संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 121 पुष्पम्

# वेदवेदाङ्गोन्मेषः

प्रधानसम्पादकः
**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः

लेखकः
**विद्यावाचस्पतिः डॉ. सुन्दरनारायणझाः**

**शोध-प्रकाशनविभागः**
**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**नवदेहली-110016**

संस्कृतविश्वविद्यालयग्रन्थमालायाः 121 पुष्पम्

# वेदवेदाङ्गोन्मेषः

प्रधानसम्पादकः
**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः

लेखकः
**विद्यावाचस्पतिः डॉ. सुन्दरनारायणझाः**

शोधप्रकाशनविभागः
**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
बी-४, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-१६

प्रकाशक:

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016

© श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य

प्रकाशनवर्षम् : 2023

ISBN : 978-81-966663-5-4

मूल्यम् : ₹ 350.00

मुद्रक:

**डी.वी. प्रिन्टर्स**

97-यू.बी., जवाहरनगरम्, देहली-110007

# प्ररोचना

वेदानां तात्त्विकार्थोपदेशकाः परमवैज्ञानिकाः करुणार्द्रहृदयाः ब्रह्मसाक्षात्कारकर्तार अस्माकं पूर्वजा ऋषयः सन्ति। वेदानां विषये महाभारते एवमुक्तमस्ति–

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥**

(महाभारते, शान्तिपर्वणि–२४४/५५)

वेदेभ्य एव समस्तचराचराणां सृष्टिर्जातेति बहुधा प्रोक्तम्। वेदानां षडङ्गानि प्रोक्तानि, तेषु वेदेषु वदाङ्गेषु च समस्तस्यापि चराचरस्य कल्याणाय सर्वविधविषयस्य वर्णनमस्तीत्यपि दाढ्र्येन वक्तुं शक्यते।

वेद–वेदाङ्गेषु ये विषयाः प्रतिपादितास्सन्ति तेषां समेषामध्ययनाय महान् कालस्यापेक्षा भवति। वेदाध्येतार आचार्याः काले काले निबन्धादि–लेखनेन तेषां विषयाणामुपरि चिन्तनं विधाय तत्तत्तत्त्वमस्माकं समक्षमुररीकुर्वन्ति। तस्यामेव दिशि श्रौतविषयाणां गवेषणात्मिकया धिया श्रीलालबहादुर–शास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य वेदविभागीयाचार्येण झोपाह्वेन डॉ. सुन्दरनारायणेन **वेदवेदाङ्गोन्मेष** इति नाम्नो ग्रन्थो वेदवेदाङ्गेषु प्रतिपादितान् विषयानादाय विविधानां निबन्धानां सङ्कलनं कृत्वा प्रकाश्यते।

ग्रन्थेऽस्मिन् ये विषयाः समाकलितास्ते गवेषकाणामध्येतृणाञ्च कृते महदुपकारका भविष्यन्तीत्यहमनुमन्ये। ग्रन्थोऽयं लोकप्रतिष्ठामवाप्य ग्रन्थकर्तुर्यशोवर्द्धनेऽपि साहाय्यं विधास्यति। अग्रेऽप्येतादृग्ग्रन्थलेखनेन लोकोपकाराय प्रवृत्तोऽयं भविष्यतीत्यहं भूतभावनं भगवन्तं विश्वनाथं प्रार्थये।

शुभाशिषः शतशः सहस्रशः।

**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली–१६

# समर्पणम्



**मातापित्रोरशेषेण शुभाशीराशिना सदा।**
**वृद्धिं गच्छन्त्यपत्यान्यायुर्विद्यायशो बलैः॥**

ययोः पितरोः कृपया देवदुर्लभमिदं मानवशरीरमादायावण्यामस्यामहं विचरामि, ययोः पालन–पोषणयोर्बलमवाप्याद्याहमेत्कार्यं कर्तुं प्रयत्नशीलश्चास्मि तयोः पुण्यप्रकर्षयोः नित्यं प्रातःस्मरणीययोः

परमश्रद्धेयपितृचरण–

**स्व० पण्डितश्रीशशिकान्तझा**

एवं

पूज्यचरणजननी–

**स्व० श्रीमतीहीरादेवी–**

वर्ययोः पादपद्मयोरिदं ग्रन्थरत्नमहं सादरं समर्पये।

# प्रस्तावना

जानन्त्येव विपश्चिदपश्चिमा मनीषिणो यद्वैदिकसाहित्यस्याध्ययनं कृत्वा तत्रोक्तविषयाणामवगाहनाय जिज्ञासा भवति सर्वेषामपि जनानां मनसि। विशेषरूपेण ये शोधच्छात्राः सन्ति ये च जिज्ञासवस्ते बहुविधान् वैदिकविषया-नेकत्र द्रष्टुमभिलषन्ति। यदि बहुविधा विषया एकत्रैव दृष्टिपथमायान्ति चेदध्ययने सौकर्यमनुभवन्ति सामान्यतस्ते। एतत्सर्वमपि विषयं मनसि निधाय काले-काले मल्लिखितानां केषाञ्चिन्निबन्धानामत्र सङ्कलनं कृत्वा प्रकाशमानेतुं साम्प्रतमहं समुत्सहे।

अथायं **वेदवेदाङ्गोन्मेष** इति नामको ग्रन्थो भवतां श्रीमतां पुरतोऽधुना मया प्रस्तूयते। ग्रन्थेऽस्मिन् नानाविधानां वैदिकानामाध्यात्मिकानां दार्शनिक-राजनैतिक-चारित्रिक-सामाजिकादिविषयैरनुस्यूतानाम् अष्टा-विंशतिर्निबन्धानां सङ्कलनमस्ति। एतेषामध्ययनेनास्माकं विद्यार्थिनो जिज्ञासवश्च लाभान्विता भविष्यन्तीत्यहम्मन्ये। ये केऽपि वैदिकविषयेषु श्रद्धामादध नास्सन्ति तेषां कृतेऽप्ययं ग्रन्थो पाथेयस्वरूपमेव भविष्यति।

यद्यपि निबन्धलेखनकर्मणि बहवोऽपि विद्वांसस्सन्ति प्रयतमानाः पाठकाश्चाप्यनेके सन्ति विद्यमानाः। निबन्धलेखनस्यायं प्रवृत्तिस्तु बहुप्राचीना दृश्यते। प्राक्तनानां केषाञ्चिद्विदुषां निबन्धास्त्वद्य पाण्डुलिपिमाध्यमेन वयं प्राप्नुमो येषां प्रकाशनं न जातम्। येऽपि निबन्धाः सन्त्यप्रकाशितास्तैर्विषयैरद्यापि वयमनभिज्ञाः स्म एव। अतः सर्वेऽपि निबन्धाः प्रकाशितास्सन्तो जनाना-मक्षिविषयीभूतास्तिष्ठन्त्विति विचार्यैवास्य ग्रन्थस्य प्रकाशनाय प्रयत्नं करोमि। अत्र बहूनपि लोकोपकारिविषयानादाय विविधं वर्णनमस्त्युपलब्धम्, येषामध्ययनेन सामान्यजनाश्चापि तत्तद्विषयान् सम्यगवन्तुं समर्था भविष्यन्ति।

अस्य ग्रन्थस्य प्रकाशनाय श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयस्य शोध-प्रकाशनविभागेन स्वीकृतिः प्रदत्ता। अतोऽहमधुना सर्वप्रथमं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य यशस्विने कुलपतिमहोदयाय **प्रो.मुरलीमनोहरपाठक**वर्यायाधमर्ण्यं ज्ञापयामि।

शोधप्रकाशनविभागस्याचार्यवर्याय विश्वविद्यालयस्यास्य कुलपतिचराय **प्रो.रमेशकुमारपाण्डेय**महोदयायाधमर्ण्यं ज्ञापयामि। महोदयो लेखनपठनादि-कर्मसु सर्वदा मामभिप्रेरयत्यतः पौनः पुण्येन प्रणमामि।

विश्वविद्यालयस्यास्य प्रभारिकुलसचिवपदमलङ्कुर्वद्भ्यः **प्रो. प्रेमकुमारशर्म**महोदयेभ्यः धन्यवादं वितनोमि।

विश्वविद्यालयस्यास्य शोधप्रकाशनविभागाध्यक्षं सुहृद्वर्यं **प्रो.शिवशङ्करमिश्र**महोदयं धन्यवादपुरस्सरं सभाजयामि। ग्रन्थस्यास्य शीर्षक-निर्धारणे तेन महान् सहयोगो विहितः।

विश्वविद्यालयस्यास्य शोधसहायकत्वेन कार्यरताय सुहृद्वर्याय **डॉ.ज्ञानधरपाठक**महोदयाय धन्यवादं समर्पयामि।

विश्वविद्यालयस्यास्य शोधविभागे विविधकार्यसम्पादकाय **डॉ.जीवनकुमारा**याशेषमाशीर्वादं समर्पयामि।

अन्येभ्यश्च सर्वेभ्योऽपि ज्ञाताज्ञातसहायकेभ्यो धन्यवादं ज्ञापयामि।

**नाहं श्रौतार्थनिष्णातो न शास्त्रज्ञोऽल्पमेधसः।**
**तथापि व्यालिखं किञ्चित् प्रीयतां तेन सद्गुरुः॥**
**गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।**
**हसन्ति दुर्जनास्तत्र समादधति सज्जनाः॥**

शमिति।

वसन्तपञ्चमी
संवत्-2078

विदुषामनुचरः-
**सुन्दरनारायणझाः**

# विषयसूची


| क्र.सं. | निबन्धाः | पृष्ठसंख्या |
|---|---|---|
| 1 | आचारहीनं न पुनन्ति वेदाः। | 1-8 |
| 2 | वेदेषु दैवीयापदः तन्निरोधोपायाश्च। | 9-15 |
| 3 | दर्शनशास्त्रीयकार्यकारणभावस्य वेददृष्ट्या विमर्शः। | 16-24 |
| 4 | गुरुशिष्यपरम्परानुसारं ग्राह्याग्राह्यशिष्यलक्षणम्। | 25-33 |
| 5 | ईशावास्योपनिषद्विमर्शः। | 34-43 |
| 6 | यज्ञेषु मण्डपविधानस्य वैज्ञानिकत्वम्। | 44-55 |
| 7 | मानवाधिकारे वैदिकवाङ्मयस्यावदानम्। | 56-71 |
| 8 | मिथिलायां वेदाध्ययनपरम्परा। | 72-78 |
| 9 | निरुक्ते षड्भावविकाराः। | 79-85 |
| 10 | पौर्णमासस्य प्राथम्ये हेतुः। | 86-92 |
| 11 | राष्ट्रीयतासंरक्षणे प्रातिशाख्यस्य योगदानम्। | 93-99 |
| 12 | वैदिकशास्त्राणां लोकोपयोगिता। | 100-110 |
| 13 | श्रौतयज्ञानाम्महत्त्वम्। | 111-121 |
| 14 | श्रौतयज्ञानां पात्रपरिचयस्तेषां देवत्वविचारश्च। | 122-138 |
| 15 | उपनिषत्सु सामाजिक-आध्यात्मिक-राष्ट्रियचिन्तनम्। | 139-145 |
| 16 | उपनिषत्सु सृष्टिविद्याविषयकं चिन्तनम्। | 146-157 |
| 17 | वैदिकवाङ्मये मन्त्रोच्चारणविधिविमर्शः। | 158-167 |
| 18 | वेदानां सार्वभौमिकत्वम्। | 168-176 |
| 19 | वेदाङ्गानां प्रासङ्गिकता। | 177-186 |
| 20 | वेदेष्वन्तःकरणविमर्शः। | 187-191 |
| 21 | वेदेषु सांख्ययोगतत्त्वविमर्शः। | 192-197 |
| 22 | वेदेषु वर्णितानां मानवजीवनसम्बद्धानां मूल्यशिक्षापरकसूत्राणां विमर्शः। | 198-205 |
| 23 | वेदेषु वर्णितानां वास्तुविज्ञानसिद्धान्तानां विमर्शः। | 206-216 |
| 24 | वेदेषु विश्वहितचिन्तनम्। | 217-223 |
| 25 | वेदमन्त्रेषु प्रयुक्तानां केषाञ्चिदलङ्काराणां विमर्शः। | 224-230 |
| 26 | विश्वकल्याणार्थं वेदस्यावदानम्। | 231-237 |
| 27 | उपनयनसंस्कारस्य महत्त्वं वैज्ञानिकत्वञ्च। | 238-246 |
| 28 | वर्त्तमानसन्दर्भे विवाहसंस्कारस्योपयोगिता। | 247-256 |

## आचारहीनं न पुनन्ति वेदाः

विदन्त्येव भवन्तो यत्पुराणेषु जीवानां चतुरशीतिलक्षयोनयः प्रोक्तास्सन्ति। तेषां क्रमपूर्वकं निदर्शनं प्रस्तूयता वीरवरस्य शिववीरस्य समर्थेन गुरुणा स्वामिरामदासेन स्वकीयाध्यात्मिके ग्रन्थे दासबोधे लिखितं यत्–

**जलजा नवलक्षाश्च दशलक्षाश्च पक्षिणः।**
**कृमयो रुद्रलक्षाश्च विंशल्लक्षा गवादयः।।**
**स्थावरास्त्रिंशतं लक्षाश्चतुर्लक्षाश्च मानवाः।**
**पापपुण्यं समं कृत्वा नरयोनिषु जायते।।**[१]

उक्तेषु चतुरशीतिलक्षयोनिषु जायमानेषु समस्तचराचरजीवेषु मानवः केनापि स्वकीयवैशिष्ट्येन श्रेष्ठतरः प्रोक्तः। तदुक्तं नीतौ–

**आहारनिद्राभयमैथुनञ्च सामान्यमेतत्पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः।।**[२]

वस्तुतो **दृश्** धातोः **कु** प्रत्यये कृते सति पशादेशात् पशुरिति शब्दो निष्पद्यते।[३] तस्य व्युत्पत्तिलभ्योऽर्थोऽस्ति– **यः पश्यति सर्वमविशेषेण स पशु**[४]रिति तेन दर्शनादिकर्मव्यापारत्वान्मानवोऽपि पशुरेव, परमुपर्युक्तवचनेन मानवस्य धर्मवैशिष्ट्यादन्यैः पशुभिर्भिन्नत्वं प्रतिपादितमिति। यतस्तु सर्वयोनिषु मनुष्य एवैको वर्तते यो यत्कामयेत तत्कर्तुं पार्येत। स स्वेच्छया बन्धन-मुक्तोऽपि प्रतिबन्धितोऽपि भवितुमर्हति। अत एवोक्तं शास्त्रेषु– **नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।**[५] तथा च **कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात्।**[६] इति। मनुनाऽपि–

**भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः।**
**बुद्धिमत्सु नराः श्रेष्ठाः नरेषु ब्राह्मणाः स्मृताः।।**[७]

अर्थात्पुण्याधिक्यादेव मानवयोनिरवाप्यते, तच्च देवैरपि दुर्लभमिति गोस्वामिना तुलसिदासेन मुक्तकण्ठेन प्रत्यपादि यथा– **बडे. भाग मानुष तनु पावा। सुर दुर्लभ सब ग्रन्थन्हि गावा।।**[८] तस्मान्मनुष्यः सर्वजीवेषु श्रेष्ठो मन्यते। मनुष्येष्वपि ये ब्राह्मणाः सन्ति ते देवा एवोक्ताः। यथोक्तं श्रुतौ– **अथ हैते मनुष्यदेवा ये ब्राह्मणाः।**[९] तथा च– **द्वया वै देवाः। अहैव देवा**

**अथ ये ब्राह्मणा शुश्रुवाँसोऽनूचानास्ते मनुष्यदेवाः।।**[१०] **दैव्यो वै वर्णो ब्राह्मणः।**[११] इति।

वस्तुतो मानवानामत्र ब्राह्मणक्षत्रियवैश्यशूद्राश्चेति चत्वारो वर्णाः प्रशस्ताः सन्ति। तेषु चतुर्ष्वपि वर्णेषु ब्राह्मणो देवसामीप्याद्देवरूपत्वाद्वा सर्वश्रेष्ठो मन्यते। तदुक्तं मैत्रायण्याम्– **पञ्च वै ब्राह्मणस्य देवता अग्निः सोमः सविता बृहस्पतिः सरस्वती तस्माद्ब्राह्मणमन्ये मनुष्या उपधावन्त्येतस्य हि भूयिष्ठा देवताः।**[१२] स च ब्राह्मणः शुचिसम्पन्नः सदाचारसम्पन्नश्च भवेदित्यपि शास्त्रेषु दाढ्र्येन निर्दिष्टम्। यो हि ब्राह्मणः सदाचारविहीनो भवति स कदाचिदपि समाजे प्रतिष्ठां नाप्नोति। ब्राह्मणानां कृते वेदाध्ययनस्यापरिहार्यत्वमनिवार्यत्वञ्चोक्तं मन्वादिभिर्धर्मशास्त्रप्रवक्तृभिर्यथा–

**योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।**
**स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः।।**[१३]

ब्राह्मणशब्दस्यार्थोऽपि तदेव वक्ति– **ब्रह्म जानाति ब्राह्मणः** इति। ब्रह्मशब्दोऽत्र वेदवाचकः। यथोक्तं श्रुतौ– **वेदो ब्रह्म**[१४] इति। अर्थाद्यो वेद-मधीते वेदमध्यापयते वा स एव ब्राह्मण उच्यते। तादृशोऽपि ब्राह्मणो यदि शास्त्रोक्तैर्विचारैर्विहीनो भवति चेत्तस्य शोधने वेदोऽप्यसमर्थो भवति। विषयेऽस्मिन् नारदं प्रति भगवतो नारायणस्योपदेशस्त्वतीव स्मरणीयो यथा–

**आचारहीनं न पुनन्ति वेदा यदप्यधीताः सह षड्भिरङ्गैः।**
**छन्दांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः।।**[१५]

अर्थाद्यथा नभोमण्डले विचरणाय पक्षिणो यदा समर्थाभ्यां पक्षाभ्यां युक्ताः भवन्ति तदा उड्डयनकर्मणि बाधकरूपं नीडं त्यक्त्वा ते अन्यत्र गच्छन्ति, तथैव षडङ्गैस्सहितस्य वेदस्याध्ययनं कृत्वाऽपि यदि कश्चिदाचारहीनो भवति तर्हि तस्य मृत्युकाले एतानि छन्दांसि त्यक्त्वाऽन्यत्र गच्छन्ति न तं नरं पावयन्तीति भावः। अत एवास्माकं धर्माचार्यैर्मन्वादिभिः **आचारः परमो धर्मः**[१६] इत्युद्घोषयद्भिराचारस्य प्राशस्त्यं प्रतिपादितम्।

यद्यपि सर्वेऽपि सांसारिका मानवाः यशः प्राप्तुकामाः सम्मानस्याभिलाषिणश्च दरीदृश्यन्ते। केचन धनं वैभवं विद्यामुच्चपदं वा सम्मानस्य साधनं स्वीकुर्वन्ति। तथाप्याचार एवैकं साधनं येन मानवः यशोभागी भवितुमर्हति, यतो मानवकर्त्तव्येष्वाचार एव प्रमुखः समुपदिष्टः।

## आचारशब्दार्थो लक्षणञ्च

पाणिनीयव्याकरणानुसारं **आ** उपसर्गपूर्वकं **चर्** धातोः घञा आचारशब्दो निष्पद्यते। यस्याचरणम्, व्यवहरणम्, कार्यशैली, चलनम्, प्रथा, प्रचलनमित्यादयोऽनेकेऽर्थाः भवन्ति। अत्र प्रश्नोत्पद्यते यत्को नामाचारः? कथं वा साध्यश्च? तदुच्यते यत्सतामाचारस्तत्सदाचार इत्युच्यते। सज्जनाः साधुपुरुषाः यथैवाचरन्ति व्यवहरन्ति च, तद्वदाचरणं सदाचारः कथ्यते। सदाचारे सर्वेषामेव सद्गुणानां समावेशोऽपीष्यते। तत्र च प्राधान्येन जितेन्द्रियत्वं संयमो दमो वागादिनिग्रहः सत्य–अहिंसा–ब्रह्मचर्यसेवनं सत्कर्मप्रवृत्तिर्दुरित–निवृत्तिश्च प्रशस्यते। तदेवास्माकं मुख्यो धर्मः। धर्मस्याचारेण सहाविना–भावसम्बन्धो वर्तते। सदाचारपालनं विना धर्मप्राप्तिर्नैव सम्भवति। यो योऽधर्माद्विरमति, इन्द्रियाणि संयच्छते, ब्रह्मचर्यमुपास्ते, मनोवाक्कायकर्मभिः सुसंयतो भवति स सदाचारवान् भवतीति। ये नरा एवमनुतिष्ठन्ति त एव पुरुषाः सदाचारिण उच्यन्ते। तैराचारवद्भिर्नैष्ठिकैस्साधुपुरुषैश्च सदाचारस्य प्रशिक्षणमवाप्य तस्यानुवर्तनेन चान्यैः मानवैः धर्मविषयकज्ञानलाभः कर्तुं शक्यते। अत एवोक्तम्मनुना–

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**
**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥**[१७]

महाभारतेऽपि– **सदाचारो यतो धर्मः सन्तस्त्वाचारलक्षणाः।**[१८]

अनेन स्मृतिवाक्येनेदं सिद्ध्यति यद्धर्मस्य मूलं वेदे निहितम्। साङ्गवेदाध्ययनेन धर्मज्ञानं सम्भवति। वेदाश्रिताः स्मृतिग्रन्थाश्चापि प्रशस्तास्तेषामध्ययनेनापि धर्मज्ञानं भवितुमर्हति, अनयोरध्ययनाभावे साधूनामाचारमवलोक्य तत्परिपालनेन च धर्मज्ञानं सम्भवति, तदभावेऽपि स्वात्मसन्तुष्ट्यात्मकेन कर्मणा धर्मज्ञानं विहितम्। अत्र धर्मपदेन वेदा एव प्रथमं वर्णिताः। यतो वेदा धर्मरूपा एवोक्तास्तान् धर्मान् विज्ञाय मानवो धर्मविद्भवति।

धर्मोऽपि ब्रह्मैवोक्तस्तदुक्तमृषिशब्दनिर्वचनप्रसङ्गे भगवता यास्केन– **साक्षात्कृतधर्माण ऋषयो बभूवुः।**[१९] अर्थाद्ये मानवेषु श्रेष्ठाः गरिष्ठाः वरिष्ठास्तपस्विनस्ते धर्मसाक्षात्कारं कर्तुं समर्था आसन्, त एव ऋषय उक्ताः। धर्मस्य च कर्मणा संसिद्ध्यमानत्वात् कर्मधर्मयोरुभयोर्ब्रह्मेति संज्ञाऽस्ति। **ब्रह्म वै बृहस्पतिः। ब्रह्म यज्ञः।**[२०] स च धर्मः कर्मरूपो भूत्वा सदाचारत्वेनास्माकं

परम्परायां समागतः। तदुक्तम्मनुना–

**यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः।**
**वर्णानां सान्तरालानां स सदाचार उच्यते॥**[२१]

भगवता बुद्धेनापि सदाचारवताम्मानवानां विषये प्रोक्तम्–

**कायेन संवुता धीरा अथो वाचाय संवुता।**
**मनसा संवुता धीरा ते वे सुपरिसंवुता॥**[२२]
**न इच्छेय्य अधम्मेन समिद्धिमत्तनो।**
**स सीलवा पञ्चवा धम्मिको सिया॥**[२३]
**यथागारं सुच्छन्नं बुट्ठीन समितिविज्झति।**
**एवं सुभावितं चित्तं रागो न समितिविज्झति॥**[२४]

## आचारस्य महत्त्वम्

आचार एव सदाचारशिक्षणेन, शीलविनियोगेन, विनयसम्पादनेन, धृतिदाक्ष्यादिगुणसंवर्द्धनेन, शारीरिक–बौद्धिक–मानसिकोन्नतिप्रदानेन जगदिदं बिभर्ति। अत एव मनुना व्यपदिश्यते यत् सदाचार एव साक्षाद्धर्मः। यथा–

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥**[२५]

सदाचारपालनेनैव श्रेष्ठत्वं गुणोत्कर्षत्वञ्चासाद्यते। आचारहीनो जनो वेदफलं नाप्नोति। यो जनो ह्याचारसंयुक्तो भवति स सर्वां सिद्धिं समधिगच्छति। सर्वेषां तपसां मूलमपि सदाचार एव। तदुक्तम्मनुना–

**आचाराद्विच्युतो विप्रो न वेदफलमश्नुते।**
**आचारेण तु संयुक्तः सम्पूर्णफलभाग्भवेत्॥**
**सर्वस्य तपसो मूलमाचारं जगृहुः परम्।**[२६]
**वेदास्त्यागाश्च यज्ञाश्च नियमाश्च तपांसि च।**
**न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित्॥**[२७]

एवमुक्तैः स्मृतिवचनैरिदं स्पष्टं भवति यत् सदाचारविहीनस्य सर्वा अपि क्रिया निष्फलैव। नैषधीयचरितमहाकाव्ये श्रीहर्षेण प्रतिपादितं यद्यो जनो ह्याचारविहीनो भवति तस्य समाजे अन्ये जनाः सततं निन्दामेव कुर्वन्ति। यथा– **जनः किलाचारमुचं विगायति।**[२८] अर्थात् परम्परया प्राप्तस्त्वाचार एव सर्ववर्णानां सदाचार उक्त इत्युक्तं प्राक्। तदनुसारं वर्ण–समाज–

देश-वंश-गुरुकुलादिप्रभृत्याचारपरम्पराणां सम्यक्तया परिपालने योऽसमर्थो भवति प्रमादाद्वा यो न कुरुते तस्य प्रतिष्ठा लोके कदापि न भवति। सर्वत्र तस्योपहास एव भवति। न स समाजे क्वचिदपि स्थातुं समर्थो भवति, अतः सर्वत्र सर्वदा निन्द्य एव भवति। तदुक्तं श्रीमद्देवीभागवते-

**दुराचारो हि पुरुषो लोके भवति निन्दितः।**
**दुःखभागी च सततं व्याधिना व्याप्त एव च॥**[29]

## आचारस्योपयोगित्वम्

आचार एव जगति सर्वार्थसाधकः। आचारादेव दीर्घायुष्यं समुन्नतिर्धनावाप्तिः कुलक्षणनिवृत्तिश्च भवतीत्युक्तं स्मृतिपुराणेषु। तदुक्तमपि-

**आचाराल्लभते चायुराचाराल्लभते प्रजाः।**
**आचारादन्नमक्षय्यमाचारो हन्ति पातकम्॥**
**आचारः परमो धर्मो नृणां कल्याणकारकः।**
**इहि लोके सुखी भूत्वा परत्र लभते सुखम्॥**
**आचारात्प्राप्यते श्रैष्ठ्यमाचारात्कर्म लभ्यते।**
**कर्मणो जायते ज्ञानमिति वाक्यं मनोः स्मृतम्॥**
**सर्वधर्मवरिष्ठोऽयमाचारः परमं तपः।**
**तदेव ज्ञानमुद्दिष्टं तेन सर्वं प्रसाध्यते॥**[30]

उपर्युक्तैः प्रमाणवाक्यैरिदं स्फुटं भवति यज्जीवने यदि विद्यते किञ्चन शाश्वतं तत्त्वम्, तर्हि तद्वृत्तमेव। चरित्रमेव पुरुषस्य जीवनस्य च सर्वस्वम्। चरित्ररक्षणेनैव मानवत्वं देवत्वञ्च सुस्थितं भवति, तदभावे दानवत्वं पिशाचत्वं म्लेच्छत्वञ्च। तस्माच्चरित्रमेव सर्वथा संरक्ष्यम्। उक्तमपि-

**साधूनाञ्च यथावृत्तमेदाचारलक्षणम्।** (महाभारते अनु. 104/9)

**वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च।**
**अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः॥**[31]

यथा सत्कविप्रणीतानि काव्यानि सुवृत्तैर्माधुर्योपेतैः सुललितछन्दोभिः शोभन्ते, तथैव सज्जनाः सद्वृत्तेन सदाचारपालनेन च चकासति। सद्वृत्तस्य परिपालनेनैव श्रीरामचन्द्रो मर्यादापुरुषोत्तमत्वमलभत्। सद्वृत्तरक्षणार्थमेव श्रीलक्ष्मणः शूर्पणखाया नासिकामच्छिनत्। चरित्ररक्षार्थमेव शतशो राजर्षिकन्यका वध्वश्च पद्मिनीप्रभृतयो वीराङ्गनाश्च सतीत्वं वव्रिरे। सदाचाराभावादेव

वेदशास्त्रनिष्णातः पुलस्त्यमुनिवंशजो, ब्राह्मणोऽपि दशाननो राक्षसत्वं प्रपेदे। वेदेऽपि आचारस्य ब्रह्मचर्यस्य च महत्त्वं वर्णयता प्रोच्यते यद् ब्रह्मचर्येणैव देवा मृत्युं विजिग्यिरे। इन्द्रोऽपि ब्रह्मचर्यबलेनैव देवेभ्यः क्षेमं दिदेश। यथा–

**ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत।**
**इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्वराभरत्॥**[३२]

सदाचारस्य मुख्यमङ्गमस्ति चरित्रम्। चरित्रस्यापरं नाम शीलमित्यस्ति। नीतिशास्त्रेषु **शीलं परं भूषणम्**[३३] इत्युद्घोषो दृश्यते। जीवने शीलमेव सद्गुणसाधनम्। यत्र शीलं तत्रैव धर्मः सत्यं तेजो बलञ्च निवसति। शीलवतामिह जगति किञ्चिदप्यसाध्यं न विद्यते। शीलं सर्वेषां गुणानामाधारोऽस्ति। शीलेन त्रिभुवनमपि जेतुं शक्यम्। उक्तं हि यथा–

**शीलेन हि त्रयो लोकाः शक्या जेतुं न संशयः।**
**नहि किञ्चिदसाध्यं वै लोके शीलवतामिह॥**[३४] **इति।**

**उपसंहारः**

उपर्युक्तैर्विविधप्रमाणवाक्यैरिदं सुस्पष्टं भवति यत्साधुपुरुषाणामाचारा एवान्यैर्मानवैः शिक्षणीयाः परिपालनीयाश्च। यतस्तु साधूनामाचाराः शास्त्रपरम्परामण्डिताः सर्वदोषनिर्मुक्ताः स्वस्थाश्च भवन्ति। अतः साधूनामाचारं वृत्त्वा मानवा अप्याचारवन्तो भविष्यन्तीति नात्र कश्चिद्विसंवादः। परमधुना विकृतपरम्परासंक्लिन्ने विकरालभालकलिकाले ये साधवः सन्ति न ते सर्वेभ्यः सुलभाः, साधूष्वप्याचाररहितानां बाहुल्यं दृश्यते। तादृशानामाचारशिक्षणेन संसर्गेण चास्माकं कल्याणं न कदापि सम्भविष्यति। तस्मात्प्रथममस्माभिः साधुपुरुषाणामन्वेषणं कर्त्तव्यम्। यतो ह्युक्तं केनापि–

**शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।**
**साधवो नहि सर्वत्र चन्दनं न वने वने॥ इति।**

अतः येषां साधूनामाचारविचारव्यवहारादयः शास्त्रसम्मताः सन्ति त एवानुकरणीयाः नान्ये। तादृशाः शुद्धाचारयुक्ताः साधवस्त्वल्पा एव मिलन्ति। वस्तुतस्त्वाचारोऽपि द्विविधः प्रोक्तः शास्त्रीयः लौकिकश्च। तदुक्तमपि–

**आचारो हि द्विविधः प्रोक्तः शास्त्रीयो लौकिकस्तथा।**
**उभावपि प्रकर्त्तव्यौ न त्याज्यौ शुभमिच्छता॥**[३५]

शास्त्रीयाचारस्तु वेदपुराणधर्मशास्त्रादिषु वर्णितः, लौकिकस्तु पितृपितामहपरम्परायां गुरुकुलपरम्परायां वा निहितः। उभयविधानामाचाराणां

सम्यक् परिपालनेनास्माकं मानवीयमूल्याणां संरक्षणं भवितुमर्हति। परं दुराचारस्याश्रयं न कदापि स्वीकर्त्तव्यः, अपितु सर्वथा त्याज्य एव। उक्तं हि यथा-

**दुराचारो हि पुरुषो लोके भवति निन्दितः।**
**दुःखभागी च सततं व्याधितोऽल्पायुरेव च॥[३६]**

इत्यलमतिविस्तरेण।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. दासबोधे, उल्लेखः- वैदिक सृष्टि विज्ञान सचित्र दर्शन पृष्ठ-18
2. हितोपदेशे प्रस्ताविकायाम्- श्लोक-25
3. वामनशिवरामआप्टेकृतसंस्कृतहिन्दीशब्दकोशे- पशुशब्दार्थप्रसङ्गे 597 तमे पृष्ठे
4. अबध्नन् पुरुषं पशुम्। शु.य.सं-31/15
5. अग्निपुराणे-
6. विष्णुपुराणे- 2/3/23
7. मनुस्मृतौ- 1/96
8. श्रीरामचरितमानसे, उत्तरकाण्डे, दोहा-43, चौपाई-7
9. षड्विंशब्राह्मणे- 1/1
10. श.प.ब्रा- 2/2/2/6 , अहः स्वर्गः- 13/2/1/6
11. तै.ब्रा.- 1/2/6/7
12. मैत्रायण्याम्-4/5/8
13. मनुस्मृतौ- 2/168
14. जैमिनीयोपनिषदि-4/11/4/3
15. श्रीमद्देवीभागवते- 11/2/1
16. मनुस्मृतौ- 1/108
17. मनुस्मृतौ- 2/6
18. महा. शा. पर्व- 260/5
19. निरुक्ते-1/6/20

20. श.प.ब्रा.-3/1/4/15
21. मनुस्मृतौ- 2/18
22. धम्मपदे-17/14
23. धम्मपदे- 6/9
24. धम्मपदे- 1/14
25. मनुस्मृतौ- 2/12
26. मनुस्मृतौ- 1/109-110
27. मनुस्मृतौ- 2/97
28. नैषधीयचरिते- 6/23
29. दे.भा.- 11/1/18
30. श्रीमद्देवीभागवते- 11/1/10,11,13 एवं 14
31. महाभारते- 3/24/74
32. अथर्वसंहितायाम्- 11/5/19
33. नीतिशतके- 1/83
34. महाभारते- 12/34/19
35. देवीभागवते- 11/1/16
36. मनुस्मृतौ- 4/157

# वेदेषु दैवीयापदस्तन्निरोधोपायाश्च

अतिप्राचीनकालादेवेष्टप्राप्त्यनिष्टपरिहृतेश्चालौकिका उपायास्तेभ्य एव वेदेभ्यो विदिता जायन्ते। वेदेषु ज्ञान-विज्ञान-धर्म-दर्शन-सदाचार-संस्कृति-नैतिक-सामाजिक-राजनैतिकप्रभृतीनां जीवनोपयोगिविषयाणां सन्निवेशोऽस्ति। अत्र प्रेय:शास्त्रं श्रेय:शास्त्रञ्चोभयं समभावेन समेधितम्। एतस्मादेव कारणात्संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्तते।

वेदेष्वनेका: देवता उक्तास्तेषां प्रतिपादनायास्माकमृषयो देवताग्रन्था: लिखिता:। देवतानां विषये यास्काचार्येण निरुक्तग्रन्थे बहुविधा चर्चा कृता। तेषां सम्मतौ- **तिस्र एव देवता इति नैरुक्ता: पृथिवीस्थानीया:, अन्तरिक्षस्थानीया:, द्युस्थानीयाश्चेति।**[१] शतपथब्राह्मणे तु **अष्टौ वसव:। एकादशरुद्रा द्वादशादित्या इमेऽ एव द्यावापृथिवी त्रयस्त्रिंश्यौ त्रयस्त्रिंशद्वै देवा: प्रजापतिश्चतुस्त्रिंश:।**[२] ऐतरेयब्राह्मणे इयं संख्या द्विगुणिताऽभवत् **त्रयस्त्रिंशद्वै देवा: सोमपास्त्रयस्त्रिंशदसोमपाश्च।**[३] ऋग्वेदस्यैकेन मन्त्रेण देवानां संख्या एकोनचत्वारिंशदुत्तरत्रिशतं त्रिसहस्राणि च (3339) वर्त्तत इति स्फुटं विज्ञायते।[४] अस्या: संख्याया उल्लेख: शतपथब्राह्मणे शाकल्ययाज्ञवल्क्ययोस्संवादे यथा- **कति देवा याज्ञवल्क्येति त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच**[५] इत्यत्राप्युपलभ्यते। परमत्र त्रयस्त्रिंशद्देवता: प्रधाना अन्ये च तेषां विभूतय उक्ता:। अग्न्यादीनामेकैकस्य पृथक् पृथगवस्थागणने, केन्द्रस्थस्येन्द्रस्य सर्वमण्डलव्यापकस्य प्रजापतेश्चापि सह गणने त्रयस्त्रिंशद्देवा: सम्पद्यन्ते। वस्तुतो वेदानां विषये तैत्तिरीयारण्यके **अनन्ता वै वेदा:**[६] इत्युक्तम्। अर्थाद्वेदोऽयमनन्तो गम्भीरश्चास्ति। एकैकस्यानन्त-कार्यकारित्वात् त्रयस्त्रिंशच्छतानि त्रयस्त्रिंशत्सहस्राणीति देवानां संख्या आख्यायते। इदानीन्तु पुराणाद्याधारेण त्रयस्त्रिंशत्कोटय इत्यपि प्रसिद्धि:।[७] एवमैतरेय-ब्राह्मणोक्तानन्तवेदकल्पनावशाद्देवतानामप्यानन्त्यं स्वीकर्तुं शक्यत एव। यतो वेदस्य द्विविधं स्वरूपमुक्तं श्रुतौ यथा-

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।**
**शब्दब्रह्मणि निष्णात: परब्रह्माधिगच्छति।।**[८]

अनयोर्द्वयोर्ब्रह्मणोर्मध्ये शब्दब्रह्मरूपेण वेदा उक्ता:। ते च वेदा:

ब्रह्मात्मकेभ्योऽग्निवायुसूर्येभ्यः परमर्षयस्तपोबलेन सम्प्राप्ताः। तदुक्तम्मनुना–

**अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।**
**दुदोह यज्ञसिद्ध्यर्थमृग्यजुस्सामलक्षणम्॥**[९]

वेदान्ते यः परमात्मा ब्रह्म इत्युक्तस्स एव वेदेषु प्रजापतिरित्युक्तः। स च प्रजापतिर्देवानां पिताऽस्तीत्यप्युक्तं श्रुतौ– **प्रजापतिर्वै पिता देवानां स जनिता स विभूवसुः।**[१०] ऐतरेयारण्यकेऽपि– **प्रजापते रेतो देवाः, देवानां रेतो वर्षम्।**[११] शतपथश्रुतावपि– **प्राचीनप्रजनना वै देवाः प्रतीचीनप्रजनना मनुष्याः।**[१२] तस्मादुक्तं मैत्रायण्याम्– **प्राजापत्या देवा**[१३] इति। ते देवा पूर्वं मर्त्या आसन् यदा ते संवत्सरमाप्तवन्तस्तदाऽमृता सञ्जातास्तदुक्तं शतपथे– **मर्त्या वाऽ अग्रे देवा आसुः। स यदैव ते संवत्सरमापुरथामृता आसुरिति।**[१४] ते च देवा द्योतनशीलत्वाद्देवता इत्युच्यन्ते। तदुक्तं श्रुतिषु– **तस्मै ( प्रजापतये ) मनुष्यान्त्ससृजानाय दिवा ( दिवसः ) देवत्रा ( द्योतनशीलः ) अभवत्। तदनु देवानसृजत। तद्देवानां देवत्वम्।**[१५] तथा च **तस्मै पितृन्त्ससृजानाय दिवाभवत्, तेन देवानसृजत्, तद्देवानां देवत्वम्।**[१६]

एभिः प्रमाणैरिदं स्फुटं भवति यद्देवाः प्रजापतेर्ब्रह्मणः पुत्रास्तस्माद्-ब्रह्मस्वरूपा एव सन्ति। ब्रह्मणोऽनन्तत्वं वेदान्तादिषु सुप्रसिद्धमेव। यथा– **सत्यं ज्ञानमनन्तं ब्रह्म**[१७] ब्रह्मण आनन्त्याद्ब्रह्मस्वरूपाणां वेदानां देवतानाञ्चा-नन्त्यमपि सुस्पष्टं भवति। तस्य च ब्रह्मणः स्वरूपं श्रुतावेवमुक्तम्– **यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रत्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्म।**[१८] तदुक्तमपि– **एकं सद्विप्रा बहुधा वदन्ति**[१९] तथा च मीमांसकाः– **अनन्ता वै देवाः** इति।

केषाञ्चन विदुषां सम्मतौ वैदिका ऋषयः प्रकृतौ विद्यमानेष्वग्नि-जलवायुसूर्यादिष्वेव देवतात्वमकल्पयन् इति स्फुटं भवति। मानवानामखिलानि कार्याणि आसां देवतानुकम्पयैव सम्पद्यन्ते इति तेषामृषीणां विश्वासः। संसारेऽस्मिन् घट्यमानानामखिलानामपि घटनानां कारणभूता देवता एवेति।

पाश्चात्यपण्डिता इमा वैदिकदेवताः प्रकृत्या एव प्रतिरूपं मन्यन्ते, किञ्च भारतीयविदुषां दृशि चैतन्यहीना जडाप्रकृतिः कदाचिदपि देवतारूपेण ग्रहीतुं न शक्यते। वस्तुतः प्रकृतेः शक्तीनामुपरि प्रशासनकर्तॄणां चैतन्यदेवतानां पूजैवाभीष्टं भवति। तत्राह भगवान् बादरायणः– **अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्**[२०] इत्येव देवतत्त्वम्मन्यते।

प्राकृतिकानि यान्यपि तत्त्वान्यस्माकमक्षिलक्षीभूतानि सन्ति तेषां समेषामुपरि यस्या देवताया अधिष्ठातृत्वम्भवति, तानि सर्वाण्यपि तत्त्वानि तत्तद्दैवतनामभिरेव विज्ञातानि भवन्ति। यथा लोकेऽप्येवं दृश्यते यद्यस्मिन् ग्रामे कश्चिन्मानवो गुणगौरवादिभिः प्रसिद्धो भवति तस्य ग्रामस्य परिचयस्तेनैव नाम्ना जायते। भवतु नाम ग्रामस्य स्थापना तस्मात्पुरुषादुत्पत्तेः पूर्वं स्यात्परं भविष्यत्कालेषु तेनैव नाम्ना तस्य ग्रामस्य प्रसिद्धिर्भवति। तस्मादेतस्मादेव कारणात् तेषां प्राकृतिकतत्त्वानां स्मरणं तत्तदभिमानिदेवतारूपेणैव वेदेषु कृतं दृश्यते। यथोक्तमपि– **अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता**[२१] इति। इत्थमग्निवायुसूर्याद्याः देवता उक्ताः। ताभिरेव देवताभिस्सकाशान्मनुष्याः स्वं स्वमभीष्टं साधयितुं कामयन्ते। अत एव यज्ञेषु देवतामुद्दिश्य द्रव्याणां त्यागः क्रियते। सा च देवता यजमानायाभीष्टं फलं प्रयच्छति। यज्ञस्य लक्षणं कुर्वता भगवता कात्यायनेनोक्तं– **द्रव्यं देवता त्याग**[२२] इति। अर्थाद्यस्मिन् कर्मणि श्रद्धापूर्वकं देवतोद्देशेन घृतादीनामाहुतिर्द्रव्याणां त्यागो विधीयते तद्यज्ञः। भगवता पाणिनिना **यज् देवपूजासङ्गतिकरणदानेषु**[२३] सूत्रं विहितम्। सूत्रेणानेन त्रिष्वर्थेषु यज्धातोः प्रयोगो दृश्यते। तत्र प्रथमोऽर्थो **देवपूजेति**। देवपदवाच्यं जडतत्त्वं स्याद्यदि वा चेतनतत्त्वम्, सर्वैस्सहानुकूलवेद्यव्यवहरणं देवपूजेत्युच्यते। प्राकृतानामग्नि-जलवाय्वादीनां पदार्थानां प्राणिमात्रस्य कल्याणायोचितोपयोगो देवपूजा ज्ञेया। प्राकृतानां पदार्थानां यथोचितमात्रासु तथा संयोगकरणं, येन प्राणिनां कल्याणम् उत्कर्षो वा स्यात्, श्रेष्ठानां धर्मात्मनां विदुषां सङ्गश्च **सङ्गतिकरणमि**त्युच्यते। स्वयमुपार्जितधनसम्पत्तिविद्यादीनां प्राणिमात्रस्य कल्याणायोत्सर्जनं **दान**पद-वाच्यमिति। यज्ञोऽयमाधिदैविकाधिभौतिकाध्यात्मिकभेदात्त्रिविधः। तत्राग्निवायु-सूर्यादिषु सनातनब्रह्मसु देवेषु सम्पद्यमानो यज्ञ **आधिदैविकः,** पृथिव्यप्तेजो-वाय्वाकाशादिषु भौतिकपदार्थेषु सम्पद्यमानो यज्ञ **आधिभौतिकः,** जीव-शरीरेष्वात्मतत्त्वेषु सम्पद्यमानो यज्ञश्**चाध्यात्मिक** इत्युच्यते। अत्राद्यावाधि-दैविकाधिभौतिकौ च यज्ञौ प्राकृतयज्ञान्तर्गतौ स्तः। प्रकृतिरूपा देवताः प्रकृत्यभिमानिन्यश्च देवताः समाना एवेत्युक्तं प्राक्। तेषु प्राकृतिकपदार्थेषु कदाचित्कस्माच्चित्कारणाद्यद्यवरोधो जायते तदा जगति विषमा परिस्थिति-रुत्पद्यते। तदवरोधः प्रकृतौ कदाचित्स्वयमेवोत्पद्यते कदाचिच्च मानवीयप्रयत्नै-

रुत्पद्यते। तैश्च प्राकृतिकैः पदार्थैर्मानवीयैः प्रयत्नैश्च यदा प्राकृतिकगति-विधिष्ववरोध उत्पाद्यते तदवरोधः प्राकृतिको दैवीयो वा प्रकोपो भवति। प्रकोपमिमं दैवीयमापदिति वक्तुं शक्यते। तस्माद्भूकम्पातिवृष्ट्यनावृष्ट्याद्युत्पाता दैवीयापदमित्युच्यन्ते।

वेदेषु दैवीयापदां विषये इन्द्रवृत्रासुरयोर्युद्धं तु प्रशस्तमेवास्ति। ऋग्वेदीयो शरमा-पणिसंवादोऽपि प्रशस्त एव। यजुर्वेदे इडाविधानप्रसंगोऽन्याश्च बह्व्य आख्यायिकास्सन्ति प्रसिद्धाः, येषु दैवीयापदां वर्णनमवलोक्यते। आसां सर्वासामापदां स्वरूपाणामध्ययनेनेदं ज्ञायते यद्वर्त्तमाने युगेऽपि याः प्राकृतिकाः घटनाः भवन्ति तासु घटनास्वपि मुख्या देवा एव। आसां प्राकृतिकोत्पातानां निवारणाय देवतानां प्रसन्नतावाप्तिरनिवार्या भवति। देवतानां प्रसन्नतायै चास्माभिर्यत्किमपि कर्म क्रियते तेषु सर्वेष्वपि कर्मसु यज्ञस्य महन्महत्त्वं वर्त्तते। शतपथब्राह्मणे न केवलं देवानामात्माऽपितु समस्तस्यास्य चराचर-स्यात्मात्वेन यज्ञः स्तुतोऽस्ति यथा- **सर्वेषां वा एष भूतानां सर्वेषां देवानामात्मा यद्यज्ञस्तस्य समृद्धिमनु यजमानः प्रजया पशुभिर्ऋद्ध्यते**[२४] इति। तेनेदं स्फुटं भवति यद्यज्ञानां रक्षणेन देवतानामात्मरक्षा भवति। तस्मादेव कारणाद्वेदेषु यज्ञविद्याया विशेषेण वर्णनमुपलभ्यते। यज्ञानुष्ठानेन देवतानां चराचराणाञ्च संरक्षणम्भवतीत्युच्यते। तदुक्तं विष्णुधर्मोत्तरपुराणे-

**यज्ञेन देवा जीवन्ति यज्ञेन पितरस्तथा।**
**देवाधीनाः प्रजाः सर्वा यज्ञाधीनाश्च देवताः॥**
**यज्ञो हि भगवान्विष्णुर्यत्र सर्वं प्रतिष्ठितम्**
**यज्ञार्थं पशवः स्रष्टा देवास्त्वौषधयस्तथा॥**
**यज्ञार्थं पुरुषाः स्रष्टाः स्वयमेव स्वयम्भुवा।**
**यज्ञश्च भूत्यै सर्वस्य तस्माद्यज्ञपरो भवेत्॥**
**यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्विषैः।**
**धनं यद्यज्ञशीलानां देवस्वं तं विदुर्बुधाः॥**
**यज्ञेन सम्यक्पुरुषस्तु नाके सम्पूज्यमानस्त्रिदशैर्महात्मा।**
**प्राप्नोति सौख्यानि महानुभावाः तस्मात्प्रयत्नेन यजेत यज्ञैः॥**[२५]

उक्तविवेचनेनेदं सुस्पष्टं यद्यज्ञ एव सर्वविधकल्याणस्य मार्ग निर्दिशति। वैदिकयज्ञेषु याः सूक्ष्मातिसूक्ष्माः प्रक्रियाः वर्णितास्सन्ति तास्सम्यगस्माभिराचरणीयाः। तत्र कृते प्रमादे सत्यनेका उत्पाताः सम्भवन्ति

याः दैवीयापद इत्युच्यन्ते। उदाहरणार्थमिह काश्चन प्रक्रियाः प्रस्तूयन्ते।

वेदेषु येषां यज्ञानां वर्णनमुपलभ्यते ते श्रौतयज्ञा इत्युच्यन्ते। श्रौतयज्ञेष्वग्निष्टोमस्य महत्त्वपूर्णं स्थानमस्ति। अग्निष्टोमयागाय प्रवृत्तो यजमानो यदा सोमक्रयणं कर्तुं सोमक्रयणीं गामादाय सौमिकवेदेर्दक्षिणद्वारादुपरवप्रदेशं प्रति गच्छति तदानीम्– **उदीचीं नीयमानामनुगच्छतो वस्व्यसीति। षट्पदान्यतीत्य सप्तमं पर्युपविशन्ति। हिरण्यमस्मिन्निधायाऽभिजुहोत्यदित्यास्त्वेति। स्फ्येन पदं त्रिः परिलिखत्यस्मे रमस्वेति। समुद्धृत्य पदं स्थाल्यामावपत्यस्मे ते बन्धुरिति। अपः स्थाने निषिच्य यजमानाय पदं प्रयच्छति त्वे राय**[२६] इत्याह कात्यायनः। श्रौतसूत्रोक्तविधिनेदं सुस्पष्टं भवति यद्यदा भूमेः सकाशादस्माभिः पांसुग्रहणं क्रियेत तदानीं तस्मिन् गर्ते जलस्यासेचनमवश्यमेव कर्त्तव्यमिति। जलसेचनेनानेन कर्मणा मृद्ग्रहणेन य आघातो भवति तस्य परिपूर्तिर्जायत इति भावः।

अस्याः प्रक्रियाया आधारस्त्वथर्ववेदस्यैकस्मिन् मन्त्रे स्पष्टमभिलक्ष्यते यथा–

**यत्ते भूमे विखनामि क्षिप्रं तदपि रोहतु।**
**मा ते मर्म विमृग्वरि मा ते हृदयमर्पितम्।।**[२७]

मन्त्रस्यास्य तात्पर्यमिदमस्ति यद्भूमेर्यस्मिन् स्थले वयं खननं कुर्मस्तमवश्यमस्माभिः शीघ्रमेव पूरणीयम्। कस्यामप्यवस्थायां पृथिव्याः हृदि मर्मस्थले च क्षतिकारकं कर्म न करणीयमिति। तात्पर्यमिदमस्ति यत्पृथिव्या मर्मस्थलाद्रत्नद्रव्यं कृष्णाङ्गारकोषः, वाष्पीयतत्त्वं (गैस), इन्धनादिकञ्च वयं निष्कासयामः, तेन भूमेः स्थानं रिक्तं भवति। रिक्तं तत्स्थानं पुनरस्माभिः पूरणीयमिति। यद्येवं न कुर्मस्तदा भूमिरसन्तुलिता भवति। यस्मात् कारणाद्भूकम्पः, भूभागस्य अधोगमनम्, जलादिस्रोतसाञ्च नाशः सम्भवतीति।

मन्ये अस्माकं वैदिका ऋषयः एतत्सर्वं सम्यक्तया जानन्तिस्म। अत एव **माता भूमिः पुत्रोऽहं पृथिव्याः**[२८] इत्युद्घोषयन्तस्ते श्रौतयज्ञप्रयोगेषु प्रक्रियायां मृदमुद्धृत्यापो निषिञ्चेदिति व्यवहारः प्रदर्शितः। अद्यत्वे वयं विस्मरामस्ताः प्रक्रियास्तस्मादेव कारणादनेका दैवीयापदो मुखं विस्फार्यास्माकं जीवने काले काले समागत्य ताडयन्त्यस्मान्। सावधानैरस्माभिर्भाव्यं नो चेदस्माकं नाशः सुनिश्चित एव। एवंविधा अनेकेषु स्थलेषु दैवीयापन्निरोधाय

मार्गदर्शकसिद्धान्ताः वेदेषूपलभ्यन्ते येषामन्वेषणमनुपालनञ्चास्माभिस्सर्वविधप्रयत्नैः करणीयम्। येनास्माकं सर्वविधं कल्याणं सम्भवेत्। श्रौतयज्ञ एवैको मार्गो योऽस्माकं सर्वविधोत्पातैः रक्षणे समर्थस्तस्मादुक्तं श्रुतौ- **यज्ञो वै श्रेष्ठतमं कर्म**[२१] इति।

आधुनिका वैज्ञानिका विषयेऽस्मिन् किं चिन्तयन्ति तदहं न जाने, परं वेदेषु यन्मया पठितं दृष्टं यच्चावगतं तदेवात्रोपस्थाप्य स्वीयां लेखनीं विरमामीत्यलमति विस्तरेण।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. निरुक्ते दैवतकाण्डे-7/5
2. श.प.ब्रा.-4/5/7/2
3. ऐतरेयब्राह्मणे- 2/18, श.प.ब्रा.-12/6/1/37
4. त्रीणि शता त्री सहस्राण्यग्निं त्रिꣳशच्च देवा नव चाऽसपर्यन्। औक्षन् घृतैरस्तृणन् बर्हिरस्मा आदिद्धोतारन्न्यसादयन्त।। ऋग्वेदे-3/9/9, 10/52/6, शु.य.सं.- 33/7, तै.ब्रा.- 2/7/12/2
5. श.प.ब्रा.-11/6/3/4
6. तै.ब्रा.- 3/10/11/3
7. तिस्रः कोट्यस्तु रुद्राणामादित्यानां दशस्मृताः। अग्नीनां पुत्रपौत्रं तु संख्यातुं नैव शक्यते।। अस्य पुराणवाक्यस्योल्लेखः हिन्दू धर्मकोशे, देवताशब्दवर्णने, 327 तमे पृष्ठे।
8. मैत्रायण्याम्-2/6, अमृतबिन्दूपनिषदि-17
9. मनुस्मृतौ- 2/
10. जैमिनीयब्राह्मणे- 3/135
11. ऐ.आ.- 2/1/3
12. श.प.ब्रा.-7/4/2/40
13. मैत्रायण्याम्- 4/8/9
14. श.प.ब्रा.- 11/1/2/12
15. तैत्तिरीयब्राह्मणे- 2/3/8/3
16. मैत्रायण्याम्- 4/1/2

17. तै.उप.–2/1/1
18. तै.उप.– 3/1/1
19. ऋग्वेदे– 1/164/46
20. ब्रह्मसूत्रे– 2/1/5
21. शु.य.सं.– 14/20
22. कात्यायनश्रौतसूत्रे– 1/2/2
23. पा.धा.–1/728
24. श.प.ब्रा.– 13/3/2/1
25. विष्णुधर्मपुराणे– 162/1–4,7
26. का.श्रौ.सू.–7/6/14–19
27. अथर्ववेदे– 12/1/35
28. अथर्ववेदे– 12/1/12
29. श.प.ब्रा.– 1/7/1/5

## दर्शनशास्त्रीयकार्यकारणभावस्य वेददृष्ट्या विमर्शः

**दृश्**-धातोर्ल्युट् प्रत्यये कृते सति **दर्शन**शब्दो निष्पद्यते। यस्यार्थो भवति **दृश्यते ज्ञायते वस्तुतत्त्वमनेनेति दर्शनम्।** वस्तुतत्त्वपदेन पदार्थतत्त्व-ज्ञानमित्यर्थोऽवगम्यते। यथा- कोऽहम्? कुत आयातः? क्व गन्तव्यः? किं कर्त्तव्यम्? कथमिदं जगन्निर्मितम्? अस्य किं कारणम्? सृष्टिरियं जडा चेतना वा? इत्यादयः प्रश्नाः चिन्तनशीलानां मनुष्याणां मनस्यहर्निशं समुत्पद्यन्ते। तेषां समेषामपि प्रश्नानां समाधानमेकमात्रं दर्शनशास्त्रमेव कर्तुं समर्थमस्ति। दर्शनमितिशब्दोच्चारणमात्रेणैव षडास्तिकानां (न्यायवैशेषिकसांख्ययोग-मीमांसावेदान्तानां) षण्णास्तिकानां (चार्वाक्-माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिक-आर्हद्दर्शनानां) सर्वमाहत्य द्वादशदर्शनानां बोधो जायते।

पाश्चात्यास्तु दर्शनशब्दस्य कृते फिलॉसोफी (Philosophy) शब्दस्य प्रयोगं कुर्वन्ति। अनेनाप्याङ्गलशब्देन विचारपरक एवार्थोऽवगम्यते दर्शनशब्दस्य। तेन मीमांसादर्शनस्य प्राचीनत्वं सिद्ध्यति। यद्यपि केचन वेदान्तदर्शनाख्यमुत्तरमीमांसाशास्त्रमेवादिमं मन्यन्ते। यतस्तत्रोपदिष्टानि वाक्यानि मन्त्रब्राह्मणारण्यकोपनिषत्सु ये विषयाः प्रतिपादितास्त एव यथायथ-मुपस्थापितास्सन्ति। उदाहरणार्थमीशावास्योपनिषद् शुक्लयजुर्वेदस्या-न्तिमाध्यायेऽस्ति। तादृशा ये मन्त्रब्राह्मणारण्यकभागास्सन्ति त एवोपनिषद्रूपेण प्रस्तुतास्सन्ति, ये च बृहदारण्यकोपनिषदाद्यास्ताः ब्राह्मणेषु वर्णिताः। एवमेवोपनिषदां साक्षात्तत्र वेदेषूपस्थितत्वात्तासामादिमत्वं केचित् साधयन्ति। परं चिन्त्यते यद्वेदान्तदर्शनस्य ग्रहणं दार्शनिकैरुत्तरमीमांसारूपेण क्रियते। तत्रेदमुच्यते यतपूर्वमीमांसाऽनन्तरमेवोत्तरमीमांसायाः कल्पनां कर्तुं शक्यते। अतस्सिद्ध्यति यत्पूर्वमीमांसादर्शनं यत्खलु विचारशास्त्रनाम्ना प्रसिद्धं तत्प्राचीनमेवेति। यद्वा तद्वा भवतु, भवतु नामात्र विदुषां विवादविषयस्तथापीदन्तु सिद्धमेव यद्दर्शनशास्त्रमस्माकं सर्वविधकल्याणाय विचारयति। वेदान्तदर्शनस्यो-पनिषदोऽध्ययनानन्तरं पाश्चात्येन विदुषा शॉपेनहावरमहोदयेन प्रोक्तं यत्- **In the whole world, there is no study so elevating as that of the Upanishadas. It has been solace of my life it will be solace of my death.**[१] अर्थात्सम्पूर्णेऽपि विश्वे जीवन-

स्योत्कर्षायोपनिषत्साहित्यं विहायान्यदध्ययनविषयो नास्ति। एतदध्ययनेन मया जीवने शान्तिमधिगतं, मृत्यावपि तेनैव शान्तिर्भविष्यतीति। अतस्सिद्धमेव यदुपनिषदः जीवने शान्तिमुपस्थापयन्तीति ब्रुवन्तः पाश्चात्या अप्यत्र श्रद्धां निदधति तर्हि किमस्माभिर्भारतीयैरास्तिकैश्च।

संवत्सरारम्भात्प्राक्कालादारभ्य शतद्वयवर्षपूर्वं यावद्दर्शनशास्त्रस्याध्ययनाध्यापनपरम्परा भारते वर्षे खल्वविच्छिन्नतया प्रचलदासीदित्यैतिहासिकग्रन्थानामध्ययनेनावगम्यते। परन्त्वद्यत्वे भारतीयदर्शनस्याध्येतारो न क्वचित्पर्याप्तसंख्यायामुपलब्धास्सन्ति। अतः स्वाध्यायकर्तृणां संख्यायां जातं ह्रासमवलोक्यैतादृशी चिन्ता समुद्भूता यत्कथमस्याः समस्यायाः समाधानं भवेदिति। यतो ह्यस्माकं देशे जनसंख्यानुगुणं जीविकासाधनस्याभावो वर्तते। तत्रापि ये छात्राः प्रौद्योगिक्यादीनामाधुनिकविषयाणामध्ययनं कुर्वन्ति ते तु यत्र क्वचित् किञ्चित् कथञ्चिदाजीविकां सा चाजीविका सर्वकारीया वा भवतु गुप्ता (प्राइवेट) वा भवतु तां प्राप्नुवन्त्यपि परं दार्शनिकानां कृते तस्य सर्वथाऽभावो दृश्यते। यदिमानि संस्कृतभाषायामुपनिबद्धानि सर्वाण्यपि शास्त्राणीशशासनरूपाणि सन्ति। ईशस्त्वखिलस्य विश्वस्य संरक्षकत्वेन स्तुतः। स एवैमान्यपि शास्त्राणि संरक्षयति। एतदर्थमत्रत्याः भूशासकाः राजान एवार्हास्सन्ति, यतः शास्त्रेषु भूपालास्तद्रूपा एवोक्तास्सन्ति। तदुक्तम्मनुना–

**इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च।**
**चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः॥**
**यावदेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः।**
**तस्मादभिभवत्येष सर्वभूतानि तेजसा॥**[२]

अर्थाद्राजान एवास्याः पृथिव्याः शासकाः पालकाः संरक्षकाश्च सन्ति। तेषामेवायं धर्मो यत्ते ब्रह्मरूपाणां शास्त्राणां, शास्त्राध्ययनशीलानां ब्राह्मणानाञ्च संरक्षणं कुर्युः। परमद्यत्वे ये राजानः सन्ति ते केवलं स्वोदरपूर्तय एव कर्माण्यनुतिष्ठन्ति। अत एवैतादृशी समस्या समुत्पन्ना जाता। तेनेदं स्फुटं भवति यत् संरक्षकाणामुदासीनतैव शास्त्रलोपस्य मुख्यं कारणमिति। अतोऽहं विनिवेदयामि यद्राजानो दत्तावधानाः भवन्तु, नो चेत्तेषां स्वार्थपरता राष्ट्रमिमं विनाशयिष्यत्येव। उक्तमपि **केवलाघो भवति केवलादी**[३] ति। श्रूयते यत्पुरा विक्रमादित्यस्य राजसभायां नवरत्नान्यासन्, तेषु कविकुलगुरुकालिदासः कविरत्नपदमलङ्करोति स्म। एवमेवान्येऽप्यनेकेषां राज्ञां नामानि श्रूयन्ते

येषामाश्रयमवाप्य संस्कृतवाङ्मयस्य विविधक्षेत्रेषु कृतभूरिपरिश्रमाः कुमारिल-भट्ट-सायण-माधव-वेङ्कट-विद्यापत्यादय संस्कृतस्य प्रचार-प्रसाराय च सन्नद्धाऽभूवन्। तेषामेव विदुषां तपस्यया राज्ञाञ्चाश्रयेण संस्कृतस्य शास्त्राणि साम्प्रतं यावत्सुरक्षितानि सन्ति। परमद्यत्वे तत्तुल्यराज्याश्रयाभावात् संस्कृतस्य सम्यक् परिचर्या न भवति, यस्मात् कारणादत्र ह्रासो दृश्यते, पण्डितानाञ्च सम्मानस्याभावो विद्यते। ये खलु संस्कृतविद्यां पठन्ति ते समाजस्य दुश्चरित्रैः जनैरुपहास्यन्ते ताड्यन्ते पीड्यन्ते च। एतस्यां परिस्थितौ **भारतीयदर्शनेषु कार्यकारणभावविमर्श** इति विषये गहनचिन्तनस्यावश्यकताऽनुभूयते। विषयेऽस्मिन् मदीयोऽयं विचारोऽस्ति यद्दर्शनशास्त्रं विज्ञानञ्चोभयोर्मध्ये सति पार्थक्येऽपि क्वचिदैक्यमवलोक्यत एव। वस्तुत अखिलेऽस्मिन् विश्वे चेतनाचेतनश्चोभयविध एव पदार्थौ स्तः। अनयोः चेतनाचेतनयोः पदार्थयोः बाह्यस्वरूपस्य स्थूलभावस्योपरि बहिस्ताद्विचारकारकं शास्त्रं विज्ञानमित्युच्यते। आभ्यन्तरस्य सूक्ष्मभावस्योपरि चाभ्यन्तरान्निर्णयकरणे समर्थं शास्त्रं दर्शन-मित्युच्यते। इत्यनया परिभाषया तु विज्ञानदर्शनयोरुभयोश्शास्त्रयोः वस्तूनामुपरि विचारकारणादैक्यमस्त्यत्र नास्ति कस्यचिदपि लेशतोऽपि सन्देहस्यावसरः। परमेकं शास्त्रं बाह्यस्वरूपस्य प्रतिपादकमपरञ्चाभ्यन्तरस्वरूपप्रतिपादकमस्ति।

वस्तुतो वयं जानीमो यद् बाह्यदर्शनादाभ्यान्तरदर्शनमतीव वैज्ञानिकं भवत्याध्यात्मिकविज्ञानत्वात्। परमाधुनिकेन भौतिकवादिविज्ञानेन न तस्य तुलनां कयाचिदपि रीत्या कर्तुं शक्यते। यद्यपि दर्शनशास्त्रात्मकं विज्ञान-माभ्यन्तरदर्शनविचारपरं ततोऽपि स्तुत्यं तथापि कलिकाले खल्वाध्यात्मिक-विचारशीलानां तदुपरि महच्छ्रद्धाप्रदर्शकानां विश्वासकर्तृणाञ्च सर्वथाऽभावात् नैतच्छास्त्रमधुना तद्गौरवपदमावहति। परं सत्यमेतत् यदाध्यात्मिकोन्नतेस्सह भौतिकोन्नतेः कल्पना अस्माकं भारतीयपरम्परायाः वैशिष्ट्यमस्ति, यदन्यत्र नावलोक्यते।

भारतीयदर्शनानामास्तिकानां नास्तिकानाञ्चोद्गमस्तूपनिषदामाधारेणैव सञ्जात इति कथने नातिशयोक्तिरस्ति। अर्थादिदं सिद्धमेव यद्विश्वस्य समस्तदर्शनानां बीजान्युपनिषत्सु निहितानि सन्ति। उपनिषदां मुख्यो विषयोऽस्त्यात्मचिन्तनम्। आत्मन् शब्दस्य निर्वचनं प्रदर्शयता यास्केनोक्तम्-
**आत्माऽततेर्वाऽऽप्तेर्वाऽपिवाप्त इव स्याद् यावद्व्याप्तिभूत इति। अततेः।**[४]
निर्वचनेनानेनेदं स्फुटं भवति यत् अत् धातोः मणिन् प्रत्यये कृते सति

आप्-लृ-व्याप्तौ धातोश्चात्मन् शब्दो व्युत्पन्नो भवति। यस्यार्थो भवति सततं गमनशीलः, सर्वव्यापकश्च। आद्यशङ्कराचार्येणात्माशब्दस्य व्याख्यानं कुर्वता लिङ्गपुराणोक्तवचनमुद्धृतं यथा-

**यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह।**
**यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते।।**[५]

पुराणोक्तवचनेनानेनेदं स्पष्टं भवति यद्यद्गृह्णाति, प्राप्नोति, भुञ्जति च जागतिकानि समस्तान्यपि वैषयिकानि तत्त्वानि एवञ्च विषयस्योपभोगद्वारा तस्मिन् सर्वतोभावेन सर्वव्यापकत्वेन च प्रविश्य तिष्ठति तदात्मतत्त्वमिति। सोऽयमात्माऽजरोऽमरश्चोक्तः गीतायाम्-

**न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।**
**अजो नित्यो शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।।**[६]

उपनिषद्यपि- **आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य**[७] इत्युक्तः। वेदेष्वात्मतत्त्वस्य परमात्मतत्त्वेनैव वर्णनमस्ति। यथा-

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्यो अभिचाकशीति।।**[८]

मन्त्रेऽस्मिन् शोभनपक्षयुतौ द्वौ पक्षिणौ वर्णितौ स्तः। उभावपि एकस्मिन्नेव शरीररूपवृक्षे तिष्ठतः। तयोरेकः शरीररूपवृक्षे समुत्पद्यमानं क्षणिकसुखप्रदातृरोगशोकादिकं सुस्वादुफलमश्नाति, द्वितीयस्तु अनश्नन्नेव तत्फलभोजने संलिप्तमानन्दमग्नमपरं जीवात्मकं पक्षिणमवलोक्यानन्दितो भवति। शरीररूपवृक्षस्योपरि पञ्चफलान्युत्पद्यन्ते, तदुक्तम्-

**रोग-शोक-परीताप-बन्धन-व्यसनानि च।**
**आात्मापराधवृक्षाणां फलान्येतानि देहिनाम्।।**[९]

उक्तान्येतानि फलानि भौतिकजगति समुपलभ्यमानानि सन्ति। यतः स्वर्गस्यापरं नाम नाक इत्यस्ति, अकं नाम दुःखं तदभावत्वात् नाक इति सिद्ध्यति। तेनेदं स्फुटं यद्दुःखमत्रैव केवलमस्ति न स्वर्गे। एतानि फलान्यवाप्य जीवः सुखं दुःखञ्चानुभवति। परमात्मा जीवशरीरे तिष्ठन्नपि तैर्निर्लिप्तत्वान्न प्रभावितो भवति। स च सुपर्णः दिव्यवपुः द्युलोकादागत्यास्मिञ्छरीरे प्रविशति, अस्माच्छरीरान्निर्गत्य च पुनस्तत्रैव गत्वा विरमति। तदुक्तं वेदे- **सुपर्णोऽसि गरुत्मान् दिवं गच्छ स्वः पत**[१०] इति।

अस्यैव सुपर्णस्य चिन्तनमस्माकं भारतीयवैदिकदर्शनस्य मुख्यं

लक्ष्यमस्ति। तस्मादस्माकं भारतं स्वर्णपक्षीव स्तुतं विश्वमण्डले। यतो ह्यत्र सुपर्णस्यैवोपासनं मुख्यं, सुपर्णस्तु सुवर्णवदाभासते नित्यम्। अतोऽस्माभिः सर्वतोभावेनास्माकं दैनन्दिनं, जीवनं, दर्शनञ्च सर्वविधप्रयासाऽऽयामेन संरक्षणीयमेव। तेनैवास्माकं सर्वसुखसमृद्धिस्सर्वोपलब्धिः सर्वकल्याणञ्च भवितुमर्हति। नान्येन पथा विचरितोऽस्माकं क्वापि गतिरिति। तदुक्तं वेदे– **नान्यः पन्थाः विद्यतेऽयनाय।**[११]

तात्पर्यमिदमस्ति यद्वेदेषु सर्वेषां प्रश्नानामुत्तराणि वर्तन्ते। वेदस्यैतदेव स्वरूपमभिलक्ष्य मनुना प्रोक्तं यत्– **सर्वज्ञानमयो हि सः**[१२] इति। अतो वेदेषु कार्यकारणभावयोरपि सम्यग्विवेचनमस्तीति सिद्ध्यत्येव। प्रसङ्गानुसारमत्र तर्कसङ्ग्रहग्रन्थदिशा सर्वप्रथमं कार्यकारणयोर्लक्षणं प्रतिपाद्यते।

**कारणस्य लक्षणम्– कार्यनियतपूर्ववृत्तिः कारणम्।**[१३] कार्यं प्रति नियतत्वे सति पूर्ववृत्तित्वं कारणत्वम् इत्याह न्यायबोधिनीकारः।

**कार्यस्य लक्षणम्– कार्यप्रागभावप्रतियोगि।**[१४] प्रागभावप्रतियोगित्वं कार्यस्य लक्षणम् इत्याह न्यायबोधिनीकारः।

इत्यनयोः कारणकार्ययोर्लक्षणमवलोक्येदं स्फुटमेव विज्ञायते यत् संसारेऽस्मिन् सम्भाव्यस्य समस्तस्यापि कार्यस्य किमपि कारणं भवत्येवेति। श्रौतग्रन्थेष्वेतादृशानां कार्यकारणसम्बन्धबोधकानामनेकान्युदाहरणानि विद्यन्ते। यथा–

**किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।**
**मनीषिणो मनसा पृच्छतेदुतद्यदध्यतिष्ठद् भुवनानि धारयन्॥**[१५]

अत्र ऋषयो मनीषिणः मनसा विचारयन्ति यद्यतो द्यावापृथिवी प्रकटिते तद्वनं किम्? तद्वृक्षश्च कः? इमानि भुवनानि धारयन् किमधि-तिष्ठति? इत्यादीन् कारणान्वेषणात्मकान् प्रश्नान् प्रकटयन्ति। प्रश्नानामेषामुत्तराणि यथा–

**ब्रह्मवनं ब्रह्म स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।**
**मनीषिणो विब्रवीमि वो ब्रह्माधितिष्ठद् भुवनानि धारयन्॥**[१६]

अत्र सर्वेषामपि प्रश्नानामेकमेवोत्तरमुक्तं ब्रह्म इति। इत्याभ्यां प्रश्नोत्तरात्मकाभ्यां श्रौतवचनाभ्यामिदं स्पष्टं भवति यत्सकलस्यापि कार्यरूपस्य प्रपञ्चस्य कारणं ब्रह्मैवास्तीति। कारणं समवाय्यसमवायिनिमित्तभेदात् त्रिविधं प्रोक्तं तर्कसङ्ग्रहे गुणनिरूपणप्रकरणे।

**समवायिकारणस्य लक्षणम्-**

यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्। यथा- तन्तवः पटस्य, पटश्च स्वगतरूपादेः।

**असमवायिकारणस्य लक्षणम्-**

कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणम् असमवायिकारणम्। यथा- तन्तुसंयोगः पटस्य, तन्तुरूपं पटगतरूपस्य च।

**निमित्तकारणस्य लक्षणम्-** तदुभयभिन्नं कारणं निमित्तकारणम्। यथा- तुरीवेमादिकं पटस्य। तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम्।

उपर्युक्तकारणलक्षणप्रतिपादनानुसारं जगत्सृष्टौ साधारणकारणत्वं ब्रह्मणो घटते। यतस्तु कार्यसामान्यं प्रतीश्वरोऽदृष्टः देशः कालश्च साधारणानि कारणानि भवन्ति। तत्तत्कार्यविशेषम्प्रति यद्विशिष्टं कारणं तदेवा-साधारणं कारणमित्युच्यते। यथा घटम्प्रति ईश्वरादयः साधारणानि कारणानि सन्ति तत्रैव दण्ड-चक्र-कुलालादय असाधारणानि कारणानि सन्ति। एवमुक्ता-साधारणकारणेषु यद्व्यापारस्य मुख्यसम्पादकं कारणम्भवति तदेव कारणं करणमित्युच्यते। प्रसङ्गवशादिह व्यापारस्य लक्षणमुच्यते- **व्यापारश्च द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकः।**[१७] प्राप्तप्रसङ्गादत्रासाधारणसाधारण-कारणयोर्लक्षणं प्रस्तूयते। तद्यथा- **कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यता-निरूपितकारणताशालित्वमसाधारणत्वम्। कार्यत्वावच्छिन्नकार्यतानिरूपित-कारणताशालित्वं साधारणकारणत्वम्।**[१८] तात्पर्यमिदमस्ति यद्यथा घटनिर्माणाय कुलालेन दण्डसाहाय्येन चक्रभ्रमादिरूपव्यापारमाचरति न तथायमीश्वरो जगत्सृष्टिकाले कस्मिंश्चिद्व्यापारे संलग्नो भवति। जगतः सृष्टिस्तु तस्येच्छामात्रेणैव भवति। तदुक्तं श्रुतौ- **प्रजापतिर्वा इदमेक एवाग्र आस। सोऽकामयत प्रजायेय भूयान्त्स्यामिति।**[१९] **प्रजापतिर्वा एक आसीत् सोऽकामयत बहुः स्यां प्रजायेयेति।**[२०] इत्याभ्यां श्रौतप्रमाणाभ्यां प्रजापतेस्साधारणकारणत्वं सिद्ध्यति। परं काठकसंहितायामिदमुक्तं यत्- **प्रजापतिर्वै प्रजास्सिसृक्षमाणस्स द्वितीयं मिथुनं नाऽविन्दत, स एतद्रूपं कृत्वाङ्गुष्ठेनात्मानँ समभवत्, ततः प्रजा असृजत्।**[२१] इति वचनादिदं स्पष्टं भवति यत्तदानीं प्रजापतिना कार्यरूपो व्यापारः समाचरितस्तेन प्रजापतेरसाधारणकारणत्वमपि ज्ञायत एव। अत इदं शक्यते वक्तुं यत्स प्रजापतिः सर्वकारणरूपोऽस्ति। परं दर्शनादिशास्त्रेषु येषां

कारणानामुल्लेखा विद्यन्ते तानि कारणानि लोकव्यवहारार्थानि प्रयुक्तानि भवन्ति। ईश्वरस्य व्यापारे तेषां कारणानां समावेशो नोचित इति।

अस्मिन् संसारे यत्किमपि अस्ति इति कृत्वा व्यवहार्यानि शब्दवाच्यानि वा तत्त्वानि सन्ति तानि सर्वाण्यपि अस्तिप्रपञ्चान्तर्गतानि सन्ति। अस्तिप्रपञ्चे द्विविरुद्धधर्मणोर्नित्यानित्ययोरेकत्र सन्निवेशोऽस्ति। वैदिकविज्ञाने नित्यभावस्य मूलम् **आभु**-पदेनानित्यभावस्य च कारणम् **अभ्व**पदेनोच्यते। आ-समन्तात् भवति इत्यनया व्युत्पत्त्या आभुपदं व्युत्पाद्यते, अभूत्वा भाति, न भवन् भाति इत्यनया व्युत्पत्त्या अभ्वपदं व्युत्पाद्यते। यत्तत्त्वं नित्यं व्यापकमनाद्यन्तरहितमस्ति तदस्तिसिद्धमित्युच्यते। यच्चानित्यं क्रियारूपं मरणधर्मयुक्तमस्ति तद्भातिसिद्ध-मिति कथ्यते। संसारे यान्यपि घट-पट-मठादीनि वस्तून्यवलोक्यन्ते तानि सर्वाण्यपि क्रियायाः समष्टिभूतान्येव सन्ति। यद्वस्तु वर्त्तमाने अस्ति तद्भविष्ये विनाशभावमाप्नोति। अतो यद्दृश्यं तदनित्यं कार्यरूपमस्ति, तदेवाभ्वपदेन व्यवहृतम्भवति। यन्नित्यं त्रिकालाबाधितं सर्वव्यापकं तत्कारणमिति वक्तुं शक्यते।

वस्तुतः **कारणगुणाः कार्यगुणानारभन्ते** इत्येषः सिद्धान्तो वर्तते। तेन योऽयमाभुरित्यस्ति स एव द्रष्टा यश्चाभ्व इत्यस्ति तद्दृश्यमिति। इत्यनयोः द्रष्टादृश्ययोरुभयोर्ज्ञानमापामर-आविद्वत्कुलं सर्वस्मिन् समानरूपेणास्ति। यथा लोके एको द्रष्टा नानावस्तूनि पश्यति, तथैव **एकमेवाद्वितीयं ब्रह्म** सर्वञ्जगदभिपश्यति। द्रष्टा त्वपरिच्छिन्नोऽस्ति, असीमश्चास्ति, दृश्यं परिच्छिन्नं ससीमञ्चास्ति। एक एव द्रष्टा सर्वेष्वपि दृश्यपदार्थेष्वभिव्याप्तो भवति। तदुभयविधं ब्रह्मास्ति।

तदेव ब्रह्म यदा सृष्टपदार्थेन घट-पट-मठादिरूपेण परिणतं भवति तदानीं तत्**सृष्टब्रह्मे**त्युच्यते। तत्सृष्टेषु पदार्थेषु च **तत्सृष्ट्वा तदेवानुप्राविशत्**[२२] इति श्रुत्यनुसारं तत्तत्पदार्थेषु प्रविष्टं भवति तदानीं तदंशः **प्रविष्टब्रह्मे**त्युच्यते। एतत्सृष्टप्रविष्टब्रह्मातिरिक्तो यदवशिष्टांशो भवति तत्**प्रविविक्तब्रह्मे**त्युच्यते। तेनेदं फलितं भवति यदिदं शरीरं सृष्टब्रह्मास्ति, आत्मा च प्रविष्टब्रह्म वर्तते। एतदुभयं सृष्टं प्रविष्टं च ब्रह्म परस्परमेकान्ततोऽविनाभूतसम्बन्धेनाबद्धमस्ति। यत्प्रविविक्तं तद्वाङ्मनसागोचरं परात्परब्रह्म इत्यनेन नाम्ना लोके सुविख्यातमस्ति। तस्मिन् विषये उच्यते यत्-

**यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।**
**तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्।।**[२३]

**न तस्य कार्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।**
**परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च॥**
**न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम्।**
**स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः॥**[२४]

एवमुक्तप्रकारेण दर्शनशास्त्रीयकार्यकारणभावस्य वेददृष्ट्या यथामति निरूपणम्मया कृतम्। आशासे विद्वांसो मदीयेन तर्कोपन्यासेन संतुष्टा भविष्यन्ती-त्यलमति विस्तरेण।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पाददटिप्पणी-

1. श्रीरमाकान्तशास्त्रीकृते वैदिक वाङ्मय का इतिहास ग्रन्थे 48 तमे पृष्ठे।
2. मनुस्मृतौ- 7/4-5
3. ऋग्वेदे- 10/117/6
4. निरुक्ते- 3/3/16
5. लिङ्गपुराणे- 1/70/96
6. गीतायाम्- 2/20
7. बृहदारण्यकोपनिषदि- 4/5/6
8. ऋग्वेदे- 1/164/20
9. हितोपदेशे, मित्रलाभे, श्लोक-41
10. शु.य.सं.- 17/72
11. शु.य.सं-31/18
12. मनुस्मृतौ-2/7
13. तर्कसङ्ग्रहे गुणनिरूपणप्रकरणे।
14. तर्कसङ्ग्रहे गुणनिरूपणप्रकरणे।
15. ऋ.सं.- 10/31/7
16. तैत्तिरीयब्राह्मणे- 2/8/9/6
17. तर्कसङ्ग्रहे गुणनिरूपणप्रकरणे, कारणलक्षणप्रसङ्गे पदकृत्यटीकायाम्।
18. तर्कसङ्ग्रहे गुणनिरूपणप्रकरणे, कारणलक्षणप्रसङ्गे न्यायबोधिन्याम्।

19. ऐतरेयब्राह्मणे- 2/33
20. मैत्रायण्याम्-4/2/1
21. काठके- 13/7
22. तैत्तिरीयोपनिषदि-2/6
23. मुण्डकोपनिषदि- 3/1/8
24. श्वेताश्वतरोपनिषदि- 6/8-9

## गुरुशिष्यपरम्परानुसारं ग्राह्याग्राह्यशिष्यलक्षणम्

आम्नायः श्रुतिरागमो वेद इत्यादयश्शब्दाः सन्ति परस्परं पर्यायाः। गुरुमुखोच्चारणानूच्चारणविधिर्यत्रानुमता सेयं श्रौती परम्परा गुरुशिष्य-परम्परेत्युच्यते। यथा चावादि भगवान् मनुः- **श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।**[१] सोऽयं वेदो अनादिनिधनावागित्यप्युच्यते। यथा-

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥**[२]

स्वयम्भुवा या वागुत्सृष्टा सैव श्रुतिरित्युच्यते। तस्यैव श्रुतेरपरन्नामास्ति वेद इति। इत्युक्त्वा भगवता व्यासेन वेदानां नित्यत्वमनादिनिधनत्वञ्च सुतरां साधितम्। ते च वेदाः शब्दात्मकाः मन्त्रब्राह्मणारण्यकोपनिषत्सु चतुर्षु भागेषु विभक्ता अस्माकमक्षिलक्ष्यीभूतास्सन्ति। वेदेषु ये शब्दास्सन्ति, तैश्शब्दैर्यस्य तत्त्वस्य वर्णनं विहितमस्ति- **तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः।** अर्थात्तदेव तत्त्वं ब्रह्म इत्युक्तं श्रौतग्रन्थेषु तदुक्तं मैत्रायण्याम्-

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥**[३]

अत्र ब्रह्मणो द्विविधं स्वरूपमुक्तं शब्दात्मकमेकमपरञ्च परंब्रह्मात्मक-मिति। यो हि जनो शब्दात्मके ब्रह्मणि निष्णातो भवत्यर्थाद्वेदानां रहस्यात्मकार्थ-विज्ञानवान् भवति स एव निर्विशेषं परंब्रह्माणमधिगन्तुं समर्थो भवतीति। अत्र प्रश्नोत्पद्यते यन्निर्विशेष इति पदस्य कोऽर्थः? तदुक्तं श्रुतौ यत्- **सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् इति। ते यथा- जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः। स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः। यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः। नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्। अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्य मव्यप-**

**देश्यमेकामप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थम्मन्यते स आत्मा स विज्ञेयः।**[४] उपर्युक्तवचनादिदं सिद्धं भवति यद्वैश्वानर-तैजस-प्राज्ञ इत्येते त्रयो ब्रह्मणः पादाः सन्ति। एभिस्त्रिभिः पादैर्भिन्नश्चतुर्थः पाद उक्तः। छान्दोग्योपनिषदि गौतमजाबालसंवादे सत्यकामजाबालेन जिज्ञासितस्य ब्रह्मण स्वरूपं वर्णयता महर्षिणा गौतमेनोक्तं यत्- **ब्रह्मणश्च ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कलोदीची दिक्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम। स य एतमेवं विद्वाँश्चतुष्कलं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवानस्मिँल्लोके भवति प्रकाशवतो ह लोकाञ्जयति य एतमेवं विद्वाँश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते।**[५]

तत्र प्रकाशवानिति यद्ब्रह्मणः स्वरूपमुक्तं तस्य पुर-पुरुष-परात्पर-निर्विशेष इति चत्वारः पादाः श्रौतग्रन्थेषु वर्णितास्सन्ति। सर्व इमे लोकाः पुरशब्देनोच्यन्ते यथा- **इमे वै लोकाः पूरयमेव पुरुषो योऽयं पवते सोऽस्यां पुरि शेते तस्मात्पुरुषः।**[६] पुरुषश्च क्षराक्षराव्ययत्वेन त्रिविधः प्रोक्तो यथा-

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।**
**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥**
**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।**
**यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥**[७]

क्षराक्षराव्ययपुरुषा यस्मिन्पुरुषे संश्रितास्सः परात्परपुरुष इत्युच्यते। यतस्त्वव्ययः परमपुरुष उक्तस्तस्मात्परमपुरुषादपि यः परतरो भवति सः **परादपि परः** परात्पर इत्युक्तः। यथा सर्वा अपि नद्यः स्यन्दमानाः समुद्रमभिप्राप्य समुद्रवदाकारा भवन्त्येवमेव तस्मिन्परात्परपुरुषब्रह्मणि गत्वैमे त्रयोऽपि पुरुषाः क्षराक्षराव्ययाः नामरूपाद्विमुक्तास्सन्तो तत्स्वरूपावस्थिता एव भवन्ति। यथोक्तमपि-

**यथा नद्यः स्यन्दमानाः समुद्रेऽस्तङ्गच्छन्ति नामरूपे विहाय।**
**तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥**[८]

परात्परोऽयं यस्मिन् पुरुषे श्रितो भवति तस्मिन्न किमपि वैशिष्ट्यं भवति येन तस्य स्वरूपस्य ज्ञानमस्माभिः कर्तुं शक्येत। तस्माद्विशेषताभि-र्विरहितत्वादयं निर्विशेष इत्युच्यते। तस्य च ब्रह्मणः पुरमिति संज्ञकः प्रथमः पाद एवेह तिष्ठति शिष्टास्तस्य त्रयः पादा उपरि तिष्ठन्ति। तदुक्तं वेदे-

**एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतन्दिवि॥ त्रिपादूर्ध्व ऽउदैत्पुरुषः पादोऽस्येहाभवत्पुनः। ततो विष्वङ्व्यक्रामत्साशनानशनेऽ अभि॥**[९] अर्थात्तस्य ब्रह्मणस्त्रयः पादाः पुरुष–परात्पर–निर्विशेषाख्याः ऊर्द्धवं तिष्ठन्ति, एकः पादः पुर इत्यात्मकोऽत्र विश्वप्रपञ्चे समवलोक्यते। ऊर्द्धवलोके स्थितस्य तस्यानिर्वचनीयस्य ब्रह्मणः स्वरूपस्य वर्णनमत्र वाग्ब्रह्मणि वेदे वर्तते। तस्माद्ब्रह्मणः स्वरूपबोधकादिमे वेदा अपि ब्रह्म इति पदेनैवोच्यन्ते।

तस्य शब्दब्रह्मणो ज्ञानमस्माभिः गुरुपरम्परया क्रियते। श्रुत्यध्ययन–परम्परानुसारं गुरुः कीदृशं शिष्यं वरयति? इत्यस्मिन्विषये तावत्किञ्चिद्विचार्यते। यतस्तु योग्यः शिष्यो गुरुसेवया तथैव सकलां विद्यामाप्नोति यथा कश्चिन्मानवः कठिनेन परिश्रमेण खनित्रयन्त्रसाहाय्येन खननं कृत्वा पृथिव्यामन्तो विद्यमानं जलं प्राप्नोति। तदुक्तं याज्ञवल्क्येन–

**यथा खनन्खनित्रेण नरो वार्यधिगच्छति।**
**तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति॥**[१०]

शुश्रूषेति पदस्यात्रार्थद्वयमस्ति श्रोतुमिच्छा सेवितुमिच्छा चेति। सेवा–धर्मस्त्वतीव कठिनो वर्तते। तदुक्तमपि भर्तृहरिणा– **सेवा धर्मः परमगहनो योगिनामप्यगम्यः।**[११] सेवाकार्यं न सर्वेषां कृते सुकरं भवति। अतो यो हि जनः सेवाकर्मणि प्रवीणो भवति सः गुरुपादसेवनं कृत्वा विद्याध्ययनं कर्तुमर्हति। गुरोः सन्निधाने स्थित्वैव गुरुवाक्यानि श्रोतुं शक्नोति। दूरे स्थित्वा गुरुवाक्यानां श्रवणं तस्यानुकरणञ्चोभयं दुष्करमेव भवति। उभयविधार्थग्रहणे शुश्रूषेति पदेन गुरुसन्निधाने शिष्यस्य संस्थितिरेव निर्दिश्यते। शुश्रूषा रहिता या विद्या भवति सा मेधादिगुणैस्सम्पन्नाऽपि रूपवती बन्ध्या युवतीव व्यर्था भवति। परं या विद्या गुरुशुश्रूषया समधिगम्यते सा मेधादिगुणसम्पन्ना सर्वदा फलिनी च भवति। तदुक्तं श्रौतशास्त्रस्य पारदृश्वना योगीश्वरेण याज्ञवल्क्येन–

**शुश्रूषा रहिता विद्या अपि मेधागुणैर्युता।**
**बन्ध्येव युवती तस्य न विद्या फलिनी भवेत्॥**[१२]

विद्याप्राप्तये मार्गत्रयमुक्तं तत्र प्रथमे स्थाने गुरुशुश्रूषैव प्रोक्ता। यथा–

**गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा।**
**अथवा विद्यया विद्या चतुर्थं नोपलभ्यते॥**[१३]

विद्याप्राप्तिमार्गेषु प्रथममार्गरूपेण गुरुशुश्रूषा प्रोक्ता, यस्य पार्श्वे

पुष्कलं (पर्याप्तं) धनं भवति सः धनदानेन विद्वांसं परितुष्य विद्यालाभं करोतीति द्वितीयो मार्गः, अथवा कश्चिद्गणितविद्यां जानाति स यदि वेदाध्ययनं वाञ्छति चेद्वैदिकं विद्वांसं गणितविद्यां पाठयित्वा तेन वेदाध्ययनं करोत्ययं मार्गस्तृतीय उक्तो विद्यया विद्येति। चतुर्थोपायस्तु नैवोपलभ्यते। अत एव भगवता याज्ञवल्क्येनोक्तं यच्चतुर्थं नोपलभ्यते।

यदुक्तं गुरुशुश्रूषेति तत्रेदं विचारणीयम्भवति यद्गुरुः कमपि शुश्रूषमाणं बालकं वेदमध्यापयेदुत श्रौतशास्त्रोक्तग्राह्यशिष्यलक्षणसम्पन्नमन्तेवासिन-मध्यापयेदिति विचारेऽत्र प्रथमं तावद्ग्राह्यशिष्यलक्षणमुच्यते। तद्यथा-

**वेदाध्ययनाय ग्राह्याग्राह्यशिष्यलक्षणम्**

विदितमेवास्ति यद्वेदानामध्ययनाय गुरुशिष्यपरम्परा स्वीकृताऽस्तीति। परम्परायामस्यां यज्ञोपवीतादिसंस्कारसम्पन्नो सर्वलक्षणसम्पन्नः शिष्यो गुरोस्सन्नि-धाने स्थित्वा गुर्वादेशानुसारं जीवनं यापयन् ब्रह्मचर्यव्रतपालनपूर्वकं वेदाध्ययनाय प्रवृत्तो भवति। तदानीं गुरोस्समक्षमयं प्रश्नः समुदेति यत्सः कीदृशं शिष्यं वेदानध्यापयेदिति। विषयेऽस्मिन् श्रौतग्रन्थेषु बहवो विचाराः प्रकटितास्सन्ति। तेषु सर्वप्रथममिदं विचारणीयं भवति यद्वेदाध्ययनाय को भवति समुपयुक्त इति।

**वेदाध्ययनाय ग्राह्यशिष्यलक्षणम्**

तदुक्तं भगवता याज्ञवल्क्येन वेदमन्त्रोच्चारणसमर्थानां लक्षणं यथा-

**प्रकृतिर्यस्य कल्याणी दन्तौष्ठौ यस्य शोभनौ ।**
**प्रगल्भश्च विनीतश्च स वर्णान् वक्तुमर्हति॥**[१४]

यस्य बालकस्य सर्वाङ्गशरीरं सुन्दरं भवेत्, दन्ताश्च ओष्ठौ च शोभनौ स्याताम्, यश्चोत्साहसम्पन्नो विनीतश्च स्यात्स एव सम्यक्तया वर्णानामर्थाद्वेदमन्त्राणामुच्चारणं कर्तुं शक्नोति। एतादृशा बालकाः वेदाध्यय-नायोपयुक्ताः तस्मादेते शिष्यत्वेन ग्राह्या भवन्ति।

**वेदाध्ययनायाग्राह्यशिष्यलक्षणम्**

**वेदमन्त्रोच्चारणाशक्तानां लक्षणं यथा-**

**न करालो न लम्बोष्ठो नाव्यक्तो नानुनासिकः।**
**गद्गदो बद्धजिह्वश्च नानुवर्णान् वक्तुमर्हति ॥**[१५]

अर्थाद्यो हि बालः **करालो**[१६] भवति, ओष्ठौ च यस्य लम्बौ भवतः, यस्य वाणी स्पष्टा न भवति सोऽव्यक्तः मूकेत्यपरपर्यायः, नासिकारोग-

ग्रस्तो यः सोऽनुनासिकः, रुन्धितस्वरेण यो ब्रूते सः गद्गद इति, यस्य जिह्वा तालुना सह श्लिष्टो भवति सो बद्धजिह्वेत्युच्यते। एतादृशाः बालकाः वर्णानामुच्चारणे भवन्त्यसमर्थाः तस्मादग्राह्याः।

लक्षणमेतत्तु सामान्यमेवोक्तं परमेतदतिरिक्तान्यन्यान्यपि लक्षणानि शास्त्रेषूपनिबद्धानि सन्ति । वस्तुतः समस्तेऽस्मिञ्चराचरात्मके जगति जीवानां चतुरशीतिलक्षसंख्यका योनयः प्रोक्तास्ता यथा–

**जलजा नवलक्षाश्च दशलक्षाश्च पक्षिणः ।**
**कृमयो रुद्रलक्षाश्च विंशल्लक्षा गवादयः ॥**
**स्थावरास्त्रिंशतं लक्षाश्चतुर्लक्षाश्च मानवाः ।**
**पापपुण्यं समं कृत्वा नरयोनिषु जायते ॥**[१७]

उपर्युक्तासु योनिषु मानवयोनिः सर्वश्रेष्ठेति मन्यते। जगत्यस्मिन् यावन्तोऽपि मानवास्सन्ति ते **सारग्राहिणो भारवाहिनो जिज्ञासवश्च** इति भेदैस्त्रिविधाः सन्ति। सारग्राहिणो द्वेधा विभज्यन्ते ऋषयो मुनयश्च। तत्र ऋषयो मन्त्रद्रष्टारः, मुनयश्च दर्शनादिशास्त्रप्रवक्तारः। भारवाहिनोऽपि द्वेधा विभज्यन्ते अहंवादिनो मूर्खमानिनश्च। जिज्ञासवोऽपि द्वेधा विभज्यन्ते वितण्डावादिनो विनीताश्च। ऋषयो मुनयश्चाप्तकामाः ज्ञानविज्ञानवन्तः परेषां हिताय शास्त्राण्युपबोधयन्ति। अहम्मन्यन्यमानाः मूर्खाश्च स्वात्मपरितोषये विपरीतशास्त्रार्थप्रतिपादनत्वाच्छास्त्रमर्यादाविच्छेदनाच्च शिष्यत्वेन स्वीकर्तुमनर्हाः भवन्ति। वितण्डावादिनो जनाः शास्त्रवाक्यानामर्थान्तरं प्रस्तुवन्ति तस्मादनर्हाः। अतः सर्वाण्यपि शास्त्राणि विनीतानां जिज्ञासुजनानां कृते प्रवृत्तानि सन्तीति मे मतिः। ऋग्वेदोक्तामृचामाश्रित्य निरुक्तकारेण कस्मै वेदस्योपदेशं प्रदातव्यमिति विषयं वर्णयता प्रोक्तं यत्– **नावैयाकरणाय नानुपसन्नाय नानिदंविदे।**[१८] अर्थाद्यो व्याकरणं न जानाति, यः शिष्यवृत्त्या गुरोराश्रमे (सन्निकटे) न तिष्ठति, इदं निरुक्तशास्त्रञ्च यो न वेत्ति तस्मै वेदोपदेशो न कर्त्तव्यः। मनुना प्रोक्तमपि–

**विद्ययैव समं कामं मर्तव्यं ब्रह्मवादिना ।**
**आपद्यपि च घोरायां न चैनामिरिणे वपेत् ॥**[१९]

इरिणं शून्यमूषरमित्यमरः। अर्थादापत्कालेऽपि शून्यस्थाने ऊषरभूमौ बीजवपनं न कर्त्तव्यं यतस्तेन बीजसम्पत्तेरपि हानिर्भवति। बीजहानिरित्यनेन समूलविनाशो बोद्धव्यः। चाणक्यनीतावपि–

**अपुत्रस्य गृहं शून्यं दिशः शून्यास्त्वबान्धवाः।**
**मूर्खस्य हृदयं शून्यं सर्वशून्यं दरिद्रता ॥**[२०]

अत्र शून्यमिति पदेन मूर्खोऽपि व्याख्यातः।

पुरा कदाचिदनधिकारिणः शिष्याः समर्थेन गुरुणा विद्याग्रहणं कृत्वा अनर्थमुत्पादयन्त आसन् । इत्यवलोक्य विद्यादेवी ब्राह्मणसमक्षमागत्य प्रह्वीभूत्वा स्वात्मरक्षायै यन्निवेदनं कृतवती तदिहोपस्थापयामि–

**विद्या ह वै ब्राह्मणमाजगाम गोपाय मां शेवधिष्टेऽहमस्मि।**
**असूयकायानृजवेऽताय न मा ब्रूया वीर्यवती तथा स्याम्॥**[२१]

वागधिष्ठात्री देवता कामरूपिणी भूत्वा संयतात्मानं विदितवेदाङ्गवेदार्थं कञ्चनोपाध्यायं विप्रं प्रत्यागत्य च प्रह्वीभूत्वोवाच– **गोपाय माम्** इति। का त्वमसीत्याचार्येण पृष्टे साऽऽह– **शेवधिष्टेऽहमस्मि** इति। अर्थादहं तव निधिरस्मीति। कुतः पुनस्त्वां रक्षामीति पृष्टे वाऽह– **असूयकायानृजवेऽयताय न मा ब्रूया** इति। गुणेषु ये दोषानाविष्कुर्वन्ति ते परापवादशीला असूयका–स्तानसूयकायान्, कुटिलवृत्तयः शठास्त्वनृजवो यस्य वा मनोवाग्देहेष्वसमाः प्रवृत्तयस्तस्मै अनृजवे, असंयतेन्द्रियाय यत्किञ्चन कायाशुचयेऽयताय वा मां मा वद। किं तथा कृते भविष्यति? इति पृष्टे– **वीर्यवती तथा स्याम्** तथा सत्यहं निग्रहानुग्रहसामर्थ्यभूता भवेयम्। अर्थाद्यस्मै त्वामनुग्रहीष्यसि तस्मै प्रभविष्यामि, यस्य वा निग्रहीष्यसि तं पराभविष्यामीति सा विद्या प्रोक्तवती।

**इदानीमाचार्यः स्वान्तेवासिनं शिष्यमुपदिशन्नाह–**

**य आतृणत्त्यवितथेन कर्णावदुःखं कुर्वन्नमृतं सम्प्रयच्छन्।**
**तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कचमच्चनाह॥**[२२]

अर्थाद्भवतः यो गुरुः सत्येन ब्रह्मणा वाचा दुःखाभावं कुर्वन्नपिहिताविव कर्णौ सन्तौ विवृणोति। यतस्त्वन्यो यः कश्चन कर्णावन्यद्वाऽऽतृणत्ति स दुःखयति। अमृतत्व(मोक्ष)प्राप्तिहेतु ज्ञानं सम्प्रयच्छन् तं मातरं पितरं च मन्येत, यतो भवन्तं तथा समुद्धर्तुं नेतरौ मातापितरौ स्तः।

**विद्याऽधुनेतरान्दुष्टशिष्यानभिशपन्तीदमाह–**

**अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा ।**
**यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् ॥**[२३]

ये मेधाविनो द्विजन्मानो विप्राः गुरुणाऽध्यापिताः सन्तो गृहीतविद्याः

प्रियवचनेन शुभानुध्यानेन परिचरणेन गुप्तं वेदरहस्यमुपदेष्टारं निजमध्यापकं नादरं कुर्वन्ति तेषां किमित्युच्यते– यथैव ते शिष्यास्तस्य गुरोर्न भोजनार्हाः (भोगदायिनो न) भवन्ति तथैव तान् शिष्यान् गुरूपदिष्टं वेदशास्त्रादिकमपि न पालयति। श्रुतफलेन न संयुनक्तीत्यर्थः।

**यस्मै विद्योपदेशः प्रदातव्यस्तस्य लक्षणमाह–**

**यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नाम् ।**
**यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्॥**[२४]

हे ब्रह्मन्! यमेव शिष्यं सदाचारसम्पन्नं यमनियमे[२५]ष्वहितं मेधा[२६]वन्तं (विद्याग्रहणधारणसमर्थं) जानीयाः। यस्तुभ्यं कदाचिदपि (सर्वास्वप्यापत्सु) द्रोहं नोपगच्छेत् तस्मै निधिपाय निधिवद्गोप्त्रे त्वं मां वदेः।

**निष्कर्षः**– एवमुपर्युक्तेन विवेचनेनेदं स्फुटं विज्ञातम्भवति यद्यो हि जनो विनीतो, गुरुसेवापरायणः, पारम्परिकेन रीत्या जीवनयापनसम्पन्नः, सरलस्वभावयुतो मेधावी, श्रद्धाभक्तिसमन्वितो भवति तस्मै वेदादिशास्त्राणा–मुपदेशः कर्त्तव्यः। तादृगेव जनः शिष्यत्वेन वृत्वा विद्योपदेशयोग्यो मन्यते। भगवता श्रीरामेण हनूमन्तम्प्रत्युपदेशं प्रयच्छतोक्तं मुक्तिोपनिषदि यत्–

**सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम् ।**
**सकृच्छ्रवणमात्रेण सर्वाघौघनिकृन्तनम् ॥**
**मयोपदिष्टं शिष्याय तुभ्यं पवननन्दन ।**
**इदं शास्त्रं मयादिष्टं गुह्यमष्टोत्तरं शतम् ॥**
**ज्ञानतोऽज्ञानतो वापि पठतां बन्धमोचकम् ।**
**राज्यं देयं धनं देयं याचतः कामपूरणम् ॥**
**इदमष्टोत्तरशतं न देयं यस्य कस्यचित् ।**
**नास्तिकाय कृतघ्नाय दुराचाररताय वै ॥**
**मद्भक्तिविमुखायापि शास्त्रगर्तेषु मुह्यते ।**
**गुरुभक्तिविहीनाय दातव्यं न कदाचन ॥**
**सेवापराय शिष्याय हितपुष्टाय मारुते ।**
**मद्भक्ताय सुशीलाय कुलीनाय सुमेधसे ॥**
**सम्यक्परीक्ष्य दातव्यमेवमष्टोत्तरं शतम् ।**
**यः पठेच्छृणुयाद्वापि स मामेति न संशयः ॥**[२७]

उपर्युक्तस्योपनिषद्वचनस्य तात्पर्यमिदमस्ति यद्यो जनो भक्तः, सुशीलो,

मेधावी, श्रद्धावान्, भक्तिमान्, सेवापरायणादिगुणैर्विरहितो भवति सः शास्त्राणामध्ययनाय नोपयुक्तो मन्यते। यतस्तादृशो जनो वेदादीनामध्ययनं कृत्वा यत्र क्वचिदपि गच्छति तत्र महाननर्थं जनयति। अतो यत्नतस्तादृशेभ्यो जनेभ्यः शास्त्राणामुपदेशो न कर्तव्यः। यतो-

**अधीत्य चतुरो वेदान्सर्वशास्त्राण्यनेकशः ।**
**ब्रह्मतत्त्वं न जानाति दर्वी पाकरसं यथा ॥** [२८]

मर्यादापुरुषोत्तमः श्रीरामः स्वशिष्याय पवनात्मजाय हनूमते महावीरायोपदिशति यद्यथा लोके एवमवलोक्यते यद्दर्वी व्यञ्जननिर्माणपात्रे सर्वत्र भ्रमति (यतो दर्व्यैव व्यञ्जनस्य चालनं विधीयते) परं व्यञ्जनस्य रसं कीदृशमस्ति सुस्वादु वा स्वादरहितो वा तद्विषयं दर्वी न जानात्येवमेव यो हि जनो मूढधीर्भवति, उपर्युक्तग्राह्यशिष्यलक्षणैर्विरहितो भवति सः सर्वाणि शास्त्राण्यधीत्यापि ब्रह्मतत्त्वं ज्ञातुं न समर्थो भवति। तादृशान् जनानेवाभिलक्ष्येवमुक्तम्- **शास्त्राण्यधीत्यापि भवन्ति मूर्खाः**[२९] इति। अतो प्रयत्नतः शास्त्रोक्तविधिना ग्राह्यशिष्यानेव विधिवद्वेदमध्यापयेद्गुरुरिति।

गीतायामवादि श्रीकृष्णः- **श्रद्धवाँल्लभते ज्ञानम्**[३०] अर्थाद्यस्य मनसि शास्त्रम्प्रति शास्त्रोपदेष्टारं गुरुम्प्रति च श्रद्धा भवति स एव सम्यक्तया वेदादिशास्त्राणां ज्ञानं लब्धुं शक्नोति। परमद्यत्वे विद्याग्रहणे श्रद्धायाः स्थानं नास्ति अपितु मौलिकाधिकाराधारेण ये केऽपि यथा तथा शिक्षणसंस्थानेषु प्रवेशमवाप्य विद्वत्तायाः प्रमाणपत्रमित्यभिलषन्ति। एवमुक्तप्रकारेण वैदुष्यस्य प्रमाणपत्रग्रहणमात्रमेवास्ति विद्याग्रहणस्य साक्षात्प्रयोजनमिति। न तेन विद्याग्रहणेन विश्वस्य कल्याणं सम्भवितुमर्हति। यतस्तु श्रद्धाहीनाय अपात्राय प्रदत्तं तात्त्विकं ज्ञानं जनकल्याणाय समाजस्योपकाराय च न कदापि सम्भवतीति शम्।

**जयतु भारतम्। जयतु संस्कृतम्। जयन्तु वेदाः।**

पादटिप्पणी-

[1] मनुस्मृतौ-2/10
[2] महाभारते शान्तिपर्वणि-
[3] मैत्रायण्युपनिषद्- 2/6, अमृतबिन्दूपनिषद्- 17

[4] माण्डूक्योपनिषद्- 2-7

[5] छान्दोग्योपनिषदि- 4/5/2-3

[6] शतपथब्राह्मणे- 13/6/2/1

[7] गीता- 15/16-17

[8] मुण्डकोपनिषदि- 3/8

[9] शु.य.सं.- 31/3-4

[10] याज्ञवल्क्यशिक्षायाम्- उत्तरार्द्धे, श्लोकः- 115

[11] नीतिशतके-58

[12] याज्ञवल्क्यशिक्षायाम्- उत्तरार्द्धे, श्लोकः- 116

[13] याज्ञवल्क्यशिक्षायाम्- उत्तरार्द्धे, श्लोकः- 117

[14] याज्ञवल्क्यशिक्षायाम्- पूर्वार्द्धे, श्लोकः- 27

[15] याज्ञवल्क्यशिक्षायाम्- पूर्वार्द्धे, श्लोकः- 26

[16] ओष्ठाद्बहिर्यस्य दन्ताः भवन्ति सः करालेत्युच्यते।

[17] स्वामिरामदासकृते **दासबोध**ग्रन्थे 20 दशके आत्मगुणनिरूपणप्रसङ्गे षष्ठसमासस्य तृतीयः श्लोकः।

[18] निरुक्ते- 2/1/4

[19] मनुस्मृतौ- 2/113

[20] चाणक्यनीतौ- 4/14

[21] निरुक्ते- 2/1/4 ; मुक्तिकोपनिषदि 2/1

[22] निरुक्ते- 2/1/4

[23] निरुक्ते- 2/1/4

[24] निरुक्ते- 2/1/4 ; मुक्तिकोपनिषदि 2/1

[25] **अहिंसासत्यास्तेयापरिग्रहा यमाः। शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।** इति पतञ्जलिना योगसूत्रे प्रोक्ताः।

[26] **धीर्धारणावती मेधा** इत्यमरः।

[27] मुक्तिकोपनिषदि 1/44-50

[28] मुक्तिकोपनिषदि 2/65-66

[29] हितोपदेशे, मित्रलाभे

[30] गीतायाम्-4/39

## ईशावास्योपनिषद्विमर्शः

उप-नि-इत्युभयोरुपसर्गयोः पूर्वकं तुदादिगणस्य **षद्-लृ-विशरणगत्यवसादनेषु**[१] धातोः क्विबन्तस्य रूपमिदमुपनिषदिति। यस्य व्युत्पत्तिलभ्योऽर्थो भवति- **उपनिषद्यते प्राप्यते ब्रह्मात्मभावोऽनया इत्युपनिषद्।** अर्थाद् गुरुं निकषा समुपगम्योपविश्य च प्राप्तं गुह्यात्मकं ब्रह्मविज्ञान-मुपनिषदित्युच्यते। तेनाध्यात्मविद्यारहस्यप्रतिपादका वेदभागा उपनिषदः कथ्यन्ते। उपनिषदां कृते **ते वा एते गुह्या आदेशा एतद्ब्रह्माभ्यतपँस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसोऽजायत।।**[२] इति छान्दोग्ये, **य इमं परमं गुह्यं श्रावयेद् ब्रह्मसंसदि। प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते तदानन्त्याय कल्पत इति**[३] कठोपनिषदि, **क्वचिद् रहस्यम्** इति चोक्तम्। अमरसिंहेन नानार्थवर्गे **धर्मे रहस्युपनिषत्स्यात्**[४] इत्युक्तम्। क्षीरस्वामिना कृतायां अमरकोषोद्घाटनटीकायां **उपनिषीदन्त्यस्यामुपनिषद्, वेदान्तोऽपि रहस्यत्वात्।** तत्त्वेऽपि यथा- **धर्मस्योपनिषत्परा** इत्युक्तम्।

विदन्त्येव भवन्तो यद्वेदानां मन्त्रब्राह्मणारण्यकोपनिषदिति चत्वारो विभागाः सन्ति। तेषु चतुर्ष्वपि विभागेषूपनिषदां वेदस्यान्तिमभागत्वेन प्रवचनाद्वेदान्तनाम्ना प्रसिद्धाः सन्ति। उपनिषत्सु महर्षयः गूढतमानामाध्यात्मिक-रहस्यानां विशदतया विचारं कृतवन्तः।

भारतीयदर्शनसाहित्ये त्रयः प्रस्थानग्रन्थाः सन्ति, ये वेदानवलम्बमाना मानवजीवनस्य चरमलक्ष्यप्राप्तिसाधनं ब्रह्मविज्ञानमुपदिशन्ति। तेषु त्रिष्वपि प्रस्थानग्रन्थेषूपनिषदः श्रेष्ठोपजीव्यग्रन्थत्वात् प्रथमप्रस्थानत्वेन गृह्यन्ते। श्रीमद्भगवद्गीता द्वितीयं प्रस्थानं ब्रह्मसूत्रञ्च तृतीयप्रस्थानमस्ति। उपनिषदा-मध्ययनेन दृष्टानुश्रविकविषयवितृष्णमुमुक्षूणां संसारस्य बीजभूता विद्या नश्यति, ब्रह्मप्राप्तं भवति, दुःखानि च क्षीणानि भवन्ति। अस्माकं प्राचीना महर्षयो यान्याध्यात्मिकतत्त्वानि ज्ञानदृशा साक्षादकुर्वंस्तानि सर्वाण्यत्र वर्णितानि सन्ति।

उपनिषदां प्रधानत्वेन प्रतिपाद्यो विषयोऽस्त्यात्मा। तत्र ब्रह्म आत्मनो न भिन्नमिति प्रतिपादितमस्ति। आत्मैव सर्वव्यापी वर्त्तते। विश्वस्य सर्वेष्वपि पदार्थेषु स एव व्याप्तोऽस्ति। तस्मिन्नेव समग्रस्यापि प्रपञ्चस्य लयो भवति। ततो व्यतिरिक्तं न किमपि। अत एव बृहदारण्यकोपनिषद्याह- **स वायमात्मा ब्रह्मविज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय**

**आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयः।**[5] एतेन स्फुटं भवति यत्संसारस्य यावन्तोऽपि स्थूलाः सूक्ष्मा वा पदार्थाः सन्ति ते सर्वेऽपि नात्मनो भिन्नाः। आत्मनैव ते सर्वे वेदितव्याः, नात्मनः परं किमपि प्रियतरम्।

**ईशावास्योपनिषदो विषयवस्तु**- इदमपि भवन्तो जानन्त्येव यदीशावास्योपनिषच्छुक्लयजुर्वेदस्यान्तिमाध्यायरूपेण तिष्ठति। वैदिकसंहिताया-मियमेवोपनिषदुपलभ्यते। अन्यासूपनिषत्सु काश्चन उपनिषदो ब्राह्मणग्रन्थे-ष्वारण्यकग्रन्थेषु चोपलभ्यन्ते। वैदिकसंहितायामस्या उपनिषदो व्याख्यानत्वादियं सर्वप्राचीनेति मन्यते। **ईशावास्यमिदं सर्वमि**ति पदेनारभ्यमानत्वादस्या नाम ईशावास्योपनिषदित्यस्ति। अस्यामुपनिषदि अष्टादशमन्त्राः सन्ति। अत्र ज्ञानदृष्ट्या कर्मोपासनाया रहस्यं वर्णितमस्ति। उपनिषदियं कर्मसंन्यासस्य पक्षपातिनी न भूत्वा यावज्जीवनं निष्कामकर्मभावेन कर्मसम्पादनस्यानुरागिणी वर्त्तते। अत्राद्वैतभावनायाः स्पष्टं प्रतिपादनमस्ति। अत्र ब्रह्मणः स्वरूपवर्णनानन्तरं विद्या-अविद्या-सम्भूति-असम्भूत्यादीनां विवेचनमस्ति। अत्र ये मन्त्राः प्रोक्तास्सन्ति तेषामर्थं ज्ञातुमस्माभिर्बहुविधं यत्नं कर्त्तव्यं भवति। यतस्तु वेदमन्त्रेषु ये शब्दाः प्रयुक्तास्सन्ति ते पारिभाषिकाः विविधरहस्यसम्पृक्ताश्च सन्ति। तेषामनेकेऽर्थाः भवन्ति ब्राह्मणग्रन्थेषु इदमध्यात्मम्, इदमधिभूतम्, इदमधियज्ञम् इत्याद्युक्त्वा त्रिविधार्थप्रतिपादनसङ्केतः स्पष्टरूपेण प्रदत्तः।

अत इदं वक्तुं शक्यते यत्केवलं शब्दशास्त्राध्ययनेन पद-पदार्थज्ञानेनैव च वेदमन्त्राणां रहस्यात्मकार्थप्रतिपादनं नैव केनापि शक्यते कर्तुम्। यतस्तु वेदानां रहस्यमयोऽर्थः गुरुपरम्परायामेवास्ति सुरक्षितः। तदर्थमाप्तवाक्यं प्रमाणं यथा- **तद् गुरुमुखादेवावगन्तव्यम्, परिप्रश्नेन सेवया** इत्यादि। तात्पर्यमिदमस्ति यद्वेदमन्त्राणामुपनिषन्मन्त्राणाञ्च गूढार्थप्रतिपादनाय विविधशास्त्राणामाश्रयः स्वीकरणीयो भवति येनामृतात्मनः सम्यङ्निरूपणं भवितुमर्हति। एतदर्थमत्र पक्षत्रयं समाश्रित्याधिभूताधियज्ञाध्यात्मरूपमर्थमुपस्थाप्यते। तत्राधिभूतोऽर्थः सामाजिकव्यवस्थानुकूलो मदीयत्वदीयात्मकः, अधियज्ञोऽर्थः सर्वस्वाहरणा-त्मिकीं प्रवृत्तिमवरुद्ध्य आवश्यकतानुसारमेव भौतिकपदार्थानामुपयोगः करणीयः येन संसारे सर्वत्र सन्तुलनं स्यात्, आध्यात्मिकोऽर्थश्च **सर्वे भवन्तु सुखिनः** तथा च **स्वस्मै स्वल्पं समाजाय सर्वस्वमि**त्युदारभावापन्नबुद्ध्या प्रस्तुतोऽस्ति।

आदौ सामान्योऽर्थो दीयते तदनन्तरं त्रिविधानामर्थानां प्रकाशनं क्रियते। आशासे सुधयो मनीषिणश्च मदीयया प्रस्तुत्या सहमता भविष्यन्तीति।

**मन्त्रक्रमेणेशावास्योपनिषदो मन्त्रत्रयस्य विमर्शः**

**प्रथमो मन्त्रः-**

**ईशावास्यमिदꣳ सर्वं यत्किञ्च जगत्याञ्जगत्।**
**तेन त्यक्तेन भुञ्जीथा मागृधः कस्यस्विद्धनम्।।**[६]

**सामान्योऽर्थः**- चराचरात्मकेऽस्मिञ्जगति यत्किमपि वस्त्वस्ति तत्सर्वमीशसत्तयाऽऽक्रान्तमित्यवगन्तव्यम्। ईशेन त्यक्तेनैव पदार्थेन भोगः करणीयः। कस्याप्यन्यस्य वित्तस्येच्छां मा कुर्विति।

**अधिभूतोऽर्थः**- भौतिकपदार्थानामुत्पत्तिः पृथिव्याः सकाशात् स्वस्मै भवति। स्वयमुद्भूतस्य पदार्थस्य ईश्वरमपहाय न कश्चिदन्यो व्यक्तिविशेषो स्वामी भवितुमर्हति **तत्सृष्ट्वा तदेवानुप्राविशत्** जगन्निर्माय तत्र स्वयं प्रविश्य स्थित इति सिद्धान्तानुसारेण। स ईशः सर्वेषां प्राणिनां पितृस्थानीयोऽस्ति। पितुः सम्पत्तौ सर्वेषां पुत्राणामधिकारो मन्यते। तेनेदं फलितं भवति यज्जगति यावन्तोऽपि जीवास्सन्ति ते सर्वे तत्प्राप्तुमधिकृता भवन्ति। सर्ववस्तुषु परमेश्वरस्याधिकारम्मत्वा यदि सर्वमपि वस्तु सर्वेषां प्राणिनां मन्यते चेत्तदानीं समाजेष्वव्यवस्था सम्भविष्यति। अतोऽयमस्य स्वामीति निर्धारणमावश्यकम्भवति। वस्तुस्वामिन आदेशं विना न केनापि कस्यापि वस्तुनो ग्रहणं कर्त्तव्यमिति।

**अधियज्ञोऽर्थः**- जीवनं यज्ञः। **यज्-देवपूजासङ्गतिकरणदानेषु** इत्यनेन पाणिनीयसूत्रेण यज्ञशब्दार्थः प्रतिपादितः। दानपदमेवास्य मन्त्रस्याधियज्ञार्थ-प्रतिपादनाय मुख्यरूपेणावलम्बनमस्ति। अत्रेदमुच्यते यज्जगति दृश्यमानस्य सर्वस्यापि पदार्थस्याधिपतिः परमात्मैव। परमात्मना यद्दत्तं स्तोकं वा महद्वा साधनं तत्प्रदत्तेन साधनेन जीवनव्यवहारः परिपालनीयः। तेन यावन्ति साधनानि यस्मै प्रदत्तानि सन्ति तानि सर्वाण्यपि साधनान्यागते काले तत्तत्समक्षं स्वयमेवाविर्भवन्ति। ततोऽधिकस्य साधनस्य प्राप्तये कदापि वाञ्छा न करणीया। तेन त्यक्तेन इति पदेन परमात्मना प्रदत्तेन साधनेन जीवनयज्ञ-मनुष्ठातव्यमिति। न ततोऽधिकस्यान्यस्मै सुनिश्चितस्य साधनस्य कामना कर्त्तव्येति।

**आध्यात्मिकोऽर्थः**- **उच्छिष्टाज्जज्ञिरे सर्वम्** [७], **उच्छिष्टे लोक**

**आहितः**[८] तथा च **इमे वै लोकाः प्रवर्ग्यः**[९] **अग्निवायुरादित्यस्तदेते प्रवर्ग्याः**[१०] उपर्युक्तैरेतैः श्रौतवचनैरिदं स्पष्टं भवति यदिदं दृश्यमानं समस्तञ्जगत् तस्य परमात्मन उच्छिष्टमेवास्ति। यदुच्छिष्टं तदेव प्रवर्ग्य इत्यपि स्पष्ट एव। वेदेषु प्रवर्ग्यपदस्य महावीरो, घर्मः, शिरोयज्ञ इत्यादय अनेके पर्याया अप्युक्तास्सन्ति। अर्थाद्ब्रह्मणः प्रवर्ग्यभूता अग्निवाय्वादित्याः सर्वव्यापकाः सन्ति। तस्मादिमे संसारस्य स्वामिन उक्ताः। तदुक्तमपि मनुना-

**अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।**
**दुदोह यज्ञसिद्ध्यर्थमृग्यजुस्सामलक्षणम्॥**[११]

अत्राग्नेः सकाशादृग्वेदस्य, वायोस्सकाशाद्यजुर्वेदस्य, आदित्याच्च सामवेदस्य दोहनं विहितमस्ति। तत्रापि विशेषेण **ऋचं वाचं प्रपद्ये मनो यजुः सामप्राणं प्रपद्ये**[१२] इत्यनेन वचनेन ऋचो वाङ्मयत्वम्, यजुषो मनोमयत्वम्, साम्नश्च प्राणमयत्वं प्रतिपादितमस्ति। अत इदं स्पष्टं यत्सर्वप्राणिषु वाग्रूपेणाग्निः, मनोभावेन वायुः, प्राणमयेन चादित्यो विद्यमानोऽस्ति। सर्वे ह्येते प्रवर्ग्या एव उक्तास्तस्मादिदं जगदुच्छिष्टं वर्तते।

अतोऽयमर्थः प्रस्फुटति यदस्मिन् संसारे यत्किमपि दृश्यमदृश्यं वा तत्त्वमस्ति तत्र सर्वत्र परमात्मनः स्वामित्वमस्ति। तेन त्यक्तेनार्थात्तदुच्छिष्टेन पदार्थेन भोगः करणीयः, कस्याप्यधिकृतस्य वस्तुनः प्राप्त्याकाङ्क्षा न विधातव्येति। तात्पर्यमिदमस्ति यद्वृक्षेषु यावत्फलं वृक्षसंलग्नं भवति तावदिदं ज्ञातव्यं यद्वृक्षस्य ममत्वं फलेन संयुक्तमस्ति। यदा प्रवर्ग्यरूपं फलं स्वस्मै वृक्षाच्च्युतं भवति तदेदं ज्ञातव्यं यदिदं फलं वृक्षेन त्यक्तमतोऽस्मिन् फले वृक्षस्य ममत्वन्नास्ति, एतत्फलं त्यागभावेन यथावश्यकमेव भोक्तव्यमिति।

**द्वितीयो मन्त्रः-**

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥**[१३]

**सामान्योऽर्थः-** अस्मिन् संसारे कर्माणि कुर्वन्नेवायुषो शतवर्षपर्यन्तं जीवितुमभिलषेत्। एवमुक्तप्रकारेण यावज्जीवनं कर्ममार्गे प्रवृत्तेषु मनुष्येषु कर्मबन्धनस्य सम्भावना न भवति।

**अधिभूतोऽर्थः-** सर्वे मनुष्याः सर्वाण्यपि कर्माणि कर्तुं न समर्थाः भवन्ति। यतस्तु सर्वेषु पृथक्-पृथक् कर्मसम्पादनसामर्थ्यं भवति। यथा- वेदाध्ययनम्, अध्यापनम्, लेखनम्, प्रवचनम्, नृत्यम्, प्रबन्धनम्, हलकर्षणम्,

वाणिज्यम्, स्वामिसेवा, याजमानमित्यादीन्यनेकानि कर्माणि करणीयानि भवन्ति। तत्सर्वमपि कार्यजातं केनापि स्वामिना सम्पादनीयं भवति। कर्मसम्पादयितुं सर्वेषां मनुष्याणां कृते तत्स्वामिना पृथक्-पृथक् कर्माणि निर्धारितानि भवन्ति। स्वामिना यत्कर्मकर्तुं ये मनुष्या नियुक्ता भवन्ति तानि कर्माणि तेषाम्मनुष्याणामधिकृतानि कर्माणि भवन्ति। ते सर्वेऽपि मनुष्याः स्वे स्वे कर्मण्यभिरतास्सन्तः समाजाय मङ्गलं कामयन्तः स्वामिना निर्दिष्टानि स्वाधिकृतकर्माण्याचरन्तः जीवनं यापयन्ति चेत्तर्हि तेन कर्मणा तेषामन्यथा अपकीर्त्यादयो न भवन्ति, न च तत्कर्म तेषां बन्धनायैव भवतीति।

**अधियज्ञोऽर्थः**- अग्निस्तपति, वायुः प्रवहति, जलं क्लेदयति च। तत्राग्नेरधिकृतं कर्म तापः, वायोः प्रवहणम्, जलस्य च क्लेदनमिति। नाग्निः प्रवहणे समर्थः, न वायुः क्लेदने, न चापस्तप्तुं समर्थः। यथाकालं यथोचितमात्रायां स्वकीयैरधिकृतकर्माणि कुर्वन्त्य एताः देवताः सृष्टेर्नियमाननु-पालयन्ति तेन न कदाप्यपकीर्तिमुपगच्छन्त्युत प्रतिष्ठिता एव भवन्ति। अननेदं सुस्पष्टं भवति यद्यस्य यद्धि भवत्यधिकृतं कर्म तत्सम्पादनेनैव तस्य सामाजिकी प्रतिष्ठा समुपचीयते। अतो लोके मानवा अपि यस्मिन् कर्मणि स्वामिना नियुक्ताः स्युस्तानि कर्माण्याचरन्तः शतायुषं भुञ्जन्तो प्रतिष्ठामेवाप्नुवन्ति नापकीर्तिमिति। तानि चाधिकृतानि कर्माणि तेषां बन्धायापि न भवति। अधिकृतान्येव कर्माणि स्वाभाविकान्युक्तानि यानि सहजानि भवन्ति। तदुक्तमपि भगवता श्रीकृष्णेन-

**स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।**
**स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्॥**
**सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्।**
**सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः॥**[१४]

अर्थात् सर्वेऽपि मानवाः सहजात्मकानि कर्माण्यनुतिष्ठन्तः स्वजीवनयज्ञं परिपालयन्त्वित्युपदेशः।

**आध्यात्मिकोऽर्थः**- ज्ञान-कर्म चोभे आत्मनः स्वाभाविकधर्मे विद्येते। विदितमेवास्ति यत्परमात्मनोऽर्द्धो भागः ज्ञानप्रधानः, अर्द्धभागश्च कर्म-प्रधानोऽस्ति। ज्ञानसहकृतानि कर्माणि ज्ञानप्रधानानि निवृत्त्यात्मकानि, कर्मसहकृतानि कर्मप्रधानानि संस्कारजनितानि कर्माणि प्रवृत्त्यात्मकान्युक्तानि।

ज्ञानप्रधानकर्मणि समस्तान्यपि प्रवृत्त्यात्मकानि कर्माणि विलीनानि भवन्ति। तदुक्तं गीतायाम्- **सर्वकर्माखिलं कर्म ज्ञाने परिसमाप्यते।**[१५] इति कथनेनेदं स्पष्टं भवति यन्निवृत्तिकर्म वासनारहितं सहजमुत्थिताकाङ्क्षात्मकं स्वाभाविकमात्मीयञ्च भवति, तेन कर्मणा कर्मसन्तानः कर्मबन्धनञ्च नैवोत्पद्यते। प्रवृत्तिकर्म सकामं संस्कारजनकमुत्थाप्याकाङ्क्षात्मकम् अस्वाभाविकमनात्मीयञ्च भवति।

वस्तुतः कर्म कदापि बन्धनस्य कारणं न भवत्यपितु मनसः सकाशादुत्पन्नेच्छैव बन्धनकारणं भवति। तदुक्तमपि भगवता व्यासेन- **मन एव मनुष्याणां कारणं बन्धमोक्षयोः।**[१६] निवृत्त्यात्मकं कर्म निष्काममिच्छाशून्यं भवति। अत्रासक्तेरभावो विद्यते, अत ईदृशानि कर्माणि कदापि बन्धनकारणानि न भवन्ति। यत्र निवृत्तिकर्म प्रज्ञानात्मकमस्ति तत्रैव प्रवृत्तिकर्म विज्ञानात्मकमिति। प्रज्ञानविज्ञानयोः प्रतिस्पर्द्धायां प्रज्ञानं विजितं विज्ञानञ्च पराभूतं भवति। यतस्तु प्रज्ञानप्रभवश्चन्द्रमा विद्यते, विज्ञानप्रभवश्च सूर्यः। सूर्यो भूपिण्डाद्बहुदूरे तिष्ठति, चन्द्रमा च भूपिण्डात्समीपवर्ति। तस्मात्कारणात् पार्थिवेषु मनुष्यादिषु जीवेषु सोमस्याधिक्यात् प्रज्ञानस्य सबलत्वं स्वतः सिद्धं भवति, विज्ञानस्य च निर्बलत्वमिति।

अतोऽस्मिन् तृतीयेऽर्थे 'कर्माणि' इति पदस्य कामना रहितानि, आत्मीयानि, स्वाभाविककर्माणि इत्यर्थः प्रस्फुटो भवति। 'अन्यथा' पदस्य कर्मसन्तान इति, लेपस्य चार्थो वासनासंस्कार इति स्वीक्रियते।

तात्पर्यमिदमस्ति यद्यावज्जीवनं निष्कामभावेन कर्माण्यनुष्ठेयानि, तानि च कर्माणि विद्यासापेक्षानि वा भवन्तु विद्यानिरपेक्षानि ईष्ट-आपूर्त्त-दत्तात्मकानि सत्कर्माणि वा। एतादृग्भिः कर्मभिर्न कर्मसन्तानो भविष्यति न च वासना लेप एव। अस्य फलं भविष्यति विदेहमुक्तिरिति। **न कर्म लिप्यते नरे** इत्युपनिषद्वाक्यस्य परिपोषणमपि तदैव भवितुमर्हतीति।

**तृतीयो मन्त्रः-**

**असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः।**
**तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥**[१७]

**सामान्योऽर्थः-** ये केऽपि जना आत्महत्यां कुर्वन्ति ते अस्माल्लोकात्प्रेत्य तल्लोकं प्रति गच्छन्ति यस्मिंल्लोके सूर्यस्य दर्शनं न भवति, तस्मिन् असूर्यलोके सूर्यस्याभावात् कदापि प्रकाशो न भवत्यतो तमसाच्छन्नो लोकः स उक्तः।

**अधिभूतोऽर्थः**- असूर्यम्पश्येत्यसूर्या, वयं जानीमो यत्पृथिवी सूर्यम्परितो भ्रमत्यहोरात्रयोरेकवारम्। अस्यां पृथिव्याञ्च दक्षिणोत्तरौ द्वौ गोलार्द्धौ विद्येते। तत्र यस्मिन्नक्षे पृथिवी सूर्यम्परिक्रामति तस्याक्षस्योत्तर-गोलार्द्धस्योपरितने भागे सूर्यस्य प्रकाशः सदैव भवति, परं दक्षिणगोलार्द्धस्या-धस्तने भागे सूर्यस्य प्रकाशः कदापि न गच्छति। भौतिक्यां परिभाषायां तदेव स्थानमसूर्यपदेन व्यवहृतमस्ति, पातालमिति च पुराणेषु। येऽपि मनुष्याः स्वमात्मानं विनिहत्यास्माल्लोकात्प्रयन्ति ते तमासाच्छन्नं तमेव लोकम्प्रति गच्छन्ति स्वर्ग न प्राप्नुवन्तीत्यर्थः।

**अधियज्ञोऽर्थः**- जीवने प्रकाशस्य महत्त्वपूर्ण स्थानमस्ति। बृहदारण्यकोपनिषदि एकः प्रसङ्गो वर्णितोऽस्ति यदेकदा ब्रह्मविज्ञानवेत्ता जनको योगीश्वरं याावल्क्यमुपगत्यापृच्छत् यत्- **किं ज्योतिरयं पुरुषः?** तदानीं याज्ञवल्क्येनोत्तरं प्रदत्तम्- **सूर्यज्योतिश्चन्द्रज्योतिरग्निर्ज्योतिर्वाग्ज्योति-रात्मज्योतिरिति पञ्चज्योतिरयं पुरुष**[१८] इति। एतेन स्पष्टं भवति यत्पञ्चज्योतिभिस्सम्पन्नो मनुष्यो सर्वविधं श्रौतं स्मार्तञ्च कर्म समनुष्ठाय महत्प्रकाशस्वरूपं स्वर्गरूपं फलं प्राप्नोति। स्वर्गप्राप्तिरेव मनुष्यस्य चरमं लक्ष्यमिति विदन्त्येव विद्वांसः। यज्ञेनात्मनः संस्कारो विधीयते, आत्म-संस्कारार्थमेव यजमानस्य दीक्षासंस्कारो विहितोऽस्ति। यो हि जनस्तादृशानि कर्माण्याचरति स विष्णोः परमं पदमाप्नोति। विष्णोर्यत्परमं पदं तत्सदा प्रकाशमानं भवति सूर्येण सदा दृश्यमानत्वात्। तदुक्तमपि- **तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्।**[१९] सूरय इति पदेनात्र सूर्यः, विद्वांसश्चेत्यर्थद्वयं संघटते। तात्पर्यमिदमस्ति यद्यत्र सदा प्रकाशो भवति तत्स्थानं विष्णोः परमं पदमित्युक्तम्। यज्ञादीनां फलमुक्तं वेदेषु-

**ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः।**
**अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि।।**[२०]

अर्थाद्यत्र बहुभिरुन्नतैः शृङ्गमयैः रश्मिभिरुपेतः सूर्यः सदा प्रकाशते तद्बहुभिर्गीयमानस्य विष्णोः परमं पदमस्ति। तत्रावां पत्नीयजमानौ वासमिच्छावः। यो हि जनस्तत्स्थानमवाप्तये स्वात्मनः संस्कारं न विदधाति स एवात्रात्महन इत्युक्तः। यश्चात्महनः सः तत्स्थानं नाप्नोति, अर्थादस्मा-ल्लोकात्प्रेत्य महदन्धेन तमसाच्छादितं सूर्यरहितं यदसूर्यलोकं तमुपगच्छतीति भावः।

अतस्सर्वेऽपि सामाजिकाः वेदोक्तानि कर्माण्याचरन्तः शतवर्षपर्यन्तं त्यागभावेनैहिकं भोगं भुञ्जन्तः जीवन्तु, येनासुर्यलोकगमनरूपादनिष्टात्स्वात्मानं गोपयितुं समर्था भविष्यन्तीति।

**आध्यात्मिकोऽर्थः**- असुर्या नाम ते लोका इति मन्त्रांशे असुर्यलोक-पदस्य **प्राणो वाऽअसुः**[२१] इत्यनेन श्रौतवचनेन प्राणमयाः ये लोकास्ते असुर्या इत्यर्थः सङ्गच्छते। प्राणो हि द्विविधः सौर आप्यश्चेति। सौरप्राणस्याधिदेवता इन्द्र उक्तः, आप्यप्राणस्याधिदेवता च वरुण इति। इन्द्रवरुणयोर्मध्ये घोरविरोधो वर्तते तस्माल्लोकालोकरूपेषु वारुणमण्डलेषु सौरप्रकाशो न गच्छति। तेन असुर्या इति पदेन सौरप्रकाशरहिताः इत्यर्थोऽवगन्तव्यः।

**सूर्याद्भवन्ति भूतानि सूर्येण पालितानि तु।**
**सूर्ये लयं हि गच्छन्ति यः सूर्यः सोऽहमेव च॥**[२२]

इति सूर्याथर्वशीर्षोक्तेन **सूर्य आत्मा जगतस्तस्थुषश्च**[२३] इति वेदमन्त्रेण चेदं प्रमाणितं भवति यत्सूर्येणैव समस्तस्यास्य जगतः सृष्टिः सम्भवति। सेयं सृष्टिः सौरजीवभागसृष्टिः ब्रह्मवनम् इत्युच्यते। सृष्टिविषये वेदेष्वेकः प्रश्नः समागच्छति यत्- **किंस्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।**[२४] इत्यस्योत्तरमपि ब्राह्मणग्रन्थेष्वेवं प्राप्यते- **ब्रह्मवनं ब्रह्म स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।**[२५] अस्माकमृषिभिर्निरुपाधिब्रह्मत आरभ्य सोपाधिब्रह्मपर्यन्तस्य वर्णनं कृतम्। तेनेदं स्फुटं भवति यन्निरुपाधिके ब्रह्मण्यावरणस्य सर्वथाऽऽभावो भवति। सोपाधिके ब्रह्मणि वागावरणं क्रमशो विकासमाप्नोति। यथा पाञ्चभौतिकसृष्टौ सर्वादावात्मनः सकाशादा-काशस्योत्पत्तिरुक्तः। अत्रेदं ज्ञातव्यं यत्प्राणमनसी सूक्ष्मत्वादात्मन्यन्तर्भूते स्तः। वाक्तत्त्वञ्च स्थूलत्वाद्विश्वभावेन परिणमय्याकाशनाम्ना प्रसिद्धिमाप्नोति। वाग्बलमाकाशत्वेन प्रतिष्ठायान्येन बलेन संयुज्य वायुरूपेण परिणमति। तत्र बलरूपस्यावरणस्याधिक्यं भवति। यदा वायुर्बलसंसर्गात् स्थूलतामुपैति तदा तेजोरूपमादधाति। तेजोऽपि वाग्बलप्रभावात् क्रमशो स्थूलतामवाप्य अब्रूपेण, आपश्च पृथिवीत्वेन परिणमय्य पाञ्चभौतिकं विश्वं सृजति। वाक्तत्त्वस्येमामेव सर्वभूतव्यापकतामभिलक्ष्य **वागेवेदं सर्वम्**[२६] इत्युक्तं श्रुतौ।

अनेनेदं सिद्धं भवति यदावरणस्योपचयेनास्य विश्वस्य निर्माणं भवति। सृष्टिक्रमानुसारं विश्वस्यान्तिममावरणमियं पृथिवीत्यस्ति। यथा प्राणमनसोरावरणविकासादाकाशात्पृथिवी सञ्जाता तथैव ब्रह्मरूपस्य आत्मन

उत्तरोत्तरमावरणविकासाज्जीवात्मानो मनुष्यादयो विकसिताः। ते च मनुष्याः यादृशं कर्म कुर्वन्ति तादृशं फलमाप्नुवन्ति। वेदोक्तानि कर्माण्याचरन्तो बन्धन-रहिता मुक्ताश्च भवन्ति, तद्भिन्नाचरणेन च तिर्यग्योनिषु गच्छन्ति। शरीर धारिजीवेषु मानुष्यमति दुर्लभमुक्तं तच्च पुण्यसञ्चयादेव कदाचिल्लभते। तदुक्तमपि- **कदाचिल्लभते जन्म मानुष्यं पुण्यसञ्चयात्।** तथा च **नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभेति।** मानवेषु सौरप्राणस्याधिक्यं भवति तस्मादेव कारणात्तेषां शिरः उन्नतो भवति, पक्षीषु ततोऽप्यधिको भवत्यतस्त आकाशे उड्डयने समर्थाः भवन्ति। अन्येषु जीवेषु यथा क्रमेण सौरप्राणस्याल्पता भवति तेनैव क्रमेण तेषां शिरः अधोऽधो निम्नतमा भवन्ति।

कथनस्य तात्पर्यमिदमस्ति यत् ये मानवाः कुत्सितकर्माचरणे प्रवृत्ता भवन्ति ते सामाजिकव्यवस्थानुसारमपमानोपहासादिभिर्विविधैर्दण्डैः प्रतिपल-मात्मघातं कुर्वन्ति। तादृशा एव जना अत्रात्महन इत्युक्ताः। ते चात्महनो जना अस्माल्लोकात्प्रेत्य आप्यप्राणमयेषु वारुणसमुद्रात्मकेष्वसुर्या नामसु लोकालोकेषु गच्छन्ति, निपतन्ति चेति।

**निष्कर्षः**- निष्कर्षरूपेणायं वक्तुं शक्यते यदीशावास्योपनिषदि मानवजीवनसम्बद्धा विविधा विषयाः रहस्यमयेन मन्त्रवाक्येनोपवर्णितास्सन्ति। येषां सम्यगध्ययनं विचारविमर्शश्चावश्यकोऽस्ति। यद्यपि साम्प्रतिके भौतिकवादियुगे आध्यात्मिकतथ्यविवेचनात्मकैरेतादृशैर्विचारैर्न कस्यापि कश्चित् सम्बन्धोऽस्ति। तथाप्याध्यात्मचिन्तनं विना मानवजीवनस्य साफल्यं न भवति। यतस्त्वात्मविज्ञानेन परमात्मविज्ञानस्यावबोधः सम्भवति। मानवशरीरे सत्यस्य परमात्मनो निवासो मन्यते। तदुक्तमपि ईशोपनिषदि- **हिरण्मयेन पात्रेण सत्यस्यापिहितम्मुखम्। योऽसावादित्ये पुरुषः सोऽसावहम्॥**[२७] अर्थात् शरीरे विद्यमानस्य सत्यस्वरूपस्य परमात्मनो मुखं हिरण्मयेन पात्रेण पिहितं वर्तते, यच्च मूर्धाभागे निहितमस्ति। अध्यात्मविज्ञानेन बारम्बारं ध्यानयोगाद्याचरणेन तत्पिहितम्मुखमुद्घाटयितुं शक्यते। वस्तुतो यस्य पुरुषस्योपस्थित्याऽयमादित्यः प्रकाशते स एव पुरुषोऽस्माकं शरीरेऽपि विद्यमानोऽस्ति। अत एवोच्यन्ते- **सर्वं खल्विदं ब्रह्म, तत्त्वमसि, अहं ब्रह्मास्मि** इत्यादीनि वाक्यानि। वेदेष्वपि- **एकं वा इदं विबभूव सर्वम्, पुरुष एव इदं सर्वम्, ईशावास्यमिदं सर्वम्,** इत्यादि।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. पा.धा.- भ्वादौ-854, तुदादौ- 1427
2. छान्दोग्योपनिषदि- 3/5/2
3. कठोपनिषदि- 1/3/17
4. अमरकोषे, नानार्थवर्गे- 93 तमे श्लोके।
5. बृहदारण्यकोपनिषदि- 4/4/5
6. शु.य.सं.- 40/1
7. अथर्ववेदे- 11/7/11, 23-27
8. अथर्ववेदे- 11/7/1
9. श.प.ब्रा- 14/3/2/23
10. श.प.ब्रा- 9/2/1/21
11. मनुस्मृतौ- 1/23
12. शु.य.सं.- 36/1
13. शु.य.सं.- 40/2
14. श्रीमद्भगवद्गीता- 18/45, 47, 48
15. गीतायाम्-4/33
16. विष्णुपुराणे- 6/7/28
17. शु.य.सं.-40/3
18. बृहदारण्यकोपनिषदि-4/3/1-5
19. ऋग्वेदे- 1/22/20, सामवेदे- 1672, अथर्ववेदे- 7/26/7, शु.य.सं.- 6/5, तै.सं.- 1/3/6/2, 4/2/9/3
20. ऋग्वेदे- 1/154/6, शु.य.सं.- 6/3, तै.सं.- 1/3/6/1, निरुक्ते- 2/7
21. श.प.ब्रा.- 6/6/2/6
24. ऋग्वेदे- 10/31/7, शु.य.सं.- 17/20, तै.सं.- 4/6/2/5, तै.ब्रा.- 2/8/9/6
25. तै.ब्रा.-2/8/9/6
26. ऐ.आ.- 3/1/6
27. शु.य.सं.-40/17

# यज्ञेषु मण्डपविधानस्य वैज्ञानिकत्वम्

विदितमेवास्ति यत्स्वरूपभेदाद्वेदास्त्रयः संहिताभेदाच्च चत्वारः सन्ति। **वेदा हि यज्ञार्थमभिप्रवृत्ता**[१] इति लगधवचनाद्वेदेषु यज्ञीयकर्मकाण्डस्य वर्णनमस्तीति स्पष्टं भवति। यज्ञानुष्ठानस्य प्रतिपादनं विशेषेण यजुर्वेदे लभ्यमानत्वाद्वेदेषु यजुर्वेदस्य मुख्यं स्थानमस्ति। यज्ञोऽयं वैदिकधर्मस्य मेरुदण्डत्वेन स्तुतोऽस्ति। यज्ञो हि द्विविधोऽत्रोक्तः श्रौतः स्मार्तश्च। श्रौतस्मार्तयज्ञयोर्लक्षणं मीमांसकैरेवं कृतम्– **श्रुति प्रतिपादिताः ये यज्ञास्ते श्रौता इत्युच्यन्ते।** अर्थाद्येषां यज्ञानां साक्षाद्विधाानं श्रुतिषूपलभ्यन्ते ते श्रौतयज्ञा उक्ताः। **पुराणेषु धर्मशास्त्रादिषु च येषां विधानमस्ति ते स्मार्तयज्ञा उच्यन्ते।** उभयविधेषु यज्ञेषु कुण्डमण्डपयोरावश्यकता भवत्येव। यथा शोधार्थिने कस्मैचिद्वैज्ञानिकाय प्रयोगं कर्तुं प्रयोगशालायाः, वस्तुसंरक्षणाय चोचिताधारस्यावश्यकता भवत्येवमेव यज्ञानुष्ठानकर्त्रे कुण्डमण्डपस्यावश्यकता भवति।

### कुण्डमण्डपशब्दस्यार्थः

पाणिनीयव्याकरणानुसारं कुण्डमण्डपयोर्व्युत्पत्तिरेवमस्ति– **कुडि-रक्षणे** धातोः **अच् णि** लोपे कृते सति निष्पन्नस्यास्य शब्दस्यार्थो भवति– **कुण्ड्यते रक्ष्यते (जलं वह्निर्वा*) भक्ष्यादि अस्मिन् इति कुण्डम्।**[२] मडि-धातोर्घञा निष्पन्नस्यास्य शब्दस्यार्थो भवति। **मण्डं भूषां पाति रक्षति इति मण्डपम्।**[३] एवमुक्तपरिभाषया कुण्डमण्डपयोरुभयोरपि शब्दयोरर्थः रक्षणार्थे विहितः। अर्थाद्यत्र यज्ञपदार्थानां यज्ञीयद्रव्याणां च संरक्षणं भवति तत्स्थानविशेषौ कुण्डमण्डपाविति बुध्यते। तयोर्यत्र निर्माणं क्रियते तत्स्थानं देवयजनमित्युच्यते। देवयजनमिदं यागोचितभूमौ निर्मातव्यं भवति। यागोचितभूमिविषये मनुना प्रोक्तं यत्–

**कृष्णसारस्तु चरति मृगो यत्र स्वभावतः।**
**स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्त्वतः परः।।**[४]

देवा इज्यन्ते यस्मिंस्तद्देवयजनं स्थानम्। तच्च श्रौतस्मार्तयोरुभयोरपि यागयोः किंचिद्विभेदेन भवत्येव। श्रौतयागे यत्राग्निस्संरक्ष्यते तत्स्थानमागारः, खरः, वेदी, धिष्ण्येत्यादिभिर्नामभिर्ज्ञायते, तत्र योनिर्न भवति। मण्डपश्च तत्र द्वौ भवतः हविर्द्धानमण्डपः सदोमण्डपश्चान्ये मण्डपाः शाला इत्युच्यन्ते।

हविर्धानमण्डपो दशारत्निर्दीर्घो दशारत्निर्विस्तृतश्चतुरस्रः प्राग्वंशो निर्मीयते। सदोमण्डपो दीर्घचतुरस्रो नवतिर्यगर्धायामो वा अष्टादशारत्न्येकविंशतिश्चतुर्विंशतिर्वोदीचीनवंशो भवति।[5] स्मार्तयागे यो मण्डपो भवति सः षोडशहस्तपरिमितो विंशतिहस्तपरिमितो वा चतुरस्रो भवति। स्मार्तयागस्याग्न्यागारः कुण्डमित्युच्यते। तत्र सत्त्वरजस्तमोरूपाः श्वेतरक्तकृष्णवर्णास्त्रयः परिधयो भवन्ति। तेष्वागारेषु योनिर्निर्मीयते तस्मात्तत्कुण्डमित्युच्यते। एवमुक्तप्रकारेण श्रौतस्मार्तयागयोः कुण्डमण्डपनिर्माणविधिमारभ्य कर्मविधिसहितमनेकाः भिन्नताः सन्ति। तथापि स्मार्तकर्माणि श्रौतानुसृतान्येव सन्ति। तस्मात्स्मार्तान्यपि कर्माणि वैदिकान्येव, नास्त्यत्र काचिद्विप्रतिपत्तिर्लेशमात्रं कस्यापि। न चात्र श्रौतस्मार्तयोरन्तरस्पष्टीकरणं ममाभीष्टमत एव प्रकृतविषयमनुसृत्य कुण्डमण्डपनिर्माणविधानस्य वैज्ञानिकं पक्षमादाय किञ्चिदहं प्रस्तोतुमीहे।

कुण्डमण्डपनिर्माणविधेः विस्तृतं सूक्ष्मं च चिन्तनं श्रीमता विठ्ठलदीक्षितेन स्वकीये **कुण्डमण्डपसिद्धि**रिति ग्रन्थे कृतम्। प्रायः सर्वदेशेषु प्रतिष्ठितोऽयं ग्रन्थः कुण्डमण्डपसिद्धिरिति। श्रौताचार्यानां कात्यायनापस्तम्बादीनामाचार्याणां श्रौतसूत्रेषु यज्ञानुष्ठानारम्भात्प्राक् भूमिपरीक्षणं दिक्साधानं च यथा विहितं तथैव विठ्ठलदीक्षितेनापि सर्वादौ हस्तादिमानं भूमिपरीक्षणादिकमेवोक्तम्।

**हस्तादिमानम्–**

**कृतोर्ध्वबाहोः समभूर्गतस्य कर्त्तुः शरांशः प्रपदोच्छ्रितस्य।**
**यो वा सहस्तोऽस्य जिनांशकोऽपि स्यादङ्गुलं तत्तदिभांशका ये॥**
**यवो यूका च लिक्षा च बालाग्रं चैवमादयः।**
**बद्धमुष्टिकरो रत्निररत्निः सकनिष्ठिकः॥**[6]

महर्षिणा कात्यायनेनापि– **यजमानेनोर्ध्वबाहुप्रपदोच्छ्रितेन समस्थितेन वा**[7] इत्यनेन सूत्रेणेदं स्पष्टीकृतं यद्यदा प्रपदोच्छ्रितेनोर्ध्वबाहुना (पादाग्रात् हस्ताग्रपर्यन्तं) मानं क्रियते तदा पंचहस्तपरिमितो विंशत्यधिकशताङ्गुलः पुरुषो भवति। तस्य पुरुषमानस्य यः पंचमो भागस्तत् हस्तमानमित्युच्यते। हस्तमानस्य चतुर्विंशो भागश्चाङ्गुलो भवति। विषयेऽस्मिन्नुक्तं कात्यायनेन स्वकीये श्लोकशुल्बे–

**अङ्गुलस्य प्रमाणं तु षड्यवाः पार्श्वसंस्थिताः।**

**चतुर्विंशाङ्गुलो *रत्निर्वितस्तिर्द्वादशाङ्गुलः॥**[८]

अङ्गुलानां प्रमाणविषये मतवैभिन्न्यं दृश्यते। केचनाष्टौ यवानामङ्गुलप्रमाणं स्वीकुर्वन्ति, परं कात्यायनेन षड्यवानामङ्गुलप्रमाणमुक्तम्। वस्तुतः कात्यायनस्य कथनं श्रौतानुकूलमित्यतोऽत्र स्मार्ते प्रमाणान्तरं स्वीकरणीयमित्याशयः। तेनाष्टौ यवानामङ्गुलः, यवस्याष्टमांशो यूका, यूकाया अष्टमांशो लिक्षा, लिक्षायाश्चाष्टमांशो बालाग्रः, मुष्टिबद्धः करो रत्निरुक्तः, सकनिष्ठिकः करो *रत्निरित्युक्तः। चतुर्विंशाङ्गुलानामरत्निः, द्वादशाङ्गुलानां वितस्तिरित्यादिभिर्मानप्रकारैर्यजनीयदेशस्य मापनं कर्त्तव्यम्।

भूमिपरीक्षा–

**ज्ञात्वा पूर्वं धारित्रीं दहनखननसंप्लावनैः संविशोध्य**
**पश्चात् कृत्वा समानां मुकुरजठरवद्वाचयित्वा द्विजेन्द्रैः।**
**पुण्याहं कूर्मशेषौ क्षितिमपि कुसुमाद्यैः समाराध्य शुद्धे**
**वारे तिथ्यां च कुर्यात्सुरपतिककुभः साधनं मण्डपार्थम्॥**[९]

अर्थाद्वास्तुशास्त्रोक्तेन विधिना भूमिं विशोधनीयम्। भूमिशोधनार्थं उपायास्त्रयः प्रोक्ताः– **दहनं खननं संप्लावनमि**ति। यागमण्डपनिर्माणायोपयुक्तायां भूमौ सर्वप्रथमं तृणादीनां दहनं कुर्यात्। ततस्तां भूमिं जानुपर्यन्तं निखनेत्। खननानन्तरं गर्तं जलेनाप्लाव्य खनितमृत्तिकया संप्लावितं गर्तं पूरयेत्। येन तत्क्षेत्रं मुकुरजठरवत् समीकृतं भवेत् तथा समीकृत्य, चतुर्भिर्ब्राह्मणैः पुण्याहवाचनं कारयित्वा यजमानः शुभपुण्यतिथौ घण्टाघोषपूर्वकं फलपुष्पादिभिः कश्यपशेषपृथिवीनां पूजनं कृत्वा मण्डपार्थं पूर्वादिदिक्साधनं कुर्यात्। भूमिपरीक्षाविषयकाः पञ्चरात्रादिग्रन्थोक्ताः नियमाः यथा–

शारदातिलके–

**नक्षत्रराशिवाराणामनुकूले शुभेऽहनि।**
**ततो भूमितले शुद्धे तुषारंगारविवर्जिते।**
**पुण्याहं वाचयित्वा तु मण्डपं रचयेच्छुभम्॥**

पञ्चरात्रे–

**ततो भूमिं परीक्षेत वास्तुज्ञानविशारदः।**
**स्फुटिता च सशल्या च बल्मीका रोहिणी तथा॥**
**दृष्टतः परिवर्ज्या भूः कर्तुरायुर्धनापहा।**
**ईशकोणप्लवा वृद्धिकरी वरदा तूत्तरा *प्लवा।**

**शेषकष्टा प्लवा भूमिर्धनायुर्गृहनाशिनी॥**
**ब्राह्मणी घृतगन्धा स्यात् क्षत्रिया रक्तगन्धकृत्।**
**क्षारगन्धा भवेद्वैश्या शूद्रा विट्गन्धिनी क्षितिः॥**
**ब्राह्मणी भूः कुशोपेता क्षत्रिया शरसङ्कुला।**
**कुशकाशाकुला वैश्या शूद्रा सर्वतृणाकुला॥**

कुण्डसर्वस्वे-

**सिता पीता तथा रक्ता कृष्णवर्णसमन्विता।**
**स्थिरोदका दृढा स्निग्धा भूमिः सर्वसुखावहा॥**

एवमुपर्युक्तैर्वचनैः सर्वविधा परीक्षिता विशुद्धा च भूमिर्यागमण्डप-निर्माणायोपयुक्ता मता। तत्र दिक्साधनादिकं कर्त्तव्यमिति धिया दिक्साधन-विधिरुच्यते।

**दिक्साधनम्-**

दिक्साधनाय कात्यायनादिभिराचार्यैरपि मतानि प्रस्तुतानि, तानि श्रौतानुष्ठानायोपयुक्तानि। तानि यथा- **समे शङ्कुं निधाय शङ्कुसम्मितया रज्ज्वा मण्डलं परिलिख्य यत्र लेखयोः शङ्क्वग्रच्छाया निपतति तत्र शङ्कुं निहन्ति सा प्राची।**[१०] शङ्कुलक्षणं यथा-

**षडङ्गुलपरीणाहं द्वादशाङ्गुलमुच्छ्रितम्।**
**जरठं चाव्रणं चैव शङ्कुं कुर्याद्विचक्षणः॥**[११]

कात्यायनवचनादष्टादशाङ्गुलस्य शङ्कुर्भवति तस्य षडङ्गुलो भागो गर्ते प्रोतः स्यात् द्वादशाङ्गुलश्चोर्ध्वभागे भवेत्। शङ्कुसम्मितया रज्ज्वा मण्डलं परिलिखेदिति। परमत्रान्यो विधिरनुकल्प्यते अतोऽधुना स्मार्तप्रयोगाय विठ्ठलदीक्षितोक्तं मतं प्रस्तौमि-

**नृपाङ्गुलैः सम्मितकर्कटेन सूत्रेण वा वृत्तवरं विलिख्य।**
**रव्यङ्गुलं शङ्कुममुष्य मध्ये निवेशयेत्खाक्षिमिताङ्गुलीभिः॥**
**चतसृभिश्चापि ऋजूत्तमाभिः संस्पृष्टशीर्षं तु समेषिकाभिः।**
**तच्छङ्कुभा यत्र विशेदपेयाद्वृत्ते क्रमात् स्तो वरुणेन्द्रकाष्ठे॥**[१२]

नृपशब्देन वैदिकगणितीयभाषायां षोडशसंख्याया बोधो जायते। तेन नृपाङ्गुलैरिति कथनेन षोडशाङ्गुलैः सम्मितकर्काटकभ्रामणेन सूत्रेण वा मण्डलमेकं कुर्यात्। तस्य मण्डलस्य मध्ये रव्यङ्गुलमर्थात् द्वादशाङ्गुलात्मकं शङ्कुं निखनेत्। मध्यशङ्कोः शीर्षभागसंस्पृष्टाश्चत्वारो शङ्कवो खाक्षिमिता

अर्थात् विंशत्यङ्गुलपरिमिता ऋजूत्तमाश्चतुर्षु दिक्षु स्थापनीयाः। प्रातः काले प्रथमे प्रहरे शङ्क्वग्रच्छाया यां दिशं प्रति वृत्तस्य रेखां संस्पृशेत्सा पश्चिमा दिगिति ज्ञातव्या। एवमेव तृतीये प्रहरे शङ्क्वग्रच्छाया यां दिशं प्रति वृत्तरेखां स्पृशेत्सा प्राची दिगिति बोद्धव्या। तत्र मकरार्कादारभ्य कर्कार्कपर्यन्तं षड्राशिविशिष्टं कालमुत्तरायणम्, कर्कार्कान्मकरार्कपर्यन्तं षड्राशिविशिष्टं कालं दक्षिणायनमित्युच्यते। तत्रापि विशेषेण कर्कवृश्चिकवृषमकरराशिषु पश्चिमायां पूर्वस्यां च यत्र शङ्क्वग्रच्छाया निपतति ततो यूकामेकामुत्तरे चालयित्वोत्तरायणे, दक्षिणायणे च यूकामेकां दक्षिणे चालयित्वा शङ्कुं स्थापयेत्। सिंहकन्यातुलाकुम्भमीनमेषराशिषु यत्रच्छाया निपतति ततो यूकाद्वयं दक्षिणे दक्षिणायणे, यूकाद्वयमुत्तरे चोत्तरायणे चालयित्वा शङ्कुस्थापनं कुर्यात्। मिथुनधन्वोः राशयोश्च चालनमकुर्वन् यत्र शङ्क्वग्रच्छाया निपतेत् तत्रैव शङ्कुर्दद्यादित्युक्तं श्रीमता विठ्ठलदीक्षितेन। यथा–

**कर्के कीटे गोमृगे यूकया सा द्वाभ्यां चाल्या सिंहकुम्भत्रिकेऽपि।**
**यां वै काष्ठां भानुमान् याति तस्यां चाल्या द्वन्द्वे कार्मुके चालनं न॥**[१३]

पूर्वपश्चिमयोस्साधनं यथा विहितमेवमेव शङ्कुनिखननेनोत्तर–दक्षिणयोरपि साधनं कर्त्तव्यम्। तदर्थं मण्डपपरिमाणाद्द्विगुणितां रज्जुमादाय तन्मध्ये ग्रन्थिं कृत्वा रज्ज्वन्तयोः पाशौ कुर्यात्। पाशमेकं प्राचीशङ्कौ, अपरं च पाशं पश्चिमशङ्कौ बद्ध्वा मध्यग्रन्थिमुत्तरस्यामाकर्षयेत् तेनोत्तरे यत्र मध्यग्रन्थिर्निपतेत्तत्र शङ्कुर्दद्यात्। एवमेव मध्यग्रन्थिमादाय दक्षिणस्यामाकृष्य शङ्कुं निखनेत्तेनोत्तरदक्षिणयोस्साधनं भवतीति। तदुक्तमपि–

**रज्जुं द्विघ्नां मध्यचिह्नां सपाशां प्राचीशङ्कौ पश्चिमे चापि दत्वा।**
**कर्षेद्धीमान् दक्षिणे चोत्तरे च तच्चिह्ने स्याद्दक्षिणा चोत्तरा च॥**[१४]

दिवा दिङ्निर्धारणस्य विधिरयं शास्त्रसम्मतं प्रस्तुतः। इदानीं रात्रौ विशिष्टेन वैज्ञानिकेन विधिना दिङ्निर्धारणस्य विधिरुच्यते। यथा–

**निशि वा श्रवणोदये दिगैन्द्री गुरुभस्योदयनेऽथ वह्निभस्य।**
**सुरवर्द्धकिवायुभान्तरालेऽप्यमुतः साधय पूर्ववच्च याम्याम्॥**[१५]

अर्थाद्रात्रौ यत्र श्रवणनक्षत्रस्य, गुरुभस्य=पुष्यनक्षत्रस्य, वह्निभस्य= कृत्तिकानक्षत्रस्य चोदयो भवति तत्र पूर्वा दिगिति ज्ञेयम्। चित्रा–स्वात्योरन्तराले वा प्राचीं ज्ञात्वा पूर्वोक्तेनोपायेन दक्षिणोत्तरयोः साधनं कर्त्तव्यम्। पूर्वोक्तं

दिक्साधनं भूगर्भविज्ञानाधारितमासीत्परमेषो विधिः खगोलविज्ञानाधारित इति। तत्रोपायान्तरं यथा–

**चित्रा विध्वैकया स्वाती अन्ययाऽपि शलाकया।**
**तिर्यस्थान्तचिह्नात्तु द्विमूले स्यात् स्फुटेन्द्रदिक्।।**[१६]

सरलरेखानुपातेन चित्रानक्षत्रमभिलक्ष्य भूमौ शङ्कुमेकं निखाय, स्वातीनक्षत्रमभिलक्ष्य चैकं निखनेत्। द्वयोः शङ्क्वोरन्तराले तन्मध्ये पूर्वा दिक् ज्ञातव्या। तेनेदं सिद्धं यच्चित्रास्वात्योरन्तराले पूर्वमिति सिद्धम्।

एवमुक्तप्रकारेण दिक्साधनं चतुष्कोणादिसाधनं च विधाय मण्डपप्रमाणं वास्तुशास्त्रानुमतमुच्यते। यथा–

**मण्डपस्योच्चता**–

**उच्चां भूमिं मण्डपस्य प्रकुर्याद्धस्तोन्मानामर्द्धहस्तोन्मितां वा।**
**मध्ये भूमिं मण्डपेनोन्मितां च त्यक्त्वा कुर्यान्मण्डपश्चेद्द्वितीयः।।**[१७]

सामान्यभूमेरेकहस्तपरिमितार्द्धहस्तपरिमिता वा मण्डपस्योच्चता भवेत्। प्रतिष्ठादिकार्येषु मण्डपान्तरं कल्प्यते तदा*परो मण्डपो यावत्परिमाणस्य भवेत् तावत्परिमाणां भूमिं विहायापरं मण्डपमर्द्धहस्तोच्चं कार्यम्।

**मण्डपप्रमाणम्**–

**दशसूर्यकरोन्मितो*धामः स्याद्दिनशक्रमितैश्च करैस्तु मध्यः।**
**धृतिभूपकरोन्मितो वरीयान्नखहस्तोऽप्यथमण्डपस्तुलायाम्।।**[१८]

अधममध्यमोत्तमभेदान्मण्डपस्त्रिविधो भवति। तदनु दशहस्तमितो द्वादशहस्तमितो वा मण्डपोऽधमो भवति। द्वादशहस्तात्मकश्चतुर्दशहस्तात्मकश्च मण्डपो मध्यमो भवति। अष्टादशहस्तमितः षोडषहस्तमितो विंशतिहस्तमितो वा मण्डपो भवत्युत्तमः। विशेषतस्तुलादाने विंशतिहस्तपरिमितो मण्डपो भवति। मण्डपस्यायामो विस्तारश्च समानो भवति। तात्पर्यमिदमस्ति यत्समचतुरस्रः मण्डपः कार्यः। मण्डपप्रमाणं शास्त्रान्तरेषु यथा–

पञ्चरात्रे–

**कनीयान् दशहस्तः स्यान्मध्यमो द्वादशोन्मितः।**
**तथा षोडशभिर्हस्तैर्मण्डपं स्यादिहोत्तमम्।।**
**दशद्वादशहस्तौ च द्विद्विवृद्धिंगतः क्रमात्।।**

मन्त्रमुक्तावल्याम्– **चतुर्विंशद्धस्तपर्यन्तं मण्डपवृद्धिः।**

वास्तुशास्त्रे– **पंचहस्तादारभ्य द्वात्रिंशद्धस्तपर्यन्तं वृद्धिः।**

ब्राह्मणादिवर्णक्रमेण मण्डपप्रमाणं शैवसिद्धान्तशेखरे–

**विप्राणां विंशतिर्हस्तो मण्डपस्तु सुशोभनः।**
**कलाहस्तः क्षत्रियाणां वैश्यानां मीनहस्तकः॥**
**दशहस्तस्तु शूद्राणां हीनानामष्टहस्तकः॥**

मदनरत्ने–

**विप्राणां मण्डपः प्राच्यां राज्ञामीशानकोणतः।**
**विशामुदीच्यां शूद्राणां प्रतीच्यां शस्त ईरितः॥**
**वैष्णवो मण्डपः प्राच्यामुदीच्यां वा स्नानमण्डपम्।**
**गजहस्तायतिं दीर्घे चतुरस्रं चतुर्दिशम्॥**
**वितस्त्युच्छ्रायसहितं चतुर्द्वारोपशोभितम्।**
**मध्ये महामण्डपतो ह्यर्धदेशं परित्यजेत्॥**
**तन्मध्ये स्थण्डिलं रम्यं हस्तमात्रप्रमाणकम्।**
**चतुरङ्गुलिकोच्छ्रायं त्रितयस्वस्तिकैर्युतम्॥**

मण्डपस्थलं वास्तुशास्त्रे–

**गृहस्योत्तरपूर्वेण प्रागुदक्प्रवणं गणे।**
**देवता सन्निधौ वापि पुण्यदेशे जलाशये॥**
**सुसमे भूमिभागे च कृत्वा हेरम्बपूनम्।**
**मण्डपं स्थापयेत्तत्र चतुरस्रमुदक्प्लवम्॥**

एवं ग्रन्थान्तरेषूक्तं मण्डपप्रमाणमुक्त्वेदानीं द्वारप्रमाणमुच्यते।

**द्वारप्रमाणम्**–

पूर्वोक्तेषु त्रिविधेष्वपि मण्डपेषु चतुर्षु दिक्षु द्वारचतुष्टयं कार्यं भवति। तानि च द्वाराणि किं प्रमाणयुतानि स्युरित्येतदुक्तं यथा–

**दिगन्तराले द्विकरं भवेद्द्वारचतुष्टयं वेदजाङ्गुलैस्तत्।**
**विवर्द्धितं मध्यवरिष्ठयोः स्याद्वेदी त्रिभागेन समाकरोच्चा॥**[११]

अधमे मण्डपे अष्टाङ्गुलैस्सहितं हस्तचतुष्टयोच्चं हस्तद्वयात्मकं विस्तृतं (4.8)/(2) च द्वारं करणीयम्। मध्यमोत्तमयोश्च मण्डपयोः मण्डपप्रमाणं त्रिधा विभज्यैकेन भागेन द्वाराणि निर्मातव्यानि। यथा– चतुर्दशहस्तात्मकस्य मण्डपस्य तृतीयो भागो भवति षोडशाङ्गुलाधिकं हस्तचतुष्टयमुच्चं चतुरङ्गुलाधिकं हस्तद्वयपरिमितं विस्तृतं द्वारं कार्यम् (4.16)/(2.4) इति। एवमेव षोडशहस्तात्मकस्य मण्डपस्य तृतीयो भागो भवति अष्टाङ्गुलाधिकं पञ्चहस्तपरिमितं तावदुच्चं अष्ठटाङ्गुलाधिकं

हस्तद्वयविस्तृतं च (5.8)/(2.8) द्वारं कार्यमिति भावः। एवमुक्तप्रकारेण द्वारप्रमाणमुक्त्वेदानीं स्तम्भस्थापनविधिरुच्यते।

**स्तम्भस्थापनविधिः-**

**समत्रिभागे च सूत्रं प्रदद्यादुदग्दक्षिणं चापि पूर्वापरं च।**
**ततस्त्र्यंशपूर्तौ च कोणेषु दद्यात्समस्तम्भकान्द्वादशैवेषु हस्तान्॥**
**वेद्याः कोणे हस्तिहस्तोच्चवेदस्तम्भान्दद्याद्वह्निदिक्तः सचूडान्।**
**प्रादक्षिण्यात्पञ्चमांशं तु भूमौ दद्यादेवं षोडशस्तम्भसंस्था॥**[२०]

विदितमेवास्ति यद्यागमण्डपेषु षोडशस्तम्भानां स्थापनं विहितम्। स्तम्भस्थापनाय क्षेत्रविन्यासक्रमोऽत्र निरूप्यते। तदुच्यते यन्मण्डपस्य प्रतिदिक्-परिसीमानं समत्रिभागं कृत्वा सन्धिस्थानेषु एकैको शङ्कुर्निखातव्यः। यथा षोडशहस्तपरिमितस्य मण्डपस्य प्रतिदिक्-परिसीमा षोडशहस्तात्मको भवति। पूर्वस्यां या परिसीमा तां समत्रिभज्यैको भागः (16/3=5.8) अष्टाङ्गुलाधिकः पञ्चहस्तपरिमितो भवति। तेन ऐशान्यामेकः शङ्कुः, मध्ये द्वौ, आग्नेय्यां चैकः, इत्येवं चत्वारो शङ्कवो निहिताः। तथैवाग्नेय्यान्नैर्ऋत्यपर्यन्तं त्रयः, नैर्ऋत्याद्वायव्यपर्यन्तं त्रयः, वायव्याच्चेशानपर्यन्तं द्वौ शङ्कू स्थापितौ सर्वमाहत्य परिसीमासु द्वादशशङ्कवो निहिताः भवन्ति। चत्वारः शङ्कवश्चान्तर्वेदिश्चतुर्षु कोणेषु चत्वारो शङ्कवो निखातव्याः। उक्तप्रकारेण यत्र यत्र शङ्कवो निखनितास्तत्र तत्र स्तम्भस्थापनं कुर्यात्। तदर्थमाग्नेयकोणादारभ्या-न्तर्वेदिस्तम्भाश्चत्वारो हस्तिहस्तोच्चाः= अष्टहस्तपरिमितोच्चाः तत्पञ्चमांशश्च यूकैका त्रियवाश्चतुर्दशाङ्गुलाः हस्तैकप्रमाणाः (1ह., 14अं., 3य., 1यू.) भूमौ निखातव्याः। मण्डप-परिधिषु च पञ्चहस्तोच्चाः हस्तैकप्रमाणा-स्तत्पञ्चमांशाः भूमौ स्थाप्याः। स्तम्भकाष्ठच्छेदनकाले पञ्चमांशाधिकं काष्ठं गृहीतव्यमित्ययं भावः। स्तभानामुपरि वलिकास्थापनमुच्यते।

**वलिकास्थापनम्-**

**स्तम्भेषु तिर्यग्वलिका निधेयाश्चूडासु कर्णेष्वथवा बहिस्ताः।**
**पूर्वापरं दक्षिणसौम्यदिक्स्थं कोणऽन्तरा काष्ठचयं निदध्यात्॥**[२१]

विदितमस्ति यत्षोडशानां स्तम्भानां योजनाय वलिकानां स्थापनमावश्यकं भवति। तदर्थं द्वादशपरिसीमास्थेषु स्तम्भेषु द्वादशसमवलिकाः, वेद्यन्तःस्थेषु चतुर्षु स्तम्भेषु च चतस्रः समवलिकाः स्थाप्यास्तेन षोडशसमवलिका भवन्ति। बहिस्थेषु चतुर्षु कोणेषु चतस्रः कर्णवलिकाः,

अन्तःस्थेषु चतुर्षु कोणेषु च चतस्रः कर्णवलिकाः पृथक्, द्वयोः कोणयोर्मध्ये वेद्याः बाह्याभ्यन्तरयोः भागयोः चतस्रः चतस्रस्तिर्यग्वलिकाश्चतुर्षु दिक्षु प्रदेयास्तेनाष्टौ कर्णवलिकाः तिर्यग्वलिकाश्चाष्टावित्याहत्य षोडशवलिकाः भवन्ति। षोडशस्तम्भाश्च पूर्वमेव स्थापितास्तानाहत्य (16समवलिकाः+8कर्णवलिकाः+8तिर्यग्वलिकाः+16स्तम्भाश्च=48) अष्टचत्वारिंशत् काष्ठसमूहा भवन्ति। तत्रापि विशेषेणेदमवधेयं यद्यत्रान्तर्वेद्याः कर्णवलिकाः मिलन्ति तत्स्थानं शिखरप्रदेश इत्युच्यते।

**मण्डपाच्छादनविधिः–**

उपर्युक्तविधानेन मण्डपस्य शिखरं विरच्य चतुर्दिग्द्वाराणि वर्जयित्वा समग्रमपि मण्डपं ऋजुकटैः कुशकाशादिभिः कोमलतृणैः पत्रैर्वंशादिभिश्चाच्छादयेत्। सुवस्त्रैर्दर्पणचामरघटादिभिश्च स्तम्भान्विभूषयेत्। द्वारेषु पृथग्रूपेण कटं निर्माय्यावलगयेत्। तदुक्तं कुण्डमण्डपसिद्धौ–

**मध्यभागशिखरं रचयित्वा छादयेदपि कटैर्ऋजुवंशैः।**
**द्वारवर्जमिह मण्डपमेनं स्तम्भकानपि सुवस्त्रसमूहैः॥**[२२]

अन्ये केचनाहुः– **नारिकेलदलैर्वाऽपि पल्लवैर्वाऽपि वेणुभिः।**
**आच्छाद्या मण्डपाः सर्वे द्वारवर्जन्तु सर्वतः॥**

वास्तुशास्त्रे– **कटैः सद्भिस्तु सञ्छाद्याः विजयाद्यास्तु मण्डपाः।**

हयग्रीवपञ्चरात्रे- **दर्पणैश्चामरैर्घटैः स्तम्भान् वस्त्रैर्विभूषयेत्।** इति।

साम्प्रतं षोडशस्तम्भसहितस्य वलिकादिभिर्युतस्य तृणादिभिराच्छादितस्य सशिखरस्य मण्डपस्य चित्रमिहोपस्थाप्यते।



**षोडशस्तम्भयुतस्य मण्डपस्य चित्रम्**

**तोरणरचनाविधिः-**

पञ्चरात्रतन्त्रे देवानामाविर्भावस्थानत्वेन तोरणस्य माहात्म्यमुपवर्णितमस्ति। तदुक्तमपि-

**देवास्तोरणरूपेण संस्थिताः यज्ञमण्डपे।**
**विघ्नविध्वंसनार्थाय रक्षार्थमध्वरस्य च॥**

अत एव तोरणस्थापनमवश्यमेव कर्त्तव्यम्। तदुक्तं कुण्डमण्डपे-

**पूर्वादिदिक्षु रचयेदपि तोरणानि न्यग्रोधजन्तुफलपिप्पलवृक्षराजैः।**
**अश्वत्थजन्तोर्फलपर्कटिभूरिपदि्भर्वैषामभावत इमान्यथवैककेन॥**
**हस्ताद्बहिर्मण्डपतः शराङ्गस्वरैः करैस्तान्यधमादिकेषु।**
**दीर्घाणि च प्राहुरथायतिः स्यात्तेषां द्विहस्ता चरणप्रवृद्ध्या॥**[23]

अर्थात्तोरणं द्वाररूपं मण्डपद्वारादेकहस्ताद्बहिः कार्या। तोरणद्वारस्यापि स्थापना पूर्वादिक्रमेणैव कुर्यात्। पूर्वस्यां दिशि न्यग्रोधोऽश्वत्थो वा, दक्षिणस्यां दिश्युदुम्बरः, पश्चिमायामश्वत्थो पर्कटी वा, उत्तरस्यां दिशि वटकाष्ठस्य प्रयोगः कर्त्तव्यः। कस्यचिदेकस्य काष्ठस्याभावे एकेनैव काष्ठेन चतुर्णामपि तोरणानां निर्माणं कर्त्तव्यम्। तानि च तोरणानि किं प्रमाणानि स्युरित्यस्मिन् विषये प्रोक्तं यत्- अधममण्डपस्य तोरणं लम्बप्रस्थक्रमेण पञ्चहस्तायामं हस्तद्वयविस्तृतं (5ह./2ह.) भवति। मध्यममण्डपस्य तोरणं लम्बप्रस्थक्रमेण षड्हस्तायामं षडधिकमङ्गुलं हस्तद्वयविस्तृतं (5ह./2ह.6अं) कार्यम्। उत्तममण्डपस्य तोरणं सप्तहस्तायामं द्वादशाङ्गुलाधिकं हस्तद्वयविस्तृतं (5ह./2ह.12अं) च कार्यमिति। तोरणस्तम्भस्यापि पञ्चमांशं भूमौ निखननीयम्। तदुच्यते यत्पञ्चहस्तात्मकस्य तोरणस्य पञ्चमांशो भवत्येकहस्तपरिमितः (1ह.), षड्हस्तस्य पञ्चमांशो षड्यवाश्चतुरङ्गुलाधिकैकहस्तपरिमितः (1ह.,4अं.,6य.), सप्तहस्तस्य पञ्चमांशः पञ्चयवा नवाङ्गुलाधिकैकहस्तपरिमितो (1ह.,9अं,5य.) भवति। स्तम्भार्थं काष्ठच्छेदनकाले एतावत्परिमितं स्तम्भकाष्ठमधिकं गृहीतव्यम्। तोरणद्वारस्योर्ध्ववलिकानामुपरि मध्ये मण्डपप्रमाणादर्धप्रमाणानां फलकानां स्थापनं विधीयते। तत्रापि विशेषेण शिवयागे धातुनिर्मितं त्रिशूलं स्थापनीयम्, विष्णुयागे च पूर्वादिक्रमेण शङ्खचक्रगदापद्माकाराणां फलकानां स्थापनमुक्तम्। एतेन विधिना स्तम्भच्छेदनकर्मणि प्रबन्धनशास्त्रस्य ये महत्त्वपूर्णाः सिद्धान्ता भवन्ति तेषामत्र साक्षात्प्रयोगो लभ्यते। येनेदं सुस्पष्टं भवति यद्वैदिककर्मकाण्डेषु मण्डपनिर्माणप्रसङ्गे

यत्र वास्तुविज्ञानस्य, भूगर्भविज्ञानस्य, खगोलविज्ञानस्य च प्रायोगिकं ज्ञानमपेक्षितं भवति तत्रैव वृक्षविज्ञानस्य प्रबन्धविज्ञानस्य च प्रचुरः प्रयोगो भवतीति। भूमितिविज्ञानस्य गणितविज्ञानस्यापि च सर्वत्र बाहुल्येन प्रयोगो दृश्यत एव। अत इदं वक्तुं शक्यते यद्वैदिकानि कर्माणि विविधवैज्ञानिकसिद्धान्तानां प्रायोगिकप्रक्रियामनुसृत्यैव कल्पितानि सन्ति। अतो वेदेषु वर्णितानि यागानुष्ठानानि पूर्णतो वैज्ञानिकतथ्याधारे स्थितानि सन्तीति कथने न काप्यतिशयोक्तिर्भविष्यति। यथा ह्याधुनिका वैज्ञानिका प्रयोगशालासु गत्वा विविधप्रयोगमाध्यमेन नित्यं नूतनं तथ्यमाविष्कुर्वन्त्येवमेव पण्डिता विद्वांसोऽपि यज्ञमण्डपेषु गत्वा नवीनमपूर्वमाविष्कुर्वन्तीति। उभयोः प्रयोगयोरन्तरमिदमस्ति यद्वैज्ञानिकानां भौतिका आविष्कारास्तु स्थूलतया प्रत्यक्षेण दृग्गोचरा भवन्ति परमेतेषां विदुषामाध्यात्मिकाः प्रयोगाः किमप्यपूर्वमाविष्कुर्वन्ति येषां स्थूलेन चक्षुषा दर्शनं न सम्भवति। जीवने क्वचित्किञ्चित्कथञ्चिच्चोपलभ्यन्त एवेत्यलम्।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी–

1. वेदाङ्गज्योतिष–3
2. वाचस्पत्यम्– तृतीयभागे, 2076 पृष्ठे।
3. वाचस्पत्यम्– षष्ठभागे, 4718 पृष्ठे।
4. मनुस्मृतौ– 2/23
5. का.श्रौ.सू.–8/6/4–6
6. कुण्डमण्डपसिद्धौ– 3,4 श्लोकौ।
7. का.श्रौ.सू.– 16/7/32
8. का.श्लोकशुल्बे– 25तमः श्लोकः।
9. कुण्डमण्डपसिद्धौ– 5 तमः श्लोकः।
10. का. शुल्बसूत्रे– 1/2
11. का. श्लोकशुल्बे– 7 तमः श्लोकः।
12. कुण्डमण्डपसिद्धौ– 6,7

13. कुण्डमण्डपसिद्धौ- 8 तमः श्लोकः।
14. कुण्डमण्डपसिद्धौ- 9 तमः श्लोकः।
15. कुण्डमण्डपसिद्धौ- 10 तमः श्लोकः।
16. कुण्डमण्डपसिद्धौ- 11 तमः श्लोकः।
17. कुण्डमण्डपसिद्धौ- 15 तमः श्लोकः।
18. कुण्डमण्डपसिद्धौ- 16 तमः श्लोकः।
19. कुण्डमण्डपसिद्धौ- 17 तमः श्लोकः।
20. कुण्डमण्डपसिद्धौ- 19,20 श्लोकौ।
21. कुण्डमण्डपसिद्धौ- 21 तमः श्लोकः।
22. कुण्डमण्डपसिद्धौ- 22 तमः श्लोकः।
23. कुण्डमण्डपसिद्धौ- 23,24 तमौ श्लोकौ।

## मानवाधिकारे वैदिकवाङ्मयस्यावदानम्

**यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्म।**[१] इत्यनया श्रुत्या जगत्कारणत्वं च ब्रह्मलक्षणमुक्तम्। तत्रापि प्राधान्येन जगदुत्पत्तिस्थितिलयनिमित्तोपादान-ब्रह्मप्रतिपादनं विहितम्। सृष्ट्यादावखिलाण्डकोटिब्रह्माण्डनायको भगवान् नारायणः स्वोदरस्थिताञ्जीवानुद्धर्तुं प्रकृतेः सकाशाद् रजोगुणं गृहीत्वा चतुर्मुखं ब्रह्माणमसृजत्। तदुक्तम्-

**ससर्ज भगवानादौ त्रीन् गुणान् प्रकृतेः परः।**
**महत्तत्त्वं ततो विष्णुः सृष्टवान् ब्रह्मणस्तनुम्॥**[२]

स परमात्मा नानाविधाः प्रजाः सिसृक्षुरभिध्यायापो जायन्तामित्य-भिध्यानमात्रेणाप एव ससर्जेत्याह मनुः। तास्वप्सु बीजं शक्तिरूपमारोपितवान्। तद्बीजं परमेश्वरेच्छया हैममण्डमभवत्। यथा-

**सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः।**
**अप एव ससर्जादौ तासु बीजमवासृजत्॥**
**तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।**
**तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः॥**[३]

अमुमेव हिरण्मयाण्डादुद्भूतं सर्वलोकपितामहं ब्रह्माणमभिलक्ष्य श्रुतिराह-

**हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।**
**स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥**[४]

भगवतो नारायणस्य सृष्टियज्ञात्मके कर्मणि सर्वप्रथमं स्वत एवोद्भूतोऽयं ब्रह्मा स्वयम्भूरित्युक्तः। स्वयम्भूः सकाशाज्जातो मनुः स्वायम्भुवेति प्रोक्तः। **मन्-ज्ञाने धातोः शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च**[५] इत्युणादिसूत्रेण उ-प्रत्यये कृते सति मनुरिति शब्दो निष्पद्यते। मनुर्विषये श्रुतावेवमुक्तं यत्- **ये विद्वांसस्ते मनव**[६] इति। ब्रह्मपुत्रस्यास्य स्वायम्भुवमनोः षड्वंशप्रभवा अन्ये समानकार्यकारिणः स्वस्वकाले सृष्टिपालनादावधिकृताः स्वाः स्वाः प्रजा उत्पाद्य पालितवन्तः। ते यथा-

**स्वारोचिषश्चोत्तमश्च तामसो रैवतस्तथा।**

**चाक्षुषश्च महातेजा विवस्वत्सुत एव च॥**
**स्वायम्भुवाद्या सप्तैते मनवो भूरितेजसः।**
**स्वे स्वेऽन्तरे सर्वमिदमुत्पाद्यमापुश्चराचरम्॥**[७]

तस्य मनोरपत्यं पुमान् (मनु+अण्) मानवः, स्त्री च मानवी। मानव इति शब्दस्यानेके पर्यायाः सन्ति। यथा–

**मनुष्या मानुषा मर्त्या मनुजा मानवा नराः।**
**स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः॥**[८]

मनोरपत्यमित्यर्थे **मनोर्जातावञ्यतौ युक् च**[९] इत्यनेन सूत्रेण यत्प्रत्ययः षुमागमश्च मनोरित्याहुर्वैयाकरणाः। अत्र जातिश्च प्रत्ययान्तोपाधिः। मनोरपत्यं जातिश्चेदिति अपत्यमात्रविवक्षायामन्तरेण जातिं मानव इति भवति। **मत्वा कर्माणि सीव्यन्ति। मनस्यमानेन सृष्टाः। मनस्यतिः पुनर्मनस्वीभावे। मनोरपत्यं मनुषो वा**[१०] इति यास्कः। मैत्रायण्यां तैत्तिरीयब्राह्मणेऽपि– **स (प्रजापतिः) पितृन्सृष्ट्वा मनस्यैत्। तदनु मनुष्यानसृजत। तन्मनुष्याणां मनुष्यत्वम्**[११] इत्युक्तम्। महाभारते यथा–

**मनोर्वंशो मानवानां ततोऽयं प्रथितोऽभवत्।**
**ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तु मानवाः॥**[१२]

**मानवाधिकारः**

शब्दोऽयं मानवः अधिकारश्चेत्यनयोः शब्दयोर्योगेन निर्मितः। तत्र मानवशब्दः पूर्वं व्याख्यातः तस्य च मनोरपत्यस्य मनुगोत्रापत्यस्य वा मानवस्य कृते यः प्राकृतिकोऽधिकारो विहितस्स मानवाधिकार इत्युच्यते। अधिकारशब्दश्च **अधीत्युपसर्गपूर्वकात्कृधातोः घञ्प्रत्ययान्निष्पद्यते।** तदुक्तं साहित्यदर्पणे– **अधिकारः फले स्वाम्यधिकारी च तत्प्रभुः॥**[१३] अर्थाद–धिकारशब्दोऽपि अधीक्षणम्, कार्यभारः, आधिपत्यम्, शक्तिः, स्वत्वम्, स्वामित्वमित्यादिष्वनेकेष्वर्थेषु प्रयुक्तोऽस्ति। आधुनिकचिन्तनपरम्परायां मानवाधिकारस्तादृशोऽधिकारोऽस्ति यन्मनुष्येभ्यो मानवजातेः सदस्यत्वान्निहित–शक्तीनां विकासायावश्यकोऽस्ति। एतादृशोऽधिकारो यत्सर्वानपि स्त्रीपुरुषान् स्वभावतः प्राप्तोऽस्ति। मानवाधिकारस्य व्यवस्था शताब्दान्मानवजातिभिः स्वाधिकाराय कृतप्रयत्नस्य संघर्षस्य च परिणामोऽस्ति।

**वर्त्तमानकाले प्रचलितो मानवाधिकारः**

यद्यपि वैदिकवाङ्मये मानवाधिकारस्य चर्चा कर्त्तव्यमुखेन

विहिताऽस्ति। तद्विषयोपस्थापनात्प्राक् वर्त्तमानयुगे विश्वस्तरे प्रचलितमानवाधिकारविषये तावत्किञ्चिद्वच्मि। स्थानीय-राष्ट्रिय-अन्ताराष्ट्रियस्तरे च सञ्चालितानां समस्तानामान्दोलनानां विश्वबन्धुत्वसम्बद्धानामुद्घोषणानाञ्चैकमात्रमुद्देश्यमासीत् समग्रमानवजातेः सम्यक् विकासः कल्याणञ्च। तस्यैवैतत्फलं यन्मानवाधिकाराणां सर्वत्र समभावेन संस्थापनार्थं संयुक्तराष्ट्रसंघस्य स्थापना 24 अक्तूबर 1945 ई. वर्षे जाता। सर्वविधशान्तेरुपासको भारतदेशः संयुक्तराष्ट्रसंघस्य सक्रियः सदस्योऽस्ति। सर्वत्र शान्तिः स्यादेतदुपदेशबलाद्विश्वगुरुपदमलङ्करोत्यस्माकं देशः। अस्माकं देशे बहुविधानि नीतिशास्त्राणि प्रचलितानि सन्ति। सर्वाण्यपि शास्त्राणि मानवकल्याणायैव प्रवृत्तानि सन्ति। द्विविधं मानवकल्याणमत्र वर्णितं लौकिकं पारलौकिकञ्च। तदुभयकल्याणसम्पादकशास्त्राणामध्ययने संरक्षणे च भारतीयाः कटिबद्धाः सन्ति। तस्माद्भारतीयं संविधानं सर्वदेशानां कृते मार्गदर्शकत्वेन प्रतिष्ठितमस्ति। तत्रोपदिष्टविधीनामनुपालनं सर्वदेशेषु स्यादित्यस्मिन्नेव क्रमे 18 दिसम्बर 1948 ई. वर्षे मानवाधिकारसम्बद्धं विश्वघोषणापत्रं प्रकाशितमभवत्। अत एव प्रतिवर्षं 10 दिसम्बरस्य तिथिः मानवाधिकारदिवसरूपेणास्माभिरनुष्ठीयते। घोषणापत्रेऽस्मिन् प्रस्तावनया सह त्रिंशदनुच्छेदाः सन्ति। ते यथा-

**अनुच्छेदः**- 1. सर्वे मनुष्याः जन्मत एव गरिमदृष्ट्या अधिकारदृष्ट्या च स्वतन्त्राः समानाश्च सन्ति। तेभ्यो बुद्धिरन्तश्चेतनाश्च प्रदत्ताः सन्ति। तैः परस्परं भ्रातृत्वभावनया कार्यं कर्त्तव्यम्।

**अनुच्छेदः- 2.** प्रतिव्यक्तिरस्यां घोषणायामुपवर्णितानां समस्तानामधिकाराणां स्वतन्त्रतानाञ्च कृते सन्त्यर्हाः, तत्र मूलवंश-वर्ण-लिङ्ग-भाषा-धर्म-राजनैतिकविचारा अन्ये च विचाराः, राष्ट्रियो वा सामाजिकोद्भवः, सम्पत्तिः, जन्माधारे अन्यपरिस्थित्याधारे वा न कश्चिद्विभेदो भविष्यति।
एतदतिरिक्तं कमपि देशं राज्यक्षेत्रं वा तत्स्वाधीनं वा स्यात् न्यायाधीनं वा स्यात् अस्वशासितं वा स्यात् प्रभुतायां कमपि मर्यादाधीनं वा स्यात् राजनीतिकाधिकारिताविषयाधारे अन्ताराष्ट्रियप्रास्थित्याधारे वा तस्य देशस्य राज्यक्षेत्रस्य वा कस्माच्चिन्मानवात् कश्चिद्विभेदो न भविष्यति।

**अनुच्छेदः- 3.** प्रतिमानवं प्राणस्य स्वतन्त्रतायाः दैहिकसुरक्षायाश्चाधिकारोऽस्ति।

**अनुच्छेदः- 4.** कमपि मानवं दासत्वेन परतन्त्रत्वेन च नैव

स्थापयिष्यते, सर्वविधो दासत्वभावः दासव्यापारश्च प्रतिषिद्धो भविष्यति।

**अनुच्छेदः- 5.** कस्मैचिदपि मानवाय यन्त्रणां न प्रदास्यते, तेन सह क्रूरामानवीयापमानजनको वा व्यवहारो न भविष्यति, उत वा न तादृशो दण्ड एव देयो भविष्यति।

**अनुच्छेदः- 6.** प्रत्येकं मानवं सर्वत्र विधिसमक्षं मानवरूपे मान्यताया अधिकारो भविष्यति।

**अनुच्छेदः- 7.** सर्वे जनाः विधिसमक्षं समानाः सन्ति, कमपि विभेदं विना विधेः समानसंरक्षणस्याधिकारिणः सन्ति। सर्वेऽपि मानवा अस्याः घोषणाया अतिक्रमणे, विभेदविरुद्धे, एतादृग्विभेदोद्दीपनविरुद्धे च समानसंरक्षणस्याधिकारिणः सन्ति।

**अनुच्छेदः- 8.** प्रतिमानवं संविधानेन विधिना वा प्रदत्तमूला-धिकाराणामतिक्रमणकारिकार्यविरुद्धे सक्षमराष्ट्रियाधिकरणैः प्रभावपूर्णस्यो-पचारस्याधिकारोऽस्ति।

**अनुच्छेदः- 9.** कमपि मानवं स्वेच्छया नियमविरुद्धतया च निगडितं निर्वासितं वा नैव कर्त्तुं शक्यते।

अनुच्छेदः- 10. मानवः स्वाधिकाराणां बाधानां वा तद्विरुद्धापरा-धिकारोपावधारणे च पूर्णतया समानरूपेण स्वतन्त्रो निष्पक्षाधिकरणैः ऋजुवृत्तान्तश्रवणाय सार्वजनिकवृत्तान्तश्रवणाय चाधिकृतोऽस्ति।

**अनुच्छेदः- 11.** (1) तादृशं मानवं यमुपरि दाण्डिकाप-राधस्यारोपोऽस्ति, एषोधिकारोऽस्ति यत्तं तावन्निरपराधं मंस्यते यावत्तं लोकविचारणे (न्यायालये) यत्र तं स्वात्मप्रतिरक्षार्थम् आवश्यकं साक्ष्यमुपलभ्येत विध्यनुसारं दोषयुक्तं (दुष्टं) न साध्यते।

(2) कमपि मानवं कस्माच्चित् कार्यात् लोपकारणाद्वा यत्क्रियमाणकाले राष्ट्रियमन्ताराष्ट्रियविध्यधीनं वा दाण्डिकमपराधं नासीत्, कस्मैचिद्दाण्डिकापराधाय दोषयुक्तमभिनिर्धारितं नैव कर्त्तुं शक्ष्यते। तस्माद्दण्डादधिकदण्डायारोपितं नैव करिष्यते यत्तदानीं प्रचलितमासीत् यदाऽपराधः कृतः।

**अनुच्छेदः- 12.** कस्यापि मानवस्यैकान्तभावेन, कुटुम्बेन, गृहेण, पत्रव्यवहारेण सह च स्वैरो हस्तक्षेपो न करिष्यते, तस्य सम्मानमुपरि ख्यातिमुपरि च प्रहारो न भविष्यति। प्रत्येकं मानवं तादृशस्य हस्तक्षेपस्य

प्रहारस्य वा विरुद्धे विधिसंरक्षणस्याधिकारोऽस्ति।

**अनुच्छेदः- 13.** (1) प्रतिमानवं प्रतिराज्यसीमान्तर्गतसञ्चरणस्य निवासस्य च स्वतन्त्रताया अधिकारोऽस्ति।

(2) सर्वे मानवाः स्वदेशमन्यं वा देशं परित्यक्तुं स्वदेशे पुनरागमनाय चाधिकृताः सन्ति।

**अनुच्छेदः- 14.** (1) सर्वेऽपि मानवा उत्पीडनवशादन्यस्मिन् देशे शरणं याचयितुं प्राप्तुं वाधिकृताः सन्ति।

(2) अस्याधिकारस्यावलम्बनं राजनीतिकेतरापराधेभ्यः संयुक्त-राष्ट्रसंघस्य प्रयोजनानां सिद्धान्तानाञ्च प्रतिकूलकार्येभ्यः वास्तविकरूपेणाद्भुता-भियोजनदशायां नैव गृहीतुं शक्ष्यते।

**अनुच्छेदः- 15.** (1) प्रत्येकं मानवं राष्ट्रियताया अधिकारो भविष्यति।

(2) कमपि मानवं स्वेच्छया तस्य राष्ट्रियतातो राष्ट्रियता-परिवर्तयितुमधिकाराच्च वञ्चितं कर्तुं शक्ष्यते।

**अनुच्छेदः- 16.** (1) पूर्णवयस्काः स्त्रीपुरुषाश्च मूलवंश-राष्ट्रीयता-धर्मकारणाच्च काञ्चिदपि सीमां विनैव विवाहं कर्तुं कुटुम्बं स्थापयितुञ्चार्हाः सन्ति।

(2) ते विवाहविषये विवाहितजीवनकाले तद्विघटने च समाना-धिकारायाधिकृताः सन्ति।

**अनुच्छेदः- 17.** (1) प्रत्येकमप्येकाकिना अन्येभ्यो जनेभ्यः सम्मिल्य वा सम्पत्तेः स्वामित्वमधिगन्तुमर्हाः सन्ति।

(2) कमपि मानवं तत्सम्पत्तिभ्यः स्वेच्छया वञ्चितं नैव कर्तुं शक्ष्यते।

**अनुच्छेदः- 18.** प्रत्येकमपि विचारस्य अन्तःकरणस्य (चेतनायाः) धर्मस्वातन्त्र्यस्य चाधिकारोऽस्ति। एतदधिकारान्तर्गतं स्वधर्मं विश्वासं वा परिवर्तयितुं स्वातन्त्र्यं वैयक्तिकस्तरे सामाजिकस्तरे चैकाकिना अन्येभ्यो जनेभ्यो मिलित्वा सार्वजनिकरूपेण वा शिक्षयितुमभ्यस्तुं व्यवहर्तुमर्चितुं पालयितुं वा स्वधर्मं विश्वासं वा प्रकटयितुं स्वातन्त्र्यमस्ति।

**अनुच्छेदः- 19.** प्रत्येकमप्यभिमतं प्रदातुमभिव्यक्तेश्च स्वातन्त्र्यमस्ति। एतदधिकारान्तर्गतं हस्तक्षेपं विनैवाभिमतं प्रस्थापयितुं केनापि सञ्चारमाध्यमेन

सीमाविचारं विना वा सूचनानामादानप्रदानयोः स्वातन्त्र्यमस्ति।

**अनुच्छेदः- 20.** (1) प्रत्येकमपि शान्तिपूर्वकं सम्मेलनाय संघटनाय च स्वातन्त्र्यस्याधिकारोऽस्ति।

(2) कमपि जनं कस्मिंश्चित्सम्मेलने संघटने वा सम्मेलयितुं न कश्चिद्विवशीकर्तुमधिकृतोऽस्ति।

**अनुच्छेदः- 21.** (1) प्रत्येकमपि स्वदेशस्य सर्वकारे (शासने) प्रत्यक्षतया स्वतन्त्रतापूर्वकं निर्वाचितप्रतिनिधिमाध्यमेन वा भागं गृहीतुमधिकृतोऽस्ति।

(2) प्रत्येकमपि जनः स्वदेशस्य लोकसेवायां तुल्यमधिकारं संधत्ते।

(3) लोकमतं सर्वकारीयप्राधिकारस्याधारो भविष्यति। अस्याभिव्यक्तिः कालबद्धेषु वास्तविकनिर्वाचनेषु भविष्यति, यानि निर्वाचनानि सार्वभौमिकैः समानमताधिकारैः गुप्तमतदानैः समतुल्यस्वतन्त्रमतदानप्रक्रियाभिश्च सम्पादितानि भविष्यन्ति।

**अनुच्छेदः- 22.** प्रत्येकं जनः समाजस्य सदस्यत्वेन सामाजिकसुरक्षामाप्तुमधिकृतो वर्तते। स च राष्ट्रियप्रयासेनान्ताराष्ट्रियसहयोगेन प्रतिराज्यगठनं संसाधनानुसारञ्च तादृशान् समस्तानप्यार्थिकसामाजिकसांस्कृतिकाधिकारानवाप्तुमर्हो भवति यत्तस्य गरिमायाः व्यक्तित्वस्य चोन्मुक्तविकासायानिवार्या भवन्ति।

**अनुच्छेदः- 23.** (1) प्रत्येकमपि कार्यं कर्तुं, नियोजनानां स्वतन्त्रचयनस्य, कार्याणां न्यायोचितस्थितीनाम् कार्याणामनुकूलदशानां, निर्वृत्तितानां विरुद्धे संरक्षणमवाप्तुमधिकारो वर्तते।

(2) प्रत्येकमपि किमपि विभेदं विना समानकार्याय समानवेतनस्याधिकारो वर्तते।

(3) यः कार्यं करोति तमेतादृशं प्रत्येकमपि जनं न्यायोचितमनुकूलं पारिश्रमिकञ्च प्राप्तुमधिकारोऽस्ति येन तस्य स्वात्मनः स्वकुटुम्बस्य च मानवगौरवानुरूपं जीवनं सुनिश्चितं स्यात् तथा चावश्यके सति सामाजिकसंरक्षणस्य विविधसाधनैस्तमनुपूरयितुं शक्येत।

(4) प्रत्येकमपि स्वहितं संरक्षयितुं व्यावसायिकसंघनिर्मातुं तत्र स्वात्मानं नियोजयितुञ्चाधिकारो वर्तते।

**अनुच्छेदः- 24.** प्रत्येकमपि विश्रामस्यावकाशस्य चाधिकारो वर्तते। यस्यान्तर्गतं कार्यहोराणां युक्तियुक्तसीमायाः पारिश्रमिकेन सह नियता-वधिकावकाशाश्चापि सन्ति।

**अनुच्छेदः- 25.** (1) प्रत्येकमपि तादृग्जीवनस्तरस्याधिकारोऽस्ति यत्तस्य स्वकीयस्य स्वकुटुम्बस्य च स्वाथ्यसंरक्षणाय कल्याणाय च पर्याप्तं स्यात्, तदन्तर्गतं भोजनं, वस्त्रम्, आवासः, चिकित्सा, आवश्यक-सामाजिकसेवाश्च सन्ति। निर्वृत्तितायां, रुग्णतायां, अशक्ततायां, वैधव्ये, वृद्धावस्थायां तथा च तस्य नियन्त्रणरहितासु परिस्थितिषु जीवनयापनाभावदशायां सुरक्षायाः पूर्णोऽधिकारो वर्तते।

(2) मातृत्वं बाल्यकालविशेषञ्च पालनाय साहाय्याय विशेषरूपेणार्हो भवति। अवैधा वैधाश्च सर्वेऽपि बालकाः समानं सामाजिकसंरक्षणमवाप्तुमर्हाः भवन्ति।

**अनुच्छेदः- 26.** (1) सर्वेभ्यो मानवेभ्यः शिक्षाया अधिकारोऽस्ति। न्यूनतमं प्राथमिकस्तरे मौलिकस्तरे च शिक्षा शुल्करहिता भविष्यति। तत्र प्राथमिकशिक्षा त्वनिवार्या भविष्यति। प्रौद्योगिकी (तकनीकि) शिक्षा, वृत्तिक-(व्यावसायिक) शिक्षायाः समुपलब्धता साधारणतया भविष्यति, उच्चशिक्षा च सर्वेभ्यो मानवेभ्यो गुणागुणाधारे समानरूपेण लभ्या भविष्यति।

(2) शिक्षाया लक्ष्यं मानवव्यक्तित्वस्य पूर्णविकासो मानवा-धिकाराणां मूलस्वातन्त्र्याणाञ्च कृते सम्मानवर्द्धिका भविष्यति। शिक्षैषा समस्तराष्ट्राणां मूलवंशविषयकानां धार्मिकसमूहानाञ्च मध्ये आदरस्य सहिष्णुतायाः सख्यभावस्य चाभिवृद्धये समुद्दिष्टा भविष्यति, सर्वत्र शान्तिस्थापनाय संयुक्तराष्ट्रसंघस्य कार्यकलापानग्रेसारयिष्यति।

(3) स्वीयान् बालकान् शिक्षयितुं विषयनिर्धारणे किं शास्त्रं पाठनीयं किं न पाठनीयमिति चयने पितरौ पूर्णरूपेणाधिकृतौ भविष्यतः।

**अनुच्छेदः- 27.** (1) प्रत्येकमपि मानवं समुदायस्य सांस्कृतिकजीवने मुक्तरूपेण भागं गृहीतुं कलानामानन्दगृहीतुं वैज्ञानिकप्रगतौ तल्लाभेषु च भागग्रहणाधिकारो वर्तते।

(2) स्वनिर्मितानां वैज्ञानिक-साहित्यिक-कलात्मककृतीनां परिणामस्वरूपं सम्भावितानां नैतिकभौतिकहितानां संरक्षणे सर्वेऽप्यधिकृताः सन्ति।

**अनुच्छेदः- 28.** अस्यामभिघोषणायां वर्णितानामधिकाराणां

स्वातन्त्र्याणाञ्च प्राप्तये सामाजिकान्ताराष्ट्रिय- व्यवस्थायाञ्च पूर्णतया एतान-धिगन्तुं प्रत्येकमपि जनोऽर्हो भविष्यति।

**अनुच्छेदः- 29.** (1) प्रत्येकं जनः तत्समुदायं प्रति कर्त्तव्यपरायणो भवेत् यत्र तस्य व्यक्तित्वस्य पूर्णस्वतन्त्रविकासः संभवेत्।

(2) सर्वेषामुपरि स्वाधिकाराणां स्वातन्त्र्याणाञ्च प्रयोगे सैव मर्यादा भविष्यति या खल्वन्येषामधिकाराणां स्वातन्त्र्याणाञ्च समीचीनां मान्यतां सम्यक् सम्मानं च सुनिश्चितीकर्तुं प्रजातन्त्रात्मके समाजे नैतिकतायाः लोकव्यवस्थायाः साधारणकल्याणस्य च न्यायोचिता अपेक्षाः पूरयितुं विध्यनुकूला स्यात्।

(3) कस्यामपि दशायामेतेषामधिकाराणां स्वातन्त्र्याणाञ्च प्रयोगः संयुक्तराष्ट्रसंघस्य सिद्धान्तान् विरुध्य न भविष्यति।

**अनुच्छेदः- 30.** अस्याः घोषणायाः न कोऽप्यंशः तथा व्याख्येयो भविष्यति येनेदं स्पष्टं भवेद्यदत्र कस्मैचिदपि राज्याय समूहाय व्यक्तिविशेषाय वा कश्चित्तादृशः क्रियाकलापः अधिकारो वा विवक्षितो वर्तते यस्य लक्ष्यमत्रोपवर्णितेष्वधिकारेषु स्वातन्त्र्येषु च कस्यचिद्विनाशोऽस्तीति।

**वैदिकवाङ्मये मानवाधिकारसूत्राणि**

विदितमेवास्ति यत्समस्तविश्ववाङ्मयस्य मूलस्रोतांसि वेदा एव सन्ति। वेदेषु सर्वविधज्ञानविज्ञानसूत्राणि सन्ति विद्यमानानि। वेदानां विषये भगवता मनुना प्रोक्तं यत् **सर्वज्ञानमयो हि सः**[१४] इति। मानवानां सर्वविध-कल्याणाय प्रवृत्ताः सन्ति। मन्त्रब्राह्मणारण्यकोपनिषदितिहासपुराणधर्मशास्त्राणि षड्वेदाङ्गानि च वैदिकवाङ्मयान्तर्गतान्येव सन्ति। वैदिकवाङ्मयेषु श्रेयःशास्त्रं प्रेयःशास्त्रञ्चोभयं समभावेन समेधितम्। तस्मात्समस्तानां धर्माणां मूलत्वेन वेदाः स्तुताः सन्ति। विश्वकल्याणाय सर्वविधसूत्रवर्णनपुरस्सरमखिलं विश्वमेकरूपं कर्तुं वेदेषु **यत्र विश्वं भवत्येकनीडम्**[१५] इति सूत्रं निर्दिष्टमस्ति। अमुमेव सूत्रमभिलक्ष्य संयुक्तराष्ट्रसंघेन मानवाधिकारमाध्यमेन समस्तं विश्वमेकीकर्तुं विश्वघोषणापत्रं प्रकाशितम्। मानवाधिकाराणां जागत-अभिघोषणापत्रे यानि तथ्यान्यूररीकृतानि तानि सर्वाणि वैदिकवाङ्मय-स्यावदानान्येव सन्तीति कथने नातिशयोक्तिर्भविष्यति। इतः पूर्वं मानवाधि-काराणां जागत-अभिघोषणापत्रोक्तानि त्रिंशदनुच्छेदेषूपवर्णितानि तथ्यानि प्रस्तुतानि, साम्प्रतं तेषां सूत्राणि वैदिकवाङ्मये कुत्र कथञ्चोपदिष्टानि

सन्तीति ब्रूमहे। आशासे विद्वांसो मच्छोधसरण्या सन्तुष्टाः सन्तो मानवाधिकाराणां जागत–अभिघोषणापत्रस्य वैदिकवाङ्मयादवदातत्वप्रतिपादनेन सहैकमता भविष्यन्ति। मानवाधिकाराणां जागत–अभिघोषणापत्रे प्रस्तुतानुच्छेदानुक्रमेणात्र वेदोक्तानि सूत्राण्युपस्थाप्यन्ते–

**अनुच्छेदः–1**

| | |
|---|---|
| परस्परं भावयन्तः श्रेयः परमवाप्स्यथ। | –गीता–3/11 |
| नूनं जनाः सूर्येण प्रसूताः। | –ऋ.सं.–7/63/4 |
| मित्रस्य चक्षुषा समीक्षामहे। | –शु.य.सं.–36/18 |
| मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुतस्वसा। | –अ.सं.–3/30/3 |

**अनुच्छेदः–2**

| | |
|---|---|
| पुरुष एवेदं सर्वम्। | –शु.य.सं.–31/2 |
| सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। | –प्रसिद्धसूक्तिः |
| स्त्री चाविशेषात्। | –का.श्रौ.सू.–1/1/7 |
| रथकारस्याधाने। | ,, –1/1/9 |
| निषादस्थपतिर्गावेधुकेऽधिकृतः। | ,, –1/1/12 |
| सर्वेषामविशेषात्। | ,, –1/1/3 |

**अनुच्छेदः–3**

| | |
|---|---|
| प्राणो हि भूतानामायुः। | – तै.सं.–8/3/1 |
| प्राणः प्रजानामुदयत्येष सूर्यः। | –मै.उप.–6/8 |
| प्राणं सूर्य उपासते। | – अ.सं.–11/4/12 |
| तनूषु विश्वा भुवनानि येमिरे। | – ऋ.सं.–10/56 |

**अनुच्छेदः–4**

| | |
|---|---|
| न मे दासो नार्यो महित्वा। | – अ.सं.–5/11/3 |

**अनुच्छेदः–5**

| | |
|---|---|
| सर्वभूतेषु चात्मानम्। | – शु.य.सं.–40/6 |
| सर्वभूतानि तृप्यन्तु। | – बौ.ध.सू.–25/9/14 |
| सर्वभूतहिते रताः। | गीता–5/24 |
| असंबाधं मध्यतो मानवानाम्। | अ.सं.–10/191/3 |
| मा हिंसीः पुरुषं जगत्। | – शु.य.सं.–16/3 |

तत्र हिंसा नाम मनोवाक्कायकर्मभिः सर्वभूतेषु सर्वदा क्लेशजननम्।
शाण्डिल्योप.–1/1

**अनुच्छेदः–6**

समानार्षेयोऽहं भोः। – शां.गृ.सू.–2/2/7

विश्वामित्रस्य रक्षति रक्षेदं भारतं जनम्। – ऋ.सं.–3/53/12

**अनुच्छेदः–7**

समानो मन्त्रः समितिः समानी। – ऋ.सं.–10/191/3

राजा राष्ट्रं विरक्षति। – अ.सं.–11/5/17

**अनुच्छेदः–8**

स्वयं श्रथ्नानो वरुणस्य पाशाद्। अ.सं.–11/1/15

मुञ्चन्तु मा शपथ्यात्। – ऋ.सं.–10/97/16

**अनुच्छेदः–9**

मुच्यमानो निरेनसः। – अ.सं.–12/2/12

**अनुच्छेदः–10**

शृणुतं म इमं हवम्। – ऋ.सं.–8/73/10

शृणोत नः सुमतिं यज्ञियासः। – मै.सं.–4/14/9

शृण्वतो देवा अवसे स्वस्तये। – ऋ.सं.–10/63/11

**अनुच्छेदः–11**

अनागो हत्या वै भीमा कृत्ये। – अ.सं.–10/1/29

अनाधृष्टं देवकृतं यदेनः। – मै.सं.–4/14/17

मा राजप्रेषितो दण्डः। – पा.गृ.सू.–3/15/20

**अनुच्छेदः–12**

मा मा हिंसीरधिगतं पुरस्तात्। – आप.श्रौ.सू.–7/6/5

मा मे प्रजया मा पशूनां मा मम प्राणैरप प्रसृप मोत्सृप।
– तै.आर.–1/14/2–4

**अनुच्छेदः–13**

सर्वा दिशो अभयास्ते भवन्तु। – अ.सं.–19/45/4

सर्वा दिशः पुरुष आबभूव। – अ.सं.–10/2/28

सर्वात्मा सर्वाः प्रजा सत्रैकं भवन्ति। – तै.आ.–3/11/2

पुनरस्ति निवर्तनम्। – अ.सं.–3/6/7

**अनुच्छेदः-14**

सर्वा लोकान् परिभूर् भ्राजमानः। - अ.सं.-13/2/10

सर्वा लोकान् अनृणा सञ्चरेमहि। - मा.श्रौ.सू.-25/2/22

**अनुच्छेदः-15**

राष्ट्राय मह्यं बध्यताम्। - अ.सं.-1/29/4

राष्ट्रं रोह च द्रविणं च रोह। - अ.सं.-13/1/34

मा त्वद्राष्ट्रमधिभ्रशद्। - शु.य.सं.-12/11

**अनुच्छेदः-16**

तस्मादु समानादेव पुरुषाद् अत्ता चाऽऽद्यः च जायते इदं हि चतुर्थे पुरुषे तृतीये सङ्गच्छामहऽइति विदेवं दीव्यमाना जात्या आसते। -

- श.प.ब्रा.-1/8/3/6

स्वयं यजस्व स्वयं जुषस्व। - शु.य.सं.-32/15

इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च।

गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः।।-मनु.-3/32

**अनुच्छेदः-17**

रयिं मे दाः। - अ.सं.-19/31/12

रयिं मे विश्वे नियच्छन्तु देवाः। - अ.सं.-18/3/11

रयिं नो देहि यज्ञियम्। - मै.सं.-4/10/5

रयिं नो देहि जीवसे। - शां.श्रौ.सू.-3/15/4

वयं स्याम पतयो रयीणाम्। - शु.य.सं.-10/20

अथानो वर्धया रयिम्। - शु.य.सं.-3/14

मा वयं रायस्पोषेण वियौष्म। - शु.य.सं.-4/22

**अनुच्छेदः-18**

धर्मो मा धर्मणः पातु। - मै.सं.-1/5/4

धर्मो मे जनपदे चर्यताम्। - कौशि.सू.-17/19

धर्मेण पापम् अप नुदन्ति। - तै.आर.-10/63/1

**अनुच्छेदः-19**

यद् वदामि मधुमत् तद् वदामि। - अ.सं.-12/1/58

यद् वाग् वदन्त्यविचेतनानि। - ऋ.सं.-8/100/10

यद् वाचो यच्च मे हृदः। - का.सं.-34/19

**अनुच्छेदः-20**

सभा च मा समितिश्चावताम्। - अ.सं.-7/12/1

सभ्य सभां मे पाहि। - अ.सं.-19/55/6

सङ्गत्यां सुमना असत। - ऋ.सं.-10/141/4

सङ्गच्छध्वं संवदध्वम्। - ऋ.सं.-10/191/2

**अनुच्छेदः-21**

राजा न मित्रं प्रमिणाति धीरः। - ऋ.सं.-9/97/30

राजा न सत्यः समितीरियानः। - ऋ.सं.-9/92/6

तत्र माममृतं कृधि। - ऋ.सं.-9/113/8

**आ त्वा हार्षमन्तरेधि ध्रुवस्तिष्ठाविचाचलिः।**
**विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधिभ्रशत्॥**
**इहैवैधि माप च्योष्ठाःपर्वत इवाविचाचलिः।**
**इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय॥**
**इममिन्द्रो अदीधरद् ध्रुवं ध्रुवेण हविषा।**
**तस्मै सोमो अधि ब्रवत् तस्मा उ ब्रह्मणस्परि॥**
**ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे।**
**ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम्॥**
**ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः।**
**ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्॥**
**ध्रुवं ध्रुवेण हविषाऽभि सोमं मृशामहि।**
**अथोत इन्द्रः केवलीर्विशो बलिहृतस्करत्॥**

-ऋ.सं.-10/173/1-6

**अनुच्छेदः-22**

सर्वतः परिरक्षतु। -ऋ.सं(खि.का.)10/127/11

शर्म विश्वमिदं जगत्। -तै.आ.-4/1/1

शर्म यच्छत् द्विपदे चतुष्पदे। -ऋ.सं.-10/37/11

**अनुच्छेदः-23**

युजो युज्यन्ते कर्मभिः। -शु.य.सं.-23/37

युजे वां ब्रह्म पूर्व्यं नमोभिः। -शु.य.सं.-11/5; ऋ.सं.-10/13/1

युजो युक्ति अभि यत् संवहन्ति। -ऐ.आर.-2/3/8/2,3

समानम् अन्नेनाप्यायस्व। - तै.आर.-10/36/1
समानम् अर्थं वितरित्रता मिथः। - ऋ.सं.-1/144/3
समानम् अर्थं चरणीयमाणा। - ऋ.सं.-3/61/3
समानं मन्त्रम् अभिमन्त्रये वः। - ऋ.सं.-10/191/3
समानां राजा विभृतः पुरुत्रा। - ऋ.सं.-3/55/4

एतदतिरिक्तं सोमयागे ऋत्विजां दक्षिणाविभागो द्रष्टव्यः। यथा- यथारम्भं द्वादश द्वादश आद्येभ्यः (ब्रह्मोद्गातृहोत्रध्वर्युभ्यः), षट् षड्द्वितीयेभ्यः (ब्राह्मणच्छंसिप्रस्तोतृमैत्रावरुण-प्रस्थातृभ्यः), चतस्रश्चतस्रस्तृतीयेभ्यः (पोतृप्रतिहर्त्रच्छावाकनेष्टृभ्यः), तिस्रस्तिस्र इतरेभ्यः (अग्नीत्सुब्रह्मण्य-ग्रावस्तुदुन्नेतृभ्यः) -का.श्रौ.सू.-10/2/24 । एवं क्रमेण शतं गवां दक्षिणादानं विधीयते।

**अनुच्छेदः-24**

प्राणा अवकाशाः। -श.प.ब्रा.-14/1/4/1; कौषी.-8/6
स इन्द्र एतमवकाशमपश्यत् तेनासुरानभ्यभवत्। -मैत्रा.-4/1/12

**अनुच्छेदः-25**

अग्नेऽभ्यावर्त्तिन्नभि मा निवर्तस्वायुषा वर्चसा प्रजया धनेन।
सन्या मेधया रय्या पोषेण। शु.य.सं.-12/7
आयुर्नो देहि जीवसे। - शां.गृ.सू.-1/25/7
आयुर्मे धेहि आयुर्यजमाने। - आप.श्रौ.सू.-5/1/14
आयुः प्राणं प्रजां पशून् कीर्तिम्। - अ.सं.-19/63/1
मातृदेवो भव। - तै.उप.-1/11/1
न हि माता पुत्रं हिनस्ति न पुत्रो मातरम्। -श.प.ब्रा.-5/2/1/18
पत्नीं मा हिंसीः। - आप.श्रौ.सू.-9/2/9
रक्षाणो अग्ने तनयानि तोका। - ऋ.सं.-10/1/8
शिशुं रिहन्ति मतयः पनिप्तम्। - ऋ.सं.-9/85/11

**अनुच्छेदः-26**

शिक्षा स्तोतृभ्यो मातिधग्भगो नः। - ऋ.सं.-2/11/21
शिक्षा सखिभ्यः पुरुहूत नृभ्यः। - ऋ.सं.-7/27/2
शिक्षन्तो नोप शेकिम। - अ.सं.-6/114/2
विद्यया देवलोकः देवलोको वै लोकानां श्रेष्ठतमस्तस्माद्विद्यां प्रशंसन्ति।

शा.प.ब्रा.–14/4/3/24

शिक्षा वस्वो अन्तमस्य। –ऋ.सं.–1/27/5

शिक्षाण इन्द्र राय आ। –ऋ.सं.–8/92/9

पितुर्न पुत्राः क्रतुं जुषन्त। –ऋ.सं.–1/68/9

पितृणां च मन्मभिः। –ऋ.सं.–8/41/2

**अनुच्छेदः–27**

समानं वा सजात्यम्। –ऋ.सं.–8/73/12

समानं व्रतं सह चित्तमेषाम्। –अ.सं.–6/64/2

समानजन्मा क्रतुरस्ति वः शिवः। –मै.सं.–2/13/10

आनन्दो मोदः प्रमोदः। –तै.सं.–3/10/1/1/3

आनन्दो ब्रह्मणो विद्वान्। –तै.उप.–2/4/1

आत्मा चात्मनि श्रितः, आत्मा हृदये, हृदयं मयि, अहममृते,
अमृतं ब्रह्मणि। –तै.ब्रा.–3/10/8/9

यत्रावहन्ति कवयः पुरूणि। –मा.श्रौ.सू.–1/7/3/42

**अनुच्छेदः–28**

यत्रोत मर्त्याय कम्। –ऋ.सं.–4/30/6

यो यदिच्छति तस्य तत्। –कठोपनि.–1/2/16

**अनुच्छेदः–29**

यत्र यन्ति सुकृतो नापि दृष्कृतः। –मै.सं.–1/2/15

यत्र सुहार्दः सुकृतो मदन्ते। –तै.आ.–9/113/11

प्राप्यैवं मानुषान् कामान्। –मा.गृ.सू.–2/11/11

प्रिये धामनि धामनि। –अ.सं.–12/1/52

प्रियो विशाम् अतिथिर्मानुषीणाम्। –ऋ.सं.–5/1/9

**अनुच्छेदः–30**

नैषा पितृन् गच्छति नोत देवान्। –आश्व.ध.सू.–2/7/17/8

नैनं हिन्वन्त्यपि वाजिनेषु। –ऋ.सं.–10/71/5

शासेन विशिशासिषद्। –शां.श्रौ.सू.–15/25

राजा राष्ट्रं विरक्षति। –अ.सं.–11/5/17

निधिरेष मनुष्याणाम्। –शां.गृ.सू.–1/2/8

एवंविधं वैदिकवाङ्मये बहूनि साक्ष्यभूतानि सूत्राणि मानवकल्याण–

सम्बद्धानि यत्र तत्रोपलब्धानि भवन्ति। तेषां समेषामत्र लघुनिबन्धे संयोजनमसम्भवमेवास्ति। तथापि यान्युपयोगीनि सूत्राणि मया प्राप्तानि तान्यत्र प्रस्तुतानि।

**उपसंहारः**

उपर्युक्तेन साक्ष्येन विवेचनेन चेदं सुस्पष्टं भवति यन्मानवकल्याणाय सर्वविधानि सूत्राणि वैदिकवाङ्मये सन्त्युल्लिखितानि। मानवाधिकारविषयकानि यावन्ति सूत्राणि वेदेषूपनिबद्धानि सन्ति तान्यादाय पृथग्ग्रन्थलेखनं कर्तुं शक्यते। अद्यत्वे आवश्यकमिदमस्ति यदेतेष्वाधुनिकविषयेषु नित्यनूतन-तथ्यानामाविष्कर्तुं बृहत्तमानि शोधकार्याणि स्युः। इतो भिन्नान्यपि मानवकल्याणसम्बद्धानि रहस्यात्मकानि तथ्यान्यादाय विश्वविद्यालयेषु शोधच्छात्राः कार्यं कुर्वन्त्विति।

एतदपि वक्तुमीहे यन्मानवाधिकारे वैदिकवाङ्मयस्यावदानमिति विषयस्थाने वैदिकवाङ्मये मानवाधिकारसूत्राणि इत्येषो विषयः समुचितः स्यादिति। यतस्तु वैदिकवाङ्मयस्येदं वैशिष्ट्यमस्ति यत्संसारस्य समस्तमपि वाङ्मयमित एवोपजीवितानि सन्ति। न केवलं सृष्ट्यारम्भादारभ्याद्यपर्यन्तमेवापितु युगयुगान्तराद्वैदिकवाङ्मस्य अविच्छिन्ना धारा प्रवहता सती सर्वलोकोपकारि-सिद्धान्तप्रतिपादनमुखेन जगत्कल्याणं सम्पादयति। तदुक्तमपि-

**युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।**
**लेभिरे तपसा पूर्वमनुज्ञाता स्वयम्भुवा॥**[१६]

इत्यनया सूक्त्या विस्पष्टं भवति यद्वेदानां समग्रमपि वाङ्मयं तपोनिरतैर्महर्ष्यादिभिः प्रत्यक्षीकृत्य जगत्कल्याणभावनया शिष्योपशिष्यपरम्परया प्रसारितम्। तदुक्तं यास्केन- **साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मेभ्य उपदेशेन मन्त्रान् सम्प्रादुरिति।**[१७]

वाङ्मयस्यास्य सकलविश्ववाङ्मयेषु श्रेष्ठत्वमुपपादयता वैदेशिकेन विदुषा मैकडोलनेनोक्तम्- **सर्वेषामपि सनातनानां साहित्यानां मध्ये वैदिकवाङ्मयं मौलिकतामूल्येन सौन्दर्यगुणप्रकर्षणेन च महत्त्वपूर्णपदमवाप। मानवप्रकृतिविकासानुशीलनस्य प्रधानसाधनता तु वेदेषु अन्यवाङ्मयेभ्यो निःसंशयम् उत्कृष्टा एव।** विण्टरट्जिमहोदयेनापि सर्वसंस्कृतिदर्शनयोर्विकासं विज्ञातुमस्याध्ययनं नितरां व्यपेक्षत इति प्रतिपदयता प्रोक्तम्- **यद्यस्माकं स्वसंस्कृतेरुपक्रमप्रक्रमाः बुभत्सिताः, यदि चास्माकं पुराणतम-**

**भारोपीयसंस्कृतिः विविदिषिता तदा यत्र भारोपीयजनानां वर्षिष्ठं वाङ्मयं सुरक्षितं तदा भारतवर्षमेव खल्वस्माकं गतिरिति।**

विषयस्य गाम्भीर्यं विलोक्येदमेव वक्तुमुत्सहे यत्-

**अनन्तशास्त्रं बहुलाश्च विद्या अल्पश्च कालो बहुविघ्नता च।**
**यत्सारभूतं तदुपासनीयं हंसो यथा क्षीरमिवाम्बुमध्यात्।।**

इत्यलमतिविस्तरेण।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. तै. उप.- 3/1
2. मणिमञ्जर्याम्- 1/2
3. मनुस्मृतौ- 1/8,9 श्लोकौ
4. ऋग्वेदे- 10/121/1
5. पा.सू.- 1/10
6. श.प.ब्रा.- 8/6/3/18
7. मनुस्मृतौ- 1/62-63
8. अमरकोशे- नृवर्गे प्रथमः श्लोकः।
9. पा.सू.- 4/1/161
10. निरुक्ते- 1/3/2/7
11. मैत्रायण्याम्- 4/2/1; तैत्तिरीयब्राह्मणे- 2/3/8/3
12. महाभारते- 1/75/12-13
13. साहित्यदर्पणे- 296
14. मनुस्मृतौ- 2/7
15. शु.य.सं.- 32/8
16. ऐतरेयब्राह्मणे सायणभाष्ये उपोद्घाते
17. निरुक्ते- 1/6/20

# मिथिलायां वेदाध्ययनपरम्परा

**प्रस्तावना**- विदन्त्येव भवन्तो यदनादिकालाद्वैदिकज्ञाननिधीनामविच्छिन्ना धारा विश्वस्मिन् सर्वत्राबाधगत्या प्रवहती सती अद्यावधियावद्यथावद्रूपेण प्रवहमाना दृश्यते। अस्याः धारायाः प्रवहणे विभिन्नर्षिमहर्षीणां, तपःपूतान्तःकरणानां मनीषिणां, विद्यावतां विदुषां, धर्माचरणशीलवतां राज्ञां, परिश्रमशालिनां जनानां, तत्तत्क्षेत्राणाञ्च महद्योगदानमस्तीत्यत्र नास्ति लेशतोऽपि सन्देहस्यावसरः।

वेदानामानन्त्यमस्माभिश्श्रूयते पठ्यते च समुपलब्धेषु श्रौतग्रन्थेषु। तदुक्तं तैत्तिरीयेण- **भरद्वाजो वै त्रिभिरायुभिर्ब्रह्मचर्यमुवास। तꣳ ह जीर्णꣳ स्थविरꣳ शयानमिन्द्र उपव्रज्योवाच- भरद्वाज! यत्ते चतुर्थमायुर्दद्यां किमनेन कुर्या इति। ब्रह्मचर्यमेवैनेन चरेयमिति होवाच। तꣳ ह त्रीन् गिरिरूपान् विज्ञातानिव दर्शयाञ्चकार। तेषां हैकैकस्मान्मुष्टिमाददे। स होवाच- भरद्वाजेत्यामन्त्र्य वेदा वा एते। अनन्ता वै वेदाः। एतद्वा एतैस्त्रिभिरायुभिरन्वोचथाः।**[१] तादृशा वेदा न हीदानीमनन्ताः समुपलभ्यन्ते। तदुच्यते यदनन्ता ये ज्ञानराशयो वेदास्सन्ति तेषां सर्वेषामेक एव नामासीद्वेद इति। तस्यैवैकस्य वेदस्यानेकशाखासु विभाजनं कृतं भगवता व्यासेनेति। तदुक्तं दुर्गाचार्येण निरुक्तविवृत्तौ- **वेदं तावदेकमतिमहत्त्वाद्दुरध्येयं सन्तं तेषामल्पायुषानल्पग्रहणशक्तिकानां सुखग्रहणाय व्यासेनानेकशाखाभेदेन समाम्नातवन्तः।**[२] एवमेक एव वेद आसीत्पूर्वमिति सिद्धं भवति। तदेवेकं वेदं भगवता व्यासेन ऋग्यजुस्सामाथर्वभेदेन चतुर्धा व्यस्य स्वशिष्येभ्यः पैलवैशम्पायनजैमिनिसुमन्तुभ्यः समुपदिष्टमिति। कालक्रमेण त एव चत्वारो वेदाः शिष्यप्रशिष्यपरम्परया चानेकशाखाप्रशाखादिभिस्सम्पन्नाः सन्तः पतञ्जलिकाले एकत्रिंशदुत्तरशताधिकसहस्रासु (1131) शाखासु विभक्ताः समुपलब्धाः पठनपाठनप्रक्रियायां प्रचलिताश्चासन्। तस्मादेव कारणान्महाभाष्यकाराणामियमुक्तिरस्ति- **एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः। एकविंशतिधा बह्वृचं नवधा अथर्वणो वेदः।**[३] अनेनेदं स्फुटं विज्ञातं भवति यद्वेदाः सन्त्यनन्ताः परं कालक्रमानुसारं तेषां सङ्कोचविकासौ भवतः। वेदविद्यायाः सङ्कोचकारणादेव महर्षिपतञ्जलिकाले सहस्राधिकमेकत्रिंशदुत्तरैकशताधिकं शाखाः समुपलब्धा आसन्। साम्प्रतिके काले

पतञ्जल्युक्तशाखास्वप्यत्यन्तन्यूना एव शाखा: समुपलभ्यन्ते। मन्ये यदन्यासां शाखानां विलोपो जात:। तत्र बौद्धजैनमुगलांग्लानामुत्पातजनितानि सन्त्यनेकानि कारणानि वेदविद्याविध्वंस- निमित्तानि समक्षमस्माकं विद्यमानानि। तदन्विहार्यजनतासन्त्रासाद्वेदानामनेका: शाखा विलुप्ता: सञ्जातेति दार्ढ्येन शक्यते वक्तुम्।

**भारतभुवि वैदिकी धारा-**

पराशरसत्यवतीसूनो: कृष्णद्वैपायनस्य महर्षेर्भगवतो व्यासस्य चत्वारो शिष्या: **पैलवैशम्पायनजैमिनिसुमन्तव**श्चासन्। तेभ्यो सौकर्येण वेदानामवगाहनं यथा स्यात्तद्दृष्ट्या विचिन्त्य यज्ञकर्मानुसारं ब्रह्मपरम्परया प्राप्तानां सकलवेदमन्त्राणां विभाजनं कृत्वा भगवता व्यासेन चतुर्भ्य: शिष्येभ्य: क्रमशो ऋग्यजुस्समाथर्ववेदानामुपदेश: कृत:। तदुक्तञ्चापि-

**तदृग्वेदधर: पैल: सामगो जैमिनि: कवि:।**
**वैशम्पायन एवैको निष्णातो यजुषामुत।**
**अथर्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनि:।।**[४]

पैलाय होतृकर्मसम्बद्धमन्त्राणां सङ्ग्रहस्य ऋग्वेदस्य, जैमिनये उद्गातृकर्मसम्बद्धमन्त्राणां सङ्ग्रहस्य सामवेदस्य, वैशम्पायनायाध्वर्यव-कर्मसम्बद्धमन्त्राणां सङ्ग्रहस्य यजुर्वेदस्य, सुमन्तवे च ब्रह्मकर्मसम्बद्धमन्त्राणां सङ्ग्रहस्याथर्ववेदस्योपदेश: कृत:।[५] चतुर्ष्वप्येतेषु व्यासशिष्येषु महर्षेर्वैशम्पायनस्य शिष्य आसीद्योगीश्वरो याज्ञवल्क्य:। कदाचित्कस्माच्चिदपि कारणात्क्रुद्धो वैशम्पायन: स्वशिष्यं याज्ञवल्क्यम्प्रति **मदधीतां विद्यां त्यज**[६] इत्यादिष्टवान्। गुरोराज्ञामनुपालयता याज्ञवल्क्येन योगबलादुद्वमनेन तां विद्यां मूर्त्तरूपेण तत्याज। याज्ञवल्क्यत्यक्तां तां मूर्त्तां विद्यां वैशम्पायनस्यान्ये शिष्यास्तित्तिरो भूत्वा भक्षितवन्त:। तस्मादेव कारणात्तानि यजूँषि कृष्णयजुर्वेदेन तैत्तिरीयशाखात्वेन चापरेण नाम्ना प्रसिद्धिङ्गतानि। वेदत्यागानन्तरं **याज्ञवल्क्य:** खिन्नेन मनसेतस्तो भुवि सञ्चरन्तो **मिथिलायां** समागत्य भगवन्तमादित्यं समाराध्य शुक्लानि यजूँषि प्राप्नोत्।[७] तथा च श्रुति:- **आदित्यानीमानि शुक्लानि यजूँषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते।**[८] अत्राह महीधर:- आदित्यादधीतान्यादित्यानि। शुक्लानि शुद्धानि। वाजस्यान्नस्य सनिर्दानं यस्य स वाजसनिस्तदपत्यं वाजसनेयस्तेन याज्ञवल्क्येन शिष्येभ्य आख्यायन्ते कथ्यन्त इत्यर्थ:। महर्षेर्याज्ञवल्क्यस्य पञ्चदश शिष्या आसंस्तस्माच्छुक्लयजुर्वेदस्य **( जाबाला:,**

**बौधेयाः, काण्वाः, माध्यन्दिनाः, शापेयाः, तापनीयाः, कपोलाः, पौण्ड्रवत्सकाः, आवटिकाः, परमावटिकाः, पाराशराः, वैनधेयाः, गालवाः, कात्यायनाः, बैजवापाश्च )** पञ्चदश शाखाः प्रसृता अभूवन्।

**याज्ञवल्क्यस्तु मैथिलः-**

स च याज्ञवल्क्यो मैथिल आसीदित्यस्मिन्विषये तावत्किञ्चिद्विचार्यते। योगीश्वरेण याज्ञवल्क्येन प्रणीता स्मृतिर्याज्ञवल्क्यस्मृतिरिति नाम्ना प्रथितास्ति। तस्यां याज्ञवल्क्यस्मृतौ श्लोकश्चैषो लभ्यते-

**मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाऽब्रवीन्मुनीन्।**
**यस्मिन् देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत॥**[९]

इत्यनेन स्मृतिवाक्येनेदं स्फुटं भवति यद्योगीश्वरो याज्ञवल्क्यो यदा बहुभिर्मुनिभिर्जिज्ञासितस्सन् धर्मविषयकमुपदेशं कुर्वन्नासीत्तदानीं सः यज्ञिये देशे मिथिलायामेवासीद्यत्र कृष्णो मृगः स्वाभाविकरूपेण सर्वदा विचरति। भगवता मनुना यज्ञियदेशस्य लक्षणमित्थं प्राह-

**कृष्णसारस्तु चरति मृगो यत्र स्वभावतः।**
**स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्त्वतः परः॥**[१०]

आभ्याम्मनुयाज्ञवल्क्ययोर्वचनाभ्यामिदं सिद्धमेव यन्मिथिला यज्ञियो देशोऽस्ति। श्रूयते यत्पुरा क्षीरसागरो यत्रासीत्तत्रैवाधुना मिथिलादेशः सुस्थितो वर्तते। क्षीरोदधेः स्थानविषये पुराणेष्वेवंभूतानि प्रमाणानि समुपलब्धानि भवन्ति। यथा- **क्षीरोदधेर्योत्तरतो हि द्वीपः श्वेतः स नाम्ना प्रथितो विशालः॥**[११] एतस्मादेव क्षीरोदधेः सकाशात् सागरं भित्वा धौतामलशिलातलः समुत्थितोऽभवत्। तस्मिन्नेव सरसि गजग्राहयोर्युद्धः सञ्जात इति वामनपुराणस्य गजेन्द्रमोक्षाख्याने वर्णितोऽस्ति। तद्यथा- **क्षीरोदजलवीच्यग्रैर्धौतामलशिलातलः। उत्थितः सागरं भित्वा देवर्षिगणसेवितः॥**[१२] **तस्मिन्सरसि दुष्टात्मा निगूढोऽन्तर्जलेशयः। आसीद्ग्राहो गजेन्द्राणां दुराधर्षो महाबलः॥** [१३] यत्र गजग्राहयोर्द्वन्द्वयुद्धोऽभवत् तत्स्थानं हरिहरक्षेत्रनाम्ना प्रसिद्धमस्ति यदधुना बिहारप्रान्तस्य सोनपुरस्थाननाम्ना प्रसिद्धमस्ति। अतिप्राचीनकालादेवात्र हरिहरक्षेत्रमेलापकस्यायोजनं भवति। साम्प्रतमप्यत्र जनाः प्रभूतमात्रायां समागत्य सश्रद्धं सोननद्यां स्नानादिकं कृत्वा स्वात्मानं धन्यं कुर्वन्ति। एतेनेदं ज्ञायते यद्यत्राधुना सोनपुरस्थानमस्ति तत उत्तरस्यां दिशि हिमालयो नाम नगाधिराजो यो हि श्वेतद्वीप उच्यते तस्यारम्भ आसीदिति। कालक्रमानुसारं

पृथिव्याः भौगोलिकी स्थितिः परिवर्तिता भवतीति वैदिकः सिद्धान्तो मान्यश्चा-धुनिकवैज्ञानिकसिद्धान्तैः। तस्मादेव प्रभावाद्यत्र पूर्वं सागर आसीत्तत्राधुना नगरं यत्र च पूर्वं नगरमासीत्तत्राधुना सागरो विद्यते। वैदिककाले प्रभूतजलयुक्ता प्रवहमाना विशाला च सरस्वती नदी नैव साम्प्रतिके काले दृग्गोचरी भवति। अनेकाः प्राक्तनाः स्थितयो न साम्प्रतं तथाविधाः परिदृश्यमाणास्सन्ति। अत एव चिन्त्यते यद्वेदेषु पुराणेषु च येषां रहस्यानां महत्त्वपूर्णं वर्णनमुपलब्ध मस्ति तेषां समस्तानां तथ्यानामवगाहनं यथा स्यात्तथाविधः समुचितः प्रयासः खल्वस्माभिः कर्त्तव्यः। तस्मिन् परिप्रक्ष्ये मयाऽधुना मिथिलायामबाधगत्या या वैदिकी परम्परा प्रचलिताऽऽसीत्तस्मिन्विषये तावत्किञ्चिद्विचार्यते।

**मिथिलायां प्रचलिता वैदिकी परम्परा–**

शतपथब्राह्मणानुसारं महर्षेर्गौतमस्य शिष्यो मथोः पुत्रो विदेघो नाम राजाऽऽसीद्यस्य मुखे वैश्वानरोऽग्निः प्रकटो भवतिस्म। कदाचिद् गौतमो विदेघश्चोभौ सरस्वत्यास्तटे भ्रमणं कुर्वन्तौ आस्ताम्। तदानीं गौतमेन पृष्टः सन् विदेघो न किमप्युत्तरयतीति दृष्ट्वा गौतमो राज्ञो विदेघस्य मुखे स्थितमग्निमनेकैः ऋङ्मन्त्रैः **वीतिहोत्रं त्वा कवे**[१४], **उदग्ने शुचयस्तव**[१५], **तन्त्वा घृतस्नवीमहे**[१६] इत्यादिभिस्तुष्टाव। गौतमो यदा ह्यन्तिमे मन्त्रे घृतशब्दस्योच्चारणं कृतवान् तदा वैश्वानरोऽग्निः घृतकीर्तौ तन्मुखादुज्जज्वाल। विदेघस्तमग्निं स्वमुखे धारयितुं न सक्षमोऽभवत्। फलतस्तन्मुखादग्निः विनिर्गतः सन् पृथिवीं प्राप्तवान्। माथवः (विदेघः) तापशमनाय तदानीं सरस्वत्यां नद्यां निमग्नोऽभूत्। तदानीं सोऽग्निस्तस्मात् स्थानादारभ्य प्राङ् दहन् पृथिव्यां यावत्योऽपि नद्यः सन्ति ताः सर्वा नदीरतिददाह। केवलमुत्तराद्गिरेः सकाशाद्या **सदानीरा**[१७] नाम्नी नदी प्रवहति तां नदीमितरनदीवत् नातिददाह। एवमुक्तप्रकारेण सर्वेषु देशेषु दग्धेषु विदेघः (माथवः) अग्निमेव प्रतीक्ष्योवाच– **क्वाहं भवानि?**[१८] इति पृष्टे सत्यग्निरुवाच– **अत एव ते प्राचीनं भुवनम्**[१९] इति। अर्थादस्याः सदानीरानद्याः पूर्वस्यां या मयाऽऽस्वादिता भूमिरस्ति तत्रैव त्वं निवसत्विति। सोऽयं देशः विगतान्नदीशरीरात् समुत्पन्नस्तस्माद्विदेह इत्युक्तः। विदेघराज्ञः प्रशासने चायं देशोऽग्निना संस्थापितस्तस्मादपि विदेहराज्ञो देशो विदेह इति प्रसिद्धिरस्ति। अत एव साम्प्रतमप्येषैव **सदानीरा नदी** कोसलदेशस्य च विदेहदेशस्य च मर्यादात्वेन दृश्यते।[२०] अनेनाख्यानेनेदं स्पष्टं भवति यद्विदेहदेशो गौतमविदेहयोर्यज्ञानुष्ठानद्वारैव विनिर्मितस्तस्माद्यज्ञियो देशोऽस्तीति।

श्रीमद्योगीश्वरो याज्ञवल्क्यो श्रुतिप्रसिद्धायामस्यां यज्ञियभूमौ विदेहे (मिथिलायां) स्थितस्सन् भगवन्तमादित्यमाराध्य वेदानामध्ययनं कृतवान्। तदारभ्य तेषां पञ्चदश शिष्यास्तदधीतवेदानां प्रचारं प्रसारञ्च चक्रुः। सैव परम्परा साम्प्रतं यावत्किञ्चित्क्वचिन्न्यूनाधिकरूपेण समस्तेऽप्युत्तरभारते प्रचलतीवावलोक्यते। भारतस्य पूर्वोत्तरभागे मिथिलादेशो वर्तते यत्रानेके गौतमयाज्ञवल्क्यादयो महर्षयः कपिलदेवलगोभिलबौधायनपराशर-कात्यायनादयो मुनयश्चाभूवन्। राजानोऽपि जनकादयो येषां गुणकीर्ति-र्भारतस्येतिहासे गौरवपूर्णं स्थानं बिभर्ति।[२१] मनीषिणश्चिन्तकाश्च मेधातिथि-कुमारिल-मण्डन-वाचस्पति-शङ्कर-हलायुध-गङ्गेशोपाध्याय-चित्रधरोपाध्यायादयः सञ्जाताः। येषां कृतयो न केवलं भारतभुव्येवापितु विदेशेष्वपि मान्याः प्रतिष्ठिताः पूजिताश्च सन्ति। अद्यापि तस्मिन् क्षेत्रे तपस्विनो महात्मानो मेधाविनो विद्वांसश्च विलसन्त्यनेके ये विविधगुरुकुलानां सञ्चालनं कृत्वा वेदविद्यायाः प्रचारं प्रसारञ्च कुर्वन्ति। अनेकान्युदाहरणभूतानि गुरुकुलानि मिथिलायां सन्ति यत्र वेदविद्यानामध्येतारो ब्रह्मचारिणस्तिष्ठन्ति वेदादिविषयाणां मूर्धन्या विद्वांसश्च विलसन्ति। मिथिलायां प्रचलितेषु विविध गुरुकुलेषु लगमाग्रामे स्थितस्य ब्रह्मचर्याश्रमस्य नाम गौरवेण स्वीक्रियते। प्रसङ्गवशादिह लगमास्थब्रह्मचर्याश्रमस्य संक्षिप्तपरिचयमुपस्थाप्यते।

**लगमाब्रह्मचर्याश्रमस्य परिचयः-**

मिथिलादेशस्य विस्तारो भारतवर्षस्य विहारप्रान्तस्योत्तरभू-भागादारभ्य नेपालदेशस्य च प्रसिद्धं स्थानं जनकपुरपर्यन्तमस्ति। तेनेदं विज्ञातं भवति यन्नेपालभारतयोः सीमाप्रान्तभागो मिथिलानाम्ना प्रसिद्धोऽस्ति। विहारप्रान्ते यन्मिथिलादेशक्षेत्रं तत्रानेकानि मण्डलानि समाविष्टानि सन्ति। मण्डलेष्वेषु दरभङ्गामण्डलस्य स्थानमत्युत्कृष्टं वर्तते। विहारप्रान्तस्य दरभङ्गामण्डले लगमाग्रामो विद्यते। तस्मिन् ग्रामे अस्त्येकं सुप्रसिद्धं गुरुकुलं **जगदीशनारायण-ब्रह्मचर्याश्रम**संज्ञकम्। अस्य गुरुकुलस्य संस्थापकाः साकेतवासिनो श्रीजगदीशनारायणब्रह्मचारिमहोदया आसन्। गुरुकुलेऽस्मिन् वेदवेदाङ्गादि-शास्त्राणामध्ययनाध्यापनञ्च भवति। अस्य गुरुकुलस्य स्थापना 1964 तमे वर्षे मईमासस्य 14 दिनाङ्के तदनुसारं वैशाखशुक्लाक्षयतृतीयायां सञ्जाता। अत्र ये ब्रह्मचारिणो वसन्ति तेषां भोजनवस्त्रावासव्यवस्था गुरुकुलेनैव क्रियते। अतिप्राचीनकाले ब्रह्मर्षिवसिष्ठसान्दीपन्योराश्रमयोर्ये नियमा आसन्

त एव एतस्मै ब्रह्मचर्याश्रमाय ब्रह्मचारिमहोदयैः प्रकल्पितास्तेषां नियमानां विधिवत्पालनमद्यापि तत्र भवत्येव। अस्माकं दौर्भाग्यं यत्ते महर्षयः साम्प्रतं सदेहमत्र न विराजन्ते परन्तेषामाध्यात्मिकशक्तिरद्यापि नः कल्याणं जनयति। अस्य महर्षेः स्थूलं शरीरं 2010 तमवर्षस्य दिसम्बरमासस्य 25 दिनाङ्के तदनुसारं पौषकृष्णचतुर्थ्यां तिथौ पूर्णमभवत्। तदनन्तरं तत्प्रदर्शितपथमग्रेसारयन्त आसन् श्रीमन्तो हरेरामदासब्रह्मचारिमहाभागा वर्तमाने बौआभगवानाख्या ब्रह्मचारिमहाभागास्तेषामुपस्थितौ साम्प्रतं शताधिका ब्रह्मचारिवटवस्तत्राश्रमे समुपस्थाय वेदादिविविधशास्त्राणामध्ययने तत्परा विद्यन्त इति हर्षस्य विषयः।

अस्मिन्नाश्रमे अनेके वेदवेदाङ्गमर्मज्ञा विद्वांसः काशीतोऽधीता व्याकरणशास्त्रपारङ्गताः सनकनन्दनाचार्याः, वेदस्य पारदृश्वानो राष्ट्रपति-सम्मानिताः चतुर्वेदमार्त्तण्डेत्यादिविरुदावलीभिर्विख्याताः पं.जगदानन्दझासदृशाः स्वज्ञानवैभवेनाश्रमस्थान् ब्रह्मचारिगणानध्यापयामास। एतस्माद्ब्रह्मचर्याश्रमा-दधीत्यानेके विद्वांसो देशस्य विविध- क्षेत्रेषु गत्वा वेदशास्त्र-गौरवमनुदिनमभिवर्द्धयन्ति। एतदतिरिक्तान्यन्यान्यपि गुरुकुलानि मिथिलायां प्रचलितानि सन्ति।

**निष्कर्षः**- उपर्युक्तविवेचनानुसारमेतत्तु सुस्पष्टमेव भवति यन्मिथिला वैदिककालादारभ्याद्यपर्यन्तं वेदविद्यायाः प्रचार-प्रसारायोत्कृष्टं स्थानमावहति। मिथिलाया एकं नाम तिरहुत इति प्रसिद्धमस्ति। तिरहुतशब्दस्यार्थं भवति तीरे तीरे (गृहे गृहे) हूयते तस्मात् तिरहुत इति। पूर्वमत्र सर्वेऽपि गृहस्थाः प्रतिदिनमग्निहोत्रं कुर्वन्ति स्म। वेदोक्तानामग्निहोत्रादारभ्य सोमपर्यन्तानां यज्ञानामनुष्ठानमत्र गृहे-गृहे भवति स्म। तस्याप्यनेके सन्दर्भाः समुपलभ्यन्ते। लघुकायेऽस्मिन्निबन्धे न तेषां सर्वेषामपि विवेचनं सम्भवमतोऽन्ये निबन्धे मिथिलायाः श्रौतयागपरम्परा इति शीर्षकमनुसृत्य प्रतिपादनं करिष्यामीत्यलमतिविस्तरेण।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः। जयतु मिथिलादेशः।**

पादटिप्पणी-

1. तै.ब्रा.- 3/10/11/3-4
2. निरुक्ते- 1/6/20 'बिल्मं भिल्मं भासनमिति वा' इति सूत्रव्याख्यानावसरे। भिल्मं वेदानां भेदनम्। भेदोऽत्र व्यासः। व्यसनं व्यासः।

3. महाभाष्ये पस्पशाह्निके।

4. नाग0 पुरा0 1/4/21

5. ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु। ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः।। (ऋग्वेदे- 10/71/11)

6. इत्युक्तो गुरुरप्याह कुपितो याह्यचलं त्वया। विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति।। श्रीमद्भागवते-12/6/63

7. देवरातसुतः सोऽपि च्छर्दित्वा यजुषां गणम्। ततो गतोऽथ मुनयो ददृशुस्तान्यजुर्गणम्।। श्रीमद्भागवते-12/6/64,

याज्ञवल्क्यस्ततो ब्रह्मंश्छन्दांस्यधिगवेषयन्। गुरोरविद्यमानानि सूपतस्थेऽर्क-मीश्वरम्।। श्रीमद्भागवते- 12/6/66

एवं स्तुतः स भगवान्वाजिरूपधरो हरिः। यजूँष्ययातयामानि मुनयेऽदात्प्रसादितः।। यजुर्भिरकरोच्छाखा दश पञ्चशतैर्विभुः। जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः।। श्रीमद्भागवते- 12/6/73-74

8. बृहदारण्यकोपनिषदि-5/5/33

9. याज्ञवल्क्यस्मृतौ- 1/2

10. मनुस्मृतौ- 2/23

11. महाभारते- 12/335/8 (शब्दकल्पद्रुमे- 5 भागे, 181 तमे पृष्ठे)

12. वामनपुराणे, गजेन्द्रमोक्षाख्याने-85/5

13. वामनपुराणे, गजेन्द्रमोक्षाख्याने-85/19

14. शु.य.सं.- 2/4, ऋग्वेदे- 5/26/3

15. ऋग्वेदे- 8/44/17 16. ऋग्वेदे- 5/26/2

17. सर्वदा नीरं जलमस्यामस्तीति व्युत्पत्त्या सदानीरा-इत्युच्यते। 'करतोया सदानीरा बाहुदा सैतवाहिनी' अमरकोशे, वारिवर्गे, श्लोकः-33 इत्यस्य पद्यार्द्धः। गौरीविवाहे कन्यादानजलादुत्पन्ना करतोया सदानीरा चेत्युभयनाम्ना प्रथिता नदी। पुलस्त्यतीर्थयात्रायां स्मृतावुक्तम्- **प्रथमं कर्कटे देवी त्र्यहं गङ्गा रजस्वला। सर्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी।।** इति।

18. शतपथब्राह्मणे- 1/4/1/17

19. शतपथब्राह्मणे- 1/4/1/17

20. शतपथब्राह्मणे- 1/4/1/10-20

21. कर्मणैव हि संसिद्धिमास्थिता जनकादयः। (गीतायाम्- 3/20)

## निरुक्ते षड्भावविकाराः

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।**[१]

इति स्मार्त्तवचनादिदं सुस्फुटमेव विज्ञातं भवति यत् यः स्वयम्भू परमात्मा सच्चिदानन्दघनलक्षणः तेनेयमनादिनिधना या नित्या वाक् सोत्सृष्टा। सा हि वाणी विश्वस्य प्रथमा वाणी आसीत्तस्माद्वेदमयी वागित्युक्ता। तयैव वाचेमाः सर्वा अपि प्रवृत्तयः क्रियारूपाः प्रादुर्भूताः। अत एवेयं वाक् वेदपदेन व्यपदिश्यते लोके। विदन्त्येव भवन्तस्सर्वे यत्समस्तज्ञानविज्ञानस्य मूलमुत्सो वेद इति। वेदानां षडङ्गान्युक्तानि यथा–

**शिक्षा–कल्पो व्याकरणं निरुक्तं छन्दसां चयः।**
**ज्योतिषामयनञ्चैव वेदाङ्गानि षडेव तु।।**[२]

वेदशरीरे वेदाङ्गानां कुत्र केनाङ्गरूपेण स्थितिरस्तीति वर्णनं कुर्वता भगवता पाणिनिना प्रोक्तं यत्–

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनञ्चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**[३]

यथा लोके मनुष्यशरीरस्यावयवानां व्यवस्था कल्पिताऽस्ति एवमेव वेदशरीरेऽपि तस्यावयवानां हस्तपादाक्षिश्रोत्रघ्राणमुखानां यथा–यथास्थानकल्पना कृताऽस्ति। तदन्विह छन्दःशास्त्रं पादस्थानीयं, कल्पशास्त्रं हस्तस्थानीयं, ज्येतिषशास्त्रं चक्षुस्थानीयं, निरुक्तशास्त्रं श्रोत्रस्थानीयं, शिक्षाशास्त्रं घ्राणस्थानीयं, व्याकरणशास्त्रञ्च मुखस्थानीयमुक्तम्। एभिरङ्गैस्सह वेदानधीत्य पार्थिवो जनो ब्रह्मलोके महीयत एवेत्युक्तमत्र। यद्यवयवैरपरिचितो भवति कश्चित्तर्हि प्राप्ते काले समक्षमुपस्थितमभीष्टं जनमपि परिचेतुमसमर्थो भवति विद्वान्। अतोऽवयवैस्सह परिचय एव सम्पूर्णः परिचयो भवति। अद्याप्यभिज्ञानपत्रेषु मुखावयवस्य छायाचित्रमावश्यकतया स्थापनीयं भवति। यतस्तु मुखं मुख्यं भवति। मुखस्य चित्रे कर्ण–नासिका–चक्षुषश्चित्रं स्वाभाविकरूपेण भवति। एकेनैव चित्रेण चतुर्णामङ्गानां परिज्ञानं साक्षादेव जायते। मुखस्य प्राधान्यं

प्राह महीदासेनैतरेयेण- **अग्निर्वै देवानामवमः परमो विष्णुः**[४] इति। मुखमध्ये भवत्यस्माकं वाक्तत्त्वमिति। **वाचीमा विश्वा भुवनान्यर्पिता**[५] इत्यनेन श्रौतवचनेनेदं स्फुटं भवति यद्वाक्तत्त्वमेव प्रधानमस्ति समस्तेऽपि क्षितिमण्डले। तद्वाचा यद्वदति तत्कर्णयोःशृणोति। वक्तुर्वचनं यदि कर्णाभ्यां सुष्ठुतया नहि श्रूयेत तर्हि वक्त्रा किमुक्तमिति सम्यक्तया नैव प्रतिपादयितुं शक्यते। अतो वागीन्द्रियस्य सफलता तदैव सिद्ध्यति यदा तदुक्तानां पदानां श्रोत्रेन्द्रियेण ग्रहणं भवेत्। मन्ये, अमृतं प्रवहति यदि तस्य धारको नास्ति तर्हि तत्प्रवाहो व्यर्थ एव कल्पते। एवमेव वक्तुर्वागीन्द्रियाद्यदा शब्दाः प्रभवन्ति तदा श्रोत्रेन्द्रियेण तस्य ग्रहणेनैव प्रतिष्ठा भवति नान्यथा। अतो वागीन्द्रिस्याधारः श्रोत्रेन्द्रियमस्तीति कारणाच्छ्रोत्रेन्द्रियस्य संरक्षणं परमावश्यकं मन्यते। तच्च वेदस्य श्रोत्रेन्द्रियरूपस्य निरुक्तशास्त्रस्य सर्वविध प्रयत्नेनाध्ययनाध्यापनादिना संरक्षणमस्माभिः करणीयमेवेति।

## निरुक्तस्य परिचयः-

**वेदार्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तमि**त्यनया परिभाषया वेदानामर्थावगमाय निरुक्तस्य यद्योगदानमस्ति तन्न कस्याप्यविदितमस्ति। अतो वेदमन्त्रोच्चारणं मुखेन जातं तस्य तात्त्विकेनार्थेनावगाहनं भवति श्रोत्रेण तस्मान्निरुक्तस्याध्ययनमिहापरि-हार्यत्वेनानिवार्यत्वेन चोक्तमस्ति। बहवो निरुक्तग्रन्थास्सन्ति परं न सर्वे समुपलब्धाः भवन्ति। साम्प्रतं यास्ककृतं निरुक्तमेवोपलभ्यते, तत्र नैघण्टुक-नैगम-दैवतानि च त्रीणि काण्डानि, चतुर्दशाध्यायाश्च सन्ति। प्रथमस्य नैघण्टुककाण्डस्य प्रथमेऽध्याये नामाख्याते चोपसर्गनिपाताश्चेति चत्वारि पदजातान्युक्तानि।

### नामाख्यातयोर्लक्षणम्-

नामाख्यातयोर्लक्षणं प्रस्तूयता भगवता यास्केन **भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानी**[६] त्युक्तम्। हरिणा प्रोक्तमपि- **धात्वर्थो भावना सैवोत्पादना सैव क्रिया इति च। असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते इति च। यावत्सिद्धमसिद्धं च साध्यत्वेनाभिधीयते। आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते।।**[७] इति च। स भावो यत्र प्रधानं तदिदं भावप्रधानम्। यदिदं भावप्रधानं तदाख्यातमित्युक्तं प्राक्। अत्र पुनः प्रश्नोत्पद्यते यदाख्यातं नाम किम्? तदुच्यते यत् आख्यायन्ते क्रियागुणभावेन वर्तमानानि स्त्रीपुंनपुंसकानि

अनेनेत्याख्यातम् (तिङन्तम्)। तत्पुनरेतच्चतुर्विधं भवति। कर्तरि भावे कर्मणि कर्मकर्तरि चेति। तत्र **पचति देवदत्त इति कर्तरि। भूयते देवदत्तेनेति भावे। पच्यते ओदनो देवदत्तेनेति कर्मणि। पच्यते ओदनः स्वयमेवेति कर्मकर्तरि** इत्युक्तं व्याख्याकारेण। आचार्यदुर्गस्तु नामपदवाच्यार्थाश्रयक्रियाव्यङ्ग्यो भावः पाकरागत्यागादिः स यत्र प्रधानं गुणभूता च क्रिया तदिदं भावप्रधानम्। किम्पुनस्तदिति? आख्यातम् आख्यायतेऽनेन गुणभावेन वर्तमाना कारक-प्रविभक्ता स्फुरमाणेव प्रधानद्रव्यभावाभिव्यक्त्युन्मुखीभूता क्रिया। तस्याश्च प्राधान्येन प्रवर्तमानो भावःस्वात्मलाभप्रधान इत्याख्यात इत्यादिस्वमतं सोपपत्तिकमुक्तवाँस्तत्तत एव स्ववधेयम्।

एवमुक्तप्रकारेणाचार्यैराख्यातस्य व्याख्यानं प्रतिपादितम्। इदानीं प्रसङ्गानुसारं नाम्नां लक्षणमुच्यते सत्त्वप्रधानीति। तदुच्यते यत् सीदति गच्छति लिङ्गसंख्यादिकमस्मिन्निति सत्त्वं (द्रव्यम्) षद्लृविशरणगत्यवसादनेष्वित्य-स्मादधिकरणे औणादिकस्त्वन्प्रत्ययः। तद्येषु प्रधानं गुणभूता च क्रिया तानीमानि सत्त्वप्रधानानि भवन्ति। अत्र प्रश्नो भवति यत्कानि पुनस्तानि? तदुच्यते यत् नामानि। नमन्त्याख्यातशब्दे गुणभावेन नमन्ति वा स्वमर्थ-माख्यातशब्दवाच्ये गुणभावेनेति नामानि। यथैव ह्याख्याते विद्यमानमपि द्रव्यमविवक्षितमेवमिहापि विद्यमानापि क्रिया अविवक्षिता, द्रव्यपरत्वात्सत्त्व-शब्दस्य तद्विक्रियाजनितमुत्तरकालं क्रियाशेषभूतमभिधाय धात्वर्थोऽसौ व्यावर्तते। स्त्रीपुंनपुंसकभेदं-निपातोपसर्गाणामपि वा क्वचिन्नामत्वमपेक्ष्य बहुवचननिर्देशो नामानीति।

वस्तुतः सत्त्वं सत्तेत्यनर्थान्तरम्। तदिह स्वार्थ इत्यप्युच्यते। स च प्रवृत्तिनिमित्तम्। यदर्थज्ञानाच्छब्दप्रवृत्तिस्तत्प्रवृत्तिनिमित्तम्। यथा सास्नादिमत्त्वं गोः, तदेव च गवि गोत्वम्। वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थिति-प्रकारत्वं प्रवृत्तिनिमित्तत्वमिति नव्याः। तदाश्रयो द्रव्यम्।

एके त्वाहुः- भाव-काल-कारकसंख्याश्चत्वारोऽर्था आख्यातस्य। तेषां मध्ये भावस्य प्रधानता भवति। अतो भावप्रधानमाख्यातमित्युक्तम्। नाम्नोऽपि सत्त्व-द्रव्य-संख्या-लिङ्गमित्येते चत्वारोऽर्थास्तेषां मध्ये सत्त्वं प्रधानमित्यतः सत्त्वप्रधानानि नामानीत्युक्तमिति।

**भावविकारनिरूपणम्-**

अयं भावः कार्यात्मा कारणात्मा चेति भेदेन द्विविधः प्रोक्तः।

तयोर्यः कार्यात्मा भावस्तमधिकृत्योक्तं **क्रियानिर्वर्त्यो योऽर्थः ( फललक्षणः ) स क्रियैव वा भाव इति।** वस्तुतः क्रियते या सा क्रिया। यदि तु क्रियतेऽनयेति करणसाधनः क्रियाशब्दस्तदावतारयतीदानीमित्यादि।

अथेदानीं कारणात्मा भावो निरूप्यते। तद्विकारा एव हि द्रव्यगुणकर्मभावेनावस्थिताः सन्तो नामाख्यातोपसर्गनिपातैरभिधीयन्त इति। तत्र विस्तरेणायं **षड्भावविकारा भवन्तीति वार्ष्यायणिः**[८] इत्यनेन सूत्रेण विधीयते। अत्राह दुर्गः- **उक्तो द्विविधो भावः कारणरूपः कार्यरूपश्च। तत्र कारणेऽविकृतत्वादभिन्न एवेत्यवगतम्। इदानीं कार्यरूपस्यानेकविकृतरूपत्वादविज्ञेयत्वेन निर्वक्तुमाह- ''षड्०........यणिः'' भाव उक्तलक्षणो नित्यं विकृतिकारणं तैर्विकारैर्विशिष्टः षट्प्रकारोऽभिधीयते उपचारतः। यतोऽयं विद्यमानतामेव भावशब्देनाभिधत्ते। तेन यो विद्यमानमात्रभवनात्मकः स एव भिन्नोऽभिधीयत इति॥**

अत्रेदं विचार्यते यद्वृत्तिकारेण कारणात्मा भावस्य विकारा भवन्ति न कार्यात्मन इत्युक्तं परं दुर्गाचार्यमतेन कारणात्मा भावो भवत्यविकृस्तस्मात्कार्यात्मा भावस्यैव विकारा भवन्तीति प्रतिपादितम्। तर्हि पक्षद्वयमवलोक्य शंशयः समुत्पद्यते कार्यात्मनो विकारा भवन्त्युत कारणात्मन इति। तदुच्यते यत्कारणं विना कार्यस्योत्पत्तिर्नैव सम्भवतीति सर्वैरङ्गीक्रियत एव। कारणे यदा विकारः समजायते तदैव किमपि कार्यं भवति। कार्यात्मनि तु विकारा सर्वदैव तिष्ठन्त्येव, यतस्तु कारणात्मनो विकारादेव कार्यात्मनः समुत्पत्तिस्तस्माद्यदा विकारस्य चिन्तनं क्रियते तदा न हि विकृतस्य विकारचिन्तनं भवत्यपित्वविकृतस्यैव विकारस्य चिन्तनं विधीयते। तस्मात्कारणात्मनो विकारा भवन्तीति सुतरां सिद्ध्यति। यथेदं समस्तं प्रपञ्चं परमात्मनो विवर्तोऽस्ति। ब्रह्मणि यदा सृष्टिभावना जागर्ति तदा तस्यैव विकारूपमिदञ्जगदुत्पन्नं भवति। अत एवेदं जगत्परमात्मनो विकारो विवर्तो वोच्यते दार्शनिकभाषायाम्।

यद्यपि भवतेः स्वपदार्थे भवनं भाव इति लक्षणविदो भावशब्दं विगृह्णन्ति। तस्य विकारा भावविकारास्ते च षड् भवन्ति। तद्भेदानाह- **जायते,ऽस्ति, विपरिणमते, वर्धते,ऽपक्षीयते, विनश्यतीति।**[९] तदेतेषां जन्मादीनां भावविकारशब्दानां मध्ये कः कस्यां विकारावस्थायामवस्थितं भावमाचष्टे कं वा विद्यमानमपि नाचष्टे कं वा प्रतिषेधतीत्युच्यते। तद्यथा-

**जायते- जायत इति पूर्वभावस्यादिमाचष्टे, नापरभावमाचष्टे, न**

**प्रतिषेधति।**[१०] अयं जायत इति शब्दः तदन्तर्वर्ति जन्धातुः पूर्वोक्तानां जन्यादिभावानां मध्ये पूर्वभावस्य प्रादुर्भावस्यादिमुपक्रमप्रभृत्यपवर्गपर्यन्तमाचष्टे ब्रवीति। अत एव पूर्वापरीभूतो भावशब्दवाच्यो हि तावदेव जायत इत्युच्यते यावन्निष्ठान्तशब्दवाच्यो भवति जात इति। तस्यां चावस्थायां नासज्जायत इति न्यायेन विद्यमानमपि अपरं भावम् अस्तिशब्दवाच्यं (अस्तित्वं) नाचष्टे, तस्यापरिपूर्णत्वात्। तस्यां हि अवस्थायाम् अनवधृतरूपं तद्भवत्यनुमानगम्यं किमपि जायत इति। नापि प्रतिषेधति अस्तित्वस्य प्रतिषेधं न करोति।

**अस्ति- अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम्**[११] इति। एष अस्तीति शब्द उत्पन्नस्य सत्त्वस्यावधारणं तन्मात्रं ब्रवीति। अपूर्णत्वात् विपरिणामं नाचष्टे। न च तं प्रतिषेधति, उपस्थिततत्वात्।

**विपरिणमते- विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारम्** [१२] इति। एष विपरिणमत इति शब्दोऽप्रच्यवमानस्य तत्त्वादपभ्रश्यमानस्य तत्त्वात्तद्भावादस्तित्वात्पुरुषत्वाद्वा विकारं विक्रियामात्रं ब्रवीति। न वृद्धिमाचष्टे, अपूर्णतवान्न च तां प्रतिषेधति, उपस्थिततत्वात्।

**वर्धते- वर्धत इति स्वाङ्गाभ्युच्चयं सांयौगिकानां वार्थानाम्**[१३] वर्धत इत्येष शब्दः स्वेषामङ्गानां शिरोग्रीवाबाहूदरादीनामभ्युच्चयमभ्युच्चिततां (संचयं) ब्रवीति। सांयौगिकानां संयोगजनितानां वा अर्थानां हिरण्यधान्यादीनाम-भ्युच्चयं ब्रवीतीति पूर्वेणाभिसंबध्यतेऽर्थवशात्। तत्प्रयोगमाह- वर्धते विजयेनेति वा वर्धते शरीरेणेति वा।। अत्राद्यमवरोहणक्रमेण सांयौगिकेषूदाहरणं द्वितीयं स्वाङ्गाभ्युच्चये। अत्र वर्धत इति ब्रुवाणो नापक्षयमाचष्टेऽपूर्णत्वात्। नापि तं प्रतिषेधति उपस्थिततत्वात्।

**अपक्षीयत इत्यनेनैव व्याख्यातः प्रतिलोमम्।**[१४] यथैव हि स्वाङ्गैः सांयौगिकैर्वा द्रव्यैरुपचीयते तथैवापक्षीयते। इत्येवमुपचयप्रयोगः पूर्वनिर्दिष्टः स अपक्षीयत इत्यनेनैव प्रतिलोमं विपरीतं व्याख्यातः। भवति हि वृद्धेः प्रतिलोममपक्षयः। प्रतिगतं लोम प्रतिलोमम्। तत्राप्यपरभावं नाचष्टे, न वा प्रतिषेधति।

**विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति।**[१५] विनाश एवात्रापरभावः तस्यादिमुपक्रमप्र- भृत्यपवर्गपर्यन्तमाचष्टे विनश्यतीति।तस्यां चावस्थायां विद्यमानमपि पूर्वभावमक्षीयतेरर्थं नाचष्टे न प्रतिषेधति सर्वं निरवद्यम्। स एव हि पूर्वापरीभूतो विनाशशब्दवाच्यः।

तावदेव हि विनश्यतीत्युच्यते यावन्निष्ठान्तशब्दवाच्यो भवति विनष्ट इति। हि अनपक्षीयमाणो विनश्येदिति।

**अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह।**[१६] इम एव भावविकाराः सन्ति किं वान्येऽपीत्यपेक्षायामिदं चतुर्थखण्डमारचयति।

अतो भावविकारषट्काद्येऽन्यत्वेनाभिमता भावविकारा लक्ष्यन्त इति शेषः। ते पृथक् पृथक् अत्यन्तभिन्ना अपि सन्तः एतेषामेव विकारा भवन्ति। तद्यथा–

(१) जनिशब्दवाच्यो भावविकारोऽनेकपर्यायशब्दवचनो निष्पद्यतेऽभिव्यज्यते उत्तिष्ठतीत्येवमादि।

(२) अस्तिशब्दवाच्योऽनेकप्रभेदभिन्नोऽनेकपर्यायवचनश्च, अस्ति विद्यते भवतीत्येवमादि।

(३) विपरिणमतिशब्दवाच्यो विपरिणमते जीर्यति भावान्तरमापद्यते इत्येवमादि।

(४) वर्धतेशब्दवाच्यो वर्धते पुष्यति उपचीयते इत्येवमादि।

(५) अपक्षीयतिशब्दवाच्यो ध्वस्यति भ्रश्यतीत्येवमादि।

(६) विनश्यतिशब्दवाच्यो विनश्यति म्रियते विलीयत इत्येवमादि।

**इति ह स्माह** आचार्यो वार्ष्यायणिरिति पूर्वोक्तमभिसंबध्यते, इति ह इत्ययं निपातसमुदायः पुरातीतवृत्ताख्याने। **ते यथावचनमभ्यूहितव्याः**[१७] त एते जन्यादिशब्दवाच्या विकारा वचनमनतिक्रम्य यथावचनं ये यस्मिन्वचनेऽवस्थिताः सन्ति ते प्रकरणोपपत्तिभ्यां मन्त्रार्थावधारणम्प्रति अभ्यूहितव्या अभितो वितर्क्याः प्रयुज्यमाना इति वाक्यशेषः। तदेते सर्व एव धातवो भाववचनास्तेषां सर्वेषामिहाध्ययने प्राप्ते शास्त्रातिगौरव-भयादेतल्लक्षणमुत्सृष्टम्।

**निष्कर्षः**– इयमत्र शास्त्रे व्याख्याशैली द्रष्टव्या– उद्देशो–निर्देशः–प्रतिनिर्देश इति। तत्रोद्देशः सूत्रस्थानीयः। तद्यथा– षड्भावविकारा इति। निर्देशो वृत्तिस्थानीयः। तद्यथा– जायते अस्ति विपरिणमत इति। प्रतिनिर्देशो वार्तिकस्थानीयः। तद्यथा– जायत इति पूर्वभावस्यादिमाचष्ट इति। एवं सर्वत्र यथासम्भवं योजनीयम्।

एवमुपर्युक्तेन विवेचनेनेदं ज्ञायते यदिमे भावविकारा न केवलं शब्देष्वेव भवन्त्युत सर्ववस्तुषु, सर्वजीवेषु, सर्वतत्त्वेषु च घटिता भवन्ति। वस्तूनामप्युद्भवः, अवस्थितिः, परिवर्तनं, वृद्धिः, ह्रासो, विनाशश्च जायन्त

एव। एवमेव जीवेष्वप्युद्भवास्तित्त्वपरिणामवृद्धिर्ह्रासविनाशभावाः सन्तिष्ठन्त्येव। जगत्यस्मिन् यावन्त्यपि तत्त्वानि सन्ति तेषु सर्वेषु तत्त्वेषु षडेमे भावविकाराः परिदृश्यन्त एव। अतो भावविकाराणामेषां सर्वत्रोपयुक्तता सिद्ध्यतीति नास्त्यत्र केषामपि काचिद्विप्रतिपत्तिरिति शम्।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. महाभारते- शान्तिपर्वणि-232/24
2. वैदिकसाहित्यं संस्कृतिश्च, 129 तमे पृष्ठे।
3. पा.शि.- 41-42
4. ऐतरेयब्राह्मणे-1/1
5. तै.ब्रा.-2/8/8/4
6. निरुक्ते-1/1/1
7. निरुक्ते मुकुन्दझावख्शीकृतटीकायामुल्लेखः।
8. निरुक्ते- 1/1/3
9. निरुक्ते- 1/1/3
10. निरुक्ते- 1/1/3
11. निरुक्ते- 1/1/3
12. निरुक्ते- 1/1/3
13. निरुक्ते- 1/1/3
14. निरुक्ते- 1/1/3
15. निरुक्ते- 1/1/3
16. निरुक्ते- 1/1/4
17. निरुक्ते- 1/1/4

## पौर्णमासस्य प्राथम्ये हेतुः

विदन्त्येव भवन्तो यच्चतुर्ष्वपि वेदेष्वाध्वर्यवकर्मनिरूपणात्मको यजुर्वेदः प्रशस्त इति। अध्वर्युशब्दस्य निर्वचनं प्रस्तूयता भगवता यास्केनोक्तम्- **अध्वर्युरध्वर्युरध्वरं युनक्त्यध्वरस्य नेता इति। अध्वर इति यज्ञनाम।** तस्मिन् यज्ञानुष्ठाने नेतृत्वं यः सम्पादयति सोऽध्वर्युरिति। तेनाध्वर्युणा सम्बद्धत्वा-दस्याध्वर्यववेद इत्यपरा संज्ञाऽस्ति। यजुर्वेदस्य ब्रह्मादित्यौ द्वौ सम्प्रदायौ स्तः। ब्रह्मसम्प्रदायस्य प्रतिनिधिः कृष्णयजुर्वेदोऽस्ति। यजुर्वेदस्य शुक्लत्व-कृष्णत्वयोर्भेदस्तस्य स्वरूपस्योपर्याश्रितोऽस्ति। शुक्लयजुर्वेदे दर्शपौर्णमासा-द्यनुष्ठानायैव मन्त्राणां सङ्कलनमस्ति। कृष्णयजुर्वेदे तु मन्त्रैस्सह तन्नियोजकानां ब्राह्मणानां सम्मिश्रणमस्ति। मन्त्रब्राह्मणयोरेकत्र मिश्रणमेव कृष्णयजुर्वेदस्य कृष्णत्वस्य मुख्यं कारणमस्ति। अनेनैव रूपेण मन्त्राणां विशुद्धं तथाऽमिश्रितरूपमेव शुक्लयजुर्वेदस्य शुक्लत्वस्य कारणमस्ति।

शुक्लकृष्णयजुषोः भेदनिरूपणे यदितिवृत्तं साम्प्रतमुपलभ्यते तत्र तित्तिरिरूपेण वान्तस्य (गृहीतपरित्यक्तस्य) यजुषां भक्षणात् तानि यजूँषि कृष्णत्वेन व्यपदिष्टानीति मुख्यम्मन्यते। तित्तिरिसम्बन्धाच्च तैत्तिरीयाभि-धानेनाप्यस्ति कृष्णयजुषां प्रसिद्धिः। परमेतदितिवृत्तं तर्कालङ्कृतमतिभिर्विद्वद्भिरेयैर्न सभाजनीयं भवति- इतिवृत्तस्यास्य काल्पनिकत्वसम्भवात्। तत्रेदमुच्यते यत् त्रीणि मन्त्रब्राह्मणारण्यकानि यस्मिन् वेदराशौ सह तरन्ति पठ्यन्ते, असौ तित्तिरिः कृष्णयजुर्वेद इत्येवं व्युत्पत्तिः **त्रि+तिर्+इ** इति विग्रहेण कर्तुं शक्यते। तित्तिरिसम्बन्धेन तैत्तिरीया इति ताः शाखास्तदनुयायिनश्चोच्यन्ते। तदुक्तं चरणव्यूहे-

**त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोस्सह।**
**यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः॥**[१]

कृष्णयजुर्वेदस्य षडशीतिसंख्याकाः शाखाभेदाः प्रोक्ताश्चरणव्यूहे। तासु तैत्तिरीयशाखा प्रधानत्वेन स्तुताऽस्ति। यतो हि साम्प्रतं षडशीत्यां शाखासु तैत्तिरीय-मैत्रायणी- कठ-कपिष्ठलाभिधेयाश्चतस्रः शाखाः प्राप्यन्ते। तत्रापि तैत्तिरीयशाखामन्तरा कस्या अपि सांहितिक्याः शाखायाः कृतपरिश्रमाः

पारम्पर्यानुगृहीताश्चाध्येतारो नोपलभ्यन्ते। असया: प्रसारदेश: दक्षिणभारतोऽस्ति।

**आदित्यानीमानि शुक्लानि यजूँषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते।**[२] इति शतपथश्रुत्या सूर्याद् याज्ञवल्क्यर्षे: शुक्लयजुषामध्ययनं ज्ञायते। याज्ञवल्क्योऽपि सूर्यात्प्राप्तं शुक्लयजुर्वेदं पञ्चदशशिष्येभ्य: समध्यापयत्। ते च शिष्या: स्वस्वपठितं शाखात्मकं वेदभागं स्वशिष्येभ्य: प्रोचु:। शाखापाठस्याद्यप्रवचनकृत: पञ्चदशयाज्ञवल्क्यशिष्या: कण्वादय आसन्नतस्तेषामेव नामधेयेन ताश्शाखा: सङ्केतिता:। ता एव पञ्चदशशाखा: शुक्लयजुषां चरणव्यूहेऽन्यत्र चोक्ता:।

शुक्लयजुर्वेदस्य पञ्चदशशाखानामध्येतार: सर्वेऽपि वाजसनेयिन इत्युच्यन्ते। सायणाचार्यो वाजसनेयपदमेवं व्याचष्टेवाज इत्यन्नस्य नामधेयम्, **अन्नं वै वाज** इति श्रुते:। वाजस्यान्नस्य सनिर्दानं यस्य महर्षेरस्ति सोऽयं वाजसनिस्तस्यापत्य: पुमान् वाजसनेयो याज्ञवल्क्य इति। श्रीधरस्वामिनस्तु रविणाऽश्वरूपेण वाजेभ्य: केसरेभ्यो वाजेन वेगेन वा सन्यस्ता: त्यक्ता: शाखा: वाजसनिसंज्ञा इत्याहु:। श्रीमद्भागवतेऽपि च-

**एवं स्तुतः स भगवान् वाजिरूपधरो हरिः।**
**यजूँष्ययातयामामनि मुनयेऽदात् प्रसादितः॥**
**यजुर्भिरकरोच्छाखा दश पञ्च च तर्विभुः।**
**जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः॥**[३]

इति सूतोक्त्या वाजसनेयशब्दोऽन्यथा व्याख्यायते।

वाजसनेयशाखासु सम्प्रति शाखाद्वयमेवोपलभ्यते। तत्रैका माध्यन्दिनीया, अपरा च काण्वसंज्ञिका। याज्ञवल्क्यान्माध्यन्दिनमहर्षिणा प्राप्तस्तेन चोपदिष्टो वेदभागो माध्यन्दिनीयशाखारूप:। अद्यत्वे माध्यन्दिनीया चैषा शाखा निखिले भारतवर्षे वाङ्मयवैपुल्येन कर्मकलापपरिगृहीततया च दृष्टप्रचारा वर्तते। अस्यां चत्वारिंशदध्यायेषु वैदिककर्मकाण्डस्यैव मुख्यत: प्रतिपादनमस्ति। आद्ययोरध्याययो: दर्शपूर्णमासेष्टिसम्बद्धा मन्त्रा: सङ्गृहीतास्सन्ति।

शुक्लयजुर्वेदस्योभयोरुपलब्धयो: काण्वमाध्यन्दिनशाखयो: शतपथब्राह्मणमुपलब्धमस्ति। ब्राह्मणग्रन्थेषु सर्वाधिकमहत्त्वशाली विपुलकायस्तथा यागानुष्ठानस्य सर्वोत्तमप्रतिपादको ग्रन्थ: शतपथब्राह्मणमस्ति। याज्ञवल्क्येन प्रोक्त: शतपथब्राह्मणग्रन्थो मनोरमरीत्या वैदिकविधानस्य याज्ञिकव्यवहारस्य च वर्णनं विशदतया प्रस्तौति। अत्र चतुर्दशकाण्डानि शतमध्यायाश्च सन्ति।

तत्राप्यादौ दर्शपूर्णमासेष्टेः वर्णनमस्ति। अस्य श्रौतसूत्रमपि कात्यायनेन विरचितमस्ति, तत्र षड्विंशत्यध्यायाः सन्ति। तत्रापि संहिताब्राह्मणोक्त-यज्ञानुष्ठानानां सविधिनिरूपणमस्ति। किञ्च येन क्रमेण यज्ञानां वर्णनं शुक्लयजुर्वेदीयमाध्यन्दिनसंहितायां प्राप्यते न तेनैव क्रमेण ब्राह्मणग्रन्थे श्रौतसूत्रे च यज्ञकर्मणां प्रतिपादनमुपलभ्यते।

तत्रेदमाशङ्क्यते यद्योगीश्वरेण याज्ञवल्क्येनैवादित्योपासनया शुक्लयलुर्वेदमधीतम्, शतपथब्राह्मणस्यापि प्रवचनं तेनैव कृतम्, तर्हि संहिताक्रमात् ब्राह्मणक्रमे पार्थक्यं कथमिति? यतो शुक्लयजुस्संहितायां प्रथमं दर्शयागस्य विधानं तदनन्तरं पौर्णमासस्य विधानमस्ति परं शतपथश्रुतौ पौर्णमासयागस्य वर्णनमादावुपलभ्यते। तत्र को हेतुरिति? जिज्ञासायां विचार्यते-

तत्रादौ **पूर्वपक्षः**- तैत्तिरीयसंहितायां **यत्पौर्णमासीं पूर्वामालभेत प्रतिलोममेवैनमालभेत**[४] इत्युक्तमस्ति। अनयोक्त्या पौर्णमासप्राथम्यस्य निन्दा कृताऽस्ति। तस्य वाक्यस्य सारस्वतहोमविधिशेषित्वेन पौर्णमासप्राथम्य-निन्दार्थवादात् **सारस्वतौ होमौ पुरस्ताज्जुहुयादमावास्या वै सरस्वत्यनु-लोममेवैनावालभते**[५] इति वचनं प्रोक्तम्। तेनेदं सिद्धं यद्दर्शयागो प्रथमोऽनुष्ठेयोऽनुलोमः पौर्णमास इति। अस्तु, तैत्तिरीयशाखाया आदित्यपरम्परया प्राप्तेभ्यो माध्यन्दिनादिशाखारूपेभ्यो वेदेभ्यः प्राचीनत्वात्तस्य वाक्यस्य प्रामाण्याधिक्याच्च दर्शेष्ट्यनुष्ठानस्यैव विधानमादौ लभ्यमानत्वात्, शुक्लयजुर्वेदसंहितायाञ्चापि दर्शयागस्यैवादौ पाठाद्दर्शेष्टेरनुष्ठानमादावेव स्यादिति निश्चीयते। तथापि शतपथब्राह्मणे श्रौतसूत्रे च पौर्णमासयागस्य विधानमादौ विहितमिति श्रुतिविरोध एवावगम्यते। कथमेतत्?

**उत्तरपक्षः**- उत्तरपक्षमाश्रित्य पूर्वपक्षोक्ततथ्यस्य स्पष्टीकरणं विध ीयते। पूर्वपक्ष- रूपेणोपस्थापितयाः शङ्कायाः समाधानं विधातुमत्र षड् हेतवः प्रस्तूयन्ते, यैः पौर्णमासस्य प्राथम्यं सुतरां सिद्ध्यति। ते यथा-

1. अत्रेदमुच्यते **यद्यावज्जीवं दर्शपूर्णमासाभ्यां यजेत। ताभ्यां यावज्जीवं यजेत। त्रिंशतं वा वर्षाणि। जीर्णो वा विरमेत।**[६] इत्यापस्तम्बवचनाद्यावज्जीवं दर्शपूर्णमासयोरनुष्ठानमग्निहोत्रिभिः कर्त्तव्यमिति बुध्यते। तत्राग्निपरिग्रहणा- यामावास्या पूर्णमासी चोभे तिथी विहिते स्तः। तदुक्तमपि- **अमावास्यायां पौर्णमास्यां वा आधेयः।** [७] क्वचित् क्वचित्त्वमावास्या एवाधानायोपदिष्टा। यथा- **अमावास्यायामग्न्याधेयम्**[८] इत्याहुः कात्यायनादयः।

इत्यस्यां परिस्थितौ चिन्त्यते यद्यदि यजमानः पौर्णमास्यामग्न्याधानं कुर्यात्तर्हि प्रथमपौर्णमास्यां प्राप्तौ सत्यां पौर्णमासमनुतिष्ठेत्। अमावास्यायामग्न्याधानं कुर्याच्चेत्तर्हि पौर्णमासागमनस्य प्रतीक्षां कुर्यात्तथा आगामिशुक्लपक्ष आगतायां पौर्णमास्यां सत्यां प्रथमां पौर्णमासेष्टिमनुष्ठायानन्तरं दर्शयागमनुतिष्ठेदिति याज्ञिकानाम्मतम्। यथा ह्यग्निहोत्रस्य सायमुपक्रमः (प्रारम्भः), प्रातरपवर्गः (समाप्तिः) प्रोक्तस्तथैवेष्टेः पौर्णमासेनारम्भः, दर्शयागेन च समाप्तिरित्युच्यते। अत्राह यज्ञतत्त्वप्रकाशकारः- **पौर्णमास्यां प्रातरारभ्य प्रतिपदि पूर्वाह्णे समापनीयम्। एवममावास्यायां प्रातरारभ्य तदनन्तरप्रतिपदि पूर्वाह्णे समापनीयम्। प्रतिदिनं सायं प्रातश्चाग्निहोत्रं जुह्वत् समनन्तरभाविन्यां पौर्णमास्यां मलमास-शुक्रास्तादिदोषरहितायाम्, अन्वारम्भणीयेष्ट्यनुष्ठानपूर्वकं दर्शपूर्णमासा-वारभेत। आरभ्य पूर्वं तस्मिन् पर्वणि पौर्णमासं यागमनुतिष्ठेत्, अनन्तरस्मिन् दर्शे दर्शयागम्।**[९] समस्तानामपीष्टीनां प्रकृतिर्दर्शपौर्णमासावुक्तौ। तत्रापि पौर्णमासः प्रथमोऽनुष्ठेय इति विधानादिदं सिद्ध्यति यत्पौर्णमासादेवेष्टेरारम्भो भवतीति।

2. **उदान एव पूर्णमा उदानेन ह्ययं पुरुषः पूर्यतऽइव, प्राण एव दर्शो ददृश इव ह्ययं प्राणस्तदेतावन्नादश्चान्नप्रदश्च दर्शपूर्णमासौ। प्राण एवान्नादः। प्राणेन हीदमन्नमद्यतऽउदान एवान्नप्रद उदानेन हीदमन्नं प्रदीयते।**[१०] इत्यनया शतपथश्रुत्युक्त्या पौर्णमासस्योदानत्वमन्नप्रदत्वञ्चोक्तम्, दर्शस्य च प्राणरूपत्वमन्नादत्वञ्चोक्तमिति। तत्रेदमुच्यते यद्यदा कश्चिदन्नप्रदानं करोति तदैवान्यः कश्चिदन्नादोऽन्नभक्षणे समर्थो भवति। अत उभयोर्मध्येऽन्न-प्रदातुरुपस्थितिरेवादावुचिता नत्वन्नादस्य। चिन्त्यतां तावत् यज्ञे यजमान एवादौ शालायामागत्य देवानाह्वयति, आह्वानानन्तरमेव देवता समागच्छति। यतो हव्यदातिरिति यजमानस्यापरन्नाम। हव्यदातुरभावे हविर्ग्रहणकर्तृणां देवानामुपस्थितिर्न विहिताऽस्ति। एवमेवान्नप्रदः पूर्णमासः प्रथममनुष्ठेय-स्तदनन्तरमन्नादरूपो दर्श इति। एतस्मादेव कारणात्पौर्णमासेष्टिरुदान-त्वादन्नप्रदातृत्वाच्च प्रथममनुष्ठीयते, तदनन्तरं प्राणरूपाया अन्नादमय्याश्च दर्शेष्टेरनुष्ठानं क्रियत इति मामकीनम्मतम्।

3. महर्षिणा कात्यायनेन स्वकीये श्रौतसूत्रे दर्शेष्टिप्रयोगे **पौर्णमासवदन्यत्**[११] इत्यनेन सूत्रेण पौर्णमासस्य दर्शेष्टावतिदेशः प्रोक्तः। अनेनापि कथनेन दर्शयागस्य प्रकृतित्वात्पौर्णमासस्य प्राथम्यं सिद्ध्यति।

4. शतपथब्राह्मणे- **पौर्णमासेन चैवामावास्येन च, पौर्णमासीं**

**चामावास्याञ्च तत्पर्वाभिषज्यन्**[१२] इत्युक्तम्। अत्रापि पौर्णमासपर्वस्यानुष्ठानं प्रथममेव विहितम्।

5. तैत्तिरीयब्राह्मणे– **पौर्णमासं हविरिदमेषां मय्यामावास्यं हविरिदमेषां मयि**[१३] इत्युक्तम्। एतयोरन्वाधानानुमन्त्रणयोर्यजमानमन्त्रयोः पाठक्रमादपि पौर्णमासस्य प्राथम्यमवगम्यते। तत्रापि विशेषेण **अमावास्या वै सरस्वती पौर्णमासः सरस्वान्**[१४] इत्युक्त्या अमावास्यायाः स्त्रीत्वं पौर्णमासस्य च पुंस्त्वं प्रसिद्धम्। सामान्यतः लोकेऽप्येतादृशो व्यवहारो दृश्यते यद्यदा स्त्रीपुरुषयोरेकदैव नामोच्चारणं क्रियते तदा पूर्वं स्त्रियाः नामग्रहणमनन्तरं पुंसो नामग्रहणं क्रियते। यथा मातापितरौ, सीतारामौ, राधाकृष्णौ, लक्ष्मीनारायणौ इत्यादि। एवमेवात्रापि दर्शस्य स्त्रीत्वात्तस्य प्रथमं नामग्रहणमुक्तं वेदे। आदौ नामग्रहणादादौ तस्यानुष्ठानस्य प्रामाण्यं न सिद्ध्यति। अतस्तेनापि पौर्णमासस्य प्राथम्यं न बाध्यते।

6. दर्शेष्टौ महेन्द्रदेवतायै सान्नाय्यहविषो निर्माणं क्रियते। सान्नाय्यं नाम दधिपयसोर्मिश्रणमिति। **दधिपयोभ्यां तन्त्रेण यागः**[१५] इत्याह देवयाज्ञिकः। अत्रेदमुच्यते यदिन्द्रो दर्शेष्ट्या बलमवाप्य वृत्रनामासुरं हन्तुं शक्तोऽभवत्। तेनेदं सिद्धं यद्दर्शेष्ट्या बलस्योत्पत्तिर्भवति, पौर्णमासेन च रसस्येति रसबलयोस्सम्मिश्रणेनैवास्य जगतो निर्माणं भवति। अत एव दर्शपूर्णमासाभ्यां जगतः सृष्टिरिति वैदिकविज्ञानविदः कथयन्ति। शतपथश्रुतौ– **रसः सोमः**[१६] इत्युक्तः। **सोमेनादित्या बलिनः सोमेन पृथिवी मही।**[१७] इत्यनेन ऋङ्मन्त्रेणेदं स्पष्टं यत्सोमेनादित्यो बलवान् भवतीति। स च सोमः रसरूप उक्तस्तस्माद्रसो बलरूपतां यातीति सिद्धमेव। तात्पर्यमिदमस्ति यत्सोमप्रधानाच्चन्द्रमण्डलाद् रेतोरूपं बलं जायते, तत एव जीवशरीरं निर्वर्तते। रेतश्शब्दश्चायं तत्तदुत्पादके सर्वत्रैव व्यवहृतः। यथा **हिरण्यरेता**[१८] इत्यग्निरुच्यते। अग्नेः सारभूतादंशाद्धिरण्यं जायत इति हिरण्यस्याग्निरेतस्त्वं व्यवहृतम्। एवमेव **कृशानुरेता**[१९] इति रुद्र उच्यते। अत एवोक्तम्–

**सूर्याद्भवन्ति भूतानि सूर्येण पालितानि तु।**
**सूर्ये लयं हि गच्छन्ति यः सूर्यः सोऽहमेव च।।**[२०]

अर्थाद्रससङ्ग्रहेणादित्यरूपस्य बलस्य निष्पत्तिस्तस्मादादित्यात्सर्वाणि भूतानि जायन्ते, तेनैव संरक्ष्यन्ते, तस्मिन्नेव च लीयन्त इति। तदुक्तं यास्केन– **आदत्ते रसानादत्ते भासं ज्योतिषां वेति आदित्यः।**[२१] अतो

रसाद्बलप्रभवत्वात्प्रथमं रसरूपस्य पौर्णमासस्यानुष्ठानमेवोक्तम् अनन्तरं बलरूपस्य दर्शस्येति।

**निष्कर्षः-**

एवमुक्तप्रकारेण पौर्णमासस्य प्राथम्यं साधयितुं षड्हेतवः प्रदर्शितास्तेन पूर्वपक्षे समुत्थापितायाः शङ्कायास्समाधानं भवत्येव। एतदतिरिक्तान्यपि बहूनि प्रमाणानि शास्त्रेषूपलभ्यन्ते यथा- दर्शपूर्णमासपदे दर्शशब्दस्यादौ प्रयोगः कथमित्याशङ्कायामुच्यते यदाचार्यपाणिनिना **अल्पाच्तरम्**[१२] इति सूत्रं सूत्रितम्, येनेदं स्पष्टं भवति यदल्पगुणस्य पदस्य प्रयोगो गुरुतराच्छब्दात्पूर्वमेव कर्त्तव्यः। अनेनैव सूत्राधारेण दर्शस्य पौर्णमासादल्पत्वात् प्रथमः प्रयोगो विहितोऽस्ति, न तु प्रथममनुष्ठेयत्वादिति। एवमनेकानि प्रमाणानि श्रौतग्रन्थेषूपलब्धानि भवन्ति येन पौर्णमासस्य प्राथम्यं सिद्ध्यति। विषयेऽस्मिन् विशिष्टस्य शोध कार्यस्यावश्यकता विद्यते। नात्र लघुनिबन्धे सर्वेषामपि प्रमाणानां समावेशः कर्तुं शक्यते। अत एतदेवोक्त्वाऽहं स्वीयां लेखनीं विरमामीत्यलमति विस्तरेण।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. चरणव्यूहे-यजुर्वेदखण्डे तैत्तिरीयशाखापरिचायनप्रसङ्गे।
2. श.प.ब्रा.- 14/9/4/33
3. श्रीमद्भागवते- 12/6/73-74
4. तैत्तिरीयसंहितायाम्- 3/5/1/5
5. तैत्तिरीयसंहितायाम्- 3/5/1/6
6. आपस्तम्बश्रौतसूत्रे- 3/14/10
7. आपस्तम्बश्रौतसूत्रे- 5/3/16 अमावास्यायां पौर्णमास्यां वादधीत- शां.श्रौ.सू.-2/1/7
8. का.श्रौ.सू.- 4/7/1, अमावास्यायामेवाग्नी आदधीत- श.प.ब्रा.-11/1/1/6
9. यज्ञतत्त्वप्रकाशे- 14-15 तमपृष्ठयोः।
10. श.प.ब्रा.-11/2/4/5-6
11. का.श्रौ.सू.- 2/2/44
12. श.प.ब्रा.- 1/6/3/36

13. तै.सं.- 3/7/4/8
14. तै.सं.- 3/5/1/5
15. दे.या.प.- 80 तमे पृष्ठे।
16. श.प.ब्रा.- 7/3/1/3
17. ऋ.सं.- 10/85/2
18. अमरकोशे, स्वर्गवर्गे, श्लोक-55
19. अमरकोशे, स्वर्गवर्गे, श्लोक-33
20. सूर्योपनिषदि-
21. नैघण्टुककाण्डे-2/4/13
22. पा.सू.-2/2/34

# राष्ट्रीयतासंरक्षणे प्रातिशाख्यस्य योगदानम्

सर्वप्रथमं राष्ट्रीयताशब्दोऽत्र विचार्यते। तत्र राष्ट्रे भवः राष्ट्रीयः, तद्धितप्रकरणानुसारं तल् प्रत्यये कृते सति राष्ट्रीयताशब्दः सिद्ध्यति। तद्धितप्रत्ययाः खलु संज्ञा-सर्वनाम-विशेषणाव्ययपदेष्वन्ते प्रयुज्यन्ते। अत्र राष्ट्रमिति संज्ञापदं तत्सम्बन्धिनीत्वाद्राष्ट्रीयः इति पदं सिद्धम्, तत्र तल्प्रत्यये कृते सति राष्ट्रीयतेति सिद्धम्। राष्ट्रमिति शब्दोऽपि 'राज्' धातोः 'ष्ट्रन्' प्रत्यये कृते सति निष्पद्यते, यस्यार्थो भवति देशः, विश्वम्, साम्राज्यमिति। सर्वेऽपि विचक्षणाः विदन्त्येव यद्राष्ट्रे राजा भवति, राज्ञो व्यवस्थामनुपालयितुं मन्त्रिणो भवन्ति, राज्ञः शासनान्तर्गतजीवनयापनकर्तारो प्रजाजनाश्चेत्येते सर्वे सन्त्यावश्यकाः। तदनुसारमस्माकं वैदिकग्रन्थेषु बहूक्तम्। यथा-**असौ वा आदित्यो राष्ट्रम्**[१], **सविता राष्ट्रं राष्ट्रपतिः**[२], **राष्ट्राणि वै विशः**[३], **वयं राष्ट्रे जागृयाम पुरोहिताः**[४], **लोकं पृण छिद्रं पृण**[५], **विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्**[६] इति।

उपर्युक्तेषु श्रौतवाक्येषु द्युलोकादारभ्य पृथिवीलोकपर्यन्तस्य समस्तस्यापि विश्वमण्डलस्य कृते राष्ट्रमित्येष एव शब्दव्यवहारो दृश्यते। तस्मादेव कारणात् न क्वापि देशानां पृथङ्नामान्युक्तानि वेदेषु। तत्र तु केवलं लोका एवोक्ताः। समस्तेष्वपि लोकेषु लोकपालाः भवन्ति। लोकपालानां दिक्पालानाञ्च प्रभुरीश्वरः राजा वा इन्द्र उक्तः। इन्द्रविषये भगवता यास्केनोक्तं-**या च का च बलकृतिरिन्द्रकर्मैव तत्।**[७] इत्यनेन यास्कोक्तवचनेन बलात्मककर्मसम्पादकत्वेनेन्द्रः स्तुतः। विष्णुरपि बलात्मककर्माणि करोत्येव। यथोक्तं विष्णुसूक्ते-**विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि।**[८] इत्यत्र विष्णोः पराक्रमस्य प्रदर्शनं कृतमस्ति। इन्द्रसूक्ते च-**इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री।**[९] अत्र इन्द्रस्य पराक्रमो वर्णितः। एवमुभयोरपि विष्ण्विन्द्रदेवतयोर्वीर्याणि प्रदर्शितानि। तत्र विष्णुसूक्ते-'पार्थिवानि' इति पदमुक्तम्। तस्मिन्विषये सायणाचार्य आह-**लोकत्रयस्य पृथिवीशब्दवाच्यम्** इति स्वकीये भाष्ये। इन्द्रस्तुतौ 'वज्री' इति पदस्य व्यवहारः। तस्यायमर्थः वज्रेण युक्तोऽसाविति। रुद्रसूक्तेऽपि एतादृशः शब्दः

प्रयुक्तः। तद्यथा–**श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस्तवसां वज्रबाहो।**[१०] अत्र 'वज्रबाहो' इति पदेन रुद्रस्य सम्बोधनम्। अर्थात् हे वज्रबाहु रुद्र! इति। इन्द्रस्यापि वज्रीति सम्बोधनम्। यस्य हस्ते वज्रमस्ति स वज्री'ति।यथा 'प्राणं धृत असाविति प्राणी', तद्वदेव 'वज्रं धृत असाविति वज्री'त्युच्यते। अत उभयोरिन्द्ररुद्रयोर्विशेषणविशिष्टसम्बोधनस्यैक्यत्वाद्रूपस्याप्यैक्यत्व-मुपपद्यत एव। यद्यपि रूपैकत्वे सत्यपि नाम्नो भिन्नत्वं तु स्वाभाविकमेव कर्मभिन्नत्वात्। निरुक्तकृद्भिश्चापि नाम्नामाख्यातजत्वं स्वीकृतम्। तेनेदं स्फुटं यत्कर्मभिन्नत्वादेकस्यैव पुरुषस्यानेकानि नामानि भवन्ति। अत एव भिन्न-भिन्नकर्मकर्तृत्वादेकस्यैव भगवतो विष्णोः सहस्रनामान्यस्माभिः पठ्यन्ते। तदुक्तमपि यास्काचार्येण–**महाभाग्याद्देवताया एक एव आत्मा बहुधा स्तूयते।** एतेन वाक्येन एकस्यानेकत्वप्रतिपादनन्तु सवत एव सिद्धं भवति। तसमाद्वीरकर्मकर्तृत्वेन विष्ण्विन्द्रयोः स्तुतिरप्युभयोर्मध्ये साम्यं स्थापयत्येव।

अनेनोक्त विवेचनेनेदं सुस्पष्टं भवति यदिन्द्र-विष्णु-रुद्रादयो देवा अनन्ताः सन्तोऽप्येक एव। केवलं कर्मभिन्नत्वान्नामभिन्नत्वमिहावलोक्यते शास्त्रेषु। यथा हि लोकेऽपि कश्चिदेक एव जनः पृथक्-पृथक्-कर्मव्यापारस्थाने पृथङ्-पृथङ् नामभिस्सम्बोध्यते तथैव देवा अपि। तद्यथा-यदा श्रीविष्णुः स्वहस्ते चक्रं धरति तदानीं स चक्रधारी, यदा वेणुं धरति तदा वंशीधरः, यदा मुरलीं धरति तदा मुरलीधरः, यदा मधुनामानं राक्षसं सूदयति हन्ति तदा मधुसूदन इत्यादिभिरनेककर्मव्यापारव्यापृतत्वादनेकैर्नामभिः स्तूयते। निरुक्तकृता यास्केन देवानां पुरुषविधत्वमप्युक्तमेव। ते च पुरुषाः परमपुरुषार्थपरायणाः लोककल्याणाय विविधां लीलां काले काले कुर्वन्तस्तिष्ठन्ति। तेषां देवानां तत्तल्लीलामनुपश्यन्तो धीराः सर्वदाऽऽनन्दिताः भवन्ति। सोऽयं पुरुषः सर्वेषामपि चराचराणामन्तस्तिष्ठति। तदुक्तमपि पुरुषसूक्ते-**प्रजापतिश्चरति गर्भेऽअन्तरजायमानो ब्बहुधाव्विजायते। तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि व्विश्वा॥**[११]

एतादृशानामपूर्वबलशालिनां देवानां राष्ट्राध्यक्षाणां स्तुतिर्यजन-माह्वानादिकञ्च यैः शब्दैः क्रियन्ते ते शब्दराशिभूताः मन्त्राः वेदेषु पठितास्सन्ति। अत एवोक्तं जैमिनिना-**तच्चोदकेषु मन्त्राख्या।** मन्त्रस्य लक्षणमुपपादयता मीमांसकैरेवमुक्तम्-**वेदो हि द्विविधो मन्त्ररूपो ब्राह्मणरूपश्चेति। तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते। विधायकं वाक्यं**

**ब्राह्मणमिति।**[१२] ते मन्त्रा एव वेदा उच्यन्ते। स्वरूपभेदान्मन्त्रास्त्रिविधाः सन्ति, ते यथा-**ऋच्यते स्तूयते यया सा ऋक्, यजुर्यजतेऽनेनेति, गीतिषु सामाख्या।** अर्थाद्यत्र देवानां स्तुतिसम्बद्धाः मन्त्रा ऋगित्युच्यन्ते। यज्ञानुष्ठानसम्बद्धानां मन्त्राणां संज्ञा यजुरिति, गेयमन्त्राश्च सामानीत्युच्यन्ते। पुनश्च संहिताभेदाद्वेदाश्चतुर्विधाः- ऋक्संहिता, यजुस्संहिता, सामसंहिता, अथर्वसंहिता चेति। चतसृणामासां संहितानां शाखाप्रशाखादिभिरनेके भेदाः समभवन्। अत एवोक्तं तैत्तिरीयब्राह्मणे-**अनन्ता वै वेदाः**[१३] इति। परं महाभाष्यकृता भगवता पतञ्जलिना एकत्रिंशदुत्तरशताधिकैकसहस्र-शाखानामुल्लेखः कृतः। सम्भवति यत्पतञ्जलिकाले एतावत्य एव षडङ्गानि **शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषञ्चेति** उक्तानि। षडङ्गेष्वेषु अङ्गत्रयाणां शिक्षाछन्दोव्याकरणानां ये प्रतिपाद्यविषयाः सन्ति, तानेव विषयानाश्रित्य परमकारुणिकेन शौनकमुनिना सर्वप्रथमं ऋक्प्रातिशाख्यमिति ग्रन्थं विरचितम्।

## प्रातिशाख्यस्य महत्त्वम्

साहित्यमिदं वेदस्य बाह्यस्वरूपं निर्दिशति। वेदाभ्यासार्थं विचारोऽपि द्विधा भवति- अर्थतो लक्षणतश्चेति। तत्र वेदार्थजिज्ञासायां षडङ्गानि प्रवृत्तानि, यानि वेदानामान्तरिकस्वरूपप्रतिपादनपराणि, तदर्थं तान्येवाध्येतव्यानि। वेदलक्षणज्ञानाय चास्य प्रातिशाख्यग्रन्थस्याध्ययनमत्यन्तमावश्यकम्। यतस्तु शास्त्रमिदं लक्षणात्मकं तस्माद्वेदस्य लक्षणं ज्ञातुं प्रातिशाख्यग्रन्थस्योपादेयत्वं महत्त्वपूर्णमेव। लक्षणज्ञानेन बाह्यस्वरूपस्यावबोधो जायते। उक्तमपि च शास्त्रेषु-

**लक्षणं यो न वेत्त्यृक्षु न कर्मफलभाग्भवेत्।**
**लक्षणो हि मन्त्राणां सकलं भद्रमश्नुते।।**[१४]

अर्थाद्यो हि जनः ऋगादिवेदानां लक्षणमज्ञात्वैव कर्म करोत्यसौ कर्मफलं न प्राप्तुं शक्नोति। यतो हि लक्षणज्ञानाभावेऽर्थज्ञानमसम्भवम्। अर्थमजानन् यः कर्माण्यनुतिष्ठति स स्थाणुरिव भारहारी भवति। तदुक्तं यास्केन-

**स्थाणुरयं भारहारः किलाभूत् अधीत्य वेदं न विजानाति योऽर्थम्।**
**योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा।।**[१५]

अर्थाद्यो हि द्विजो वेदार्थं विजानाति सैव समस्तं कल्याणमाप्नोति।

ज्ञानेन पापं विनाश्य स्वर्गं प्राप्नोति। वेदार्थज्ञानाय च लक्षणज्ञानमावश्यकम्। न लक्षणज्ञानेनार्थज्ञानं सम्भवति, अतोऽर्थज्ञानात्प्राक् सर्वविधप्रयत्नेन लक्षणज्ञानं तु कर्त्तव्यमेव। वेदलक्षणज्ञानायैव प्रातिशाख्यग्रन्थानां प्रणयनमस्माकमृषिभिः कृतम्। वेदलक्षणज्ञानान्तर्गतं स्वर-वर्ण-अक्षर-मात्रा-देवता- विनियोगार्षज्ञानस्वरूपाः विषयाः विचार्यन्ते। एतेषां पदार्थानां ज्ञानाय प्रातिशाख्यग्रन्थानामुपयोगोऽस्ति। तदुक्तं केनापि-

**स्वरो वर्णोऽक्षरो मात्रा दैवं योगार्षमेव च।**
**मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे।।**[१६]

अस्य तथ्यस्य स्पष्टनिर्देशः ऋक्प्रातिशाख्यस्य मङ्गलश्लोके सूत्रकारेण शौनकेन मुनिना कृतमस्ति। यथा-

**तं पद्मगर्भं परमं त्वादिदेवम्। प्रणम्यर्थो लक्षणमाह शौनकः।।**[१७]

अत एव ऋक्प्रातिशाख्यस्यापरं नाम ऋक्लक्षणमस्ति। अथर्ववेदीय परिशिष्टान्तर्गते ऊनपञ्चाशत्तमं परिशिष्टं चरणव्यूहोऽस्ति। तदनुसारं वेदस्य पञ्चलक्षणग्रन्थाः सन्ति-**चतुराध्यायी, प्रातिशाख्यम्, पञ्चपटलिका, दन्त्योष्ठविधिः, बृहत्सर्वानुक्रमणी च।**

केषाञ्चिन्मतेन शिक्षाङ्गान्तर्भूता एव प्रातिशाख्यग्रन्थाः, तेऽपि वेदभेदेन शाखाभेदेन वा भिन्नाः केचन समुपलभ्यन्ते। प्रातिशाख्यशब्दस्यार्थो भवति-**शाखायां शाखायां प्रतिशाखम्, प्रतिशाखभवम् इति प्रातिशाख्यम्।**[१८]

अर्थात्प्रातिशाख्यानामध्ययनेन ज्ञातो भवति यत्तासु शाखासु नैकशाखानियमानामेव निर्देशो विद्यते अपितु तास्वेकैकस्य चरणस्य शाखानियमानामुल्लेखो मिलति। महर्षिणा यास्केनोक्तम्-**पदप्रकृतीनि सर्वचरणानां पार्षदानि।**[१९] अर्थात्पारिषदानां प्रातिशाख्यानाञ्च सम्बन्धः चरणैः सह सिद्धो भवति। प्रतिशाखाशब्दः चरणायैव व्यवहृतः प्रतीतो भवति।

प्रातिशाख्यस्य विषये उव्वटकृतस्य प्रातिशाख्यभाष्यस्यारम्भे पद्यमेकमुपलब्धं भवति, येनास्याः प्रयोजनस्य परिचयो मिलति-

**शिक्षा छन्दो व्याकरणैः सामान्येनोक्तलक्षणम्।**
**तदेवमिह शाखायाकमति शास्त्रप्रयोजनम्।।**

अयमाशयो यत् वेदाभ्यासस्तु पञ्चधा विभज्यते- (1) अध्ययनम्, (2) विचारः, (3) अभ्यासः, (4) जपः, (5) अध्यापनञ्चेति।

प्रातिशाख्यसूत्रेषु एतेषां पञ्चप्रकारकानां वेदाभ्यासस्य विधिवद्वर्णनमस्ति। अध्ययनं वेदश्रवणस्य द्योतकं तद्धि गुरुमुखाच्छ्रवणेन भवति। विचारो द्विधा लक्षणतो अर्थतश्चेति पूर्वमेवोक्तम्। अभ्यासः गुरुमुखोच्चारणविधिना श्रुतस्य वेदमन्त्रस्य लक्षणतोऽर्थतश्च विचारं कृत्वा पुनः पुनः स्मरणमभ्यासः। जपविषये अनन्तभट्टस्य कथनमिदं युक्तियुक्तमेव-

**जपादौ नाधिकारोऽस्ति सम्यक्पाठमजानतः।**
**प्रातिशाख्यमतो ज्ञेयं सम्यक्पाठस्य सिद्धये॥**[२०]

अध्यापनं स्वयं सम्यगधीत्यान्येषां शिष्याणामुपदेशायाध्यापनमिति। एतदर्थं प्रातिशाख्यग्रन्थोऽयं शिक्षाछन्दो व्याकरणानां सामान्यनियमानुपवर्णयति। तत्तद्वेदाङ्गेषु प्रोक्तास्त एव नियमाः तत्तद्वैदिकीशाखायां केन प्रकारेणास्ति, अस्य कथनमेव प्रातिशाख्यस्य मूलप्रयोजनमस्ति।

निष्कर्षरूपेणायं वक्तुं शक्यते यत् प्रातिशाख्यस्य क्षेत्रं पूर्वोक्तानि त्रीणि वेदाङ्गानि समाहरति; तथा तस्यां तस्यां विशिष्टशाखायां तत्तद्विशेषनियमानां विवरणं प्रस्तौति। प्रातिशाख्यं पूर्वोक्तस्य वेदाङ्गत्रितयस्य नियमानां विशेषरूपेण व्यवस्थापकमस्ति। शिक्षा-छन्द-व्याकरणेषु यस्य नियमस्य विधानमस्ति तद्भिन्ननियमानां विधानमस्मिन् शास्त्रे भवति। एवंविधाः विषयाः सन्ति-पद-क्रम-क्रमहेतु-पारायणादयः। प्रातिशाख्यमिमं कस्यापि शास्त्रस्याङ्गमिति कथनेनास्य पूर्णतायाः ह्रासो भवति। इदमस्ति अनिन्द्यम्, आर्षं पूर्णं वेदाङ्गञ्चेति। स्वयं मुनिना शौनकेन कथितम्-**कृत्स्नं च वेदाङ्गमनिन्द्यमार्षम्।**[२१]

चतुर्णां वेदानां चत्वारि प्रातिशाख्यानि सन्ति। तानि च-ऋक्प्रातिशाख्य-वाजसनेयिप्रातिशाख्य-तैत्तिरीयप्रातिशाख्य-सामवेदीय-प्रातिशाख्य-अथर्ववेदीयप्रातिशाख्यानीति। एतेषु प्रातिशाख्यग्रन्थेषु ऋग्वेदप्रातिशाख्यं शीर्षस्थानीयमस्ति। विषयप्रतिपादनदृष्ट्या वैदिकशब्दानां वेदमन्त्राणाञ्च व्याकरणप्रक्रियाप्रदर्शनमेव प्रातिशाख्यानामुद्देश्यम्। संक्षेपतो वैदिकव्याकरणसम्बन्धिपदप्रयोगनियमानां ज्ञानायान्यव्याकरणजन्य-ज्ञानसौलभ्याय च प्रातिशाख्यग्रन्थाः प्रणीताः। प्रातिशाख्यरचयितृत्वेन प्रशस्तः शौनको मुनिः। कात्यायनाश्वलायनौ च शौनकमुनेः शिष्यौ आस्ताम्। विषयेऽस्मिन्नुक्तं वेदार्थदीपिकाकारेणषड्गुरुशिष्येन काण्वसंहितायाः भाष्यारम्भे-**आश्वलायनसदृशः कात्यायनोऽपि शौनकमुनेः शिष्य एवासीत्। शौनकमुनिः स्वयं दशग्रन्थानां प्रणयनं कृत्वा स्वशिष्यैः कात्यायनाश्वलायनादि-**

**भिरनेकग्रन्थान् विनिर्माय वेदस्य यदुद्धारः कृतस्तदर्थं समस्तं विश्वं शौनकस्य ऋणी अस्ति स्थास्यति च।**[२२]

इत्थं स्फुटं भवति यच्छौनकेन ऋक्प्रातिशाख्यस्य रचना कृता, कात्यायनेन शौनकस्य मार्गनिर्देशने वाजसनेयिप्रातिशाख्यस्य रचना कृता, अज्ञातकर्तृणा तैत्तिरीयप्रातिशाख्यस्य रचना विहिता, वररुचिश्शाकटायना-भ्याञ्च सामवेदीयप्रातिशाख्यस्य रचना कृता, पुनः शौनकेनाथर्ववेदीय-प्रातिशाख्यस्य रचना कृतेति सिद्धम्। अज्ञातकर्तृणां स्थाने आश्वलायनस्य नामग्रहणं कर्तुं शक्यते। परमाश्वलायनो ऋग्वेदाध्यायी आसीदत एवेदं बलपूर्वकं न वक्तुं शक्यते यत्तैत्तिरीयप्रातिशाख्यमाश्वलायनस्यैव परमज्ञातकर्तृकस्थानेऽस्य नामग्रहणं कर्तुं शक्यते उपर्युक्तेन शौनकवचनेन।

निष्कर्षरूपेणायं शक्यते वक्तुं यद्राष्ट्रीयतायाः संरक्षणं मूलरूपेण वेदोक्तैरनुष्ठानैरेव भवति। तच्चानुष्ठानं स्वरवर्णादीनां ज्ञानं विना निष्फलं जायते। तस्मात्स्वरवर्णादीनां सम्यज्ज्ञानाय प्रातिशाख्यग्रन्थानां महत्त्वमस्तीति बहुवारमुक्तम्। यतो लोकत्रयरूपराष्ट्रे निवसतां सर्वेषामेव जीवानां राष्ट्रियाणां मनुष्य-पशु-पक्षि-कृमि-कीट-पतङ्ग-लता-गुल्म-वृक्ष-वनस्पत्यौषध्यन्नादीनां संरक्षणार्थं वेदानामध्ययनं, वेदविहितानां यज्ञयागादिकर्मणामनुष्ठान-ञ्चावश्यकम्। वेदाध्ययनायोचितपथप्रदर्शकोऽयं प्रातिशाख्यग्रन्थो महन्महत्त्व-भाजो वर्तते। प्रातिशाख्यग्रन्थानामध्ययनं विना सम्यग्वेदाध्ययनं वेदार्थपरिज्ञानञ्च न सम्भवमतो वैदिकसिद्धान्तमुररीकर्तुं प्रातिशाख्यग्रन्थानामध्ययनं सर्वैरपि वेदविद्भिरवश्यमेव कर्त्तव्यम्। वस्तुतो वैदिकमन्त्राणामध्ययनं स्वरवर्णादीनां सम्यज्ज्ञानं विना नैवोचितम्। तदुक्तमपि भगवता पाणिनिना स्वकीये शिक्षाग्रन्थे-

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥**

तस्मात्स्वरवर्णादीनां ज्ञानजन्येन वैदिककर्मफलप्राप्तिद्वारा जगत्कल्याणमस्य प्रातिशाख्यग्रन्थस्य मुख्यं लक्ष्यमिति सिद्ध्यति। तेनेदं स्फुटं यत् राष्ट्रीयतासंरक्षणे प्रातिशाख्यग्रन्थानां महत्त्वपूर्णं योगदानमस्तीति। विस्तारभयादधिकप्रपञ्चतो विमुच्यात्रैव स्वीयं व्याख्यानमवसाययामि।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. काठकश्रुतौ- 37/11
2. तैत्तिरीयब्राह्मणे- 2/5/7/4 ; श.प.ब्रा-11/4/3/14
3. ऐ.ब्रा.- 8/26
4. शु.य.सं.-9/23
5. शु.य.सं.- 12/64 ; 15/59
6. शु.य.सं.- 16/48
7. निरुक्ते- 7/
8. ऋग्वेदे- 1/154/1
9. ऋग्वेदे- 1/32/1
10. ऋग्वेदे- 2/33/3
11. शु.य.सं.- 31/19
12. मीमांसापरिभाषायाम्- प्रारम्भे
13. तै. ब्रा.-
14. वै.वा.इतिहासे- 304तमे पृष्ठे।
15. निरुक्ते- 1/16
16. वै.वा.इतिहासे- 304 तमे पृष्ठे।
17. ऋक्प्रातिशाख्यस्य मङ्गलश्लोक:।
18. शु.य.प्रातिशाख्यस्य अनन्तभाष्ये प्रथमसुत्रव्याख्यानावसरे।
19. निरुक्ते- 1/17
20. व.प्राति. प्रथमसूत्रव्याख्यानावसरे अनन्तभट्टेनोक्तम्
21. ऋक्प्रातिशाख्ये- 14/69
22. काण्वसंहिताया प्रथममन्त्रस्य व्याख्यानावसरे। का.सं.- 1/1

# वैदिकशास्त्राणां लोकोपयोगिता

संस्कृतमिति शब्दोच्चारणमात्रेणैव सर्वप्रथममस्माकं बुद्धौ वेदस्यैव बोधो जायते। सर्वविदितमेवैतद्यद्वेदा अस्माकं जीवनाधायकाः, सर्वविध-कल्याणकारकाः, सर्वविद्यानिधिभूताश्च सन्ति। साम्प्रतमुपलभ्यमानाः सर्वेऽपि ज्ञानविज्ञानात्मकाः विषयाः वेदादेव प्रसृताः। तदुक्तं महाभारते-

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥[१]**

सेयं वागनाद्यन्तनिधना सर्वादौ स्वयम्भुवादुत्सृष्टेत्युक्तम्। अत्रोत्सृष्टमिति पदं नैव सर्जनव्यापारं बोधयत्यपितु परमात्मनोऽन्तःकरणे विद्यमानस्य तत्त्वस्योत्सर्जनमिति भावं प्रकाशयति। तत एव संसारस्य सर्वा अपि ज्ञानविज्ञानात्मिकाः प्रवृत्तयः प्रसारं गता इति। एतस्मादेव कारणाद्वेदानामध्ययनमिहापरिहार्यत्वेनानिवार्यत्वेन चोपदिष्टम्। तदुक्तमपि मनुना-

**योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।**
**स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥[२]**

अर्थाद्यो हि द्विजो वेदमनधीत्यान्यत्र श्रमं विदधाति स इह शूद्रो मतः। अत इदमुच्यते यद्वेदानामध्येतारो मेधाविनः विद्वांसश्चेह निवसन्तोऽपि ब्रह्मभूयाय इव कल्प्यन्ते। तदुक्तम्मनुना-

**वेदशास्त्रार्थतत्त्वज्ञो यत्र कुत्राश्रमे वसन्।**
**इहैव लोके तिष्ठन्स ब्रह्मभूयाय कल्पते॥[३]**

मनूक्तवचनेनानेनेदं सुव्यक्तं भवति यद्वेदस्यार्थतत्त्वज्ञानस्य महत्त्वमत्युत्कृष्टतममस्ति। अर्थतत्त्वज्ञानाय चानेकविधवैदिकसाहित्यस्या-ध्ययनमनिवार्यमस्ति तदुक्तं केनचिद्विदुषा-

**वेदे काञ्चनपत्तने परिलशद्वेदान्तदुर्गो महान्**
**मीमांसा परिखा विभाति पुरतः शाब्दं लशद्गोपुरम्।**
**योगो यामिनिजागरूकनिचयः सांख्यं विवेकात्मकं**
**धर्मं चोरयितुं विशन्ति सुभगाः नैयायिकाः रक्षकाः॥**

उपर्युक्तानां वेदान्त-मीमांसा-व्याकरण-योग-सांख्य-न्यायादीनां शास्त्राणामध्ययनं विना वैदिकपदानां तात्त्विकार्थज्ञानमसम्भवमिति सर्वैरप्यङ्गीक्रियत एव। सर्ववेदभाष्यकाराणां सायणाचार्याणां विषये विपश्चिदपश्चिमैरुच्यते **पदवाक्यप्रमाणपारीणा** इति। पदमिति पदेन व्याकरणशास्त्रस्य, वाक्यमिति पदेन मीमांसाशास्त्रस्य, प्रमाणमिति पदेन च न्यायशास्त्रस्य बोधो जायते। वेद इति शब्दश्रवणादृग्यजुस्सामाथर्वसंज्ञकानां शब्दराशिभूतानां चतसृणामपि संहितानां बोधो भवति। यद्यप्यापस्तम्बादिभि-र्वैदिकैराचार्यैर्वेदानां द्विविधं स्वरूपं स्वीक्रियते **मन्त्रब्राह्मणयोर्वेदनामधेयम्**[४] इति। तत्र मन्त्रब्राह्मणयोर्लक्षणं प्रस्तूयता महर्षिणा जैमिनिना द्वादशलक्षण्यां पूर्वमीमांसायामुक्तं- **तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते। विधायकं वाक्यं ब्राह्मणम्**[५] इति। **ब्रह्म वै मन्त्रः**[६] इति ब्राह्मणोक्तवचनाद्ब्रह्मवेदयोरैक्यं सिद्ध्यति। अत्र ब्रह्मपदं कर्मबोधकं सद्यज्ञस्यैवोद्बोधकमिति ज्ञायते। तस्माद्यज्ञादीनां साङ्गोपाङ्गानि विधिविधानानि यत्रोक्तानि तानि ब्राह्मणानीति। ब्रह्मपदव्याख्यानावसरे प्राचीनैर्ऋषिभिरेवमुक्तं मैत्रायण्याम्-

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।**
**शाब्दे ब्रह्मणि निष्णातः परंब्रह्माधिगच्छति।।**[७]

शब्दब्रह्मरूपेणात्र शब्दराशिभूताः मन्त्रब्राह्मणात्मकाः वेदा उक्ताः। परंब्रह्मपदेन च सर्वजगत्कारणभूत अनादिनिधनाव्यक्तागोचरानन्तादि-पदैर्व्यवह्रियमाणो परमात्मा बुध्यते। तत्रेदमुच्यते यच्छब्दब्रह्मरूपा वेदा परब्रह्मणः मूलस्वरूपमुपवर्णयन्ति। तेनेदं सिद्धं यद्वेदेषु ये मन्त्राः पठितास्सन्ति तेषां तात्त्विकार्थज्ञानद्वारा शब्दब्रह्मणि निष्णाततामवाप्तुं शक्यते। ये जनाः शब्दब्रह्मणि निष्णाता भवन्ति ते परब्रह्माणमधिगन्तुं प्रभवन्तीति।

तत्रापि च मन्त्रब्राह्मणात्मकेषु वेदेषु यस्य यज्ञस्वरूपस्य परमात्मनो विषये व्याख्यानमस्ति स मन-प्राण-वाक्-आनन्द-विज्ञानमयोऽस्तीत्युक्तः उपनिषत्सु। तद्यथा- **स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमय-स्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽ-धर्ममयः सर्वमयस्तद्यदेतदिदंमयोऽदोमय**[८] इति।।

अनेनेदं सिद्ध्यति यद्वेदेषु सर्वविधज्ञानविज्ञानं सुविस्तृतेन व्याख्यात-

मस्ति। तस्मान्मनूक्तवचनमिदं **सर्वज्ञानमयो हि सः**[९] इति साधुरेव। तत्र ज्ञानमिति कथनेनाध्यात्मविद्याया बोधो भवति। यतस्त्वनेकस्मादेकस्मिन्नारोहणं ज्ञानं ब्रह्मविद्येत्युच्यते। तथैकस्मादनेकस्मिन्नवतरणं विज्ञानं यज्ञविद्येति। तस्मादुक्तं श्रुतौ–**विज्ञानं यज्ञं तनुते**[१०] इति। अनेनेदं स्फुटं भवति यद्ब्रह्मविद्यातिरिक्ताः सर्वा अपि विद्या अनेकत्वप्राधान्याद्यज्ञविद्यायामर्थाद्विज्ञान एवान्तर्भवन्ति। विज्ञानस्य कर्माणि प्रायोगिकस्थलान्यपेक्षन्ते, अतो विज्ञानं यज्ञविद्येत्युच्यते। आभ्यामेव ज्ञानविज्ञानाभ्यां मानवस्य कृतकृत्यता सम्पद्यते। इदमेव ज्ञानविज्ञान-युगलं मुख्यो धर्मः। तत्र ज्ञानं निःश्रेयसजनकम्, विज्ञानन्त्वभ्युदयहेतुः। तदुक्तं कणादेन– **यतोऽभ्युदयनिःश्रेयससिद्धिस्स धर्मः**[११] इति।

उपर्युक्तैर्विवेचनैरिदं स्फुटं भवति यद्वेदेषु सर्वविधज्ञानविज्ञानस्य पर्याप्तसामग्र्यो विद्यन्ते। अस्माकं पूर्वजैः कृष्णाजिनेषूपविष्टैस्सत्यानु-सन्धानतत्परैर्ऋषिभिर्यत्किञ्चिदवलोकितं तत्सर्वमप्याधुनिकैर्नवीनैर्ऋषिभिरनु-सन्धितमिति। रहस्यस्यास्योद्घाटनमृग्वेदस्यैकेन मन्त्रेण भवति यथा–

**अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति॥**[१२] इति।

अत्र पूर्वेभिः ऋषिभिरिति कथनेन पुरातनैर्वशिष्ठात्रिकश्यपादिभि-र्मन्त्रद्रष्टृभिरिति बुध्यते। नूतनैरिति पदेन चान्यैः श्रुतर्षिभिरिति, तैश्च पुरातनैर्नूतनैश्च ऋषिभिस्सोऽग्निरीड्य इति स्फुटं भवति। सम्प्रत्यनुसन्धान-शब्दोच्चारणेन तदेवार्थमवगम्यते। यथा– अन्विति पदमानन्तर्यस्य बोधकम्। सन्धानमितीक्षणम्। उभयमपि मिलित्वाऽनुसन्धानमिति सिद्ध्यति। अस्यानु-सन्धानपदस्यानेके पर्याया विद्यन्ते– **अन्वेषणम्, गवेषणम्, अन्वीक्षणम्, शोधकार्यमित्यादयः।** अत्र प्रश्नोत्पद्यते यदनुसन्धानं कस्य भवति? तत्रेदमुच्यते यद्यस्य वस्तुनः पूर्वं सन्धानं कृतं स्यात्तस्यैवेदानीं पुनरवलोकनायानुसन्धानं क्रियते। शब्दोऽयं वैज्ञानिकभाषायां प्रयुक्तः। तस्माद्वेदेषु वैज्ञानिकविषयाणां विवेचनमस्तीति कथने न कस्यापि विप्रतिपत्तिरिति।

विज्ञानमिति पदस्यार्थो भवति विशिष्टं ज्ञानम्। तत्र भवानमरसिंहेनोक्तं– **मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः**[१३] इति। भगवता श्रीकृष्णेनाप्युक्तम्– **ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः**[१४] इति। अर्थाच्छिल्पशास्त्रादिषु यदाविष्कारात्मकं ज्ञानं व्याख्यातं तद्विज्ञानपदबोध्यमिति। यज्ञादिकं शिल्पशास्त्रान्तर्गतमेव स्वीक्रियते, यतस्तत्र वेद्यादिसाधनं शिल्पानुमतमेव भवति। याज्ञिकप्रक्रिया चापि पूर्णतो वैज्ञानिकी भवति, तत्र यजमानस्या–

सद्वृत्तेर्विनाशः सद्वृत्तेरुदश्च क्रियते। तेन स स्वर्गमाप्नोति। एतस्मादेव कारणात्– **आत्मसंस्कृतिर्वै शिल्पानि आत्मानमेवास्य तत्संस्कुर्वन्ति**[१५] तथा च– **आत्मा वै यज्ञः**[१६] इत्युक्तं श्रुतिषु। आत्मसंस्काररूपं कर्म नावैज्ञानिकं भवितुमर्हति। यत आत्मनो विज्ञानरूपत्वं स्वयं सिद्धम्। तस्य विज्ञानरूपस्यात्मनः संस्कारो विज्ञानं विना कथं शक्यम्? अतो यज्ञस्य वैज्ञानिकत्वमुक्तं पूर्वम्। आधुनिकविज्ञानानुसारं येषां वैज्ञानिकविषयाणामध्ययनमुद्घुष्टं तत्सर्वमत्र वेदे विस्तृतेन व्याख्यातमस्ति। यथा– भौतिकविज्ञानम्, रसायनविज्ञानम्, वनस्पतिविज्ञानम्, जन्तुविज्ञानम्, प्रौद्योगिकीविज्ञानम्, कृषिविज्ञानम्, गणितविज्ञानम्, ज्योतिर्विज्ञानम्, वृष्टिविज्ञानम्, पर्यावरणविज्ञानम्, अन्तरिक्षविज्ञानम्, भूगर्भविज्ञानम्, आयुर्विज्ञानम्, सूर्यविज्ञानम्, अग्निविज्ञानम्, खगोलविज्ञानम्, पिण्डविज्ञानम्, ब्रह्माण्डविज्ञानम् इत्यादीनि सर्वाण्यपि विज्ञानानि वैदिकयज्ञविज्ञानान्तर्गतानि सन्ति।

वेदेषु उपर्युक्तैराधुनिकविज्ञानविषयैश्चाप्यधिकविषयाणां वर्णनान्युपलभ्यन्ते तानि च विज्ञानान्यस्माभिर्विस्मृतानि सम्भाव्यते यत्कालान्तरेषु तान्यस्माकं साक्षात्कृतानि स्युः, परमधुना दाढ्र्येन वक्तुमशक्यानि।

जगति सर्वेष्वेव जडचेतनात्मकेषु पदार्थेषु गत्यागती प्रवर्तेते। सर्वत्र व्याप्तो ह्यग्निः प्राणो भूतसहकृतः स्वभावेन प्रतिक्षणं निष्क्राम्यति, तेन जाता क्षतिश्चापरत आगतेन सोमेनाग्निरूपतामाप्तेन प्रपूर्यत इति सर्वेषामेव पदार्थानां जीवनं यज्ञायत्तम्। यत्रागतिरधिका, गतिश्चाल्पा तत्पुष्टी भवति। यत्र तु गतिरधिका, आगतिश्च यमेन विच्छिन्नतयाल्पा तज्जीर्णं भूत्वा विनश्यतीति भावविकारविवरणे निरुक्तादिषु स्पष्टीकृतम्। प्रक्रियेयं प्राकृतिकी खलु। इमामेव प्राकृतिकीं प्रक्रियामालम्ब्य कृत्रिमा यज्ञा विहिताः। यज्ञानां विषये भगवता मनुना प्रोक्तं– **द्रव्यं देवता त्याग**[१७] इति। अर्थाद्यत्र अग्न्यादिदेवतामुद्दिश्य सोमादिद्रव्याणामाहुतिर्दीयते तत्र यज्ञः सम्पद्यते। प्रसिद्धे सोमयागे लतारूपः सोम एव कण्डनेन रसतामापाद्य हूयते। इष्ट्यादिषु यत्र सोमाहुतिर्न भवति तत्रापि येषु द्रव्येषु सोमस्य प्राधान्यं तान्येव गव्यघृतदुग्धादीनि तण्डुलादिभिर्विनिर्मितानि पुरोडाशादीनि च हूयन्ते। तदुक्तं बृहज्जाबालोपनिषदि– **अग्नीषोमात्मकञ्जगत्**[१८] इति। अत्रोच्यते यद्द्विविधाः हि लोके भवन्ति पदार्थाः– ऋतरूपाः, सत्यरूपाश्च। यद्धि केन्द्रबद्धं न तिष्ठति प्रत्यृतमेव विकीर्णभावेन प्रसरति, तदृतमित्युच्यते। यथा वायुरापः

सोम इत्येकस्यैव तत्त्वस्येमास्तिस्रोऽवस्थाः– स्थूलावस्था आपः, तासां सूक्ष्मावस्था वायुः, तदपेक्षयापि सूक्ष्मतमावस्था सोमः। सोऽयं सोमः सर्वत्राकाशेऽभिव्याप्तः। यथोक्तं सोमस्तुतिमन्त्रे–

**त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः।**
**त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ॥**[१९]

सोऽयं सोमः सर्वस्मिन्नन्तरिक्षे ऋतरूपेण स्थितः। शतपथ-ब्राह्मणेऽप्युक्तम्– **अन्नाद एवाग्निरभवदन्नं सोमोऽन्नादश्च वा इदं सर्वमन्नं च**[२०] इति।

अग्निस्तु केन्द्राधारेण तिष्ठतीति स सत्यः। अग्निरयं विकसनशीलः केन्द्राद्बहिरभितो विकसन्नभिव्याप्नोति। सोमस्तु संकोचशीलोऽभितः संकुचन्नग्नौ पतति, सेयमेव सोमस्याग्नावाहुतिः। अनयैवाहुतिप्रक्रियया यज्ञस्य स्वरूपं सुस्पष्टं भवति। यज्ञ एव हि मनुष्याणां मुख्यो धर्मः। स एव जगतः समुत्पादको रक्षकश्चेत्यार्यशास्त्रेषु पदे पदे गीतम्। अयं यज्ञ एव मनुष्याणां देवानां च परस्परसम्बन्धस्थापकः। तदुक्तं भगवता भगवद्गीतायाम्–

**देवान् भावयतानेन ते देवा भावयन्तु वः।**
**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥**[२१]

यज्ञेन मनुष्या देवान् भावयन्ति, भाविताः पूजिताश्च देवा मनुष्यानुपकुर्वन्तीति देवानां मनुष्याणां च पारस्परिकः सम्बन्धो वैदिकप्रक्रियायां व्याख्यातः। अनयैव प्रक्रियया सामाजिकं सामरस्यं सुस्थापितं वेदेषु। क्रमप्राप्तमिह वेदेषु सामाजिकसमरसता विषये तावत्किञ्चिद्विचार्यते।

**वेदेषु सामाजिकसमरसता**– वेदो न कस्मैचिदेकस्मै मनुष्याय, वर्गाय, समूहाय, पन्थाय, देशविशेषाय चोपदिष्टो वर्तते अपितु समस्तस्यापि चराचरस्य कल्याणायास्माकमृषिभिरुपदिष्टोऽस्ति। **यत्र विश्वं भवत्येक-नीडमिति**[२२] वेदस्य समुद्घोषो वर्तते। अर्थाद्वेदस्तु तादृशो नीडोऽस्ति यत्र समस्तमपि विश्वमेकत्रीभूय तिष्ठतीति। गीतायां भगवता श्रीकृष्णेन **चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः**[२३] अर्थाच्चतुर्णां वर्णानां सर्जनम्मया गुणकर्मविभागानुसारं कृतम्। अत्र गुणकर्मणोः स्वरूपविषये चिन्तनस्यावश्यकता विद्यते। यतस्तु स्कन्दपुराणस्य नागरखण्डे स्पष्टमुक्तं भगवता व्यासेन–

**जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते।**
**शापानुग्रहसामर्थ्यं तथा क्रोधः प्रसन्नता॥**[२४]

अर्थाज्जन्मना सर्वेऽपि मनुष्याः शूद्रा एव भवन्ति परं चुडाकरणोपनयनवेदारम्भसमावर्तनादिभिस्संस्कारैः संस्कृता मनुष्या द्वितीयं जन्म गृहीत्वा द्विजत्वमाप्नुवन्ति। तैः संस्कारैर्विहीनास्तु शूद्रा एव भवन्ति नास्ति कश्चित् सन्देहलेशः। तत्रापि गुणकर्मणोरुभयोः प्रभावोऽपि सम्यगवगन्तव्य एव।

पश्यतां ब्राह्मणवंशे समुत्पन्नो लङ्काधिपतीरावणो न पूज्योऽस्ति सर्वशास्त्रनिष्णातोऽपि राक्षसीप्रवृत्तिवशात्। क्षत्रियकुलोद्भवो मर्यादापुरुषोत्तमः श्रीरामः श्रेष्ठकर्मणि प्रवृत्तत्वात् गुणाधिक्याच्च सर्वलोकपूज्योऽस्ति। यदुकुलभूषणः श्रीकृष्णोऽपि सर्वत्र पूज्यो वर्तते। वानरयोनौ समुत्पन्नः श्रीरामभक्तो हनूमान् सर्वैरपि स्तुत्यो वर्तते। एषां सर्वेषां मध्ये कर्मणो प्रामुख्यमस्ति। वेदेषु दैवत्वनिर्धारणेऽपि कर्मणः प्राधान्यमवलोक्यते। निरुक्ते भगवता यास्काचार्येणोक्तं यत्- **इतरेतरजन्मानो भवन्ति इतरेतरप्रकृतयः। कर्म जन्मानः आत्मजन्मानः।**[२५] तत्राह म.म.मुकुन्दझाबख्शीमहोदयस्टीकायाम्- कर्मणे जन्म येषां ते कर्म जन्मानो भवन्ति। योऽसावेक आत्मा बहुधा स्तूयते, सर्गकाले षोढाऽऽत्मानं विभज्य जगद्भावं बिभर्ति तस्माज्जयन्त इत्यात्मजन्मानः। मनुष्य-धर्मविपरीतो हि देवताधर्मः देवा ऐश्वर्यशालिनो वर्तन्ते। न मनुष्याणामियं शक्तिरस्ति, अनैश्वर्यात्। मनुष्याणां हि पिता पुत्रं जनयति, इति पिता प्रकृतिः। न पुनरिच्छन्नपि पुत्रः पितरं जनयति। देवानां **त्वग्नेः सूर्योऽजायत** एष अग्निः प्रातःकाले सूर्यं प्रसुवति। तस्मात्सूर्यस्याग्निः प्रकृतिः। सूर्याच्चाग्निः सायं जायते तस्मादग्नेः सूर्यः प्रकृतिः। **अदितेर्दक्षो अजायत दक्षाद्वदितिः परि।**[२६] दहनप्रकाशनाभ्यामग्निः, आर्द्रत्वादापः, शोषणाद्वायुरित्यादयः सर्वेऽपि देवाः कर्मवशादेव देवत्वं प्राप्तवन्तः। अत एव श्रुतिर्वदति- **यो यदिच्छति तस्य तत्**[२७] अर्थात्सर्वकर्मसु श्रेष्ठं कर्म यज्ञो विद्यते। तस्यानुष्ठाता यया कामनया कर्मानुष्ठानं करोति तादृशं फलमवश्यमेव प्राप्नोति। कर्मसु **अङ्गहीनाश्रोत्रियषण्ढशूद्रवर्जम्**[२८] इति कात्यायनवचनाद्वर्जितान्विहान्येषां सर्वेषामधिकारो वर्तत एव। महर्षिणा येषां कृते निषेधो विहितस्तत्र वैज्ञानिकता विद्यते। यतस्तु कर्म केवलं मनसा चिन्तनेनैव शक्यं नास्ति तस्याचरणमावश्यकं भवति तदर्थमश्रोत्रिया वेदमन्त्रोच्चारणे, अङ्गहीना यथा बधिराः प्रैषवाक्यश्रवणे, पङ्गवो विष्वाक्रमणे, अन्धा आज्यावेक्षणे, खञ्जा आहुतिप्रदानेऽसमर्थाः, षण्ढा नपुंसकास्ते पुत्रोत्पादनेऽक्षमा भवन्ति तथा चोक्तं **जातपुत्रः**

**कृष्णकेशोऽग्नीनादधीत**[२९] इति, शूद्राः संस्काराचारविरहितास्ते सर्वे सम्यक्तया कर्मानुष्ठातुमयोग्या असमर्थाश्च भवन्ति तस्मादेव वर्जिताः। तदतिरिक्तास्सर्वेऽपि मनुष्याः श्रौतकर्मस्वधिकृतास्सन्ति तस्मादुक्तं कात्यायनेन **मनुष्याणां वारम्भसामर्थ्यात्**[३०] इति। अधिकृतेष्वपि ये निर्धनास्तेऽपि वर्ज्यास्तदुक्तमपि–

**अश्वेमेधादयो यज्ञा बहुसंभारविस्तराः।**
**न शक्यास्ते यतः कर्तुमल्पवित्तैर्द्विजातिभिः।।**[३१]

अर्थादल्पवित्तैर्द्विजातिभिरपि एतादृशा श्रौतयज्ञा नैवानुष्ठातुं शक्याः सन्ति तस्माद्येऽप्यधिकृतास्ते धनसम्पन्ना अपि भवन्तु चेत्तदानीमेतादृशान् यज्ञाननुतिष्ठन्तु।

तेषाञ्च यज्ञानामिदं स्पष्टं फलं भवति यत्तत्र सर्वेऽपि सामाजिकाः मित्रवद्व्यवहन्ति। तस्माच्छ्रुतावोक्तं यत्–

**अभयं मित्रादभयममित्रादभयं ज्ञातादभयं पुरो यः।**
**अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रं भवन्तु ।।**[३२]
**मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।**
**मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।।**
**मित्रस्य चक्षुषा समीक्षामहे।।**[३३]
**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे संजानाना उपासते।।**
**समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।**
**समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि।।**
**समानीव आकूतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति।।**[३४]

**वैदिकयज्ञेन लोकोपकारः**– भगवता श्रीकृष्णेनोक्तं **यज्ञः कर्म समुद्भवः**[३५] शतपथश्रुतावपि **यज्ञो वै श्रेष्ठतमं कर्म**[३६] इति। अर्थाद्यज्ञः क्रियाव्यापारविशेषः। क्रिया च खलु कर्मव्यापाररूपा, स च व्यापारः बहुविध उक्तः। तेन क्रियायाश्चाप्यनेकरूपता सिद्ध्यत्येव। सर्वाप्येषा क्रिया त्रेधा– यज्ञो दानं तपश्चेति। तिस्रश्चेमाः क्रियाः मनोवाक्प्राणेषु सन्निहिताः सन्तः वेदरूपतामेवाकलयन्ति। तद्यथोक्तं श्रुतौ– **ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये सामप्राणं प्रपद्ये**[३७] इति। अस्मिन् मन्त्रवाक्ये ऋग्वेदो वाग्रूपेण, यजुर्वेदो मनोरूपेण, सामवेदश्च प्राणरूपेण स्तुतः। कथनस्यास्य तात्पर्यमिदमस्ति

यत्सर्वेषां वस्तूनां त्रीणि मण्डलानि भवन्ति। पिण्डरूपमेकं मण्डलम्, यदृगित्युच्यते। तस्मात् पिण्डाच्च तदीयाः प्राणा निष्क्रम्य बहिश्चरन्ति। यस्मिन् स्वल्पे महति वा प्राणे यावती शक्तिः, तावद्दूरमेव स प्रचरति। पार्थिवेषु पदार्थेष्वग्निरेव प्राणः। स चायमग्निप्राणो द्विविधः- चित्यः चितेनिधेयश्च। चित्याः प्राणा मर्त्याः, चितेनिधेयास्त्वमृताः। तत्र चित्याः प्राणाः स्वचयनेन वस्तुस्वरूपं निष्पादयन्ति, तद्रक्षण एव च व्यापृतास्तत्रैव तिष्ठन्ति। चितेनिधेयास्तु बहिरपि प्रचरन्ति। एषां प्राणानां यदन्तिमं मण्डलं तत्साममण्डलमित्युच्यते। यावती यस्य ऋग्भवति तदनुकूलमेव तस्य सामेति समत्वात् सामशब्दः प्रयुज्यत इति तदभिप्रायः। ऋचमारभ्य सामपर्यन्तं प्रत्येकस्मिन् बिन्दौ शतशो मण्डलानि सन्ति, तेषु च यत्प्राणरूपमग्नितत्त्वं व्याप्तं तदेव यजुरित्युच्यते। तदेतत्सूर्यमण्डलमधिकृत्य वर्तते अत एव शतपथश्रुतिराह- **यदेतन्मण्डलं तपति तन्महदुक्थं ता ऋचः स ऋचां लोकः। अथ यदेतदर्चिर्दीप्यते तन्महाव्रतं तानि सामानि स साम्नां लोकः। अथ य एतस्मिन् मण्डले पुरुषः सोऽग्निस्तानि यजूंषि स यजुषां लोकः। सैषा त्रय्येव विद्या तपति।**[३८] इति।

अथ यदेव किञ्चिदृग्यजुस्सामसाध्यमग्निप्रयुक्तं कर्मजातं स यज्ञः। अनेन कथनेनेदं सुव्यक्तं भवति यद्विश्वकल्याणार्थं लोकानामुपकाराय च वेदस्य महत्त्वपूर्णमवदानमस्ति। यतो वेदेभ्य एव समस्तानां यज्ञ-यागादिक्रियाकलापानां ज्ञानं सम्भवति। यज्ञेनैव सर्वे देवाः, पशवो मनुष्याश्च सर्वविधं कल्याणमाप्नुवन्तीत्यत्र नास्ति काचिद्विप्रतिपत्तिः। उक्तमपि-

**यज्ञेन देवा जीवन्ति यज्ञेन पितरस्तथा।**
**देवाधीनाः प्रजाः सर्वा यज्ञाधीनाश्च देवताः॥**
**यज्ञो हि भगवान् विष्णुर्यत्र सर्वं प्रतिष्ठितम्।**
**यज्ञार्थं पशवः स्रष्टा देवास्त्वौषधयस्तथा॥**
**यज्ञार्थं पुरुषाः स्रष्टाः स्वयमेव स्वयंभुवा।**
**यज्ञश्च भूत्यै सर्वस्य तस्माद्यज्ञपरो भवेत्॥**
**यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः।**
**धनं यद्यज्ञशीलानां देवस्वं तं विदुर्बुधाः॥**
**यज्ञेन सम्यक् पुरुषस्तु नाके सम्पूज्यमानस्त्रिदशैर्महात्मा।**
**प्राप्नोति सौख्यानि महानुभावाः तस्मात्प्रयत्नेन यजेत यज्ञैः॥**[३९]

अनेन कथनेनेदं सुव्यक्तं भवति यल्लोक इति कथनेन सर्वेषामपि देव-दानव-मनुष्य-पशु-पक्षि-कृमि-कीट-लता-गुल्म-वृक्ष-वनस्पत्यौषध्यन्नादीनां प्राणतत्त्वसंयुक्तानां विश्वस्मिन्विश्वे निवसतां प्राणिविशेषाणां गणना भवति। तेषां समेषामपि लोकेऽवस्थितानां भूतभौतिकानां हितं वेदेषु यज्ञमुखेन निहितं वर्तते। समस्तस्यापि विश्वस्य कल्याणार्थं वेदस्य महत्त्वपूर्णमवदानमस्ति। यतो वेदेभ्य एव समस्तानां यज्ञ-यागादिक्रियाकलापानां ज्ञानं सम्भवति। यज्ञ-यागाद्यनुष्ठान- माध्यमेनैव सर्वेषां वास्तविकं कल्याणं सम्भवति। अत एव वेदेषु यज्ञादीनां प्राचुर्येण वर्णनमुपलभ्यते। यस्मै कस्मैचिदपि कामावाप्तये यज्ञानुष्ठानं क्रियते तत्सर्वमपि फलमग्निनैव प्राप्यते। तदुक्तमृग्वेदे- **अग्निना रयिमश्नवत पोषमेव दिवे दिवे। यशसं वीरवत्तमम्।।**[४०] स एवाग्निर्विश्वेषां हितसम्पादकोऽस्ति तदुक्तं यथा- **त्वमग्ने यज्ञानां होता विश्वेषां हितः। देवेभिर्मानुषे जने।।**[४१] अग्निवायुरविभ्य एवास्य विश्वस्य निर्माणं पालनं पोषणाद्यभिरक्षणञ्च संभवति। त्रिभ्य एभ्य एव देवेभ्यः सकाशाद्वेदानां दोहनं यज्ञसिद्ध्यर्थं सञ्जातमिति मन्वादिभिर्मुक्तकण्ठेनोक्तम्। तद्यथा-

**अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।**
**दुदोह यज्ञसिद्ध्यर्थमृग्यजुस्सामलक्षणम्।।**[४२]

**निष्कर्षः-**

निष्कर्षरूपेणायं वक्तुं शक्यते यद्वेदेषु यज्ञानां वर्णनमस्ति, यज्ञाश्च विश्वहितसम्पादने प्रमुखसाधनत्वेन वर्णिताः सन्ति। हितस्वरूपे गृहे सुखपूर्वकं गन्तुमेको यज्ञ एव मार्गोऽस्ति नान्यः कश्चित्। अत एवोक्तं वेदे- **नान्यः पन्था विद्यतेऽयनाय।**[४३]

अत इदमुच्यते यत्सर्वविधं हितं कल्पयितुं यज्ञानुष्ठानं कर्तव्यम्। न केवलं मनुष्या एवापितु देवा अपि यज्ञानामनुष्ठानेन स्वीयं सर्वविधं कल्याणं सम्पादयन्ति। अतो यज्ञमुखेन वेदाः समस्तस्यापि विश्वस्य हितं सम्पादयन्तीति कथनं युक्तियुक्तमेव। अन्येऽपि बहवो विषयाः सन्ति ये वेदेषु विश्वहित-सम्पादनमिति तथ्यमुररीकर्तुं प्रस्तोतुमिह शक्यन्ते। वेदा एव संस्कृतशास्त्राणां मूलाधाराः सन्ति तस्मात्संस्कृतशास्त्रेषु बहुविधं लोकोपकारित्वमुपवर्णितमस्ति परं नात्र लघुनिबन्धे तेषां समेषामुल्लेखः सम्भवति। अतो विस्तारभयादत्रैव विरमामीत्यलमतिविस्तरेण।

**जयतं संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. महाभारते शान्तिपर्वणि- 244/55
2. मनुस्मृतौ-2/168
3. मनुस्मृतौ- 12/102
4. आपस्तम्बश्रौतसूत्रे-24/1/31
5. मीमांसा परि.- पृष्ठ-4 (वेदद्वैविध्यम् प्रकरणे)
6. शतपथब्राह्मणे-7/1/1/5
7. अमृतबिन्दूपनिषदि-17 ; मैत्रायण्याम्-6/12
8. बृहदारण्यकोपनिषदि-4/4/5
9. मनुस्मृतौ- 2/7
10. तैत्तिरीयारण्यके-8/5/1 ; तैत्तिरीयोपनिषदि-2/5/1
11. वैशेषिकसूत्रे-1/2
12. ऋग्वेदे-1/1/
13. अमरकोषे-धीवर्गे-6 तमे श्लोके
14. श्रीमद्भगवद्गीतायां-7/2
15. गोपथब्राह्मणे-2/6/7
16. शतपथब्राह्मणे-6/2/1/7
17. का.श्रौ.सू.-1/2/2
18. बृ.जा.उप.-2/4
19. ऋ.सं.-1/91/22
20. श.प.ब्रा.-11/1/6/19
21. भगवद्गीतायाम्- 3/11
22. शु.य.सं.-32/8
23. गीतायाम्- 4/13
24. स्कान्दे नागरखण्डे- 239/31
25. निरुक्ते- 7/1/4
26. ऋ.सं.- 10/72/4
27. कठोपनिषदि- 1/2/16
28. का.श्रौ.सू.- 1/1/5
29. श्रौतवाक्यम्, उल्लेखो का.श्रौ.सूत्रे विद्याधरभाष्ये भूमिकायां 32 तमे पृष्ठे।

30. का.श्रौ.सू.-1/1/4
31. भविष्यपुराणे- 151/11
32. अथर्ववेदे- 19/15/6
33. शु.य.सं.-36/18
34. ऋ.संहितायाम्- 10/191/2-4
35. गीतायाम्- 3/14
36. श.प.ब्रा.- 1/7/1/5
37. शुक्लयजुर्वेदे- 36/1
38. शतपथब्राह्मणे-10/5/2/1-2
39. विष्णुधर्मोत्तरपुराणे-162/1-4,7
40. ऋग्वेदे- 1/1/3
41. समवेदे- 1/1/1/2
42. मनुस्मृतौ- 1/23
43. यजुर्वेदे- 31/18

## श्रौतयज्ञानाम्महत्त्वम्

**श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।**
**ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मौ हि निर्बभौ।।**[१]

इत्यस्माद्भगवता मनुना प्रोक्तत्वाद्वेदानां श्रुतिस्वरूपत्वं सुसिद्धमेवास्ति। श्रुतिरित्येतत्पदेन मन्त्रब्राह्मणारण्यकोपनिषत्सहितान्यन्यान्यपि श्रौतसूत्रादीनि श्रौतसाहित्यानि च गृह्यन्ते। तेषु तेषु च श्रौतग्रन्थेषु येषां कर्मणां साक्षाद्वि-धानान्युपलब्धानि भवन्ति तानि कर्माणि श्रौतानीत्युच्यन्ते। येषाञ्च कर्मणां विधानानि स्मार्त्तग्रन्थेषूपलब्धानि भवन्ति तानि स्मार्त्तानीति। उपर्युक्तेन कथनेन मीमांसकानामियं परिभाषा **श्रुतिप्रतिपादिता ये यज्ञास्ते श्रौतयज्ञा** इति सार्थकत्वेन सिद्ध्यति।

अनेन प्रकारेण यज्ञस्य द्विविधं स्वरूपमस्माकं समक्षमायान्ति- **श्रौतयज्ञाः स्मार्त्तयज्ञाश्च।** तत्र श्रौता यथा दर्शपौर्णमासादयः **स्मार्त्ता** पुनः षोडशसंस्कारादयश्च। स्मार्त्तकर्माणि शरीरसम्बन्धीनि सन्ति श्रौतकर्माणि चाध्यात्मसम्बन्धीनि। तथाह भगवती श्रुतिर्यत्- **देवो भूत्वा देवानप्येति**[२] अर्थात्स्वयं देवो भूत्वा देवतानां पूजनं कर्त्तव्यं तेन देवतानां सान्निध्यमवाप्यते। यथा मानवो भूत्वा मानवस्य सेवायां यदि कश्चिद् प्रवृत्तो भवति चेत्तदा सेव्यसेवकयोर्मध्ये भयः सन्देहश्च न भवति, परं कश्चिद्व्याघ्रो भूत्वा सर्पो भूत्वा वा मानवस्य सेवायां प्रवृत्तो भवति चेत्तदा सेव्यसेवकयार्मध्ये सर्वदा भयः संशयश्च विद्यमानो भवत्येव। तस्माद्देवतात्वमवाप्यैव देवतानां पूजनं सेवादिकञ्च कर्त्तव्यमिति शास्त्रस्यादेशों वर्तते। अत श्रौतयागे व्रतग्रहणकाले यजमानो देवत्वप्राप्तये अग्निं देवमेवं प्रार्थयति यत्- **अग्ने व्रतपते व्रतञ्चरिष्यामि तच्छकेयन्तन्मे राध्यताम्। इदमहमनृतात् सत्यमुपैमि।।**[३] अतः स्पष्टमभवद्यदादौ शरीरस्य शोधनं तदुपरान्तमेव यज्ञादिकर्मसु प्रवृत्तं भवितव्यमिति। एतस्मादेव कारणात् भगवान् कात्यायनः स्वकीये श्रौतसूत्रे श्रौतकर्मणां के अधिकारिणो भवन्ति? इति जिज्ञासायां तेन **अङ्गहीनाऽश्रोत्रियषण्ढशूद्रवर्जम्**[४] इति सूत्रं लिखितम्। अर्थाद्यो हि जनो हस्तपादादिभिरङ्गैर्विहीनो भवति सोऽङ्गहीन इत्युच्यते। स चाङ्गहीनो मानवः सम्यक्तया यज्ञानुष्ठानं नाचरितुं शक्नोति तस्मादेव कारणादत्र तादृशा जना नाधिक्रियन्ते। यथा पङ्गुर्विष्णुक्रमणे

समर्थो न भविष्यति, अन्धश्चाज्यावेक्षणं नैव कर्तुं शक्ष्यति, मूको मन्त्रोच्चारणे समर्थो न भविष्यति, बधिरः प्रैषादिवाक्यश्रवणे, खञ्जो वस्तुग्रहणे चाक्षमो भविष्यति। यद्येतत्सर्वमविचार्यैव ऋषीणामभिप्रायमनपेक्ष्य उपर्युक्तेभ्यो यज्ञार्थमनुपयुक्तेभ्यः कर्मण्यधिकारो दीयेत तर्हि कर्मणि विगुणता समापतिष्यति तस्माच्छ्रौतकर्मस्वेषामधिकारो न भवितव्य अति। वेदानामध्ययनं यैर्न कृतं त अश्रोत्रिया उच्यन्ते, अश्रोत्रियाः श्रौतकर्मस्वनधिकृताः सन्ति। षण्ढो नपुंसक इत्युच्यते, पुंस्त्वहीनो जनः पुत्रोत्पादनं न कर्तुमर्हति, श्रौताग्न्याधानायैष नियमोऽस्ति यत्- **जातपुत्रः कृष्णकेशोऽग्नीनादधीत**[५] अर्थाद्यो पुत्रवान् भवेत्, यस्य च केशाः कृष्णाः स्युः (युवा स्यात्) तादृशो जनोऽग्निपरिग्रहाया-धिकारी प्रोक्तः। नपुंसकेन पुत्रोत्पत्तिर्न कदापि संभवति, तस्मादत्र यज्ञकर्मणि नासावधिकृतः। शूद्रस्तु परम्परागतयज्ञोपवीतादिसंस्कारैर्विहीनत्वात् नोपयुक्तः। यद्यपि अद्यत्वे विषयोऽयं तावन्महत्त्वं नोपदधाति तथाप्यस्य सर्वेऽपि पूर्वजा उपनयनादिसंस्कारैर्वञ्चिताः तस्मात्स व्रात्यदोषग्रस्तत्वात् श्रौतकर्मणे नोपयुक्तस्तस्मान्निषिद्ध इति।

अत्रेदं ज्ञानमावश्यकमस्ति यच्छूद्रशब्दो न केवलं जातिवाचक एवापितु गुणकर्मणामपि वाचकोऽस्ति। गीतायां भगवान् पद्मनाभः स्पष्टमवादि यत्- **चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।**[६] अर्थात् गुणकर्मणामाधारे चतुर्णां वर्णानां सर्जनं मया कृतमिति। श्रौतयज्ञविषये त्विदं स्पष्टमेवोक्तं यच्छ्रुत्यध्ययनसम्पन्ने यस्मिन् त्रैवर्णिके अधिकारिणः समस्तमपि लक्षणं व्याप्तं स्यात् स एव जनः श्रौताग्निपरिग्रहायाधिकृतो वर्तते नान्यः कश्चित्। अत्र गुणकर्मोभयाभ्यां ब्राह्मणः क्षत्रियो वैश्यश्च भवितुमनिवार्यमुक्तमस्ति। तत्तद्वंशेषु जन्मग्रहणमात्रेण श्रौताग्निपरिग्रहस्याधिकारो नैव दीयते। वस्तुतः जन्मना सर्वेऽपि मानवाः शूद्रा एव भवन्ति यज्ञोपवीतादिसंस्कारादेव तेषु त्रैवर्णिकत्वमाधीयते। तदुक्तमपि स्कान्दे नागरखण्डे-

**जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते।**
**शापानुग्रहसामर्थ्यं तथा क्रोधः प्रसन्नता।।**[७]

यस्य यस्मिन् वंशे जन्म तस्य तादृक्छन्दोगतं सावित्रीमन्त्रविधानं शास्त्रेषूक्तम्। तद्यथा- **गायत्रीं ब्राह्मणायानुब्रूयादाग्नेयो वै ब्राह्मण इति श्रुतेः। त्रिष्टुभं राजन्यस्य। जगतीं वैश्यस्य।**[८] अत्र ध्यातव्यं यत् **तत्सवितुर्वरेण्यमिति गायत्री, देवसवितः प्रसुव यज्ञमिति त्रिष्टुप्, विश्वारूपाणि**

**प्रतिमुञ्चत** इति जगती। एवमुक्तविधानानुसारं त्रैवर्णिकेभ्यो माणवकेभ्यो सावित्रीप्रदानं सर्वैरप्याचार्यैरनुमतमस्ति। तत्रापीदमधेयं यद्यदि कश्चिद् ब्राह्मणवंशे समुत्पन्नः सः स्मार्त्तसंस्कारसम्पन्नोऽपि दिव्याङ्गः, वेदाध्ययनावसररहितः, नपुंसकः, मन्दबुद्धियुक्तः, अलसः, अविवेकी, भ्रष्टः, दुराचारे प्रवृत्तश्चास्ति तर्हि श्रौतविधिनानभिज्ञत्वात्, सदाचरणरहितत्वात्, उचितानुचितविवेकविरहाच्च न केवलं ब्राह्मणवंशे उत्पत्तिकारणादत्र कर्मणि तस्याधिकारो भविष्यति, अपितु श्रौतविधीनां सम्यगनुपालने सक्षमो मानव एवैतदर्थं नियोजयितुं शक्यते, एतदेव श्रौताचार्याणां कथनस्य तात्पर्यमस्ति। कथनस्यास्यान्यान्य-दृष्ट्या अवलोकनमवगाहनञ्च नैव कर्त्तव्यमिति।

## श्रौतयज्ञानाम्महत्त्वम्-

संसारेऽस्मिन्ये केऽपि जीवास्सन्ति ते सर्वे सुखमेव वाञ्छन्ति। सुखप्राप्तिरेव सर्वेषामिष्टं भवति। हितोपदेशे मूषिकराजस्य हिरण्यकस्य कथायामेवं पठ्यते यद्यदा हिरण्यको धनहीनोऽभवत्तदानीं कथं विलपतीति। तेनेदं फलितं भवति यज्जलचर-थलचर-नभचरास्सर्वेऽपि जीवाः स्वाभिलषितं धन-पुत्रादिकं सुखं सर्वदैव वाञ्छन्ति। ऋग्वैदिकमण्डूकसूक्तस्य **संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः।** तथा **शाक्तस्येव वदति शिक्षमाणः** इत्यादिभिर्वचनैरिदं स्फुटं भवति यन्मण्डूका अपि सोमाङ्गभूतस्य सत्रयागस्यानुष्ठानम्, गुरुशिष्यपरम्परया वेदाध्ययनञ्च कुर्वन्तीति। एवंविध-मनेकान्युद्धरणान्यवाप्यन्ते येषु विविधा जीवा यागानुष्ठाने प्रवृत्ता अनुभूयन्ते। तत्र सर्वजीवेषु मनुष्याणां श्रेष्ठत्वं शास्त्रेषु यत्र-तत्र प्रतिपादितमेव। यतस्तु मानवा एव वेदाध्येतृत्वेन प्रत्यक्षगोचरा सन्त्यस्माकं तस्मात्सर्वश्रेष्ठजीवान् मानवानभिलक्ष्यैवात्र ब्रवीमि। तेषामभिलषितसुखानामवाप्तये विविधोपायाः पन्थानश्च वर्णिताः सन्ति। तेषु मार्गेषूपायेषु च सर्वश्रेष्ठो मार्ग इदं वेदविहितं यज्ञानुष्ठानमस्ति। एतदेव रहस्यं मनसि निधाय पदवाक्यपारीणेन सायणाचार्येण वेदानाम्महत्त्वविषये प्रोक्तं यत्- **प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता॥** तथा च **इष्टप्राप्त्यनिष्ट-परिहारयोरलौकिकमुपायं यो ग्रन्थो वेद स वेदः।** अर्थाद्वेदाध्ययनेन वेदोदितेन च कर्मणा मानवः सर्वविधं लौकिकमलौकिकञ्च सुखं प्राप्तुं शक्नोति। यतो मानवानां शक्तिरल्पा सीमिता च भवति, ईश्वरस्य शक्तिः प्रचुरा असीमिता च भवति। देवा एवात्र ईश्वरपदाभिधेयास्सन्ति, तेषां सान्निध्यमत्र

श्रौतयागे प्राप्यत एव। यतो देवानामत्यन्तप्रियेऽस्मिन् श्रौतयागे यदा याज्या-पुरोऽनुवाक्ययोः मन्त्राः पठ्यन्ते तदानीं देवा अत्रागत्य स्वीयं हविर्भागं स्वीकुर्वन्ति। मानवाः श्रौतयागेन देवान् सन्तुष्य स्वात्मकल्याणं साधयन्ति। यथा राजा मनसा वाचा कर्मणा च प्रजानुरञ्जने तद्धितसाधने च सर्वदाऽनुरक्तो भवति तथैव देवा अपि सर्वदैव मानावानां हितसाधने तल्लीना भवन्ति। देवानां एतादृशस्योपकारस्याधमर्ण्यं व्यक्तीकर्तुं श्रौतयाग एव मुख्यमवलम्बन-मस्ति। तस्माच्छ्रौतयागस्य महन्महत्त्वं समुपगीतं सर्वेष्वपि संस्कृतसाहित्यग्रन्थेषु।

वयं सर्वे जानीमो यत्प्रणवेत्यपरशब्देन विश्रुतोऽयमोङ्कार एव ब्रह्मणः सकाशात्सर्गादौ सर्वप्रथममाविर्भूय समस्तमपि चराचरात्मकमिदं विश्वमण्डल-मुत्पादयामास। तस्मादुक्तं **वागेवेदं सर्वम्**[९] इति। सा च वाक् शब्दब्रह्मात्मकत्वेन स्तुता वेदे। तदुक्तमपि-

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।**
**शाब्दब्रह्मणि निष्णातः परंब्रह्माधिगच्छति॥**[१०]

तथा- **इयं या परमेष्ठिनी वाग्देवी ब्रह्म संशिता।**[११] इत्यथर्वणवचनात्, **वाचीमा विश्वा भुवनान्यर्पिता।**[१२] इति तैत्तिरीयोक्तत्वात्, **वागिति पृथिवी, वागित्यन्तरिक्षं, वागिति द्यौः।**[१३] इति जैमिनीयप्रोक्तत्वाच्चास्य विश्वमण्डल-स्यादावोङ्कारः समभवदिति सुस्पष्टमेव। ओङ्कारं वेदमन्त्रोच्चारणात्प्राक् प्रयुञ्जन्ति शाखाध्यायिनः

**प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम्।**
**सावित्रीञ्चानुपूर्व्येण ततो वेदान् समारभेत्॥**[१४]

इति भगवतो याज्ञवल्क्यवचनात् सः प्रणवः स्फुटशब्दब्रह्मरूपो वेदस्तत्रोक्तेन ब्रह्मकर्मणा (श्रौतयज्ञानुष्ठानेन) च तत्र निष्णातो यजमानः परब्रह्माधिगन्तुं समर्थो भवति, यज्ञफलप्राप्तिरूपं स्वर्लोकं गत्वा तस्मिन्विलीय तद्वान् भवति। वेदमन्त्रेषु शब्दाः प्रयुक्ताः, शब्देष्वक्षरपुरुषोऽक्षरपुरुषे चाव्ययपुरुषरूपः प्रजापतिरुक्तः। स च कीदृशः? तदुक्तं-

**चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।**
**हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः॥**[१५]

इत्यत एव (4+4+2+5+2=17) सप्तदशसंख्यात्मको यज्ञप्रजापतिरेव वेदान्तिनामन्येषाञ्च ब्रह्मेत्युच्यते। तदिदं ब्रह्म सप्तदशाक्षरसंयुक्तं **ओश्रावय** इति चत्वारि, **अस्तु श्रौषट्** इति चत्वारि, **यज** इति द्वे, **ये यजामहे** इति

पञ्च, **वौषट्** इति च द्वे आहत्य सप्तदशसंख्या पूर्यते। तन्निमित्तमनुष्ठीयमानैर्यज्ञैर्महायज्ञैश्च सर्वेऽपि दीक्षिताः क्षत्रियवैश्यकुलोद्भवा यजमानाः **दीक्षितोऽयं ब्राह्मणः दीक्षितोऽयं ब्राह्मणः दीक्षितोऽयं ब्राह्मणः** इत्यनया दीक्षितघोषणया ब्राह्मणत्वं प्राप्यान्ते च ब्रह्मसाक्षात्कारद्वारा स्वात्मानं ब्राह्मीयं कुर्वन्ति। **महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनु**[१६] रिति मनुवचनादिदं ज्ञातं यच्छ्रौतानुष्ठानपरायणो भूत्वा ब्रह्मसाक्षात्कारेण स्वशरीरं ब्राह्मीयं करोतीति श्रौतानुष्ठानस्यापूर्वप्राप्तिः। ते च श्रौतयागाः सन्त्यनेकभेदभिन्नाः, तेषां विषये चर्चा परमावश्यकीत्यवगत्य तदुच्यते।

### श्रौतयज्ञानां भेदाः–

श्रौतस्मार्त्तभेदेन यज्ञो द्विविध उक्त इत्युक्तं प्राक्। तयोर्द्वयोर्लक्षणमपि तत्रोपस्थापितम्। साम्प्रतं श्रौतयज्ञानां भेदविषये तावत्किञ्चिद्विचार्यते। संस्थाक्रमेण **सप्तपाकयज्ञसंस्थाः** (सायंप्रातर्होमो, नवान्नेष्टिः, स्थालीपाकः, बलिवैश्वदेवः, पितृयज्ञः, अष्टका, पशुश्च) स्मार्त्तयज्ञान्तर्गताः, **सप्तहविर्यज्ञसंस्थाः** (अग्न्याधेयम्, अग्निहोत्रम्, पौर्णमासेष्टिः, अमावास्येष्टिः, नवसस्येष्टिः, चातुर्मास्यानि, पशुबन्धश्च) **सप्तसोमयज्ञसंस्थाश्च** (अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोर्यामश्च) श्रौतयागान्तर्गताः प्रोक्ताः। सर्वास्वपि संस्थासु मुख्यरूपेण नित्य–नैमित्तिक–काम्यभेदेन त्रिविधा यज्ञा भवन्ति। तत्रापि विशेषेण हविर्यज्ञसोमयज्ञसंस्थयोर्याः चतुर्दशसंस्थाः प्रोक्तास्तासां पुनस्त्रिविधत्वमुच्यते प्रकृति–विकृत्युभयात्मकभेदैः।

**प्रकृतियागस्य लक्षणम्–**

(1.) यत्र कृत्स्नं क्रियाकलापमुच्यते या प्रकृतिः।

(2.) यतो विकृतिरङ्गानि गृह्णाति सा प्रकृतिः।

(3.) प्रकर्षेणाङ्गोपदेशो यत्र क्रियते सा प्रकृतिः।[१७]

**विकृतियागस्य लक्षणम्–**

(1.) यत्र समस्तः क्रियाकलापो न पठ्यते सा विकृतिः।

(2.) चोदकाद् यत्र नाङ्गप्राप्तिस्सा विकृतिरिति।

(3.) प्रकृतिवद्विकृतिः कर्त्तव्या इति।

**प्रकृतिविकृत्युभयात्मकयागस्य लक्षणम्–**

(1.) यो यागः स्वयं विकृतिरूपः सन्नप्सन्यस्य कस्यचिद्यागस्य प्रकृतिभावं गच्छति, स प्रकृतिविकृतिरूपो यागो भवति। यथा– चातुर्मास्यानां

वैश्वदेवं पर्व। इदं दर्शपौर्णमासयोर्विकृतिः परं चातुर्मास्यानां उत्तरपर्वणां प्रकृतिभावं गच्छति। अत्रापि पक्षद्वयमाश्रीयते **होम-इष्टि-सोम** इत्येकः पक्षः, **इष्टि-पशु-सोम** इत्यपरः पक्षः। अस्माकं पूर्वजैर्मीमांसकैश्च द्वयोरपि पक्षयोर्विचारः कृतः।

**( क ) प्रथमपक्षाश्रयेणेवमुक्तम्-**

1. सर्वेषां होमानां प्रकृतिरग्निहोत्रम्। दर्विहोदयो विकृतय उच्यन्ते।
2. सर्वासामिष्टीनां प्रकृतिर्दर्शपूर्णमासौ। दाक्षायणाद्या इष्टयो विकृतय उच्यन्ते।
3. सर्वेषां सोमयागानां प्रकृतिरग्निष्टोमः। अत्यग्निष्टोमादयो विकृतय उच्यन्ते।

**( ख ) द्वितीयपक्षाश्रयेणेवमुक्तम्-**

1. सर्वासामिष्टीनां प्रकृतिर्दर्शपूर्णमासौ। दाक्षायणाद्या इष्टयो विकृतय उच्यन्ते।
2. सर्वेषां पशुयज्ञानां प्रकृतिरग्निषोमीयपशुयागविधिः। अन्ये पशुयागा विकृतय उच्यन्ते। अत्र महर्षि कात्यायनस्य मतं भिन्नमस्ति। तेषां सम्मतौ निरूढपशुबन्धः पशुयागानां प्रकृतिरिति।
3. सर्वेषां सोमयागानां प्रकृतिरग्निष्टोमः। अत्यग्निष्टोमादयो विकृतय उच्यन्ते।

अत्रेदं विशेषेणावधातव्यं यत्सोमयागा एकाहाहीनसत्रसाद्यस्क्रभेदात्पुनश्चतुर्विधा भवन्ति। यस्मिन् यागे एक एव सुत्सादिवसो भवति स एकाहः, यत्र द्व्यहादारभ्य द्वादशसुत्यादिवसा भवन्ति स अहीनसंज्ञकः, यत्र द्वादशाहादारभ्य सहस्रसंवत्सरपर्यन्तं सुत्यादिवसा अनुष्ठीयन्ते तत्सत्रम्, यो यागः पुनरेकस्मिन्नेवाहनि आरभ्य समाप्यते स साद्यस्क्र इत्युच्यते। तत्र यद्वैज्ञानिकं रहस्यं वर्तते, तद्विषये तावच्चिन्त्यते।

**श्रौतयज्ञस्य वैज्ञानिकता**- श्रौतयज्ञाः पूर्णतः वैज्ञानिकताभिरोतप्रोताः सन्ति। श्रौतयज्ञानां वैज्ञानिकत्वं स्पष्टयितुं सर्वप्रथमं विज्ञानशब्दार्थे विचार आवश्यकः प्रतीयते। तत्रायं प्रश्नः समुदेति यत् **विज्ञानं नाम किम्?** विषयेऽस्मिन्नुच्यते यत्- **विशिष्टं ज्ञानं विज्ञानमिति।** एवमुक्तप्रकारेण ज्ञानं द्विविधं- सामान्यज्ञानं विशिष्टज्ञानञ्च। ज्ञानविज्ञानयोः स्वरूपं स्पष्टयता अमरसिंहेनोक्तं- **मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।**[१७] अर्थात् मोक्षप्राप्त्यर्थं प्रयुक्ता बुद्धिर्ज्ञानम्, शिल्पकलायां शास्त्रार्थप्रतिपादने प्रयुक्ता बुद्धिर्विज्ञानमित्युच्यते। श्रौतानुष्ठानाय शिल्पज्ञानं शास्त्रार्थबोधश्चोभयमावश्यकं वर्तते। यथा यज्ञसाधनानां यागविहार-यज्ञपात्र-वेदि-खरादीनां निर्माणार्थं शिल्पकलाया ज्ञानमत्यन्तमावश्यकमस्ति। एवमेव कर्मानुरूपाणामुचितमन्त्राणां

प्रयोगोऽपि महत्त्वपूर्णं भवति। मन्त्रार्थज्ञानाभावे कस्य मन्त्रस्य कुत्र कथं प्रयोगः करणीयः? इति ज्ञानं कठिनं भवति। अत उभयविधं ज्ञानमत्यन्तमावश्यकमस्ति। प्रसङ्गानुसारमत्र शिल्पशब्दार्थो विचार्यते।

**शिल्पशब्दार्थः**- सामान्यपरिभाषायां प्रौद्योगिकी'ति शब्दस्यार्थः शिल्पविज्ञानं कलाविज्ञानं वेति भवति। शिल्पशब्दाय आङ्ग्लभाषायां **टेक्नोलॉजी** (Technology) इति शब्दः प्रयुक्तो वर्तते। शब्दोऽयं ग्रीकभाषायाः **तकने** (Techne) शब्दात् **तकनीकोज** (Technikos) शब्दाच्च विनिर्मितोऽस्ति। अस्य लैटिनरूपमस्ति **टेकसयर** (Texere) इति। यस्यानेकेऽर्थाः- सर्जनं, निर्माणं, उत्पादनं, ग्रन्थनं, सज्जीकरणमित्यादयो भवन्ति। वस्तुतः कस्मिन्नपि विशिष्टकार्ये व्यावहारिकी निपुणतैव प्रौद्योगिकी'त्युच्यते। तादृशी निपुणता, क्षमता, सिद्धता, दक्षता, तादृशं ज्ञानं वा यस्मिन् पुरुषे विद्यमानमस्ति, स एव प्रौद्योगिकीविदित्युच्यते। आङ्ग्लभाषायाम् आक्सफोर्डशब्दकोशे प्रौद्योगिकी'ति शब्दस्यार्थ एवमुक्तोऽस्ति- A particular way of doing something. तथा- The practical skill that somebody has in a particular activity. प्रौद्योगिकीं यो जानाति तस्य परिभाषा- He is a naturally talented runner, but he needs to work on his technique. एवं प्रदत्ताऽस्ति। अस्य तात्पर्यमिदमस्ति यदुद्योगक्षेत्रे विज्ञानक्षेत्रे वा व्यावहारिकैः कौशलैः सम्पन्नो जनः प्रौद्योगिकीज्ञ इत्युच्यते। अंग्रेजी-हिन्दी-शब्दकोशकारेण भार्गवेनापि स्वकीये शब्दकोशे टेकनिक् इति शब्दस्यार्थमेवं प्रस्तुतम्- Skill of an art of Craft. अर्थात् शिल्पसम्बन्धी या कला सा प्रौद्योगिकी'त्युच्यते। तादृशं ज्ञानं यस्मिन् शास्त्रे वर्णितमस्ति, तच्छास्त्रं टेक्नोलॉजी'ति नाम्ना लोके व्यवहृतमस्ति। टेक्नोलॉजी'ति शब्दस्यार्थं कुर्वता भार्गवेनोक्तं यत्- Science of industrial art. अर्थात् औद्योगिककलाविज्ञानं टेक्नोलॉजी'त्युच्यते। औद्योगिककलाविज्ञानस्य पर्यायोऽस्ति शिल्पविज्ञानमिति। तादृक् प्रौद्योगिककौशलसम्पन्नाय जनाय वेदेषु तक्षन्, तक्षा, तक्षक, शिल्पी, शिल्पकार इत्यादयोऽनेके शब्दाः प्रयुक्तास्सन्ति। कुशलतापूर्वकं वस्तुनां निर्माता तक्षेत्युच्यते। अनेनेदं स्पष्टं भवति यच्छिल्पकार एव प्रौद्योगिकीज्ञ इत्यनेन शब्देन वैदिकवाङ्मये वर्णितोऽस्ति। तेनेदं स्फुटं भवति यत् वैदिककाले प्रयुज्यमानः तक्षन् इति

शब्द एव कालान्तरे परिणतो भूत्वा टेक्निशियन् इत्यनेन शब्देन व्यवहृतोऽभवदिति। यद्यपि सर्वासां भाषाणां जननीत्वेन संस्कृतभाषा पूजिताऽस्ति। संस्कृतभाषाया आदिग्रन्थो वेद इत्यस्ति नात्र कस्यापि विप्रतिपत्तिः। अतो तक्षन् इत्यस्मात् वैदिकशब्दादेव टेक्निशियन् शब्दो विनिर्मित इति कथनं समीचीनमेवास्ति।

स च तक्षन् विशिष्टज्ञानेन सम्पन्नो भवति, यथोक्तमृग्वेदे- **तक्षन् रथं सुवृतं विद्मनापसः।**[१८] अर्थात् उभयविधविचारपूर्वकं कर्मकुशलः ऋभुनामकाः देवाः सुन्दरं रथं विनिर्मितवन्तः। **दक्षास ऋभवः**[१९] ऋभुगणाः निपुणाः शिल्पकाराः सन्ति। **त्वष्टा तक्षद् वज्रं स्वपस्तमं स्वर्य रणाय**[२०] शिल्पकारेषु सर्वश्रेष्ठः त्वष्टानामकः शिल्पी युद्धार्थमिन्द्रायातितीव्रं तेजोमयञ्च वज्रं चकार। शुक्लयजुर्वेदस्यैकस्मिन् मन्त्रे **शिल्पो वैश्वदेवः**[२१] इत्युक्त्वा शिल्पं सर्वदेवसम्बद्धं कथयन्नेवमुक्तं यच्छिल्पे विश्वस्य समस्तानामपि देवतानां ज्ञान-विज्ञानानि सम्मिलितानि भवन्ति। अत एवाद्यापीदं शिल्पकर्म शिल्पीनां समूहेन (Group) सम्पाद्यते। यथा कश्चित् शिल्पी शिल्पकर्माणि कुर्वन् घनैः, कुठारैः, खनित्रादिभिर्विविधयन्त्रोपकरणसाधनानामुपयोगैः काष्ठ-लौह-पाषाणादिद्रव्येषु यथाभीष्टामाकृतिं प्रदाय तद्द्रव्यं प्रतिष्ठाय च लोकोपयोगिनीं किंवा लोकप्रियां करोत्येवमेव यज्ञो यजमानस्यात्मानं संस्कृत्य तं देवतुल्यं करोतीति। श्रौतग्रन्थेषु स्पष्टरूपेण प्रोक्तमस्ति यच्छिल्पैर्यजमानः स्वात्मानं संस्कृतं करोति। यथा- **आत्मसंस्कृतिर्वै शिल्पानि छन्दोमयं वा एतैर्यजमान आत्मानं संस्कुरुते।**[२२] तथा **आत्मसंस्कृतिर्वै शिल्पानि आत्मानमेवास्य तत्संस्कुर्वन्ति।**[२३] वस्तुतः आत्मसंस्कारकं कर्म यज्ञ एवस्ति। विश्वस्य समस्तकर्मसु आत्मनः संस्कार एव मुख्यो वर्तते, तच्च यज्ञेनैव सम्भवति, अतो यज्ञः सर्वकर्मसु सर्वश्रेष्ठो मन्यते तदाह स्वयं श्रुतिः- **यज्ञो वै श्रेष्ठतमं कर्म।**[२४]

वयं जानीमो यद्विज्ञानस्य कार्यमस्ति आविष्कार इति। अत्रायं प्रश्नः समुदेति यदाविष्कारः कस्य भवति? एतस्मिन् विषये सर्वप्रथमम् अस्य शब्दस्यार्थविचार आवश्यकः। संस्कृतभाषा शब्दानां व्युत्पत्त्या अर्थबोधं कारयति, तस्मात् सर्वासु भाषासु श्रेष्ठा सर्वासां जननी चेयमुच्यते। व्युत्पत्त्याधारे **आविः प्रकटीक्रियतेऽनेनेत्याविष्कारः** अर्थात् कस्यापि गुप्ततथ्यस्य प्रकटनमेव वैज्ञानिकभाषायाम् आविष्कार इति कथ्यते। एवमुपर्युक्तप्रकारेण मनुष्येषु

देवासुरयोरुभयोर्गुणं विद्यमानं भवति। यस्मिन् मनुष्ये यस्य गुणस्य यदा यावत्यां मात्रायां प्राबल्यं भवति तदानीं सः मानवः तद्वदाचरणं करोति। उदाहरणार्थं श्रीरामो रावणश्चोभौ मानवौ स्थः। उभयोरपि गुणकर्माणि भिन्नानि-भिन्नान्यासन्। श्रीरामस्य गुणस्त्वस्माभिर्गीयते, तेषां गुणाः कर्माणि च वयमादर्शत्वेन स्वीकुर्मः। सोऽस्माभिर्मर्यादा- पुरुषोत्तमत्वेन विष्णोरवतारत्वेन च सर्वदा पूज्यते। तत्रैव समस्तज्ञान-विज्ञानैः परिपूर्णो रावणः ब्राह्मणः सन्नपि राक्षसत्वेन निन्द्योऽस्ति। अत एव वयं स्वबालकान् शिष्याञ्च शिक्षयामो यत्- **रामादिवद्वर्तितव्यं न रावणादिवत्।**

वस्तुतः श्रौतयागो यजमानस्यात्मानं संस्कृत्य तं देवतुल्यं करोति। उत वा एवं वक्तव्यं यच्छ्रौतयागे विहितया (आहवनीयाग्नि-गार्हपत्याग्नि-दक्षिणाग्नि-सभ्याग्नि-आवसथ्याग्निश्च) पञ्चाग्न्युपासनया यजमानस्याभ्यन्तरे गुप्तरूपेण विद्यमानानां दैवीयगुणानामाविष्कारो भवति। यतस्त्वग्निरेव सर्वदेवरूपोऽस्ति, सर्वं कर्तुं (निर्मातुं) समर्थोऽस्ति, अविनाश्यस्ति, परमात्माऽस्ति। श्रुतिरेवं वदति- **अग्निर्वै सर्वा देवताः**[२५]**, अग्निर्वै यज्ञः**[२६]**, अग्निः प्रजानां प्रजनयिता,**[२७] **अग्निरमृतोऽभवद् वयोभिः,**[२८] **अग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियाः**[२९] एवंविधा विविधाः सन्दर्भाः मिलन्ति यत्राग्नेः सामर्थ्यानां वर्णनमस्ति। अत एवास्माकं पूर्वजा ऋषयः अग्निन्देवं स्वेष्टं मत्वा तस्योपासनरूपेण यज्ञानुष्ठानेन समस्तमाधिभौतिकमाधिदैविक- माध्यात्मिकञ्च सामर्थ्यं प्राप्तुं मार्गं साधितवन्त इति। आधुनिकवैज्ञानिका अमुमग्निं ऊर्जारूपेण स्वीकुर्वन्ति। ऊर्जायाः परिभाषां प्रयच्छद्भिर्वैज्ञानिकैरुक्तं यत्- Energy can neither be created nor destroyed; rather, it can only be transformed from one form to another form. अर्थादूर्गिति तादृशं वस्त्वस्ति यन्न केनापि तदुत्पादयितुं शक्यते न च विनाशयितुमेव शक्यते। तत्केवलं एकस्माद्रूपादन्यस्मिन् रूपान्तरितं कर्तुं शक्यत इति।

अग्न्याधानमाध्यमेन श्रौताग्निपरिग्रहानन्तरं यजमानो नित्याग्निहोत्रादिकर्म समाचरन् क्रमशो दर्शपौर्णमास-चातुर्मास्य-पिण्डपितृयज्ञ-निरूढपशुबन्ध-अग्निष्टोमयज्ञानामनेक स्वरूपाणम् (एकाहाहीनसत्राणां) अनुष्ठानं कृत्वा विदेहमुक्तावस्थां प्राप्नोति। एवमाध्यात्मिकोन्नतिप्राप्ति- सदृशस्यास्य श्रौतयज्ञस्य वैज्ञानिकस्वरूपमस्माकं समक्षं स्फुटं भवति। श्रौतयागस्यारम्भस्त्वग्निपरिग्रहेण,

समापनञ्चाग्निसमारोपेण भवति। अग्नौ सोमद्रव्यस्याहुतिरेव याग इति। भगवान् कात्यायनो यागस्य लक्षणं एवं प्रस्तौति- **द्रव्यं देवता त्यागः।**[३१] अर्थात् देवतानिमित्तं द्रव्यस्य त्याग एव याग इत्यस्ति। अत्राग्निर्देवताऽस्ति आज्य-चरु-पुरोडाश-सोमादिकञ्च द्रव्याणि सन्ति। उक्तरीत्या अग्निसोमयोः संयोगेन सम्पत्स्यमानेन यागेन विश्वस्य निर्माणं भवति। यथोक्तं श्रुतौ- **अग्नीषोमात्मकञ्जगत्**[३२] अर्थादिदं जगत् अग्नि-सोमात्मकमस्ति। वस्तुत एकस्मादनेकस्मिन्नवतरणं यज्ञ इत्युच्यते। अनेकस्मात्पुनरेकस्मिन्नारोहणं योग इत्युच्यते। यथैकस्माद् बीजाद् अनेकबीजानामुत्पत्तिः कृषियज्ञो भवति। तथैव एकस्माद् ब्रह्मणः सकाशात् समस्तस्य प्रपञ्चस्योत्पत्तिः येन यागेन भवति सः सृष्टिसर्जनात्मको याग उच्यते। एषां यागानां वर्णनानि श्रौतग्रन्थेषु सन्ति, तस्मादेते श्रौतयागा उच्यन्ते। उक्ता इमे श्रौतयागा नित्यमाविष्कारात्मका-स्सन्ति एतस्मिन्नाधारे श्रौतयागानां वैज्ञानिकता पूर्णरूपेण सिद्धा भवतीति शम्।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. मनुसमृतौ-2/10
2. बृहदारण्यकोपनिषद्-4/1/2
3. शु.य.सं.-1/5
4. कात्यायन श्रौतसूत्र-1/1/5
5. उक्त श्रुतिवचन का उल्लेख कात्यायनश्रौतसूत्र के विद्याधर भाष्य की भूमिका में पृष्ठ सं- 32 पर किया गया है।
6. श्रीमद्भगवद्गीता- 4/13
7. स्कन्दपुराणे नागरखण्डे, 239 अध्याये, 31 तमः श्लोकः।
8. पारस्करगृह्यसूत्रे- 2/3/7-9
9. ऐ.आ.- 3/1/6
10. मैत्रायण्युपनिषद्- 6/22
11. अथर्ववेदे- 19/9/3
12. तै.ब्रा.- 2/8/8/4
13. जैमिनीयब्राह्मणोपनिषद्- 4/22/11

14. याज्ञवल्क्यशिक्षा- पूर्वार्द्ध-21
15. श्रौतयागप्रकरणे-
16. मनुस्मृतौ-
17. अमरकोष, धीवर्ग, श्लोक-6
18. ऋग्वेदे-1/111/1
19. ऋग्वेदे- 1/51/2
20. ऋग्वेदे- 1/61/6
21. यजुर्वेदे- 24/58
22. ऐ.ब्रा.-6/27
23. गोपथब्रा.- 2/6/7
24. श.प.ब्रा.- 1/7/1/5
25. श.प.ब्रा.- 1/6/2/8, 3/1/3/1
26. श.प.ब्रा.- 3/4/3/19, तां.ब्रा.- 11/5/2
27. तै.ब्रा.- 1/7/2/3
28. ऋ.सं.- 10/45/8, यजुर्वेद- 12/1
29. यजुर्वेद- 4/11, श.प.ब्रा.- 3/2/2/7
30. **तिष्ठद्धोमा वषट्कारेण प्रदाना याज्या-पुरोऽनुवाक्यावन्तो यजतयः। उपविष्टहोमा स्वाहाकारेण प्रदाना जुहोतयः।** ( का.श्रौ.सू.-1/2/6-7) इस प्रकार जिस कर्म में यजति देश में खड़ा होकर वषट्कार से आहुति दी जाती है वह याग कहलाता है, तथा जुहोति देश में बैठकर स्वाहाकार द्वारा जहाँ आहुति दी जाती है, वह होम या यज्ञ कहलाता है।
31. का.श्रौ.सू.-1/2/1
32. बृहज्जाबालोपनिषद्- 2/4

## श्रौतयज्ञानां पात्रपरिचयस्तेषां देवत्वविचारश्च

**श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।** [१] इति मनुवचनादिदं सिद्धमेव यच्छ्रुतिशब्दो वेदस्य पर्याय इति। श्रुतिसम्बद्धानि कर्माणि श्रौतानीत्युच्यन्ते। तस्याञ्च श्रुतौ येषां यज्ञानां साक्षाद्विधानान्युपलभ्यन्ते ते श्रौतयज्ञा इत्युच्यन्ते। येषां यज्ञानां विधानानि तावत् गृह्यधर्मसूत्रेषूपलभ्यन्ते ते यज्ञाः स्मार्ता इत्युच्यन्ते। तत्र पैप्पलादसंहिताया **अग्निर्यज्ञं त्रिविधं ( त्रिवृतं ) सप्ततन्तुम्**[२] इति मन्त्रांशमुद्धृत्य गोपथब्राह्मणे पाकयज्ञादीनां त्रयाणां सप्त-सप्त भेदाः कृतास्ते यथा-

**सप्त सुत्याः सप्त च पाकयज्ञाः**
**हविर्यज्ञाः सप्त तथैकविंशतिः।**
**सर्वे ते यज्ञा अङ्गिरसोऽपि यन्ति**
**नूतना यानृषयः सृजन्ति ये च सृष्टाः पुराणैः॥**[३]

अत्रोक्तानां त्रयाणामपि सप्तकानां नामनिर्देशो यथा गोपथब्राह्मणे समुपलभ्यते तदित्थम्-

**सायंप्रातर्होमौ स्थालीपाको नवश्च यः।**
**बलिश्च पितृयज्ञश्चाष्टका सप्तमः पशुः॥**
**अग्न्याधेयमग्निहोत्रं पौर्णमासममावास्ये।**
**नवेष्टिश्चातुर्मास्यानि पशुबन्धोऽत्र सप्तमः॥**
**अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यषोडशिमांस्ततः।**
**वाजपेयोऽतिरात्राप्तोर्यामात्र सप्तमस्तथा॥**[४]

उक्तास्वेकविंशतिः संस्थास्वादौ सप्त पाकयज्ञसंस्थाः स्मार्ताग्नावनुष्ठेया उक्तास्तदनन्तरम् अग्न्याधेयमारभ्याप्तोर्यामपर्यन्ताश्चतुर्दशसंस्थाः सप्त हविर्यागसंस्थाः सप्त सोमयागसंस्थाश्च श्रौताग्निसाध्याः प्रोक्तास्ताश्च पुनः प्रकृतिविकृत्युभयात्मकभेदैस्त्रिविधाः श्रौतविज्ञैर्मनीषिभिरुक्ताः।

**प्रकृतियागस्य लक्षणम्-**

यत्र समग्राङ्गोपदेशस्सा प्रकृतिः।[५]
यतो विकृतिरङ्गानि गृह्णाति सा प्रकृतिः।[६]
प्रकर्षेणाङ्गोपदेशो यत्र क्रियते सा प्रकृतिः।[७]

**विकृतियागस्य लक्षणम्**–

यत्र न समग्राङ्गोपदेशस्सा विकृतिः।[८]

य अन्यतः (प्रकृतेः) क्रियाकलापान् गृह्णन्ति ते विकृतयः।[९]

यत्र प्राकृताः धर्मा अतिदिश्यन्ते ते विकृतयः।[१०]

**उभयात्मकयागस्य लक्षणम्**–

न प्रकृतिर्न विकृतिस्तदुभयात्मकः।[११]

यः स्वयं विकृतिरूपः सन्नप्यन्यस्य प्रकृतिभावं गच्छति स उभयात्मकः।[१२]

अत्र पुनरिष्टिपशुसोमभेदात्त्रिविधानां यज्ञानां प्रकृतिविकृति–भेदनिदर्शनमेवं क्रियते–

**इष्टियागः– इष्टिशब्दः ऋत्विक्चतुष्टयसम्पाद्ययपत्नीक–यजमानकर्तृककर्मनाम।**[१३] समस्तानामिष्टीनां प्रकृतिर्दर्शपूर्णमासौ।

**पशुयागः– यत्र मांसमपि देवतायै दीयते सः पशुयागः।** सर्वेषामपि पशुयागानां प्रकृतिभूतोऽग्नीषोमीयः पशुयागः।[१४]

**सोमयागः– सोमो नाम लताविशेषस्तं कस्माच्चिदपि पुरुषात् क्रीत्वा ततो रसं निष्काश्य तेन च होमः क्रियते। अत एवास्य सोमयाग इति व्यवहारः।**[१५] सर्वेषां सोमयागानां प्रकृतिरग्निष्टोमः।

उपर्युक्तेष्वेषु सर्वेष्वपीष्टिपशुसोमात्मकेषु यागेषु यज्ञपात्राणामुपयोगो विधीयते। प्रकृतेऽस्मिन् निबन्धे द्वौ विभागौ स्तः। यज्ञपात्राणां परिचय इत्येको विभागः, यज्ञपात्राणां देवत्वविचार इत्यपरो विभागः। तदन्वत्र द्वयोरपि विभागयोरुपरि यथामति विमर्शः समुपस्थाप्यते। तत्र प्रथमं श्रौतयज्ञानां पात्रपरिचयविषये तावत्किञ्चिद्विचार्यते।

**पात्रशब्दार्थविचारः**–

पात्रशब्दो **पा** धातोः **ष्ट्रन्** प्रत्यये कृते सति निष्पद्यते। यस्य व्युत्पत्तिलभ्यार्थो भवति **पाति रक्षति, पिबन्ति अनेन वेति पात्रम्।** अर्थाद्येन साधनेन किमपि वस्तु संरक्ष्यते तत्पात्रमित्युच्यते। तच्च पात्रमच्छिद्रमेव भवेत्तदुक्तं श्रुतौ– **स्रवता ( पात्रेण ) न हस्ता अवनेनिजीत, न पिबेत्।**[१६] अतोऽनेनेदं स्फुटं भवति यत्पात्रेणैव पानमशनादिकं कर्त्तव्यमिति। यथा लोके मनुष्याणां कृते पात्राण्यावश्यकानि भवन्त्येवमेव यज्ञेषु देवेभ्यो यदा हविःप्रदानादिकं क्रियते तदानीं पात्राण्यावश्यकानि भवन्त्येव। यज्ञपात्राणां

विषये श्रौताचार्येण भगवता आपस्तम्बेनोक्तं यत्– **आधानप्रभृति यावज्जीवं पात्राणि धार्यन्तेतेषां प्रतितन्त्रं संस्कारः।**[१७] अर्थाद्यावज्जीवं धार्यत्वेन यज्ञपात्राणि विहितानि। प्रतिप्रयोगञ्च तेषामासादनप्रोक्षणमार्जनादिसंस्काराः कर्त्तव्याः।


यजमानदम्पत्योर्मध्ये प्रथमतो यस्य/यस्या वा मरणं भवति तद्देहेन सह सर्वेषां पात्राणां दाहो विहितः। प्रवर्ग्यसम्बन्धिपात्राणां तूत्तरवेद्यां स्थापनं तदुपर्यग्नेः स्थापनञ्च प्रवर्ग्योद्वासनकाले विहितम्। सोमयागे सोमलिप्तानां पात्राणामवभृथसमये तज्जले त्यागो विहितः। सामान्यतः पात्राणां दारुणा निर्माणं विहितम्। तथापि पात्रं दारुमयं मृण्मयं दर्भमयञ्चेति त्रिविधमुक्तम्। मृण्मयानां तावद्भेदनम्। दर्भमयेषु कानिचिद्यावज्जीवं धार्याणि, कानिचिच्च प्रयोगान्ते विसर्जनीयानि इत्यादिरूपेण विधानं दृश्यते। कस्य पात्रस्य किं प्रमाणम्? केन काष्ठेन निर्माणम्? कीदृशी चाकृतिरेतत्सर्वमत्र श्रौतशास्त्रोक्तरीत्या श्रौतयज्ञेषु विहितानां पात्राणां स्वरूपं विवरीतुं यथामत्यारभ्यते।

## यज्ञपात्राणां सचित्रं परिचयात्मकं विवरणम्

दारुनिर्मितानि मृण्मयानि दर्भमयानि च पात्राणि यज्ञोपकरणानि नव-विधानि सन्ति। तानि यथा– मन्थनपात्राणि, स्रुक्पात्राणि, यज्ञायुधपात्राणि, स्थालीपात्राणि, चमसाः, ग्रहाः, उपयोजनपात्राणि, प्रातिस्विकानि, आसनानि चेति।

**१. मन्थनपात्राणि**– अधरारणिः, उत्तरारणिः, देवयोनिः, प्रमन्थः, चात्रम्, ओबिली, नेत्रम्, अधिमन्थनशकलश्चेत्यग्निमन्थनयन्त्रावयवद्रव्याणि। अत्राह कात्यायनः– **अश्वत्थशमीगर्भाऽरणी प्रयच्छति। अभावेऽगर्भस्य।**[१८] तेनेदं स्फुटं भवति यच्छमीवृक्षेण संसक्तमूलो योऽश्वत्थः स शमीगर्भ इति। तस्य या प्राङ्मुखी वोदङ्मुखी वोर्ध्वगा वा शाखा स्यात् तां छित्वोभे **अरणी** कुर्यात्। अनयोश्चारण्योश्चतुर्विंशत्यङ्गुष्ठं दैर्घ्यम्, षडङ्गुष्ठविस्तारः, चतुरङ्गुष्ठोत्सेधश्च क्रियते। अष्टाङ्गुलदीर्घो द्व्यङ्गुलोत्सेधविस्तार उत्तरारण्या ईशानदिग्भागस्थितः **प्रमन्थो** गृह्यते। द्वादशाङ्गुलं खादिरं **चात्रं** वृत्तमष्टाश्रि मूलेऽग्रे च लोहपट्टिकया नद्धं, तस्याग्रे लोहमयः कीलकः कार्यः। **ओबिली** च खादिरी द्वादशाङ्गुलाऽधोभागे लोहपट्टिकायुक्ता च कार्या। गोबालैः शणमिश्रैः त्रिगुणं वृत्तं व्यामप्रमाणञ्च **नेत्रं** कार्यम्। अधरारणेर्मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलं त्यक्त्वा तत्र यच्चतुरङ्गुलमन्तराले भवति सा **देवयोनिः**। अधिमन्थनशकलस्तूत्तरारणेरधस्तात् स्थाप्यः।

**1.अधरारणिः 2.उत्तरारणिः 3.प्रमन्थः 4.चात्रम् 5.ओबिली 6.नेत्रम्**




**२. स्रुक्पात्राणि**– स्रुवः, ध्रुवा, जुहूः, उपभृत्, अग्निहोत्रहवणी इत्येतानि पञ्च स्रुक्संज्ञकानि पात्राणि। तत्र स्रुवः पुमान् अन्याः स्रुचः स्त्रियः सन्ति।

**क.स्रुवः**– आज्यादिद्रव्यमस्मात्स्रवति तस्मात् स्रुवो नाम। स च **खादिरः स्रुवः**[१९] अङ्गुष्ठपर्ववृत्तपुष्करो नासिकावत्पर्वार्द्धखातोऽरत्निमात्रदीर्घो बाहुमात्रो वा भवति।



**ख. ध्रुवा– वैकङ्कती ध्रुवा**[२०] यागसमाप्तिं यावदेकत्र वेद्यां स्थिता भवति तस्माद्ध्रुवा उच्यते। सा च बाहुमात्री, मूलदण्डा त्वग्बिला हंसमुखप्रसेका पाणिमात्रपुष्करा भवति।



**ग. जुहूः– पालाशी जुहूः**[२१] हूयतेऽनया तस्माज्जुहूः। बाहुमात्री, मूलदण्डा त्वग्बिला हंसमुखप्रसेका पाणिमात्रपुष्करा भवति।



**घ. उपभृत्– आश्वत्थ्युपभृत्।**[२२] जुह्वाः समीपे ध्रियते तस्मादुपभृत्। बाहुमात्री, मूलदण्डा त्वग्बिला हंसमुखप्रसेका पाणिमात्रपुष्करा भवति।




**ङ. अग्निहोत्रहवणी– अग्निहोत्रहवणी वैकङ्कती**[२३] बाहुमात्री, मूलदण्डा त्वग्बिला हंसमुखप्रसेका पाणिमात्रपुष्करा भवति।



**३. यज्ञायुधपात्राणि- द्वन्द्वम्पात्रमुदाहरति शूर्पञ्चाग्निहोत्र- हवणीञ्च स्फ्यञ्च कपालानि च शम्याञ्च कृष्णाजिनञ्चोलूखलमुसले दृषदुपले।**[२४] एतानि **दश**पात्राणि यज्ञायुधसंज्ञकानि भवन्ति। देवासुरयोर्मध्ये सृष्टिविषयकयुद्धे शत्रुरिवाचरणशीलानामसुराणां पराजयनिमित्तं देवैर्दर्शपौर्णमास-योरनुष्ठानं कृतम्। तस्माद्दर्शपौर्णमासयोर्युद्धरूपत्वं सिद्धयति। तत्र चैषां प्राधान्येनोपयोगो विहितस्तस्मादेतानि यज्ञायुधसंज्ञकान्युक्तानि।

तत्र **शूर्पं** वैणवमैषिकं नलमयं वा अचर्मबद्धं समचतुरस्रमरत्निमात्रं वृत्ताकारं वा कार्यम्। एतच्च व्रीह्यादीनां निस्तुषकरणायोपयुज्यते। **अग्निहोत्रहवणी** उपर्युक्तगुणयुक्ता। **वज्रः** (स्फ्यः) खदिरकाष्ठनिर्मितो वैकङ्कतकाष्ठनिर्मितो वा तीक्ष्णाग्रभागः खड्गाकृतिररत्निदीर्घश्चतुरङ्गुलविस्तृतो भवति। **कपालानि** मृण्मयानि द्विजहस्तघटितानि लौकिकाग्निपरिपक्वानि अश्वशफाकाराणि द्व्यङ्गुलोच्चानि पुरोडाशपाकार्थानि। **आग्नेयोऽष्टाकपालः।**[२५] **अग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपालः।**[२६] **आग्नावैष्णव एकादशकपालः**[२७] इत्यादिभिः श्रौतवाक्यैः अष्टाकपाल-एकादशकपालयोः सन्दर्भाः प्राप्यन्ते। **शम्या** खदिरकाष्ठनिर्मिता, विकङ्कतकाष्ठनिर्मिता, वारणकाष्ठनिर्मिता वा अग्रभागेऽष्टास्वङ्गुलीषु कुम्बाष्टकोपेता षट्त्रिंशदङ्गुलायामा शम्या कार्या। द्वात्रिंशदङ्गुला शम्या वाजसनेयिनाम्। प्रादेशमात्र तीक्ष्णाग्रेति केचित्। इयं च तण्डुलादिपेषणकाले दृषदुपलादिसमाहननादौ च दृषदोऽधस्तात् स्थापनायोपयुज्यते। **कृष्णाजिनम्** कृष्णसारमृगचर्मखण्डं सग्रीवशिरोभागं सचतुःपादभागं च कृष्णाजिनं कार्यम्। तच्च व्रीह्याद्यवघातकाले उलूखल-स्याधः स्थापनायोपयुज्यते। **उलूखलम्** पालाशं वारणं सारवद् वृक्षान्तरकृतं वोपरितनार्द्धभागे बिलयुक्तं पृथुबुध्नं बृहद्बकं मध्ये रास्नायुक्तं द्वादशाङ्गुलो-च्चायमरत्निमात्रं जानुमात्रं यथेच्छप्रमाणं वोलूखलं कार्यम्। तच्च चरुपुरोडाश-सम्बन्धिव्रीह्यादीनां कण्डनायोपयुज्यते। **मुसलम्** खादिरं वारणं सारवद्वृक्षान्तरकृतं वोलूखलार्द्धत्रिगुणायामं प्रादेशमात्रं त्र्यरत्निमात्रं यथेच्छप्रमाणं वा मुसलं कार्यम्। तदप्युलूखलवत्कण्डनायोपयुज्यते। **दृषत्** अश्ममयी प्रादेशमात्रदीर्घा षडङ्गुलनिःसृता चारत्निप्रमाणा इच्छाप्रमाणा वा दृषदुच्यते। सा च पेषणीयद्रव्याणां पेषणकाले आश्रयभूता भवति। **उपला** अश्ममयी षडङ्गुला प्रकल्पिताग्रभागा पेषणायोपला क्रियते। **उपलो वर्तुलः प्रोक्तो वितस्तिपरिमाणकः।** इत्येतानि दशयज्ञायुधपात्राण्युक्तानि।


1.शुर्पम्




2.अग्निहोत्रहवणी




3.वज्रः( स्फ्यः )



4.कपालानि




5.शम्या



6. कृष्णाजिनम्




7. उलूखलम्




8. मुसलम्



9. दृषदः



10. उपला




४. **स्थालीपात्राणि**- आज्यस्थाली, चरुस्थाली, अन्वाहार्यस्थाली, पिष्टोद्वपनी, पिष्टपात्री, हविर्द्धानपात्री, भर्जनपात्री, पुरोडाशपात्री, इडापात्री, दारुपात्री, यजमानपात्री, पत्नीपात्री, पूर्णपात्रम्, प्रणीतापात्रम्, प्रोक्षणीपात्रम्, फलीकरणपात्रम्, मदन्ती, द्रोणकलश इति स्थाल्यादिपात्राणि **षोडश।** तेषु तावदियं स्थाली शततृण्णा भवति। इह स्थाल्यादिकं सर्वमेव मृण्मयं पात्रं कुलालचक्रघटितमासुरं देवकर्मायोग्यं विज्ञेयम्। हस्तघटितमेव तु दैविकमिति।

तत्र**आज्यस्थाली** तैजसी वा मृण्मयी वा द्वादशाङ्गुलविस्तीर्णा प्रादेशोच्चा विधीयते। यथाकामं वाऽऽज्यस्थाल्याः प्रमाणं भवति। **साज्यस्थाली यस्यां**





**पवित्रमन्तर्द्धाय स्रुक्षु पूरणार्थमाज्यं गुह्यते। चरुस्थाली** मृण्मयी औदुम्बरी वा दृढा नातिबृहन्मुखी तिर्यगूर्ध्वं च समिन्मात्रा कार्या। **अन्वाहार्यस्थाली** अस्यां स्थाल्यामन्वाहार्या ओदनः श्रप्यते। सा यथेच्छं कार्या। **पिष्टोद्वपनी** अस्यां गार्हपत्याधिश्रितायां पिष्टानि समुप्यन्ते। **पिष्टपात्री** द्वादशांगुला चतुरस्रा विपुला च भवति। सैव **हविर्द्धानपात्री**त्यप्युच्यते। **भर्जनपात्री** भर्जनार्थमपेक्षितं मृण्मयं पात्रम्। **पुरोडाशपात्री** समचतुरस्रा वर्त्तुलेन खातेनोपेता भवति। **इडापात्री** अरत्निमात्री वैकङ्कती स्यादित्येके। आश्वत्थं पदपरिमितायाम-बिलयुक्तं चतुरंगुलपरिणाहं चतुरंगुलदण्डं पञ्चविंशतिपलं चेडापात्रमित्यन्ये। हुतहविःशेषादवदाय इडापात्रे स्थाप्यमानो हविर्भाग इडा, तदाधारत्वा-दिदमिडापात्रमित्युच्यते। **दारुपात्रम्** पात्रमिदमिडापात्रतुल्यं केनचिच्चिह्नविशेषेण इडापात्रात् कृतभेदं सम्पाद्यते। पक्वान् पुरोडाशान् कपालेभ्य उद्वास्य मन्त्रेणाज्योपस्तरणं कृत्वा कृतोपस्तरणस्थाने तत्रैप दारुपात्रे पुरोडाशान् स्थापयित्वा हविरासादनकाले वेद्यामासादयन्ति। तत्पात्रस्थानामेव पुरोडाशानां यागकाले प्रधानहोमार्थं, ब्रह्मभागार्थं, यजमानभागार्थं, स्विष्टकृदर्थं, प्राशित्रार्थमिडापात्रे नीत्वा चतुर्धाकरणार्थमवदानञ्च क्रियते। **यजमानपात्री पत्नीपात्री** च उभे यजमानस्तत्पत्न्योः प्राशनार्थं यथारुचि प्रकल्पिते भवतः। **पूर्णपात्रम्** यावताऽन्नेन भेक्तुः पूर्णा तृप्तिः सम्भाव्यते, तावद्भिर्व्रीहिभिर्यवैर्वा पूर्णं पात्रं पूर्णपात्रमिति। सामान्यतो व्रीह्याद्यन्नमुष्टीनां षट्पञ्चाशेन शतद्वयेन पूर्णं पूणपात्रमित्यहुः। **प्रणीतापात्रम्** आश्वत्थं वारणं वा प्रादेशमात्रमष्टांगुलबिलं चतुरंगुलदण्डं पात्रम्। तेन प्रणीतानाम्न्य आपो नीयन्ते। **प्रोक्षणीपात्रम्** पाणिमात्रं वैकङ्कतं हंसमुखप्रसेकं त्वग्बिलं चतुरंगुलञ्च कार्यम्। **फलीकरणपात्रम्** अश्वत्थमयं यथाकामप्रमाणं फलीकरणेन प्राप्ततुषाणां यागसमाप्तिकालं यावत्संरक्षणार्थं विनिर्मितं पात्रमिति। व्रीह्यादी**नुलूखले मुसले**नावहत्य **शूर्पेण** निस्तुषीकरोति। तत्र ये तुषादयः पतन्ति ते फलीकरणशब्देन व्यपदिश्यन्ते। यागानन्तरं फलीकरणेन प्राप्तानां व्रीह्यादितुषाणां जुह्वा चतुर्गृहीतेनाज्येन सह दक्षिणाग्नौ होमो विधीयते। **मदन्ती भर्जनपात्र्य**धिश्रयणकाले यज्जलपात्रमधिश्रितं भवति तत्रत्यं जलं मदन्तीत्युच्यते। मदन्तीसंज्ञिका आपो यस्मिन्पात्रे संताप्यन्ते तत्पात्रमपि लक्षणया मदन्तीत्युच्यते। **द्रोणकलशः** पलशतग्राही पारिप्लवाकृतिः कार्यः। जुहूसदृशे महापुष्करे द्वे पात्रे द्रोणकलशावित्याहुः।

1.आज्यस्थाली 2.चरुस्थाली 3.अन्वाहार्यस्थाली 4.पिष्टोद्वपनी










5.पिष्टपात्री 6.भर्जनपात्री 7.पुरोडाशपात्री 8.इडापात्री

9.दारुपात्रम् 10.यजमानपात्री, पत्नीपात्रीच





11. पूर्णपात्रम् 12. प्रणीतापात्रम् 13. प्रोक्षणीपात्रम्

14. फलीकरणपात्रम् 15. मदन्ती 16. द्रोणकलशः











**५. चमसाः**- विकङ्कतमयाः, पलाशमयाः, वटमया अन्यकाष्ठमया वा श्लक्ष्णास्त्वग्बिलाः कार्याः। तेषां दण्डाश्चतुरङ्गुलाः, स्कन्धो द्व्यङ्गुलः, विस्तारश्चतु- रङ्गुलाश्चोक्ताः। दशचमसाध्वर्यवो भवन्ति तेषां चमसवृन्तेषु विशेषलक्षणमुक्तं कात्यायनेन परिशिष्टे-

**विकङ्कतमयाः श्लक्ष्णास्त्वग्बिलाश्चमसाः स्मृताः।**
**चतुरङ्गुलखाताश्च तेषां दण्डेषु लक्षणम्॥**
**होतुर्मण्डल एव स्याद् ब्रह्मणश्चतुरस्रकः।**
**उद्गातृणां च त्र्यस्त्रिः स्याद्याजमानः पृथुः स्मृतः॥**
**प्रशास्तुरवतष्टः स्यादुत्तष्टो ब्रह्मशंसिनः।**
**पोतुरग्रे विशाखी स्यान्नेष्टुः स्याद्द्विगृहीतकः॥**
**अच्छावाकस्य रास्ना च आग्नीध्रस्य मयूषकः॥**[२८]




**चमसपात्रम्   1.मण्डल-होतृचमसः   2.चतुरस्र-ब्रह्मचमसः**



**3.त्र्यस्त्रि-उद्गातृचमसः 4.पृथु-यजमानचमसः 5.अवतष्ट-प्रशास्तृचमसः**

**6.उत्तष्ट-ब्राह्मणाच्छंसिचमसः 7.विशाखी-पोतृचमसः 8.द्विगृहीतक-नेष्टृचमसः**






**9.रास्नावान्-अच्छावाक्चमसः 10.मयूख-आग्नीध्रचमसः**

**६. ग्रहाः**– सोमस्य ग्रहाः चत्वारिंशद्भवन्ति। ते यथा– उपांश्वन्तर्यामौ द्वौ, उपांशुसवन एकः, ऐन्द्रवायवः, मैत्रावरुणः, आश्विन इति द्विदेवत्यास्त्रयः, शुक्रामन्थिनौ द्वौ, आग्रयणोक्थ्यध्रुवास्त्रयः, पूतभृत्, आधवनीय इति द्वौ, ऋतुग्रहाः द्वादश, ऐन्द्राग्नः, वैश्वदेवः इति द्वौ, मरुत्वतीयास्त्रयः, माहेन्द्र एकः, आदित्यः, सावित्र इति द्वौ, वैश्वदेवः, पात्नीवतः, हारियोजन इत्येते त्रयः, अंशुरदाभ्य इति द्वौ, दधिग्रहः, षोडशी इति द्वौ। इत्थं चत्वारिंशत्। तत्रादितः षट्त्रिंशदग्निष्टोमीयाः। अंश्वादयस्तु चत्वारोऽत्यग्निष्टोमीया उक्ताः।


**ग्रहपात्राणि**–




तत्रौदुम्बरं **चतुःस्रक्ति** दधिग्रहपात्रम्, **रास्नाचिह्नितं** पात्रमैन्द्रवायवम्, **पिलकाचिह्नितं** मैत्रावरुणम्, **द्विकोणं** पात्रमश्विनम्, बैल्वं शुक्रपात्रम्, वैकङ्कतं श्लक्ष्णं मन्थिपात्रम्, औदुम्बरं चतुःस्रक्ति अंशुपात्रम्, औदुम्बरं श्लक्ष्णमदाभ्यम्, न्यग्रोधकाष्ठनिर्मितान्यतिग्राह्याणि, इतराणि तु पात्राणि नैयोग्रोधान्यौदुम्बराणि वा कार्याणि। तानीमानि दधिग्रहादीनि प्रादेशमात्राण्युलूखलाकाराणि एकतो मुखानि वायव्यानि सप्तदशपात्राणि। ऋतुपात्रे द्वे उभयतोमुखे कार्ये।

**७. उपयोजनपात्राणि**– प्राशित्रहरणम्, शृतावदानम्, मेक्षणम्, दर्वी, आकर्षफलत्वम्, कङ्कतम्, धृष्टिः, उपवेषः, अभ्रिः, कूर्चम्, षडवत्तम्, परिधयः, श्रपणी, शूलम्, पशूखा, अन्तर्द्धानकटः, वेदः, वेदपरिवासनम्, पवित्रम्, प्रोक्षणी, विधृतिः, प्रस्तरः, बर्हिः, जूना, योक्त्रम्, इध्मः, इध्मप्रव्रश्चनः, शाखा, विषाणम्, आसन्दी, इत्येवमादीन्युपयोजनपात्राणि कर्मभेदाद् बहुधा भिद्यन्ते। तेषु केषाञ्चिदत्र चित्राण्युपस्थाप्यन्ते। यथा–

**प्राशित्रहरणम् शृतावदानम् मेक्षणम् दर्वी आकर्षफलकम् कङ्कतम्**






तत्र **प्राशित्रहरणं** खादिरं वैकङ्कतं वा प्रादेशमात्रादर्शाकारं चमसाकारं गोकर्णाकारं वा चतुरङ्गुलदण्डयुक्तं कार्यम्। हुतशेषहविर्भागो ब्रह्मणे देयः प्राशित्रम्। तदनेनाह्रियते तस्मात् प्राशित्रहरणम्। **शृतावदानं** वैकङ्कतं प्रादेशमात्रदीर्घं पृथुवक्त्रमङ्गुष्ठपर्वमात्रं तीक्ष्णाग्रं कार्यम्। शृतमन्नमनेनावद्यते तस्मात् शृतावदानम्। **मेक्षणम्** इध्मजातीयमिध्मप्रमाणार्द्धप्रमाणं वैकङ्कतं प्रादेशमात्रं कार्यम्। **दर्वी** मेक्षणसदृशो दर्वी भवति। साऽरत्निमात्रा वारणी तुर्यांशाधिक-पुष्करा हस्ताकारा द्व्यङ्गुलपृथ्वग्रा सर्पफणाकृत्यग्रा च कार्या। **आकर्षफलकम्** धनुराकृति हस्तमात्रं सर्पफणाकाराग्रं खादिरं वैकङ्कतं वा कार्यम्। **कङ्कतानि** त्रिदन्तीनि वारणानि भवन्ति। **धृष्टिः** धृष्टिरपि मेक्षणसदृशी भवति। सा च कपालोपधाने गार्हपत्यादङ्गारोद्धरणादावुपयुज्यते। तेनात्युष्णमपि द्रव्यं सहसा गृहीतुं प्रगल्भते तस्मात् धृष्टिरित्युच्यते। **उपवेषः** धृष्ट्याकारः प्रादेशमात्रः पालाशो वत्सापाकरणशाखायाः पर्णानि छित्वा विनिर्मितो भवति। अरत्निमात्रो वैकङ्कतो खादिरो वा हस्ताकारो भवति। **अभ्रिः** अरत्निप्रमाणा खादिरा वैकङ्कती वारणी वौदुम्बरी वा तीक्ष्णमुखा कार्या। काष्ठकुद्दालोऽभ्रिः। तस्याः शासं दशाङ्गुलं कार्यम्। **कूर्चः** कुशमयो बाहुमात्रो मकराकारः। मलिनद्रव्यमलापकर्षणादा- वुपयुज्यते। देवयाज्ञिकस्तु वारणकाष्ठनिर्मितः पीठाकारः प्राह।[२९] **षडवत्तं** वारणनिर्मितं वैकङ्कतं वा षडङ्गुलप्रमाणं चतुरस्रमुभयतः शातं कार्यम्। **परिधयः** श्रैपर्णा बाहुमात्रा अपुष्कराः कार्याः। श्रपण्यौ श्रैपर्ण्यौ हस्तमात्रे भवतः। **शूलं** हस्तमात्रं यस्य कस्यचित्तरोर्यज्ञियस्य क्रियते। **पशूखा** मृण्मयी, लौही, ताम्रमयी वा स्यात्। **अन्तर्धानकटः**

आश्वत्थो वैकङ्कतो वा द्वादशाङ्गुलोऽर्धचन्द्राकृतिः किञ्चिदुच्छितशीर्षा भवति। यदा गार्हपत्येऽध्वर्युः पत्नीसंयाजैः प्रचरति तदा तत्राहूतानां देवपत्नीनां तिरोधानेनावस्थानायोपयुज्यते। वेदो दर्भमुष्टिरुच्यते। स च प्रदक्षिणमावेष्ट्य-द्विगुणः कृतः प्रादेशमात्र उपविष्टवत्सजानुसदृशसम्पन्नः प्रच्छिन्नाग्रः स्यात्। समन्त्रके वेदिसंमार्जनादावुपयुज्यते तस्माद्वेदः। वेदपरिवासनानि वेदस्य यान्यग्राणि पूर्वं छिन्नानि तानि वेदपरिवासनान्युच्यन्ते। **पवित्रम्** अनखछिन्नं साग्रं प्रादेशमात्रं द्विदलं समपरिणाहं मन्त्रसंस्कारयुक्तं दर्भद्वयम्। तेन प्रोक्षणादिप्रयोगाः क्रियन्ते, तस्मात् पवित्रम्। **प्रोक्षण्यः** व्रीह्यादिप्रोक्षणार्थ-मग्निहोत्रहवण्यां गृहीता आपः प्रोक्षण्यः। **विधृतिप्रस्तरबर्हिषे** दर्शपौर्णमासे द्वौ दर्भावुदगग्रौ वेद्यां निधीयेते तयोर्विधृतिसंज्ञा। चतस्रो दर्भमुष्टयश्छिद्यन्ते तत्र प्रथमा या मन्त्रसंस्कृता विधृत्योपरि प्रागग्रा निधीयते तस्याः प्रस्तरसंज्ञा भवति। अन्यास्तिस्रो मुष्टयो वेद्यास्तरणार्था बर्हिरिति। तदित्थं दर्भाणामेवावस्था-विशेषादेताः समाख्या भवन्ति- वेदः, पवित्रम्, विधृतिः, प्रस्तरः, बर्हिरिति। **जुना** बर्हिषां बन्धनोपयुक्तं बर्हिःसन्नहनम्, इध्मानां बन्धनायोपयुक्तमिध्म-सन्नहनमिति द्विविधा भवति। तयोर्लौकिकी संज्ञा जुनेति। **योक्त्रं** मुञ्जमयं सन्नहनम्। अध्वर्युप्रेषित आग्नीध्रो पत्नीकटिप्रदेशे वेष्टनगुणेन सन्नह्यति स गुणो योक्त्रमिति। **इध्मानि** बर्हिः सम्भरणानन्तरमध्वर्युः परशुना तूष्णीमिध्मानां एकविंशतिसंख्याकानां छेदनं करोति तदिध्म इति। **परिधयः,** समिधश्चेति द्विविधः। आहवनीयस्य पश्चाद्दक्षिणत उत्तरतश्च प्रथममेखलोपरि स्थापनार्थं मेखलापरिमाणायामं काष्ठत्रयं परिधिशब्देनोच्यते। अन्याष्टादशकाष्ठानि प्रादेशमात्राणि समिधः। **इध्मप्रव्रश्चनानि** इध्मच्छेदनकाले यानि काष्ठशकलानीतस्ततः पतन्ति तानीध्मप्रव्रश्चनानीत्युच्यन्ते। **शाखा** अध्वर्युना पलाशस्य समन्त्रकच्छिन्ना विहारमानीता शाखा। तस्याग्रभागश्छिन्नस्त्रिभिर्दर्भैर्वेण्या-कारेण निबद्धः शाखापवित्रमिति। **विषाणम्** दीक्षितस्य कण्डूतिसाधनं शृङ्गनिर्मितं विषाणं नाम। **आसन्दी** औदुम्बरी नाभिदध्नपादा अरत्निमात्रशीर्ष्णी मौञ्जविवयना आसन्दी भवति। **औदुम्बरीमासन्दीम्...**।[३०]

८. **प्रातिस्विकः**- सिकतादयो पञ्चविंशत्याधानस्सम्भाराः, वल्मीकवपादयो यज्ञशिरसि पञ्चसम्भाराः, महावीरः, परीशासौ, प्रचरणी, उपयमनम्, उपयमनी, पिन्वने, रौहिणकपाले, रौहिणहवण्यौ स्रुचौ, मयूखः, होतृपीठम्, घनः, परशुः, रथः, शकटम्, वसतीवरी, धमनी, चरुपात्रम्,

सप्तदशारचक्रमित्यादीन्यनेकानि प्रातिस्विकानि पात्राणि भवन्ति। तेषु केषाञ्चन चित्राण्यत्रोपस्थाप्यन्ते। यथा–







महावीरः, प्रचरणी, उपयमनम्, उपयमनी, परीशासौ, पिन्वने, रौहिणकपाले, रौहिणहवण्यौ स्रुचौ इत्येतानि दश यज्ञशिरः पात्राणि। तत्र **महावीरः** मृत्पिण्डेन निर्मितं प्रादेशमात्रं मध्यसंगृहीतं महावीरपात्रं भवति। तस्योपरिष्टात् त्र्यङ्गुलं मुखं तत्र नासिका च क्रियते। **परीशासौ** अत्युष्णं महावीरपात्रमग्नेरुपरिष्टादधः स्थापयितुं यज्ञकाष्ठनिर्मिते मध्यवर्तुले द्वे पात्रे परीशासावुच्येते। **परीशासावादत्ते।**[31] **प्रचरणी** वैकङ्कतं जुहूसदृशं पात्रं प्रचरणी नाम। महापुष्करं महादण्डम्। उपयमनम् जुहूसदृशमुपयमनम्। **रौहिणहवणी** जुहूसदृश्याकृतियुक्ता गर्तरहिता बाहुमात्री रौहिणपुरोडाशाहुतिकाले प्रयुक्ता।




**मयूखः** अजबन्धनाय भूमौ स्थाप्यमानः स्थूणाविशेषो मयूखः। **होतृपीठम्** यज्ञकाष्ठनिर्मिते पीठे समुपविश्य होता सामिधेनीनामृचां पाठं करोति तदासनं होतृपीठमुच्यते। **रथः** यज्ञे राज्ञामावागमनार्थमुपयुक्तं वाहनम्। **आसनानि चारत्निमात्रदीर्घाणि प्रादेशमात्रविपुलानि।**[३२] **चरुपात्रम्** यागनिमित्तं गार्हपत्याग्नौ पक्वान्योदनानि हवींषि चरुसंज्ञकानि भवन्ति। तेषां स्थापनार्थं प्रयुक्तं पात्रं चरुपात्रमिति। **शकटम्** हविषामानेतुं प्रयुक्तम्। ते द्वे दक्षिणोत्तरयोः हविर्द्धानयोः स्थाप्येते। **वसतीवरी** यज्ञार्थमुपयुक्ता नद्याः सकाशादानीता आपो वसतीवर्य उच्यन्ते। **वसतीवरीर्निनयन्ति।**[३३] **धमनी** वंशनिर्मितं मुखद्वायुं प्रेरयित्वा अग्निप्रज्ज्वालनसाधनविशिष्टं पात्रम्। **एकधनम्** यज्ञोपयोगि जलपूर्णं मृण्मयं घटसदृशं पात्रम्। **प्रत्यगेकधनान्।**[३४] **घनः** लौहनिर्मितः काष्ठदण्डयुक्तः स्थूणानिखननार्थमुपयुक्तः। **स्थूणां गोबन्धनार्थं निखनति।**[३५] **परशुः पलाशशाखां छिनत्ति**[३६] यज्ञनिमित्तं तृणदर्भकाष्ठादीनां छेदनार्थं शस्त्रविशिष्टम्। **सप्तदशारचक्रम्** वाजपेययागे सप्तदशसंख्याया महत्त्वमस्ति। तत्र रथे नियोज्यमानं सप्तदशारसंयुतं चक्रमिदम्।

**९. आसनानि–**

**यजमानासनम्,** **ब्रह्मासनम्** **पत्न्यासनम्,**

**अध्वर्य्वासनम्,** **होत्रासनम्,** **आग्नीध्रासनम्**

इत्यादीन्यासनान्यरत्निमात्राणि कार्याणि।

**श्रौतयज्ञपात्राणां देवत्वविचारः–**

इतः पूर्वं श्रौतयज्ञपात्रपरिचयात्मके खण्डे तेषां निर्माणविधिः स्वरूपञ्च सचित्रमुपस्थापितमिह तेषां यज्ञपात्राणां देवत्वविचारः क्रियते। पूर्वमेवोक्तं

यत्पात्राणि दारुनिर्मितानि मृण्मयानि दर्भमयानि चोक्तानि। तत्र यानि दारुमयानि तान्यग्निदेवत्यानीत्युक्तं श्रुतौ। यथा– **अग्निमद्धै दारुपात्रम्**[३७] इति। **न मृत्पात्रेणापिदध्यात्। यन्मृत्पात्रेणापिदध्यात् पितृदेवत्यं हविः स्यात्।**[३८] इत्यनेन श्रौतवचनेन मृण्मयानां पात्राणां पितृदेवत्यं स्फुटमेव विज्ञातम्भवति। तथा च **आपो दर्भाः**[३९] इति वचनाद्दर्भाणां आपोदेवत्यं रूपं सिद्धं भवति। तथापि केषाञ्चित्पात्रविशेषाणां कृते पृथक्–पृथग् देवत्वविचाराः प्राप्यन्ते। तेषामत्र यथामति प्रतिपादनं कतुमीहे।

**पृथिवी देवता विराट्च्छन्दो ध्रुवस्य पात्रमसि**[४०] इत्यनेन वचनेनेदं सिद्धं भवति यत् ध्रुवानाम्न्यः स्रुचः पृथिवी देवता उक्ता।

**आग्नेयी वै जुहूः।**[४१] **यजमानदेवत्या वै जुहूः।**[४२] इत्याभ्यां श्रौतवचनाभ्यां जुहूर्नाम्न्यः स्रुचो देवता अग्निरप्युक्ता यजमानोऽप्युक्तेति।

**भ्रातृव्यदेवत्योपभृत्।**[४३] **सावित्र्युपभृत्।**[४४] इत्याभ्यां श्रौतवचनाभ्यामुपभृन्नाम्न्यः स्रुचः भ्रतृव्यदेवता सविता देवता चोक्ता।

**असा आदित्यः स्रुवः।**[४५] अनेन श्रुतिवचनेन स्रुवस्य देवता आदित्योऽस्तीति स्फुटमवगम्यते।

**शूर्पं वैणवमेव।**[४६] **अग्निर्देवेभ्य उदक्रामत् स वेणुं प्राविशत्।**[४७] इति शतपथवचनाद्वेणुनिर्मितस्य शूर्पस्याग्निर्देवता सुनिश्चिता भवति।

**वज्रः आङ्गिरसः।**[४८] **वज्रो वै स्फ्यः।**[४९] **वज्रः शम्या।**[५०] इत्यादिभिर्वचनैरिदं स्फुटमेव विज्ञायते यद्वज्र एव स्फ्यः, वज्र एव च शम्या अस्ति। स च वज्रः स्वयमग्निदैवत्यो वर्तते तस्माद्वज्रस्फ्यशम्यानामग्निरेव देवता प्रसिद्धेति।

**असौ ( द्यौः ) कृष्णाजिनम्।**[५१] **इयं ( पृथिवी ) वै कृष्णाजिनम्।**[५२] इत्याभ्यां श्रौतवचनाभ्यां कृष्णाजिनस्य द्यावापृथिवी देवता सुस्पष्टा भवति।

**वैष्णवम् उलूखलम्।**[५३] **योनिरुलूखलं शिश्नं मुसलम्।**[५४] **हनू एव दृषदुपले।**[५५] इत्येतैः श्रौतवचनैरिदं स्पष्टं यदुलूखलमुसलदृषदुपलानां विष्णुर्देवतेति। एवमेव सर्वेषामपि यज्ञपात्राणां देवताविचारो यत्र–तत्र स्थलेषु कृतो विद्यते। परं लघुकायेऽस्मिन्निबन्धे तेषां सर्वेषामप्युल्लेखो नास्ति सम्भवः। विषयोऽयमस्ति गम्भीरः समुद्रवदगाधोऽनन्तश्च, अतोऽस्मिन् विषये महान् शोधकार्यं कर्तुं शक्यते। तस्मादत्यल्पकाले नैव तादृशं विस्तृतं विवेचनं शक्यमस्तीति ज्ञात्वाऽहमत्रैव स्वीयां वाचमवसाययामि।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी–

1. मनुस्मृतौ– 2/10
2. पैप्पलादसंहितायाम्– 5/28/1, गोपथब्राह्मणे– 1/1/12
3. गोपथब्राह्मणे– 1/5/25
4. गोपथब्राह्मणे– 1/5/23
5. मीमांसान्यायप्रकाशः 52 तमे पृष्ठे। का. सं. सीरिज। वेदार्थपारिजाते च 2096 तमे पृष्ठे।
6. मीमांसान्यायप्रकाशः 44 तमे पृष्ठे। का. सं. सीरिज।
7. तै0सं0भाष्यभूमिकायाम्, 8 तमे पृष्ठे। वै.सं.मण्डलम्, पुणे। वेदभाष्यभूमिकासंग्रहः, काशी, 6 तमे पृष्ठे।
8. मीमांसान्यायप्रकाशः 53 तमे पृष्ठे। का. सं. सीरिज।
9. श्रौतयज्ञमीमांसायाम्, 12 तमे पृष्ठे।
10. मीमांसकानां वचनात् फलितोऽर्थः।
11. मीमांसकानां वचनात् फलितोऽर्थः।
12. श्रौतयज्ञमीमांसायाम्, 13 तमे पृष्ठे।
13. श्रौतपदार्थनिर्वचने, प्रथमे पृष्ठे।
14. यज्ञतत्त्वप्रकाशे 34 तमे पृष्ठे।
15. का.श्रौ.सू. (विद्याधरशर्मा) भूमिकायां 42 तमे पृष्ठे।
16. मैत्रायण्याम्– 4/2/1
17. आप.श्रौ.सू.– 24/1/28.29
18. का.श्रौ.सू.– 4/7/20–21
19. का.श्रौ.सू.– 1/3/32
20. दे.या.प.– 6 तमे पृष्ठे।
21. का.श्रौ.सू.– 1/3/34
22. का.श्रौ.सू.– 1/3/35
23. दे.या.प.– 6 तमे पृष्ठे।
24. श.प.ब्रा.–1/1/1/22
25. तै.सं.–7/5/21/1, मै.सं.–1/10/1, का.सं.–9/4, तै.ब्रा.–3/9/17/1
26. शु.य.सं.– 29/60
27. मैत्रायण्याम्–2/6/4, 3/1/10, 4/3/1, काठ– 15/1
28. देवयाज्ञिकपद्धतौ– 306 तमे पृष्ठे उल्लेखः।
29. यैः पात्रैः होमो न क्रियते तानि सर्वाणि वारणानि भवन्ति। तानि चोलूखल–मुसल–कूर्चे–डापात्री–पिष्टपात्री–पुरोडाशपात्री–शम्या–शृतावदाना–भ्रुपवेषा–

ऽन्तर्द्धानकट-प्राशित्रहरण-षडवत्त-ब्रह्मासनादीनि। कूर्चो बाहुमात्रः पीठाकारः। (दे.या.प., पृष्ठ-6-7)

30. दे.या.प.- 260 तमे पृष्ठे।
31. का.श्रौ.सू.- 26/5/12
32. दे.या.प.- 7 तमे पृष्ठे।
33. दे.या.प.- 308 तमे पृष्ठे।
34. का.श्रौ.सू.- 9/2/22
35. दे.या.प.- 265 तमे पृष्ठे।
36. दे.या.प.- 76 तमे पृष्ठे।
37. मै.-4/1/3, काठ-31/2, क- 47/2, तै.ब्रा.- 3/2/3/8
38. काठ-31/2, क- 47/2
39. तै.ब्रा.- 3/3/2/1, श.प.ब्रा.- 2/2/3/11
40. तै.सं.- 3/1/6/3
41. तै.ब्रा.- 3/3/7/6,
42. तै.सं.- 2/5/9/5, तै.ब्रा.- 3/3/5/4
43. तै.सं.- 2/5/9/5, तै.ब्रा.- 3/3/5/4
44. तै.सं.- 3/3/7/6
45. मै.-4/1/11;12; 7/3, काठ- 31/5
46. दे.या.प.- 6 तमे पृष्ठे।
47. श.प.ब्रा.- 6/3/1/31
48. जै.ब्रा.- 3/15
49. श.प.ब्रा.- 1/2/5/20
50. क. -47/5
51. काठ- 19/4
52. श.प.ब्रा.- 6/4/9/1
53. मै.- 3/2/7
54. श.प.ब्रा.- 7/5/1/38
55. श.प.ब्रा.- 1/2/1/17

## उपनिषत्सु सामाजिक-आध्यात्मिक-राष्ट्रियचिन्तनम्

विदन्त्येव भवन्तस्सर्वे यद्वेदो द्विविधो मन्त्ररूपो ब्राह्मणरूपश्चेति। मन्त्रसमुदाय एव संहितापदेन व्यवह्रियते। ताश्चतस्रः-ऋक्संहिता, यजुःसंहिता, सामसंहिता, अथर्वसंहिता चेति। ब्राह्मणरूपो वेदभागस्तु भागत्रये विभक्तमस्ति-प्रथमो भागो ब्राह्मणम्, द्वितीयो भाग आरण्यकम्, तृतीयो भाग उपनिषदिति कथ्यते। तत्र यज्ञस्वरूपप्रतिपादको ब्राह्मणभागः, अरण्ये पठिताः यज्ञस्याध्यात्मिकं रूपं विवेचयन्तो वेदभागा आरण्यकाणि, उपनिषदो ब्रह्म-बोधिकाः मोक्षसाधनानि, अयमेव भागो वेदस्यान्तरूपतया वेदान्त इत्युच्यते।

'उप+नि' उपसर्गयोः पूर्वकं विशरणगत्यवसादनार्थकस्य 'षद्-लृ' धातोः क्विबन्तस्य रूपमिदमुपनिषदिति। अस्यार्थो भवति रहस्यमिति। तस्मादध्यात्मविद्यारहस्य प्रतिपादका वेदभागा **उपनिषदः** कथ्यन्ते। अस्माकं परमर्षयो यान्याध्यात्मिकतत्त्वानि ज्ञानदृशा साक्षादकुर्वस्तानि सर्वाणि तत्त्वान्यत्र वर्णितानि सन्ति। आसामध्ययनेन दृष्टानुश्रविकविषयवितृष्णमुमुक्षूणां संसारस्य बीजभूता विद्या नश्यति, ब्रह्मप्राप्तं भवति दुःखानि च क्षीणानि भवन्ति। ब्रह्मणः स्वरूपस्य तदवाप्त्युपायस्य जीवस्य जगतश्च किञ्चात्मादिविषयाणां सविस्तरं वर्णनपरत्वात् 'उपनिषद्' इत्येषा संज्ञा युक्तैव।

**सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्**[१] इत्युपनिषद्वाक्येन ज्ञायते यदुपनिषदष्टोत्तरशततोऽप्यधिका आसन्। तासु बह्वीषूपनिषत्सु साररूपाश्चैता अष्टोत्तरशतसंख्यका उपनिषदः। तत्र 10 ऋग्वेदसम्बद्धाः, 19 शुक्लयजुर्वेद-सम्बद्धाः, 32 कृष्णयजुर्वेदसम्बद्धाः, 16 सामवेदसम्बद्धाः, 31 अथर्ववेद-सम्बद्धाश्च। तास्वपि दशोपनिषदः प्रसिद्धाः सन्ति। तदुक्तं मुक्तिकोपनिषदि-

**ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः।**
**ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश॥**[२]

एतदतिरिक्तमपि कर्मब्रह्मोभयरहस्यप्रतिपादकत्वाच्छ्रीमद्भगवद्गीता सर्वोपनिषदां सारत्वेन प्रतिष्ठिताऽस्ति। तदुक्तमपि च-

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीताऽमृतं महत्॥**

आसूपनिषत्सु बहवो मानवजीवनसम्बद्धाः विषयाः साधु विवेचितास्तेषु सामाजिक-आध्यात्मिक-राष्ट्रियचिन्तनञ्च प्रामुख्येनोपवर्णितमिति नास्त्यत्र लेशतोऽपि सन्देहस्यावसरः। क्रमशोऽत्र मूलविषयमनुसृत्य संक्षेपेण विवरणं प्रस्तूयते-

**उपनिषत्सु सामाजिकं चिन्तनम्**

समाजशब्दस्यार्थो भवति सभा इति। कयाचिदपि सभया यत्तथ्यं सम्बन्धितं भवति तत्सामाजिकमित्युच्यते। यस्मिन् समाजे यस्य समूहो भवति स तस्यैव समाज उच्यते। यथा मानवानां समूहो मानवसमाजः, पशूनां समूहः पशुसमाजः, आर्याणां समूहश्चार्यसमाज इति। मानवसमाजे मानवाः भवन्ति, ते च मूलरूपेण द्विविधाः- स्त्रियः पुरुषाश्च। केचन मानवाः पुरुषाः भवन्ति, काश्चन स्त्रियश्च। उभयोरेव मानवरूपयोः स्त्रीपुरुषयोः सभा (समूहः) मानवसमाज इत्युच्यते। स्त्रीपुरुषयोः सम्बन्धे यत्तथ्यं तत्सामाजिकमिति शक्यते वक्तुम्। यतः स्त्रीपुरुषाभ्यामेव मानवोत्पत्तिः तदैव समाजो भवति। तदुक्तं बृहदारण्यकोपनिषदि-

**पुरुषो वाऽग्निर्गौतम तस्य व्यात्तमेव समित्प्राणो धूमो वागर्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुल्लिङ्गास्त- स्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुत्यै रेतः संभवति।**

**योषा वाऽग्निर्गौतम तस्या उपस्थ एव समिल्लोमानि धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुल्लिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुत्यै पुरुषः सम्भवति यावज्जीवत्यथ यदा म्रियते।**[३]

तावुभावपि स्त्रीपुरुषौ गृहे तिष्ठतः तस्माद् गृहस्थ इत्युच्यते। लोके चतर आश्रमाः प्रसिद्धास्तेषु गृहस्थाश्रमस्य सर्वोत्कृष्टं महत्त्वं वर्त्तते। उपनिषत्स्वपि चतुर्णामाश्रमाणां वर्णनमस्ति। तद्यथा- **स होवाच याज्ञवल्क्यः - ब्रह्मचर्यं परिसमाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत्।**[४]

अर्थात् ब्रह्मचर्याश्रमानन्तरं गृहस्थाश्रमी भूत्वा समाजनिर्माणादिकं सामाजिकं कार्यं कुर्यात् तदनन्तरं वानप्रस्थाश्रमे प्रविशेत् अन्ते च सन्यासाश्रमे वसेत् इति स्पष्टनिर्देशो मिलति। गृहस्था एव जनाः समाजे स्थित्वा सामाजिकं कार्यं कर्तुमर्हन्ति नान्ये। अत एव ब्रह्मचर्याश्रमात् गृहस्थाश्रमप्रवेशार्थं ब्रह्मचारिणां

समावर्तनसंस्कारो विहितोऽस्ति। समावर्तनं नाम दीक्षान्तसंस्कारविशेषः। दीक्षान्तकाले गुरुः शिष्यानुद्बोधयति यत्-**स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। आचार्यदेवो भव। अतिथिदेपो भव। यान्यवद्यानि तानि सेवितव्यानि नो इतराणि।**[५]

इत्यादिभिर्दीक्षान्तोपदेशैः गुरुः स्वशिष्यान् समर्थीकृत्य गृहस्थाश्रमम्प्रति गन्तुमादिशति। गृहस्थाश्रमे तिष्ठन् देव-पितृ-मातृ-आचार्य-अतिथिपूजापूर्वकं स्वाध्यायाध्ययनं कुर्वन् सर्वदाऽनवद्यानि कार्याणि समाचरणविधिना सामाजिकं कार्यं कुर्यादित्युपदेशस्तु स्पष्ट एव। तेनेदं स्फटं यदुपनिषत्सु सामाजिकं चिन्तनमपि भृशं वर्णितम्।

**उपनिषत्सु आध्यात्मिकं चिन्तनम्**

अध्यात्मशब्दस्यार्थो भवति आत्मनः सम्बद्धम्। तेनेदं स्फुटं यदात्मना परमात्मना वा सम्बद्धं यज्ज्ञानं तदध्यात्ममिति। अर्थात् ब्रह्मविषयकं चिन्तनमध्यात्मम्। तेनाध्यात्मना सह सम्बद्धं चिन्तनमाध्यात्मिकचिन्तनमित्युच्यते। उपनिषदां मुख्यः प्रतिपाद्यो विषयोऽस्ति ब्रह्मविद्येति। तच्च चिन्तनं चतुर्विधम्- ब्रह्मस्वरूपम्, ब्रह्मात्मनोरैक्यम्, ब्रह्मप्राप्तिसाधनं ज्ञानम्, ब्रह्मप्राप्तिश्च। तदनु किञ्चिद्विचार्यते-

ब्रह्मणः स्वरूपं प्रतिपादनप्रसङ्गे तैत्तिरीयोपनिषद्येवमुक्तम्-**यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति।**[६]

अर्थाद्यस्मात् सकाशादिमानि चराचरात्मकानि भूतानि समुत्पद्यन्ते, उत्पद्य च यावदायुर्जीवन्ति, जीवनसमाप्त्यनन्तरं यत्र गत्वा विश्रमन्ति, यस्मिन् पुनः लीयन्ते, तत्तत्त्वं ज्ञातव्यं तदेव ब्रह्मेति। अस्यैव तथ्यस्य व्याख्यायामग्रे **अन्नं ब्रह्म, प्राणो ब्रह्म, मनो ब्रह्म, विज्ञानं ब्रह्म, आनन्दो ब्रह्मेत्युक्तम्।**

ऐतरेयोपनिषद्यात्मनः सकाशाच्चराचरात्मकप्रपञ्चस्योत्पत्तिं प्रदर्श्याग्रे प्रतिपादितं यत्-**एतत् हृदयं मनश्चैतत्। संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति। सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति।**[७] इत्यनेन वाक्येन **प्रज्ञानं ब्रह्म** इत्युद्घोषितम्। इयमुपनिषद् साक्षाद्रूपेण ब्रह्मविद्यायाः वर्णनं न करोति तथापि तस्य माहात्म्यं विशदतया विवेचयति।

कौषीतक्युपनिषदि-**प्राणो ब्रह्मेति उक्थं ब्रह्मेति**[८] उक्त्वा प्राणस्य

श्रेष्ठता निरूपिताऽस्ति। प्राणेनायोस्तथा प्रज्ञया सत्यसंकल्पस्य च प्राप्तिर्भवति। इन्द्रेण प्रदत्तस्तदुपदेशोऽस्ति, यज्ज्ञात्वाऽऽत्मज्ञानस्य उपलब्धिर्भवति। यथा-**एता भूतमात्राः प्रज्ञामात्रास्वर्पिताः। प्रज्ञामात्राः प्राणऽर्पिताः। स एव प्राण एव प्रज्ञात्मानन्तोऽजरोऽमृतो न साधुना कर्मणा भूयान् भवति नो एवासाधुना कनीयान्**[९] इति।

छान्दोग्योपनिषदि-**सर्वं खल्विदं ब्रह्म**[१०] इत्युक्तम्। अनेन कथनेनाद्वैतवादस्य विजयघोषो भवति। तदुक्तं कठोपनिषदि-

**नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।**
**यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूँ स्वाम्॥**[११]

तथा च-

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु।**
**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥**[१२]

एवमुक्तप्रकारेणात्र ब्रह्मप्राप्तेः साधनं रथ-रथिनोः रूपकद्वारा विवृतम्। अग्रे च-

**ऊर्ध्वमूलोऽर्वाक्शाख एषोऽश्वत्थः सनातनः।**
**तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते॥**[१३]

इत्थं सूक्ष्मतयाऽत्र ब्रह्म-जीव-जगत्सम्बद्धाः विषयाः विवेचिताः सन्ति।

बृहदारण्यकोपनिषदि-**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्।**[१४] इत्युक्त्वा आत्मतत्त्वस्य ज्ञाता सर्वतत्त्वज्ञाता सर्वज्ञो वा भवतीति प्रतिपादितम्। तेन आत्मब्रह्मणोर्मध्ये यदैक्यत्वं तत्प्रदर्शितमिति। यथा हि ब्रह्मणः स्वरूपं प्रतिपादितं तथैवात्मनः स्वरूपमपि प्रतिपादयता प्रोक्तं याज्ञवल्क्येन-

**स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं हि ब्रह्म भवति य एवं वेद।**[१५]

इत्थं याज्ञवल्क्यस्य तत्त्वज्ञानमतीवविशदं प्रामाणिकं तर्कपूर्णञ्चास्तीति स्फुटं भवति। उपनिषद्-युगस्यासौ सर्वमान्य तत्त्वज्ञ आसीत्, यस्य सम्मुखे ब्रह्मतत्त्वविज्जनकोऽपि नतमस्तको भूत्वाऽभ्यासेन ज्ञानार्जनात्पराङ्मुखो नाऽभवत्। न केवलमसौ सिद्धान्तवादी आसीदपितु व्यवहारे अध्यात्मतत्त्व-ज्ञानस्योपदेशक आसीत्।

यज्ञस्याध्यात्मिकस्वरूपस्य वर्णनप्रसङ्गे संहितोपनिषद्यनेकविधाध्यात्मिकसमीकरणं प्रदत्तमस्ति। अस्यां चत्वारः पुरुषाः निर्दिष्टाः सन्ति-**शरीरपुरुषः, छन्दः पुरुषः, वेदपुरुषः, महापुरुषश्च।** एतेषु चतुर्ष्वेकत्वं स्थापितमस्ति। अस्या उपनिषद अन्ते हवनस्य मुख्यतात्पर्य प्रदर्शितम्। अस्यां वाचि प्राणस्य होमः, प्राणे च वाचः होमो विहितोऽस्ति। तदुक्तमपि-**वाचि हि प्राणं जुहुमः प्राणे वाचम्।**[१६] इति।

मैत्रायण्याम्- शब्दब्रह्मपरब्रह्मरूपेण ब्रह्मणो द्विविधं स्वरूपमुक्तमस्ति। यथा-

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्मपरं च यत्।**
**शब्दब्रह्मणि निष्णातः परब्रह्मणि गच्छति।।**[१७]**इति।**

अत्र परब्रह्मणः स्वरूपोपवर्णनार्थ शब्दब्रह्मणः कथनमपि युक्तियुक्तमेव।

महानारायणोपनिषदि- अध्यात्मतत्त्वस्य निरूपणं विशदरूपेणास्ति। तत्रेदमुक्तं यदेकैव परमसत्ताऽस्ति, सैव स्वरूपभागिति। तद्यथा-

**यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्।**
**वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णपुरुषेण सर्वम्।।**[१८]

एवंविध निरूपणेन सह तस्य परमात्मनोऽभिव्यक्तिः बहुशो मिलति। बाष्कलमन्त्रोपनिषद्यपि मुख्यरूपेणात्मतत्त्वस्य प्रतिपादनं वर्त्तते। यथा-

**अहं वेदानामुत यज्ञानामहं छन्दसामविदं रयीणाम्।**
**अहं पचामि सरसः परस्य यदि देतीव सरिरस्य मध्ये।।**
**अहं चरामि भुवनस्य मध्ये पुनरुच्चावचं व्यश्नुवानः।**
**यो मां वेद निहितं गुहा चित् स इदित्था वोथवीदाशयध्यै।।**
**अहमस्मि जरिता सर्वतोमुखः पर्यारणः परमेष्ठी नृचक्षाः।**
**अहं विष्वङ्ङमहमस्मि प्रसात्वानहमेकोऽस्मि यदिदं नु किञ्च।।**[१९]

एवमुपर्युक्तविवरणेनेदं स्पष्टं भवति यदुपनिषत्सु अध्यात्मविद्यायाः रहस्यं प्रातिभपूर्णेन चक्षुषा महर्षिभिः यथायथं स्वरूपमवलोक्य समुपदिष्टम्। तेनेदं स्फुटं यदुपनिशदो भारतीयाध्यात्मविद्यायाः ज्वलन्ति रत्नानि महर्षयो यान्यध्यात्मिकतत्त्वानि ज्ञानदृशा साक्षादकुर्वस्तानि सर्वाणि तत्त्वान्यत्रोपनिषत्सु सविस्तरं वर्णितानि सन्ति।

**उपनिषत्सु राष्ट्रियचिन्तनम्**

राष्ट्रियचिन्तनविषये छान्दोग्योपनिषदः तृतीयाध्यायस्य षष्ठखण्डादारभ्य दशमखण्डपर्यन्तं स्वराज्यस्य वर्णनमुक्तमस्ति। तत्र क्रमशो वसूनां, रुद्राणाम्, आदित्यानां, मरुतां, साध्यानाञ्चाधिपत्यं स्वाराज्यं च वर्णितम्।[२०]

अनेन प्रसङ्गेन पञ्चदेवोपासनाया अपि महत्त्वं प्रस्फुटं भवति। अनया पञ्चदेवोपासनया राष्ट्रस्य हितं संभवतीत्युपवर्णितम्। तया च पञ्चदेवोपासनया संरक्षितं राष्ट्रं कीदृशं स्यादेतस्मिन्विषये प्रतिपादितं छान्दोग्ये यत्- **न मे स्तेनो जनपदे न कदर्यो न मद्यपो नानाहिताग्निर्वाविद्वान्न स्वैरी स्वैरिणी कुतः।**[२१]

अर्थादस्माकं राष्ट्रे स्तेनो न स्यात्। सोऽयं **स्तेनो** द्विविधः प्रकटो गुप्तश्च। **कदर्यः**- कदाचारकर्मव्यापारसंलग्नः। **मद्यपः**- मादकद्रव्याणां सः सेवनं करोति सः। **नानाहिताग्निः**- यो हि आहिताग्निर्भवति सैव श्रौतयागस्याधि कारी। अनाहिताग्निर्विप्रः श्रौतयागाय नाधिक्रियते। अस्माकं देशो यज्ञियो भवेत्तदर्थं याज्ञिको विप्रोऽप्यावश्यकः। **अविद्वान्**- विद्धातोरर्थो भवति ज्ञानमिति, अर्थादस्माकं देशस्य नागरिको विद्वान् भवेत् अविद्वानत्र नोत्पद्येत। **स्वैरी**- स्वेच्छाहाराचारविहारी पुरुषः सोऽपि न भवेत्। **स्वैरिणी**- स्वेच्छाहाराचार-विहारशीला दुष्टा स्त्री साऽप्यस्माकं देशे न भवेत्। कथनस्य तात्पर्यमिदमस्ति यदस्माकं राष्ट्रे ये नागरिकाः सन्तु ते सर्वे धार्मिकाः, पारम्परिक-जीवनयापनकर्तारः, नित्यसदनुष्ठानव्रतपरायणाः, शास्त्रोक्तविधानमनुपालकाः, नीतिनिपुणाः, सभ्याः, सदाचारिणः, सर्वविधकार्यकुशलाः, स्वस्थमनस्काः, स्व-स्वसम्प्रदायानुकूलाचरणशीलाः साम्प्रदायिका एव सन्तु, न तु भ्रष्टाः, दुःशीलाः, दुराचारिणः, चौराः तस्कराः स्वैरिणो वा भवन्तु। स्त्रियश्चापि सुशीलाः, सदाचरणयुक्ताः, नम्राः, स्वकर्त्तव्यपरायणाः, शास्त्रविधि परिपालिकाश्च भवन्तु, न स्वैरिण्यो दुष्टाः स्त्रियोऽत्र सम्भवन्त्विति।

एतादृशस्य राष्ट्रस्य कल्पना खलूपनिषत्सु कल्पिताऽस्ति। एवंविधान्यन्यान्य-प्युदाहरणानि प्रमाणवाक्यानि चोपनिषत्सूपलभ्यन्ते सुराष्ट्रकल्पनाविषयकानि, परमत्र लघुनिबन्धे न सर्वेषां समावेशः कर्तुं शक्यते, अतोऽत्रैव विरमामीत्यलम्।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. मुक्तिकोपनिषदि- 44
2. मुक्तिकोपनिषदि- 30
3. बृहदारण्यकोपनिषदि- 6/2/12-13
4. जाबालोपनिषदि- 3
5. तैत्तिरीयोपनिषदि- 1/10/1-2
6. तैत्तिरीयोपनिषदि- 3/1
7. ऐतरेयोपनिषदि- 5/2
8. कौषीतक्युपनिषदि- 2/1,4
9. कौषीतक्युपनिषदि- 5/8
10. छान्दोग्योपनिषदि- 3/14/1
11. कठोपनिषदि- 1/2/22
12. कठोपनिषदि- 1/3/3
13. कठोपनिषदि- 2/6/1
14. बृहदारण्यकोपनिषदि- 2/4/5
15. बृहदारण्यकोपनिषदि- 4/4/25
16. संहितोपनिषदि- 8/11
17. मैत्रायण्युपनिषदि- 6/22
18. महानारायणोपनिषदि- 10/20
19. वाष्कलमन्त्रोपनिषदि- 14,18,25
20. छान्दोग्योपनिषदि- 3/6-10 खण्डं यावत् द्रष्टव्यम्।
21. छान्दोग्योपनिषदि- 5/11/5

# उपनिषत्सु सृष्टिविद्याविषयकं चिन्तनम्

उप-नि-उपसर्गपूर्वकस्य विशरणगत्यवसादनार्थकस्य 'षद्लृ'धाातोः क्विबन्तस्य रूपमिदमुपनिषदिति। उपनिषच्छब्दस्यार्थो भवति रहस्यमिति। म.म.पं.मधुसूदनौझामहोदयेन **नित्यसिद्धो विज्ञानसिद्धान्तः** इत्युक्तमुपनिषद्विज्ञानभाष्ये। तेनावरणमूलकानामविद्याभावानां नाशिकेयमुपनिषदिति सिद्ध्यति। सेयमध्यात्मविद्यारहस्यप्रतिपादिका वेदभागा उपनिषदः कथ्यन्ते।

प्रधानतया द्विविधो वेदो मन्त्ररूपो ब्राह्मणरूपश्च। मन्त्रसमुदाय एवात्र संहितापदेन व्यवहृतः। ब्राह्मणरूपो वेदभागस्तु संहिताभागस्य व्याख्यारूप एव। ब्राह्मणभागोऽपि भागत्रये विभक्तोऽस्ति। प्रथमो भागो ब्राह्मणम्, द्वितीयो भाग आरण्यकम्, तृतीयो भाग उपनिषदिति। वेदस्य ये त्रयो भागाः कर्मकाण्ड-ज्ञानकाण्ड-उपासनाकाण्डात्मका उक्तास्त एवैते। तत्र ज्ञानकाण्डेनोपनिषदां, कर्मकाण्डेन ब्राह्मणग्रन्थानाम्, उपासनाकाण्डेन चारण्यकग्रन्थानां बोधो जायते। अत एव यज्ञस्वरूपप्रतिपादकानि ब्राह्मणानि, अरण्ये पठितानि यज्ञस्याध्यात्मिकस्वरूपविवेचनात्मकान्यारण्यकानि, ब्रह्मबोधिकाः मोक्षसाधनभूताः विविधज्ञानविज्ञानोपेता उपनिषदः। अयमेव ज्ञानकाण्डात्मको भागो वेदस्यान्तरूपतया 'वेदान्त' इत्युच्यते।

उपनिषत्सु महर्षय आध्यात्मिक्या विद्यया गूढ़तमानां रहस्यानां विशदतया विचारं कुर्वाणाः दृश्यन्ते। भारतीयदर्शनसाहित्येसन्ति त्रयः प्रस्थानग्रन्थास्ते वेदानवलम्बमानाः मानवजीवनस्य चरमं लक्ष्यं तत्प्राप्तिसाधनं चोपदिशन्ति। भारतीयविचारशास्त्रस्य श्रेष्ठोपजीव्यग्रन्थत्वादुपनिषदः प्रस्थानत्रयीषु प्रथमस्थानत्वेन गृह्यन्ते। श्रीमद्भगवद्गीता द्वितीयं प्रस्थानं, बादरायणव्यासप्रणीतं ब्रह्मसूत्रञ्च तृतीयप्रस्थानमिति कथ्यते।

उपनिषदामध्ययनेन दृष्टानुश्रविकविषयवितृष्णमुमुक्षूणां संसारस्य बीजभूता विद्या नश्यति, ब्रह्मप्राप्तं भवति, दुःखानि च क्षीणानि भवन्ति। ब्रह्मणः स्वरूपस्य तदवाप्त्युपायस्य जीवस्य जगतश्च किञ्चात्मादिविषयाणां सविस्तरं वर्णनपरत्वात् 'उपनिषद्' इत्येषा संज्ञा सार्थकैवेति। उपनिषदां संख्याविषये मुक्तिकोपनिषदि भगवता श्रीरामेणोक्तम्-

**ऋग्वेदादिविभागेन वेदाश्चत्वार ईरिताः।**

**तेषां शाखा ह्यनेकाः स्युस्तासूपनिषदस्तथा॥**
**ऋग्वेदस्य तु शाखाः स्युरेकविंशतिसंख्यकाः।**
**नवाधिकशतं शाखा यजुषो मारुतात्मज॥**
**सहस्रसंख्यया जाताः शाखाः साम्नः परंतप।**
**अथर्वणस्य शाखाः स्युः पंचाशद्भेदतो हरे॥**
**एकैकस्यास्तु शाखाया एकैकोपनिषन्मता॥**[१]

उपर्युक्तेन श्रौतवचनेन वेदानां सहस्राधिकाः शाखाः सिद्ध्यन्ति। वेदशाखानुसारं प्रतिवेदशाखाया एकैकोपनिषत्प्रोक्ता। तेनोपनिषदां संख्याऽपि सहस्राधिकेति। तासूपनिषत्सु पुनरष्टोत्तरशतसंख्यकोपनिषदां साररूपतां प्रतिपादयता भगवता प्रोक्तम्- **सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्**[२] समुपलब्धास्वास्वष्टोत्तरशतसंख्यकोपनिषत्सु दशोपनिषदः ऋग्वेदसम्बद्धाः, एकोनविंशत्युपनिशदः शुक्लयजुर्वेदसम्बद्धाः, द्वात्रिंशदुपनिषदः कृष्णयजुर्वेद-सम्बद्धाः, षोडशोपनिषदः सामवेदसम्बद्धाः, एकत्रिंशदुपनिषदश्चाथर्ववेदसम्बद्धा उक्ताः।

प्राप्तास्वष्टोत्तरशतसंख्यकासूपनिषत्सु प्रायेण दशोपनिषदः प्राचीनत्वाद् विशदतया च विषयस्य प्रतिपादकत्वादतितरां प्रामाणिकता मता भवन्ति। तासु काश्चनोपनिषदो गद्यात्मिकाः, काश्चन पद्यात्मिकाः, काश्चन गद्यपद्योभयात्मिकाश्च सन्ति। आसामुपनिषदां कालो भिन्नो भिन्नः, परं प्रसिद्धाः काश्चनोपनिषदः बुद्धकालात्प्राचीना एवेति संस्कृतसाहित्येतिहास-लेखकाः वदन्ति। आसामुपनिषदां कालनिरूपणाय तथा पारस्परिकसम्बन्ध निर्धारणाय चार्वाचीनविद्वांस अतीवोद्योगं कृतवन्तः। तैरुपनिषत्कालं चतुर्षु स्तरेषु विभज्य प्रस्तुतम्। यथा-

**(क) प्राचीनतमोपनिषदः**- ईश-छान्दोग्य- बृहदारण्यकाद्याः-700 ई0पूर्वम्।
**(ख) द्वितीयकालस्योपनिषदः**- ऐतरेय-तैत्तिरीयाद्याः -600 ई0पूर्वम्।
**(ग) तृतीयकालस्योपनिषदः**- प्रश्नकेनकठमुण्डक- माण्डूक्याद्याः-500-400ई0पू0।
**(घ) चतुर्थकालस्योपनिषदः**-कौषीतकि-मैत्री- श्वेताश्वतराद्याः-200-100ई0पू0।[३]

सर्वास्वप्युपनिषत्सु ईशावास्योपनिषदोऽत्यन्तप्राचीनत्वं सिद्धम्। यतो माध्यन्दिनीयशाखीयेयं यजुर्वेदसंहितायाश्चत्वारिंशत्तमोऽध्यायोऽस्ति।

अथर्ववेदस्यान्तिमो भागोऽस्ति। अत्राष्टादशमन्त्राः सन्ति **ईशावास्यमिदं सर्वम्** इत्याद्यपदस्याधारोपरि अस्या नामकरणमस्ति।

सर्वासूपनिषत्स्वाधिदैविकाधिभौतिकाध्यात्मिकादिविषयाणां वैज्ञानिक-दृष्ट्या विवेचनेन सह सृष्टिविद्याविषयकं चिन्तनमत्रातिविस्तृतेन कृतमस्ति। सर्वेषामपि तत्र-तत्रोपनिषत्सु साङ्गोपाङ्गवर्णितानां सृष्टिविद्याविषयक-चिन्तनानामत्रोल्लेखो न सम्भवः। तस्मान्मुख्यरूपेण प्रश्न-ऐतरेय-तैत्तिरीय-छान्दोग्य-बृहदारण्यकोपनिषत्सु वर्णितानां तद्विषयकचिन्तनानामुपस्थापनमत्र संक्षेपेण क्रियते।

**प्रश्नोपनिषदि सृष्टिविद्याविषयकं चिन्तनम्**

प्रश्नोपनिषदि कात्यः कबन्धीऋषिः पिप्पलादर्षिमुपेत्य पप्रच्छ यत्- **कुतो ह इमाः प्रजाः प्रजायन्त**[४] इति। अस्य प्रश्नस्योत्तरं पिप्पलादेन प्रस्तुतं यत्- **प्रजापतिरिति।** अथर्ववेदेष्विदं प्रसिद्धं यत्समस्तजीवानां स्वामी प्रजापतिः सृष्ट्यादौ यदा प्रजोत्पत्त्यर्थमैच्छत्तदा स सङ्कल्परूपस्तपोऽतप्यत। तपस्तप्त्वा स सर्वप्रथमं रयिश्च प्राणश्चेत्येतौ मे बहुप्रजा करिष्यत इति विचार्य रयितत्त्वं प्राणतत्त्वं चोत्पादितवान्।

अत्र प्राणतत्त्वं चेतनायाः निदर्शकं रयितत्त्वं च स्थूलाकृतेः। अनयोस्तत्त्वयोस्संयोगेनैव सृष्टेः समस्तं कार्यं सम्पन्नं भवतीति। एते एव तत्त्वे क्वचिदग्नीषोमावुक्ते।

योऽयं सूर्यः प्रत्यक्षगोचरः स एव प्राणः। यतोऽस्मिन्नेव सर्वेभ्यो जीवनशक्तिप्रदातृचेतनाशक्तेराधिक्यं प्राधान्यं चास्ति। तस्मादयमादित्यस्तस्याः सूक्ष्मजीवनीशक्तेर्घनीभूतं स्वरूपमस्ति। यथाऽऽदित्यः प्राणरूपस्तथैव चन्द्रमा रयिरूपेण वर्णिता। यतो चन्द्रमसि स्थूलतत्त्वपोषयितृणां भूततन्मात्राणामे-वाधिक्यमस्ति। समस्तानामपि प्राणिनां स्थूलशरीरिणां पोषणमिमां चन्द्रशक्तिमवाप्यैव भवति। अस्माकं शरीरेषु इमे उभेऽपि शक्ती समस्तेष्वङ्गप्रत्यङ्गेषु व्याप्ते स्तः। तयोरुभयोश्शक्तयोर्मध्ये जीवनीशक्तेः सम्बन्धः सूर्येण, मांसमेदादीनां स्थूलतत्त्वानां सम्बन्धश्चन्द्रमसा चास्ति। अत एवोक्तं- **मूर्तिरेव रयि**[५] रिति। अर्थात् प्राणिनां शरीरे यो वैश्वानरोऽग्निस्स सूर्यस्यैवांशः, सूर्य एव। तथा च प्राणापानसमानोदानव्यानेषु पञ्चरूपेषु विभक्तः प्राणोऽपि उदीयमानस्य सूर्यस्यैवांशः, सूर्य एवास्ति। एवमुक्तप्रकारेण सूर्येण चन्द्रमसा चास्याः सृष्टेरुत्पत्तिरिति विशदं व्याख्यातमस्ति।

**ऐतरेयोपनिषदि सृष्टिविद्याविषयकं चिन्तनम्**

ऐतरेयोपनिषदि जड़चेतनात्मकस्यास्य जगतः प्राकट्यं कारण-रूपात्परमेश्वरादभवदिति व्याख्यातोऽस्ति। यथा-

**आत्मा वा इदमेव एवाग्र आसीत्। नान्यत्किञ्चनमिषत्। स ईक्षत लोकान्नु सृजा इति। स इमॉल्लोकानसृजत। अम्भोमरीचिर्मरमापोऽदोभ्यः परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आपः। स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्च्छयत्।**[६]

अर्थादिदं सिद्धमेव यत्कस्यापि कार्यस्य कर्त्ता कश्चिद्भवत्येव। तेनात्रपि सृष्टिजन्यकार्यस्य कर्तृत्वेन केनापि भाव्यमेवेति स्फुटम्। तद्विषये महर्ष्यैतरेयेणोक्तं यत्सर्वव्यापकः, त्रिषु कालेषु सदा विद्यमानः सर्वान्तर्यामीत्वेन प्रसिद्धः परमात्मा एवाग्रे=सृष्ट्यादौ आसीदिति। तदुक्तमपि- **प्रजापतिर्वा इदमेक एवाग्र आस। सोऽकामयत प्रजायेय भूयान्त्स्यामिति**[७] इत्यैतरेये। तथा च मैत्रायण्याम्- **प्रजापतिर्वा एक आसीत् सोऽकामयत बहुः स्यां प्रजायेय**[८] इति। स एव परमात्मा भूरादीन् सप्तोर्ध्वलोकान्, अतलादीन् सप्ताधोलोकॉश्च सृष्ट्वा तेषां समस्तानां लोकानां रक्षकत्वेन लोकपालान् स्रष्टुं सर्वप्रथमं जलाद्यतिसूक्ष्ममहाभूतानि सकाशाद्धिरण्मयं पुरुषमाविष्कृत्य तं समस्तैरङ्गोपाङ्गैः युक्तं कृत्वा मूर्तरूपेण प्रतिष्ठापयत्। ततोऽन्यानग्न्यादीन् देवानाविष्कृतवान्। परमात्मना सृष्टास्ते इन्द्रियाधिष्ठातारोऽग्न्यादयो देवा अशनायया पिपासया च युक्ताः समभवन्। तदनन्तरं ते देवाः परमात्मानं निवेदयामासुः- **आयतनं नः प्रजानीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति।**[९] तेषामग्न्यादीनां देवानां प्रार्थनां श्रुत्वा स परमात्मा प्रथमं गामानयत्, तामवलोक्य ते अब्रुवन् न वै नोऽयमलमिति। पुनस्तेभ्योऽश्वमानयत् ते अब्रुवन् न वै नोऽयमलमिति। पश्चात्तेभ्यः पुरुषमानयत्, तद्दृष्ट्वा सर्वे प्रसन्ना अभूवन्, तस्मिन् प्राविषन् च। तदुक्तमप्युपनिषदि-

**अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविश-दन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशन्।**[१०]

एवमुपर्युक्तप्रकारेण सर्वे देवाः तस्मिन् शरीरे यथास्थानं प्रविष्टवन्तः।

पुरुषशरीरे अन्ये सर्वे देवास्तु प्राविशन् परं परमात्मानं विना नैव तेषां गतिरिति विचार्य सः परमात्माऽपि तस्मिन् शरीरे प्रवेष्टुमैच्छत्, तदर्थमुपयुक्तमार्ग-मन्विष्यन् स सर्वोत्तमं मार्गं मूर्धामेवाचिन्वत। अतो ब्रह्मरन्ध्रं विदार्य सः प्राविशदिति। यथा- **स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत।**[११] इत्थं मानवशरीरमेव पुरुषायोपयुक्तमायतनं प्रमाणीकृतमत्र, तस्मादेव कारणात्सर्वेष्वपि जीवेषु मानवः सर्वोत्तमः प्रथितः। तस्य मानवशरीरस्य विभिन्नावयवेषु देवताः प्रवेशमाप्नुवन्, तदनन्तरं परमात्मा तस्य मूर्धसीमां विदार्य जीवभावं सम्प्राप्य भूतैस्सह तादात्म्यं स्थापयति। इत्यादिभिर्वैज्ञानिकतथ्यवर्णनैस्सह सृष्टितत्त्वस्य मार्मिकं विवेचनं प्रस्फुटं भवति।

**तैत्तिरीयोपनिषदि सृष्टिविद्याविषयकं चिन्तनम्**

सर्गादौ परब्रह्मपरमात्मा व्यचिन्तयत् यत्- **बहुः स्यां प्रजायेय इति। स तपोऽतप्यत। स तपस्तप्त्वा इदं सर्वमसृजद्यदिदं किञ्च। तत्सृष्ट्वा तदेवानुप्राविशत्। तदनुप्रविश्य। सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तं च। निलयनं चानिलयनं च। विज्ञानं चाविज्ञानं च। सत्यं चानृतञ्च । सत्यमभवत् यदिदं किञ्च।**[१२]

अर्थादहमेक एवास्मि अतो नानारूपेषूत्पद्य बहुस्यामिति विचार्य सः प्रजापतिस्तपस्तप्तवान्। तपसा सङ्कल्पेन च समस्तजडचेतनात्मकं जगदरचयत्। तदुक्तमपि- **तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात्पुरुषः॥**[१३] तत्सर्वं सृष्ट्वा तेषु स्वयं प्रविष्टोऽभवत्। प्रविश्य च मूर्तरूपेषु पृथ्वीजलतेजेषु, वाय्वाकाशावित्यमूर्तरूपेषु च प्रकटोऽभवत्। पुनः नानारूपेष्वभवदिति।

सृष्टेः प्रागिदं जड़चेतनात्मकं जगदव्यक्तरूपमासीत्, तदेव असदित्युच्यते। तस्मादुक्तमुपनिषच्छ्रुतौ- **असतः सदजायत**[१४] इति। अनेनेदं स्फुटं भवति यदयं परमात्मा स्वयमेव जड़चेतनात्मकजगद्रूपे अभवत्। तस्मात्स परमात्मा सुकृत इत्युच्यते। गीतायां भगवता श्रीकृष्णेनोक्तं यत्-

**अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः।**[१५]

अर्थाद्यो हि मनुष्ठयो बुद्धिहीनोऽस्ति स मदीयमव्ययं भावं न जानाति। अत एव मोहादज्ञानाद्वा स मनुष्यमिव शरीरधारित्वेन मामभिजानाति। वस्तुतः परमात्मा व्यक्ताव्यक्तयोरुभयोः स्वरूपयोः विद्यमानो भवति। स

एवाव्यक्तरूपः स एव च व्यक्तरूपोऽपि। अत एवोक्तमीशोपनिषदि–

**तदेजति तन्नेजति तद्दूरे तद्वन्तिके।**
**तदन्तरस्य तदु सर्वस्यास्य बाह्यतः॥**[१६]

अर्थात्स परमात्मा गतिशीलोऽपि गतिरहितोऽपि च वर्तते। एकस्मिन्नेव क्षणे परस्परविरोधिभावाः, गुणाः, क्रियाश्च यस्मिंस्तिष्ठति स एव परमेश्वरोऽस्ति। एतत्तस्याचिन्त्यशक्तेर्महिमैव खलु। अपरस्मिन् शब्दे एवमपि वक्तुं शक्यते यत् सः स्वदिव्यधाम्नि स्वभक्तेभ्यः सुखं प्रदातुमप्राकृते सगुणरूपे स्थित्वा लीलां करोति, सैव लीला तस्य गतिशीलत्वं द्योतयति। निर्गुणरूपेण च यः सर्वथा निश्चलत्वेन स्थितोऽस्ति तदेव रूपं तस्य गतिरहितत्वं द्योतयति। यो हि जनः तस्य परमात्मनः तां लीलां पश्यति तस्य कृते सोऽत्यन्तनिकटवर्ति, अन्येषां चाज्ञानिनामश्रद्दधानां कृते सुदूरवर्ति इति मदीयो विचारः। स एव सर्वप्राणिनः शरीरेष्वन्तर्यामितया तिष्ठति, बहिरपि स एवास्ति। एवमुक्तप्रकारेण परमात्मनः सर्वजगत्कारणत्वं, सर्वप्रपञ्चमयत्वं, सर्वरूपमयत्वं च सर्वविधतर्कवितर्कसाधनैः सिद्ध्यत्येव। अनेनैव विधिना सर्वप्रथमं स स्वात्मस्थं सूक्ष्मं जगत्पश्यति, दृष्ट्वा च तत्पुनः स्थूलरूपेण प्रकटीकरोति। यदा हि सूक्ष्मं जगत् स्थूलत्वमाप्नोति तदैव सृष्टिर्जायते इति त्वस्माभिस्सर्वैरपि विज्ञैर्ज्ञायत एव। परं नेयं सृष्टिर्नवीना सा तु प्राचीनैव, बीजभावेन परमात्मनोऽन्तर्हृदि सदा विराजते। आगतेषु सत्स्ववसरेषु केवलं परमात्मना तानि बीजान्यङ्कुरत्वेन विकासयित्वा तस्य सम्यक् विस्तारः प्रसारणं वा कृत्वा अस्य जगतः सृष्टिर्विधीयतेत्युपर्युक्तैः शास्त्रवचनैर्विज्ञायते।

## छान्दोग्योपनिषदि सृष्टिविद्याविषयकं चिन्तनम्

छान्दोग्योपनिषदः पञ्चमेऽध्याये एकादशतमात् खण्डादारभ्य चतुर्विंशं खण्डं यावत् षड्दार्शनिकानां सिद्धान्तानां समन्वयेन सह सृष्टिविषयकतथ्यानां विशदं चिन्तनमस्ति। तस्मिन्नुपक्रमे औपमन्यवः प्राचीनशालः, पौलुषिः सत्ययज्ञः, भाल्लवेयः इन्द्रद्युम्नः, शार्कराक्ष्यो जनः, आश्वतराश्विर्बुडिलश्चैते पञ्चमहागृहस्थाः वेदाध्ययनशीलाः, वैश्वानरोऽग्निसेवकाः समेत्य **को न आत्मा किं ब्रह्मेति?**[१७] इति मीमांसां चक्रुः। तदानीमारुणिरुद्दालको विशिष्टो विद्वानासीत्। ते पंचर्षयस्तमुपागतवन्तस्तानवलोक्योद्दालको व्यचिन्तयत् यन्नाहमेतेषां शंकां समाधातुमर्होऽस्मि। अत एतैस्सहाहमपि कैकेयाश्वपतिर्भूपतेः पार्श्वे गच्छामि, यतस्स एवाधुना वैश्वानरविद्यां सम्यगवगच्छति। एवं विचार्य

ते सर्वे षडर्षयोऽश्वपतिमुपागतवन्तः। अश्वपतिस्तान् षडर्षीन् सम्पूज्य, अर्थात् सम्यगातिथ्येष्टिं विधाय विनयेनोपगम्योवाच- **एतद्धनं मत्त उपादध्वमिति। ते होचुः- येन हैवार्थेन पुरुषश्चरेत्तं हैव वदेदात्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूहीति।**[१८] अश्वपतिस्तानुवाच- यद्भवन्तो यां विद्यां ज्ञातुमिच्छन्ति तामहं श्वः प्रभाते वक्ष्यामि। अपरेद्युः प्रभातबेलायां ते षडर्षयः स्नानसन्ध्यादीनि नित्यकर्माण्यनुष्ठाय समित्पाणिः शिष्यवन्नम्रभावास्सन्तो वैश्वानरविद्यामवाप्तुं राजानमुपेत्य स्थितवन्तः। नृप अश्वपतिरपिताननुपनीयैव विद्यामददात्। तस्मिन् क्रमे पूर्वज्ञानायौपमन्य-वनामानमेकमृषिं पप्रच्छ- **कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्**[१९] इत्युवाच। अनन्तरं पौलुषिं सत्ययज्ञं पप्रच्छ- **कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्**[२०] इत्युवाच। अथ भाल्लवेयमिन्द्रद्युम्नं पप्रच्छ- **स होवाच वायुमेव भगवो राजन्निति।**[२१] अथ शार्कराक्ष्यं जनं पप्रच्छ- **स आकाशमेव भगवो राजन्निति।**[२२] अथाश्वतराश्विं बुडिलं पप्रच्छ- **स अप एव भगवो राजन्नित्युवाच।**[२३] अथारुणिमुद्दालकं पप्रच्छ- **स पृथिवीमेव भगवो राजन्नित्युवाच।**[२४] एवमुपर्युक्तेन प्रश्नोत्तरेण तेषां षण्णामपि ऋषीणां पृथक्पृथग्वैश्वानरविद्योपासनविषयं श्रुत्वाऽश्वपतिरुवाच यद्भवन्तो वैश्वानरस्यैकाङ्गीमुपासनां चक्रुः, एतस्मादेव कारणात् तस्याः वैश्वानरोपासनायाः समग्रं फलं न लभ्यतेऽतो समष्टिरूपेण वैश्वानरविद्योपासनं साङ्गोपाङ्गं भवद्भिः कर्त्तव्यं तयैवोपासनया सर्वव्यापकस्य वैश्वानरस्य मूलसृष्ट्युत्पादकरहस्यं ज्ञातुमर्हाः भविष्यन्ति भवन्त इति। तदनन्तरं छान्दोग्योपनिषदः सप्तदशखण्डादारभ्य चतुर्विंशखण्डं यावदश्वपतिः भोजनस्याग्निहोत्रत्वसिद्ध्यर्थं **प्राणाय स्वाहे**ति प्रथमाहुतिवर्णनं, **व्यानाय स्वाहे**ति द्वितीयाहुतिवर्णनम्, **अपानाय स्वाहे**ति तृतीयाहुतिवर्णनं, **समानाय स्वाहे**ति चतुर्थाहुतिवर्णनम्, **उदानाय स्वाहे**ति पञ्चमाहुतिवर्णनं कृत्वा जीवशरीरस्य सर्वाङ्गपोषणप्रक्रियां च वर्णयित्वैतदुक्तवान् यत् अनयैवाहुत्या शरीरान्तःस्थाः पञ्चप्राणाः तुष्टा भवन्ति, तुष्टे प्राणे जगतः सृष्टिः सम्भवतीति सर्वमान्यसिद्धान्तमुपासनीयमिति उपदिष्टवान्।

**बृहदारण्यकोपनिषदि सृष्टिविद्याविषयकं चिन्तनम्**

बृहदारण्यकोपनिषदः प्रथमाऽध्यायस्य द्वितीये ब्राह्मणे सृष्टिविषयक-सिद्धान्तानां वर्णनमस्ति। तत्रेदमुक्तं यत्- **नैवेह किञ्चनाग्र आसीन्मृत्युनै-**

**वेदमावृतमासीत्। अशनाययाऽशनाया हि मृत्युस्तन्मनोऽकुरुतात्मन्वी स्यामिति। सोऽर्चन्नचरत्तस्यार्चत आपोऽजायन्तार्चत वै मे कमभूदिति तदेवार्कस्यार्कत्वं कं ह वा अस्मे भवति य एवमेतदर्कस्यार्कत्वं वेद॥**[२५] इति।

कथनस्यास्य तात्पर्यमिदमस्ति यदिह संसारमण्डले किञ्चिदपि नामरूपप्रविभक्तविशेषं नैवासीत् प्रागुत्पत्तेर्मन आदेः। अत्र **नैवेह किञ्चन** इति श्रुतेः न कार्यं कारणं वाऽसीत् इति स्फुटं भवति, तर्हि किं तदानीं शून्यमेवासीत्? तदुच्यते यत् कारणस्यन नास्तित्वं यतो **मृत्युनैवेदमावृतमासीत्** इति श्रुतेः यदि हि किञ्चिदपि नासीद्येनाव्रियते यच्चाव्रियते तदा नावक्ष्यत् **मृत्युनैवेदमावृतमासीदिति।** अतोऽनुमीयते यत्प्रागुत्पत्तेः कार्यकारणयो-रस्तित्वमासीदेव। कार्यरूपाऽशनाया ह्यत्र मृत्युरुक्ता। तन्मनोऽकुरुत। अर्थाद्वक्ष्यमाणकार्यसिसृक्षया तत्कार्यालोचनक्षमं मनःशब्दवाच्यं संकल्पादि-लक्षणमन्तःकरणमकुरुत **आत्मन्वी** आत्मवान् भवेयमित्यभिप्रायेण। मनसा समनस्कः प्रजापतिरर्चन्नर्चयन्। तेनार्चनेन रसात्मिका आप उत्पन्नाः। अत्राकाशप्रभृतीनां त्रयाणामुत्पत्त्यनन्तरमिति वक्तव्यम्, श्रुत्यन्तरसामर्थ्या-द्विकल्पासम्भवाच्च सृष्टिक्रमस्य। **आपो वा अर्कः**[२६] अर्थादर्चनात्सुख-हेतुपूजाकरणादप्सम्बन्धाच्च अग्नेरेतद्गौणं नामार्क इति। आपो वै अर्चनाङ्गभूतास्ता एवार्कोऽग्नेरर्कस्य हेतुत्वात् सोऽग्निः रसः सारो प्रजापतिशरीरान्निष्क्रान्तः सोऽण्डस्यान्तर्विराट्प्रजापतिः प्रथमजः जातः शंकरभगवत्पादाः। **स त्रेधाऽऽत्मानं व्यकुरुत**[२७] स एष प्राणः सर्वभूतानामात्माऽपि अग्निवाय्वादित्यरूपेण त्रेधा विभक्तोऽभवत्। **सोऽकामयत द्वितीयो न आत्मा जायेतेति। स मनसा वाचं मिथुनं समभवदशनाया मृत्युस्तद्रेत आसीत्स संवत्सरोऽभवत्। न ह पुरा ततः संवत्सर आस तमेतावन्तं कालमविभः यावान्संवत्सरस्तमेतावतः कालस्य परस्तादसृजत। तं जातमभिव्याददात्स भाणकरोत्सैव वागभवत्।**[२८] अर्थात्स विराट्प्रजापतिः द्वितीयो मे शरीरं स्यादित्यकामयत। स एवं कामयित्वा मनसा पूर्वोत्पन्नेन वाचं त्रयीलक्षणां द्वन्द्वभावं कृतवान्। अर्थात् मनसा त्रयीमालोचितवान्, वेदत्रयीविहितस्य सृष्टिक्रमस्य विचारश्च मनसा कृतवानिति। अशनाया मृत्युः तद्यद्रेत आसीत्तद्भावभावितोऽपः सृष्ट्वा तेन रेतसा बीजेनाप्स्वनुप्रविश्याण्डरूपेण गर्भीभूतस्स संवत्सरोऽभवत्। प्रजापतेः संवत्सररूपेणाविर्भावत्वात्संवत्सरोऽपि

प्रजापतिरुक्तः। यथा– **संवत्सरो वै प्रजापतिरिति।**[29] इदमेव तथ्यम्मनुना एवमुपस्थापितम्–

**आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।**
**अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः।।**
**ततः स्वयम्भूर्भगवानव्यक्तः व्यञ्जयन्निदम्।**
**महाभूतादि वृत्तौजाः प्रादुरासीत्तमो नुदः।।**
**सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः।**
**अप एव ससर्जादौ तासु बीजमवासृजत्।**
**तदण्डमभवद्धैमं सहस्रांशुसमप्रभवम्।।**
**तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः।।**[30]

वेदेष्वपि– **हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।**[31] इत्यादिभिः श्रौतस्मार्तवचनैः प्रजापतिनैव सर्वभूतानां भौतिकपदार्थानां चोत्पत्तिः समभवदिति स्फुटं भवति।

**उपसंहारः**

एवमुपर्युक्तेन विवरणेनेदं स्पष्टं भवति यदुपनिषत्सु सृष्टिविद्याविषयकं चिन्तनमतिगम्भीरेण विशदेन च कृतमस्ति। तत्रोक्तमादौ सृष्टिर्नासीत् किमपि केवलं मृत्युरवर्तत। ततश्च मनः, मनः सलिलानलभुवः समुद्भूताः। प्रजापतेरनन्तरं सुरासुराश्चोद्बभूबुः। क्वचिदिदमप्यभिहितं प्रथमं पुरुषस्य ततः स्त्रियाः उत्पत्तिरभवत्। ताभ्यां च विश्वस्य सृष्टिरभूत्। एतादृशं वर्णनं छान्दोग्योपनिषदि बृहदारण्यकोपनिषदि चोपलभ्यते।

उपनिषदामध्ययनेन ज्ञातो भवति यत्सर्वतः प्रथममेकमव्यक्तं रूपमासीत्। तस्मादेव व्यक्तमिदं जगत्सृष्टमभूत्। इदमव्यक्तं रूपमेव **परब्रह्म** उच्यते। समस्तमपि चराचरं जगत्तस्मादेव प्रादुर्बभूव, अन्ततश्च तत्तस्मिन्नेव लीयते। तदुक्तं यथा– **यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्ब्रह्म एव जगतो निमित्तकारण-मुपादानकारणं चास्ति।**[32]

आत्मानं द्रष्टुं किं वा ब्रह्मज्ञातुं जीवस्य कर्तव्यमिदं यत् सः कायं वाचं मानसं च संयच्छेत्। किञ्च ब्रह्मणः साक्षात्काराय सत्यस्याचरणं, न कस्यापि वस्तुनोऽपहरणं, ब्रह्मचर्यस्य रक्षणम्, इन्द्रियाणां निग्रहणं, हिंसायाः निषेधः, मातृपितृदेवातिथिगुरुजनानामभ्यर्चनं, निन्दनीयकर्मपरित्यजनं, सांसारिकेषु

विषयेषु विरजनम्, अन्तःकरणस्य परिक्षालनमित्येतानि कर्माण्यतितरामपेक्षन्ते।

परिशुद्धेन कायेन, वचनेन, हृदयेन, चाहंरुपस्थितं, प्रत्यक्चेतनमवबोद्धुं प्रयतेत जीवः। तदर्थं निदिध्यासनमपेक्षितमस्ति। योगशास्त्रोक्तानि साधनानि च साधनीयानि। एतस्मिन्नध्यवसाये तदैव सफलता भवति यदा गुरौ स्वात्मसमर्पणरूपा श्रद्धा जायते। अहंभावविनाशाय सर्वाण्यप्येतानि कार्याणि कर्तव्यानि भवन्ति। गुरुस्तत्त्वं प्रहीणदोषायैव प्रददाति। उक्तमपि च–

**प्रशान्तचित्ताय जितेन्द्रियाय च प्रहीणदोषाय यथोक्तकारिणे।**
**गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे॥**[३३]

गुरुर्जिज्ञासवे **तत्त्वमसि** इत्येतदुपदिशति। शान्तोदान्तः शुद्धान्तःकरणः साधकः **अहं ब्रह्मास्मि** इत्येतं गुरूपदेशं निशम्य स्वयमेवात्मनि ब्रह्मणोऽनुभूतिं कर्तुमारभते। साधकोऽभ्यासवशात् शनैः शनैः **तत्, त्वम्, अहम्, अयम्, एकेन विज्ञानेन सर्वं विज्ञातं भवति** इत्येतदुपनिषद्वचनानुसारेण सः साधकः सर्वपदार्थबोधानन्तरं **सर्वं खल्विदं ब्रह्म** इत्येतत् साक्षाद्भावेनानुद्भवति। ततश्चासौ संसारबन्धनान्मुक्तिमवाप्य अनामयं सच्चिदानन्दपदं प्रपद्यते। न पुनः संसारेऽस्मिन् स निवर्तते। उक्तं चापि गीतायाम्–

**अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्।**
**यं प्राप्य न निवर्तन्ते तद्धाम परमं मम॥**[३४]
**न तद्भासयते सूर्यो न शशांको न पावकः।**
**यद्गत्वा न निवर्तन्ते तद्धाम परमं मम॥**[३५]

इत्थं ह्युपनिषदुपदेशनिष्कर्षोऽयं यदेकमेव तत्त्वमस्ति। तस्मादेव समग्रोऽपि संसारः समुत्पद्यते पुनश्चान्ततस्तत्रैव लीयते। स एव देशकाल–निमित्तातीतः, सर्वथैव विचित्रः, प्रमाणातीतोऽप्रमेयः, सच्चिदानन्दघनः स्वमानसिकसङ्कल्पेन जगदिदं सृजति। तदुक्तम्मुण्डकोपनिषदि–

**यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति।**
**यथासतः पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वम्॥**[३६]

सोऽयं तटस्थस्वरूपलक्षणद्वयसम्पन्नः परमेश्वरः सगुणं ब्रह्म संसारस्यास्य शास्ता निखिलस्यापि जगतो हि जीवानां भाग्यस्य विधाता वर्तते। शुभकार्यकर्तृणां जीवानां यत्कल्याणसम्पादयिता, मुक्तिभुक्तिप्रदाता, अशुभकर्मकारिप्राणिनिगृहीता च। तदेव सगुणं ब्रह्म ईश्वरो विराट् हिरण्यगर्भादिसंज्ञाभिः व्यपदिश्यते। अस्य विश्वस्य सर्वेऽपि प्राणिनः तस्यैव

शरीरमिति कथ्यन्ते।

ब्रह्मणः शक्त्यैव देवतासु शक्तिः संचरति। तस्यैव शक्तिभूतत्वेन जगतः पदार्थाः जायन्ते शक्तिमन्तः। अत उपनिषत्सु ब्रह्मणा सृष्टिरभदिति भृशं चिन्तितम्। गोस्वामिना तुलसिदासेनोक्तं यत्-**हरि अनन्त हरि कथा अनन्ता। कहहिं सुनहिं बहुविधि सब सन्ता॥** अतोऽनन्तरूपस्य ब्रह्मणः कथामुखरूपा उपनिषदोऽप्यनन्ता एव। तास्वनन्तोपनिषत्सु साररूपेणात्र किञ्चिदेव तथ्यमुररीकृत्य सृष्टिविद्याविषयकं विवरणं प्रस्तुतम्। यतो ह्यल्पज्ञानसम्पन्नोऽयं जनः कथं तत्तत्त्वं सम्यगवगत्य विस्तृतेन प्रस्तोतुं समर्थः स्यात्। अतोऽल्पधियाऽल्पदृशाऽल्पाक्षरैश्च प्रस्तुतमिदं सुष्टिविद्याविषयकं चिन्तनं विदुषां सन्तोषाय अलं भविष्यतीत्याशासे।

इत्यलमतिविस्तरेण।

पादटिप्पणी-

1. मुक्तिकोपनिषदि-1/11-14
2. मुक्तिकोपनिषदि- 1/44
3. वैदिकवाङ्मय का इतिहास- लेखकः- श्रीरमाकान्तशास्त्री, चौखम्भा विद्याभवन वाराणसीतः, 1970 तमे वर्षे प्रकाशितः, पृ.सं.-43
4. प्रश्नोपनिषदि- 1/3
5. प्रश्नोपनिषदि- 1/5
6. ऐतरेयोपनिषदि- 1/1-3
7. ऐतरेयब्राह्मणे- 2/33
8. मैत्रायण्याम्- 4/2/1
9. ऐतरेयोपनिषदि- 2/1
10. ऐतरेयोपनिषदि- 2/4
11. ऐतरेयोपनिषदि- 3/12
12. तैत्तिरीयोपनिषदि- 2/6
13. तैत्तिरीयोपनिषदि- 2/1
14. असद्वा इदमग्र आसीत्। ततो वै सदजायत। तदात्मानं स्वयमकुरुत तस्मात्सुकृतमुच्यत इति। तैत्तिरीयोपनिषदि- 2/7
15. श्रीमद्भगवद्गीतायाम्- 7/24

16. ईशावास्योपनिषदि- 5
17. छान्दोग्योपनिषदि- 5/11/1
18. छान्दोग्योपनिषदि- 5/11/6
19. छान्दोग्योपनिषदि- 5/12/1
20. छान्दोग्योपनिषदि- 5/13/1
21. छान्दोग्योपनिषदि- 5/14/1
22. छान्दोग्योपनिषदि- 5/15/1
23. छान्दोग्योपनिषदि- 5/16/1
24. छान्दोग्योपनिषदि- 5/17/1
25. बृहदारण्यकोपनिषदि- 1/2/1
26. बृहदारण्यकोपनिषदि- 1/2/2
27. बृहदारण्यकोपनिषदि- 1/2/3
28. बृहदारण्यकोपनिषदि- 1/2/4
29. शतपथब्राह्मणे- 2/3/3/18
30. मनुस्मृतौ- 1/5-9
31. शु.य.सं- 23/1
32. तैत्तिरीयोपनिषदि- 3/1/2
33. उपदेशसाहस्री-324/16/72, वैदिकवाङ्मयस्येतिहासस्य 197 तमे पृष्ठे उल्लिखितः।
34. श्रीमद्भगवद्गीतायाम्- 8/21
35. श्रीमद्भगवद्गीतायाम्- 15/6
36. मुण्डकोपनिषदि- 1/7

# वैदिकवाङ्मये मन्त्रोच्चारणविधिविमर्शः

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।[१]**

स्वयम्भुवा या वागुत्सृष्टा सैव श्रुतिरित्युच्यते। तस्यैव श्रुतेरपरन्नामास्ति वेद इति। इत्युक्त्वा भगवता व्यासेन वेदानां नित्यत्वमनादिनिधनत्वञ्च सुतरां साधितम्। ते च वेदाः शब्दात्मकाः मन्त्रब्राह्मणारण्यकोपनिषदिति चतुर्षु भागेषु विभक्ता अस्माकमक्षिलक्ष्यीभूतास्सन्ति। तदुक्तं मैत्रायण्याम्-

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।**
**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।[२]**

अत्र ब्रह्मणो द्विविधं स्वरूपमुक्तं शब्दात्मकमेकमपरञ्च परंब्रह्मात्मकमिति। यो हि जनो शब्दात्मके ब्रह्मणि निष्णातो भवत्यर्थाद्वेदानां रहस्यात्मकार्थविज्ञानवान् भवति स एव निर्विशेषं परंब्रह्माणमधिगन्तुं समर्थो भवतीति। वस्तुतस्तु मीमांसकैर्वेदानां द्विविधमेव स्वरूपमुक्तम्। ते वदन्ति यत्- **वेदो द्विविधो- मन्त्ररूपो ब्राह्मणरूपश्चेति। तत्र प्रयोगकालीनार्थ-स्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते। विधायकं वाक्यं ब्राह्मणमिति।** तेषां सम्मतिरस्ति यदारण्यकोपनिषद्ग्रन्थाः ब्राह्मणग्रन्थानामेवांशभूतास्तस्मात्ते ब्राह्मणग्रन्थान्तर्गता एव मन्यन्ते। तस्माद्वेदो द्विविधः प्रोक्तः।

वेदमन्त्रेषु स्वरा भवन्ति, स्वरदृष्ट्यैव शिक्षादिवेदाङ्गशास्त्रेषु वेदमन्त्राणामुच्चारणविधिर्निर्दिष्टो वर्तते। शाखाभेदैर्विभक्तानां वेदानां पृथक्-पृथक् शिक्षाग्रन्थाः प्रातिशाख्यग्रन्थाश्च सन्ति, येषु वेदमन्त्रोच्चारणविधयो वर्णितास्सन्ति। तेषु केचनोपलब्धाः केचनानुपलब्धाश्च। तेषामत्र संक्षेपेण निदर्शनं प्रस्तूयते-

| क्र.सं. | वेदः | शाखा | शिक्षा | प्रातिशाख्यम् |
|---|---|---|---|---|
| 1 | ऋग्वेदः | | व्यासशिक्षा<br>पाणिनीयशिक्षा | ऋक्प्रातिशाख्यम् |
| 2 | यजुर्वेदः | तैत्तिरीय<br>वाजसनेयि | भरद्वाजशिक्षा<br>मध्यन्दिनीयशिक्षा<br>वसिष्ठीशिक्षा<br>याज्ञवल्क्यशिक्षा<br>सम्प्रदायबोधिनीशिक्षा | तैत्तिरीयप्रातिशाख्यम्<br>शुक्लयजुःप्रातिशाख्यम् |

(इतोऽप्यनेकाः शिक्षाग्रन्थाः समुपलभ्यन्ते)

| | | | | |
|---|---|---|---|---|
| 3 | सामवेदः | कौथुमी | नारदीयशिक्षा<br>लोमशीशिक्षा<br>गौतमीशिक्षा | सामवेदीयप्रातिशाख्यम् |
| 4 | अथर्ववेदः | शौनकीया | माण्डूकीशिक्षा<br>क्रमसन्धानशिक्षा<br>गलदृक्शिक्षा | अथर्ववेदीयप्रातिशाख्यम् |

यद्यप्याचार्यश्रीरामप्रसादत्रिपाठिना सङ्कलिते सम्पादिते च शिक्षासङ्ग्रह इत्यभिधाने ग्रन्थे एकत्रिंशत् शिक्षाग्रन्थानां सङ्कलनमस्ति। यथा-
1) याज्ञवल्क्यशिक्षा, 2) वासिष्ठी शिक्षा, 3) कात्यायनी शिक्षा, 4) पाराशरी शिक्षा, 5) माण्डव्यमहर्षिप्रणीता शिक्षा, 6) अमोघानन्दिनी शिक्षा, 7) लघ्वमोघानन्दिनी शिक्षा, 8) माध्यन्दिनीया शिक्षा, 9) लघुमाध्यन्दिनीया शिक्षा, 10)वर्णरत्नप्रदीपिका शिक्षा, 11) केशवी शिक्षा, 12) पद्यात्मिका केशवी शिक्षा, 13) मल्लशर्मकृता शिक्षा, 14) स्वराङ्कुशशिक्षा, 15) षोडशश्लोकी शिक्षा, 16) अवसाननिर्णयशिक्षा, 17) स्वरभक्तिलक्षण- परिशिष्टशिक्षा, 18) क्रमसन्धानशिक्षा, 19) गलदृक्-शिक्षा, 20) मनःस्वारशिक्षा, 21) प्रातिशाख्यप्रदीपशिक्षा, 22) विसर्गाङ्गुलि-प्रदर्शनप्रकारशिक्षा, 23) यजुर्विधानशिक्षा, 24) स्वराष्टकशिक्षा, 25) क्रमकारिका शिक्षा, 26) पाणिनीयशिक्षा, 27) शिक्षाप्रकाशः, 28) नारदीयशिक्षा, 29) सामवेदीया गौतमी शिक्षा, 30) सामवेदीया लोमशी शिक्षा, 31) अथर्ववेदीया माण्डुकी शिक्षा, 32) अथर्वपरिशिष्टम्, ततोऽप्यधिकानां केषाञ्चन शिक्षाग्रन्थानां केवलं नामान्येव क्वचित् क्वचिदुपलभ्यन्त इति धिया तेषां नामान्येवोल्लिखितानि सन्ति। यथा- शौनकशिक्षा, चारणी शिक्षा, गालवशिक्षा, वाल्मीकिशिक्षा च स्मर्यते। माण्डूक्याः शिक्षायाः समाप्तौ पञ्चविंशतिसंख्याकाः शिक्षाः शुक्लयजुर्वेदस्य, एका ऋग्वेदस्य, सामवेदस्य तिस्रः, अथर्ववेदस्य चैका शिक्षा सुमुद्रिता इत्युल्लेखो वर्तते। यथा-

**गगनेष्वङ्केन्दुमिते मधावर्जुनके दले।**
**यजुर्वेदस्य शुक्लस्य माध्यन्दिनमतस्य तु॥१॥**

**पञ्चविंशतिसङ्ख्याकाः शिक्षाश्चात्र सुमुद्रिताः।**
**ऋग्वेदस्यैकशिक्षा पाणिनीया सटीकता॥२॥**
**त्रतयी सामवेदस्य नारदी गौतमी तथा।**
**लोमशी चाथर्वणिका माण्डुकी लोकविश्रुता॥३॥**[3]

इत्युक्तवचनात्पञ्चविंशतिसङ्ख्याकाः शिक्षाः माध्यन्दिनशाखायाः, एका ऋग्वेदस्य, तिस्रः सामवेदस्य, एकैव चाथर्ववेदस्य शिक्षेति सर्वमाहत्य त्रिंशत्सङ्ख्याकाः शिक्षाः सन्तीत्युक्तम्।

**शिक्षेति शब्दस्यार्थः**– पाणिनीयव्याकरणानुसारं **शिक्ष्-विद्योपादान**[4] धातोः शिक्षेति पदस्य निष्पत्तिर्मन्यते। तदन्वेव श्रीमता सायणाचार्येण ऋग्वेदभाष्यभूमिकायामुक्तम्– **स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते यया सा शिक्षेति।** अनया व्युत्पत्त्या वैदिकमन्त्राणामुचितं शुद्धं चोच्चारणं येन शास्त्रमाध्यमेन सम्पाद्येत तच्छास्त्रं शिक्षानाम।

वस्तुतो वेदे स्वरस्य प्राधान्यमिति सर्वेऽपि विद्वांसो विदन्ति, तच्च स्वरज्ञानं शिक्षाऽऽयत्तम्, अत इदं शास्त्रं वेदाङ्गमिति।

**शिक्षाशास्त्रप्रयोजनम्**– तैत्तिरीयोपनिषद्यारम्भे शिक्षाशास्त्रप्रयोजन-मेवमुक्तम्– **शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तः शीक्षाध्यायः॥**[5] अत्र **वर्ण** इत्यनेन अ-इ-उ-इत्यादयः स्वराः, ककारादारभ्य हान्ताः व्यञ्जनवर्णाश्च ज्ञातव्याः। **स्वरा** उदात्तादयः। **मात्रा** ह्रस्व-दीर्घ-प्लुताः। **बलमि**त्यनेन बाह्याभ्यन्तरप्रयत्नानां बोधः। **साम** इत्यनेन सामगानरीत्या वर्णानां समवृत्त्योच्चारणम्। **सन्तानः** सन्धिश्चोच्यते। तात्पर्यमिदमस्ति यद्वर्णानामुच्चारणे षडेतेषां नियमानामनुपालनमावश्यकमेव भवति। एतेषां सम्यगवबोधायैव शिक्षाशास्त्रस्य प्रवृत्तिर्जातेति तत्रोक्तम्।

**शब्दभेदः**- वस्तुतो लोके शब्दो द्विविधो वर्तते- वैदिकशब्दो लौकिकशब्दश्च। वेदे ये शब्दाः प्रयुक्तास्ते वैदिकशब्दाः, लोके ये व्यहृतास्ते लौकिकशब्दा इत्युच्यन्ते। लौकिकशब्दानामुच्चारणमपि शुद्धमेव भवेदेतदर्थं व्याकरणशास्त्रं प्रवृत्तमस्ति। लौकिकशब्दोच्चारणे क्वचिन्नियमज्ञानाभावा-दशुद्धिर्भवति चेद्विद्वांसो मार्जयन्ति। परं वैदिकशब्दानामुच्चारणन्तु शिक्षाशास्त्रोक्तनियमानुसारमेव भवितव्यं नो चेन्महानन्र्थः सम्भवति। यतस्तु शिक्षाग्रन्थेषु स्वरानुकूलमुच्चारणं विहितमस्ति, तेन वैदिकपदानामर्थज्ञानमपि सुकरं भवति। स्वरज्ञानाभावे त्वर्थज्ञानमसम्भवमेव, फलतो सत्कर्मणामुचितं

फलं न लब्धुं शक्यते। विषयेऽस्मिन् किञ्चिदुच्यते–

**वैदिकशब्दोच्चारणे दोषस्याशुभफलम्**– स्वरभ्रष्टादनर्थस्योदाहरणं प्रस्तुवता भगवता पाणिनिना स्वशिक्षायां प्रोक्तं यत्–

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥**[६]

शतपथब्राह्मणानुसारं त्वष्टुः पुत्रः विश्वरूपसंज्ञकः त्रिशीर्षः षडक्ष आस। तस्य कठोरतपश्चर्यया क्षुब्ध इन्द्रस्तं विश्वरूपं जघान। तेन त्वष्टा क्रुद्धो भूत्वेन्द्रस्य वधाय सक्षमं **वृत्र**नामानं पुत्रं प्राप्तुमाभिचारिकं प्रयोगं कृतवान्। तस्मिंश्चानुष्ठाने **इन्द्रशत्रुर्विवर्धस्व** इति मन्त्रेण ऋत्विग्भिर्होमं विहितम्। मन्त्रपाठावसरे त्वष्टुः पुरोहिताभ्यां किलाताकुलीभ्यां बहुव्रीहिसमासोक्तार्थफलप्रदातृस्वरेण साकम् **आद्युदात्तस्य** इन्द्रपदस्य प्रयोगो विहितः, फलतो यजमान एव हतः। अत्र इन्द्रस्य वधाय इन्द्रस्य शत्रोः त्वष्टुर्वर्धनाय च षष्ठीतत्पुरुषसमासोक्तार्थस्य स्वरयुक्तस्य **अन्तोदात्ते**न्द्रपदप्रयोग आसीदपेक्षितस्तन्नाभूदतो यजमानस्य नाशोऽभवत्। इत्येतामेव शतपथोक्तां कथामत्र स्मारयति पाणिनिः।

अतः शिक्षाशास्त्रमाध्यमेन स्वरसहितवेदमन्त्राणां शुद्धोच्चारणस्य ज्ञानं भवति तस्मादस्य वेदाङ्गस्याध्ययनं कर्त्तव्यमेव वेदार्थज्ञानाय।

**लौकिकशब्दोच्चारणे दोषप्रदर्शनम्**– लोकव्यवहाराय भाषा भवत्यावश्यकी। भाषायां शुद्धता व्याकरणज्ञानेन विना नैव भवितुर्महति। अतोऽस्मिन् धरातले सर्वासामपि भाषाणां व्याकरणमस्त्येव। सर्वास्वपि भाषासु संस्कृतभाषा मातृस्थानीयाऽस्ति। अतोऽस्याः भाषायाः व्याकरणमपि मातृवत् सर्वभाषा सम्पोषिका पूर्णसमृद्धा चास्ति। व्याकरणस्याध्ययनमिहानिवार्यत्वेन अपरिहार्यत्वेन चोक्तम्। तदुक्तमपि केनापि–

**यद्यपि बहुनाधीषे तदपि पठ पुत्र व्याकरणम् ।**
**स्वजनः श्वजनो माभूत् सकलं शकलं सकृच्छकृत् ॥**

संस्कृतव्याकरणं समुद्रवदपारमगाधञ्चास्ति। व्याकरणविषये उक्तमस्ति यत्– **बृहस्पतिश्च वक्ता। इन्द्रश्चाध्येता। दिव्यं वर्षसहस्रमध्ययनकालः अन्तं च न जगाम।** (महाभाष्ये पस्पशाह्निके) । पण्डितसमाजे प्रसिद्धगाथा अस्ति–

**समुद्रवद् व्याकरणं महेश्वरे तदर्धकुम्भोद्धरणं बृहस्पतौ ।**

**तद्भागभागाच्च शतं पुरन्दरे कुशाग्रबिन्दूत्पतितं हि पाणिनौ ॥**

इन्द्रः, चन्द्रः, काशकृत्स्नः, आपिशलिः, शाकटायनः, पाणिनिः, अमरः, जैनेन्द्रश्च इत्यतेऽष्टौ सन्ति व्याकरणकर्तारो विद्वत्सत्तमाः प्रथिताः। एतदतिरिक्तं कौमारं सारस्वतं शाकलञ्च व्याकरणं यत्र-तत्र प्रसिद्धमस्ति। अस्ति ह्यनन्तमतिगभीरञ्चेदं शब्दशास्त्रं तस्मादुक्तं अनुभूतिस्वरूपाचार्येण-

**इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः।**
**प्रक्रियां तस्य कृत्स्नस्य क्षमो वक्तुं कथं नरः॥**

**वेदमन्त्रोच्चारणविधिज्ञानाय याज्ञवल्क्यशिक्षाया महत्त्वम्-**

वेदानां शाखाक्रमेणानेकशिक्षाग्रन्थानां नामानि श्रूयन्ते, परं साम्प्रतं तेषु केचन समुपलब्धाः केचन चानुपलब्धास्सन्ति। सर्वेष्वपि शिक्षाग्रन्थेषु मन्त्रोच्चचारणविषये विविधविषयाः क्वचित्पार्थक्येन सन्ति वर्णिताः। सर्वेषां विषयाणामत्र प्रतिपादनं नैव कर्तुं शक्यते तस्माद्याज्ञवल्क्यशिक्षामधिकृत्य तावत्किञ्चिद्विचार्यते। याज्ञवल्क्यशिक्षाया द्वौ भागौ स्तः, पूर्वार्द्ध उत्तरार्द्धश्च। उभयोरप्यर्द्धयोः 92+121=213 आहत्य त्रयोदशाधिकं शतद्वयं श्लोकाः सन्ति। तत्र वेदमन्त्रोच्चारणविषये ये सामान्यविशेषनियमाः प्रदर्शितास्तेषामत्र संक्षेपेणोपस्थापनं क्रियते।

**उच्चारणविषयका नियमाः-**

उच्चारणविधिर्द्विविधः, सामान्यतो विशेषतश्च। यो विधिर्वर्णसामान्यं विषयीकरोति स सामान्यतः, यथा- **यथा व्याघ्री हरेत्पुत्रान्**[७], इत्यादिः। यश्च वर्णविशेषं विषयीकरोति, स विशेषतो यथा- **मेघदुन्दुभिनिर्घोषः**[८] , इत्यादिः।

एवमेव याज्ञवल्क्यशिक्षायां 1.) त्रैस्वर्यलक्षणम्, 2.) उदात्तादीनां स्वराणां वर्णदैवतजातिगोत्रछन्दसां निरूपणम्, 3.) षडजादीनामुदात्तादि-त्रिस्वरेष्वन्तर्भावः मात्राभेदादिः, 4.) हस्तादिशरीराङ्गसन्निवेशनचालनादि प्रकारः, 5.) संहितापदक्रमाणां माहात्म्यम्, 6.) हस्तचालन- प्रदर्शनम्, हस्तदोषादिनिरूपणञ्च, 7.) जात्यादि स्वरितस्याष्ट भेदनिरूपणम्, 8.) वर्णानां पदानाञ्च वर्णदैवतजात्यादि कथनम्, 9.) सन्धिभेदः, विवृतिस्वरूपम्, स्वरभक्तिनिरूपणञ्च, 10.) वर्णानां स्थानप्रयत्नविवेकः, 11.) संयुक्तवर्णानां हस्तचालनव्यवस्था, तेषां पूर्वापराङ्गनिरूपणम्, 12.) समानस्थानकरण-विमोकविवेकः, अभिधानस्वरूपकथनम्, 13.) चयप्रत्याहारद्वित्वनिषेधः,

अनुस्वारस्य सोदाहरणमात्रिकादिव्यवस्था, 14.) विसर्गस्याष्टविधिकथनम्, यवयोः जकारबकारोच्चारणविषये व्यवस्था, 15.) औरसहकारनिरूपणम्, अभिनिधानशिक्षा च, 16.) रङ्गविचारः, उपधानिकाऽनुनासिकस्योच्चारणविधिः, वर्णोच्चारणम्, 17.) यथेच्छपाठस्य निन्दा गुणविशिष्टपाठस्य प्रशंसा, 18.) आम्रेडितसंज्ञा, उपचरितकार्याणि सोदाहरणानि च, 19.) संयोगपिण्डानां साप्तविध्यम्, तेषां स्वरूपाणि सोदाहरणानि, 20.) व्यञ्जनसंख्यानिरूपणम्, यमादिविचारः, 21.) वर्णानामुच्चारणे विवेकः, विद्याग्रहणसाफल्यविधिः, गुरुसामर्थ्यनिरूपणञ्चेत्येते विषयाः सम्यक्तया प्रतिपादिताः सन्ति।
वर्णानां सामान्योच्चारणाय यो विधिरुक्तस्तदित्थं प्रदर्शितः-

**यथा व्याघ्री हरेत्पुत्रान् दंष्ट्राभिर्न च पीडयेत्।**
**भीतापतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत्॥**
**मधुरं च न चाव्यक्तं व्यक्तं चापि न पीडितम्।**
**सनाथस्येव देशस्य न वर्णाः सङ्करङ्गताः॥**
**यथा सुमत्तनागेन्द्रः पदात्पदं निधापयेत्।**
**एवं पदं पदाद्यन्तं दर्शनीयं पृथक् पृथक्॥**[९]

व्याघ्री स्वशिशुं दन्तैर्गृहीत्वा स्थानात् स्थानान्तरं नयन्ती शिशुमीषदपि पीडां नानुभावयति, तथैव वेदमन्त्रोच्चारणकाले वर्णाः दन्तादिनिपीडनमकृत्वैव मार्दवेन समुच्चारणीयाः, येन श्रोतृभिः श्रूयमाणा सत्वरमेव प्रतीतिपूर्वकमर्थाव-बोधने समर्थाः स्युरिति। अपीडितं मधुरं सुव्यक्तञ्चोच्चारणं भवितव्यं यथा मदमस्तो गजः क्रमशः एकस्मादनन्तरमपरं पदं निक्षिपति, तद्वदेवैकं पदमुच्चार्यमपरं पदमेकमात्रा व्यवधानेनोच्चारणीयमिति।

**विशेषत उच्चारणविधिर्यथा**- अनुस्वारोच्चारणविधिः, रङ्गोच्चारण-विधिश्च।

**यथा सौराष्ट्रिका नारी अराँ २॥ऽ इत्यभिभाषते।**
**एवं रङ्गः प्रयोक्तव्यो ङकारपरिवर्जितः॥**[१०]

सौराष्ट्रदेशस्य नारी यथा 'अराँ' इति पदमुच्चारयति तद्वदेव रङ्गस्योच्चारणं ङकारश्रुति- वर्जितमनुनासिकमेव कर्त्तव्यम्। तत्रोदाहरणं यथा- **लोकाँ-2 अकल्पयन्** [११] इत्यत्र द्वयोः स्वरयोर्मध्ये आकारस्य द्विमात्रिकमुच्चारणं कृत्वा अनुस्वारस्यार्द्धमुच्चारणं ङवर्जितं विहितमस्ति। एवमेव द्वयोः स्वरयोर्मध्ये रेफव्यवहितोऽपि द्विमात्रिको रङ्गो भवति, यथा- **शत्रूँ-२ रप**[१२] इत्यत्र।

स्वरव्यञ्जनयोर्मध्ये ऊष्माव्यवहितस्तु एकमात्रो रङ्गो भवति, यथा- **यामैरयँश्चन्द्रमसि**[१३] इति।

**अनुस्वारस्य च गुँकारः**- अनुस्वारस्य च गुँकारादेशो भवति। तदुक्तं कात्यायनेन प्रतिज्ञासूत्रे- **अथानुस्वारस्य ॐ इत्यादेशः शषसहरेफेषु तस्य त्रैविध्यमाख्यातम्। ह्रस्वदीर्घगुरुभेदैर्दीघात्परो ह्रस्वो, ह्रस्वात्परो दीर्घो, गुरौ परे गुरुः।**[१४] अनुस्वारात्परे शल् प्रत्याहारो रेफश्च (शषसहरेफवर्णा भवेयुः) भवेच्चेत् अनुस्वारस्य ॐ कारादेशो भवति। स च त्रिविधो गुँकार इति- ह्रस्वदीर्घगुरुभेदात्। याज्ञवल्क्येनापि-

**अङ्गुष्ठाकुञ्चनं लघावनुस्वारे त्वपा ॐ रसम्।**
**दीर्घे रङ्गे च तर्जन्याः प्रसारः परिकीर्तितः॥**[१५] इत्युक्तम्।

**षकारस्य खकारोच्चारणम्**- एवमेव षकारस्य खकारोच्चारणविषये महर्षिणा कात्यायनेन प्रतिज्ञासूत्रे प्रोक्तं यत्- **अथो मूर्धन्योष्मणोऽसंयुक्तस्य टुमृते संयुक्तस्य च खकारोच्चारणमध्ययनादिकर्मस्वर्थबेलायां प्रकृत्या।**[१६] इत्यस्माद्वचनात् टवर्गेण संयुक्तस्य मूर्धन्य षकारस्य प्रकृत्या षकारत्वेनैवोच्चारणं विहितम्, परं टवर्गेणासंयुक्तस्य मूर्धन्यषकारस्य खकारत्वेनोच्चारणमध्ययनकाले विहितमस्ति।

यकारस्य जकारोच्चारणम्- महर्षिणा याज्ञवल्क्येन यकारस्य जकारत्वेनोच्चारणविषये प्रोक्तं यत्-

**पादादौ च पदादौ च संयोगावग्रहेषु यः।**
**ज शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः॥**[१७]

पदादौ पादादौ संयोगे अवग्रहे च यकारस्योच्चारणं जकारत्वेन भवति, अन्यत्र यकाररूपेणैवोच्चारणं विहितमित्याशयः।

**वकारस्य ह्रस्वगुरूच्चारणम्**- महर्षिणा याज्ञवल्क्येन वकारस्य ह्रस्वगुरुरूपेणोच्चारणविषये प्रोक्तं यत्-

**पादाद्यं च पदाद्यञ्च तथाऽवग्रहकालिकम्।**
**सुस्पृष्टं वं विजानीयात् तत्तत्कालनिबन्धनम्॥**[१८]
**वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः।**
**आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतरः॥**
**सन्धिजौ च पदान्तीयावुपसर्गपरौ लघू।**
**अथ-मा-स-न-शब्देभ्यो विभाषाऽऽम्रेडिते यवौ॥**[१९]

एवमुक्तप्रकारेण पादादौ, पदादौ, अवग्रहे च वकारस्योच्चारणं गुरुवर्णमिव कर्त्तव्यम् अर्थज्ञानकाले च तं ह्रस्वमवगन्तव्यम्। स च वकारस्त्रिविधः प्रोक्तः पदादौ गुरुः, पदमध्ये लघुः, पदान्ते च लघुतरो ज्ञेयः। सन्धिस्थाने, उपसर्गात्परे च यकारवकारयोरुच्चारणं लघुतरमेव भवति। अथ-मा-स-न- शब्दात्परे स्थितयोः आम्रेडितसंज्ञकयकारवकारयोः लघुतररूपेणैवोच्चारणं भवतीति।

**निष्कर्षः**- एवमुक्तप्रकारेणेदं सिद्धं यत् शिक्षाशास्त्रनाम्ना प्रथितानां वेदाङ्गानां मुख्यं प्रयोजनमस्ति वेदमन्त्राणां शुद्धोच्चारणपूर्वकमर्थज्ञानसहितं तत्रोक्तक्रियाकलापानाञ्च सम्यगनुपालनमिति। यतस्तु नीतावुक्तमस्ति यत् **ज्ञानं भारः क्रियां विना** इति। अर्थात् क्रियाविरहितं यज्ज्ञानं तद्भारस्वरूपमेव भवति। मन्यताम्, कश्चित् पिपासुर्जलं वाञ्छति चेदिदं ज्ञातव्यमेव यत्कूपाज्जलमादाय पिपासाशान्तिः करणीयेति। सत्युपलब्धेऽपि सर्वविधोपकरणे जलोत्कर्षणज्ञानाभावे तस्य पिपासाशान्तिरसम्भवैव भवति। उदाहरणार्थं तत्र कूपोऽप्यस्ति, रज्जुरप्यस्ति, जलाहरणपात्रमप्यस्ति परं यदि जलोत्कर्षणज्ञानं नास्ति चेत्कथं जलं प्राप्तव्यमित्यवस्थायां स हस्तं सम्मृज्जन्नेव स्थास्यति न जलपानेन पिपासाशान्तिमधिगच्छति। एवमेव वेदमन्त्रोच्चारणज्ञानसम्पन्नो यदि कश्चिद्विद्वान् तत्रोक्ताभिः क्रियाभिरपरिचितो भवेच्चेत् तादृशं ज्ञानं केवलं भारस्वरूपमेव भवति। वेदार्थज्ञानस्य तात्पर्यमेवास्ति तत्रोक्तक्रियाज्ञानम्, तद्रहितोऽनर्थज्ञ इति च बोध्यम्। तात्पर्यमिदमस्ति यद्वेदेषु पठ्यमानानां मन्त्राणामर्थज्ञानं नितरामावश्यकं भवति। अत एव भगवता यास्केनार्थज्ञानं प्रशंस्य अर्थज्ञानाभावस्य च निन्दा कृतेति। तेनोक्तं यत्-

**स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।**
**योऽर्थज्ञ इत्सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मा॥**[२०]

अर्थाद्यो हि जनो वेदमन्त्रानधीत्य तस्यार्थं न जानाति स स्थाणुरिव पृथिव्यामुपरि भारहार एवास्ति। इत्यनेन कथनेन तादृशस्य मनुष्यस्य जीवनं भारस्वरूपमुक्त्वा अर्थज्ञानाभावस्य निन्दा विहिताऽस्ति। यो हि मनुष्यो वेदार्थं जानाति स सकलं भद्रमत्रत्यमवाप्नोति। प्रेत्य च स्वर्गं गच्छतीति वेदार्थज्ञानस्य प्रशंसायामुक्तम्। भगवता मनुनापि प्रतिपादितं यत्-

**वेदशब्दार्थतत्त्वज्ञो यत्र कुत्राश्रमे वसन्।**
**इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते॥**[२१]

अत एभिः प्रमाणैः वेदार्थज्ञानप्रशंसावचनैरिदं स्फुटमेव विज्ञातं भवति यद् वेदाध्ययनानन्तरं तस्य अर्थज्ञानमपि आवश्यकत्वेनैव करणीयम्।

अतो वेदार्थज्ञानायोपकारकाणि वेदार्थबोधे सहायकानि चेमानि षड्वेदाङ्गान्यपि निश्चितरूपेणाध्येतव्यान्येव। एतेषां वेदाङ्गानां अध्ययनाभावे वेदार्थज्ञानं नैव कर्तुं शक्यते। **नान्यः पन्था विद्यतेऽयनाय**[२२] इत्यस्मात् श्रौतवचनात्। एवमनेके विषया अत्र वर्णिताः सन्ति सर्वेषामपि विषयाणामत्रोपस्थापनमसम्भवमेव। तस्मादीषदेव चर्चां कृत्वाऽहं स्वीयां वाचमवसाययामि। यतस्तु-

**असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे**
**सुरतरुवरशाखा लेखनीपत्रमुर्वी।**
**लिखति यदि गृहीत्वा शारदा सर्वकालं**
**तदपि तव गुणानामीश पारं न याति॥**

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. महाभारते शान्तिपर्वणि- 232/24
2. मैत्रायण्युपनिषदि- 2/6, अमृतबिन्दूपनिषदि- 17
3. माण्डुकी शिक्षाया अन्ते।
4. पा.धा.-
5. तैत्तिरीयोपनिषदि- शिक्षावल्ल्याम्- 1/2/1
6. पा. शि.- 52
7. या.शि.- उत्त., श्लोक-83
8. या.शि.- उत्त., श्लोक-63
9. या.शि.- उत्त., श्लोक-83-85
10. या.शि.- उत्त., श्लोक-74
11. शु.य.सं.- 31/13
12. शु.य.सं.- 7/37
13. शु.य.सं.- 1/28
14. कात्यायनोक्तप्रतिज्ञासूत्रे- 3

15. या.शि.- पूर्वार्द्धे, श्लोक-64
16. कात्यायनोक्तप्रतिज्ञासूत्रे- 2
17. या.शि.- उत्त., श्लोक-56
18. या.शि.- उत्त., श्लोक-55
19. या.शि.- उत्त., श्लोक-57-58
20. निरुक्ते-1/6/19
21. मनुस्मृतौ-12/102
22. शु.य.सं.- 31/18

## वेदानां सार्वभौमिकत्वम्

समस्तस्यास्य जगतो मूलमुत्सो वेद एवास्ति। स च वेदस्तावदादावेक एवासीत्तदुक्तमपि– **वेदं तावदेकमतिमहत्त्वाद्दुरध्येयं सन्तं तेषामल्पायुषा–मल्पग्रहणशक्तिकानां सुखग्रहणाय व्यासेनानेकशाखाभेदेन समाम्नातवन्तः।**[१] एवमुक्तप्रकारेणैकस्य वेदस्यानेकशाखासु विभाजनं जातमित्यत्रोक्तम्। परञ्च तैत्तिरीयब्राह्मणस्य **अनन्ता वै वेदाः**[२] इति वचनात् वेदानामानन्त्यं सिद्ध्यति। वस्तुतो **वेदो नारायणः साक्षात्**[३] इत्युक्त्वा भगवता वेदव्यासेन वेदस्य साक्षान्नारायणत्वमुपपादितम्। मैत्रायण्यामन्यत्रोपनिषदि चेदमुक्तं यत्–

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।**
**शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति।।**[४]

अत्र ब्रह्मणो द्विविधं स्वरूपमुक्तम्–शब्दात्मकमेकम्, परब्रह्मात्मक–ञ्चापरमिति। तत्र मन्त्रब्राह्मणारण्यकोपनिषत्सु ये मन्त्राः सन्ति ते शब्दराशयो वेदास्तु यज्ञात्मकतुलामाध्यमेन परब्रह्मणो मूलस्वरूपस्योपवर्णनपराः सन्ति, तस्मात्तुलनया परब्रह्मणः स्वरूपोपबोधकाः मन्त्रास्तूलवेद इति नाम्ना व्यवहृता भवन्ति। तूलवेदात्मकेषु वेदमन्त्रेषु यस्य स्वरूपं वर्णितमस्ति तद्ब्रह्म एव मूलवेद इत्युच्यते। अतो यदिदं परमात्मनो द्विविधं स्वरूपमुक्तं शब्दब्रह्मात्मकं परब्रह्मात्मकञ्च, तदुभयमेव तूलवेद–मूलवेदेति संज्ञयाऽभिहितमस्ति।

वेदेषु ब्रह्मेति पदं प्रजापतिपदेन सर्वत्र स्तुतमस्ति। तस्य च प्रजापतेः स्वरूपस्य वर्णनं यज्ञरूपेण वर्तते। तथा चोक्तं तैत्तिरीयेण– **आश्रावयेति चतुरक्षरमस्तु, श्रौषडिति चतुरक्षरं, यजति द्व्यक्षरं, ये यजामह इति पञ्चाक्षरं, द्व्यक्षरो वषट्कार एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्तो य एवं वेद प्रति यज्ञेन तिष्ठति, न यज्ञात् भ्रंशते।**[५] अत्र प्रयाजयागे प्रयुक्तानाम् आश्रावण–प्रत्याश्रावणादीनां सप्तदशाक्षराणां प्रजापतित्वेनोपपादनं विहितमस्ति। तदाधारेणैव **प्रजापतिर्यज्ञः**[६] इति कथनं वैदिकवाङ्मये खल्वनेकत्रोपलभ्यते। तेनैव प्रजापतिना सर्वा इमाः प्रजाः सृष्टा इत्यप्युक्तमस्ति श्रौतसाहित्ये। एतस्मिन्विषये विविधानि प्रमाणवचनानि समुपलब्धानि भवन्ति। तेषु वचनेषु केषाञ्चिद्वचनानामत्रोपस्थापनं क्रियते। तद्यथा– **प्रजापतिर्वा इदमेक एवाग्र आस। सोऽकामयत प्रजायेय भूयान्त्स्यामिति।**[७]

**प्रजापतिर्वा इदमग्र आसीन् नान्यं द्वितीयं पश्यमानस्तस्य वागेव स्वयमासीद् वाग् द्वितीया स ऐक्षत हन्तेमां वाचं विसृजे। इयं वावेदं विसृष्टा सर्वं विभवन्त्य एष्यतीति।**[८]

**प्रजापतिर्वा एक आसीत् सोऽकामयत यज्ञो भूत्वा प्रजाः सृजेयेति।**[९]

**प्रजापतिर्वा एक आसीत् सोऽकामयत बहुः स्यां प्रजायेयेति।**[१०]

इत्थमनेकेषु स्थलेषु यज्ञात्मकेन प्रजापतिना सृष्टिसंरचनाविषयो वर्णितोऽस्ति। सोऽयं यज्ञस्तु धर्मपदेनोक्तो मीमांसायाम्। यथा- **यागादिरेव धर्मः। वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः।**[११] अत्र यागादिः यागदानहोमादिः। एवकारेण चैत्यवन्दनादेः वैशेषिकसम्मतस्यादृष्टमात्रस्य च व्यवच्छेदः। प्रयोजनवदिति प्रयोजनवांश्चासावर्थश्चेति विग्रहः। वेदप्रतिपाद्यत्वे सति प्रयोजनवत्वे सत्यर्थत्वं धर्मलक्षणम्। प्रयोजनवत्वमिष्टसाधनम्। अर्थत्वमनर्थभिन्नत्वम्। तेनार्थशब्देनापीष्टसाधनत्वस्यैवोक्तत्वात् प्रयोजनवत्व-मित्यनेन पौनरुक्त्यमिति परिहृतम्। धर्मपदं विवेचयता भगवता याज्ञवल्क्येनोक्तं यत्- **एष धर्मो य एष (सूर्यः) तपत्येष हीदं सर्वं धारयत्येतेनेदं सर्वं धृतम्।**[१२] सोऽयं धर्मः सत्यरूपेण धृयते तस्मात्सत्यधर्मणोरैक्यं ब्रुवता याज्ञवल्क्येनोक्तं यत्- **यो वै स धर्मः सत्यं वै तत्, तस्मात्सत्यं वदन्तमाहु-र्धर्मं वदतीति, धर्मं वा वदन्तं सत्यं वदतीति।**[१३] अनेन स्पष्टं यत् यदि कश्चित्सत्यं वदति चेत्तदानीं धर्मं वदतीति एवमेवोच्यते। तस्य धर्मस्य ये धर्तारस्ते धर्मधृत उच्यन्ते। यथा- **सोमा इन्द्रो वरुणो मित्रो अग्निस्ते देवा धर्मधृतो धर्मं धारयन्त्वित्येते वै देवा धर्मधृतो यदिमे प्राणाः।**[१४] अनेन धर्मणैव सर्वेऽपि देवाः, ग्रहनक्षत्रज्योतींष्यादयः परस्परमन्योन्यं धृत्वा तिष्ठन्ति। धर्मणा समस्तलोकाः, दिशः, योनिः, प्रजाश्च धृत्वा दृढीक्रियन्ते। यथा- **द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा।**[१५] **तथा धर्मासि दिशो दृंह योनिं दृंह प्रजां दृंह।**[१६] स चायं धर्मः रहस्यात्मको गोपनीयश्चास्ति। परं सर्वकालेषु, सर्वदेशेषु, सर्वतत्त्वेषु च धर्मविषयकं चिन्तनं सर्वदैव भवत्येव। **धर्मस्य तत्त्वं निहितं गुहायामि**[१७] ति वचनाद्धर्मस्य चिन्तनन्तु सर्वकालेषु प्रासङ्गिकमेवास्ति। यतस्तु मानवजीवनस्यानुशासनाय नियन्त्रणाय च धर्मस्यावश्यकता विद्यत एव। धर्मोऽयं वेदकायत्वान्मूलवेदरूपस्य ब्रह्मणस्तात्त्विकस्वरूपोपवर्णकत्वाद्यज्ञमुखेन सर्वमपीदं जगत्तत्त्वं वर्णयतीति। तदन्वत्र धर्मरूपाणां वेदानां सार्वभौमिकत्वमिति विषये तावत्किञ्चिद्विचार्यते।

**वेदयज्ञयोस्सम्बन्धः-**

यथा समस्तेऽपि ब्रह्माण्डे सर्वत्र जीवानामुपस्थितिरस्तीत्येतत् नाविदितं कस्यापि, तथैव यत्र-यत्र जीवानामुपस्थितिस्तत्र सर्वत्र धर्मरूपस्य वेदस्याप्युपस्थितिरस्तीति कथनं समुचितमेव। सर्वेषामपि चराचराणामस्ति कश्चिद्धर्मविशेषः। न केवलं चराचराणां जीवानामेवापितु ग्रहनक्षत्रज्योतिषां देवानां लोकानाञ्च सुव्यवस्थायां धर्म एवास्ति मुख्यमवलम्बनम्। संसारे न किमपि स्थानमस्ति द्युलोकभूलोकाभ्यां व्यतिरिक्तमिति। यत्र-यत्र वयं गच्छामः पश्यामो वा तत्र सर्वत्र भूम्यन्तरिक्षाकाशो विद्यत एव। एभ्यो विरहितं स्थानं न क्वाप्युपलभ्यते। यत्रैते भूम्यन्तरिक्षाकाशा विद्यन्ते तत्र तेषां धर्मास्तु निश्चितरूपेण तिष्ठन्त्येव। अतो निश्चयेनेदं वक्तुं शक्यते यद्धर्माव्यवच्छिन्नं स्थानं कुत्रापि नास्ति। धर्मस्य प्रादुर्भावो वेदादेव भवति। तस्मादुक्तम्मनुना- **वेदाद्धर्मो हि निर्बभौ**[१८] इति। लगधाचार्येणाप्युक्तं वेदाङ्गज्योतिषे- **वेदा हि यज्ञार्थमभिप्रवृत्ताः**[१९] इति। अत एभिः प्रमाणैर्वेदाद्यज्ञस्योत्पत्तिः सुस्पष्टमवगम्यते।

यज्ञ एव धर्म इत्युच्यत इति पूर्वं यदुक्तं मीमांसाशास्त्रवचनं तेनेदं स्पष्टं भवति यद् धर्मस्यार्थात् यज्ञस्योत्पत्तिः वेदाद् भवतीत्युक्तमधुना यज्ञादेव वेदानामुत्पत्तिरित्युच्यते। यथा-

**तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।**
**छन्दाꣳसि जज्ञिरे तस्मात्तस्माद्यजुस्मादजायत॥**[२०]

एवमुपर्युक्तेन श्रुतिवचनेन यज्ञाद्वेदानामुत्पत्तिर्जातेति स्फुटमवगम्यते। ऋक्सामयजुषां त्रयीविद्यानां यज्ञरूपत्वं शतपथश्रुतावुक्तम्। तद्यथा- **सैषा त्रयी विद्या ( ऋक्सामयजूँषि ) यज्ञः।**[२१] एवमुभयविधप्रमाणेन वेदयज्ञयोरैक्यं सिद्ध्यति।

**देवतानां त्रैविध्यत्वम्-**

निखिलस्यापि ब्रह्माण्डस्य त्रिष्वायतनेषु विभाजनं सर्वत्रानुस्यूतमस्ति। तदनु देवानामप्यायतनविभागात् त्रिविधत्वमुक्तमस्ति। यथा- **तिस्र एव देवता इति नैरुक्ताः। अग्निः पृथिवीस्थानः, वायुर्वेन्द्रो वान्तरिक्षस्थानः, सूर्यो द्युस्थानः।**[२२] अग्निवाय्वादित्यानां वेदत्रयीत्वेन प्रतिपादनाय भगवान् मनुराह-

**अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।**
**दुदोह यज्ञसिद्ध्यर्थमृग्यजुस्सामलक्षणम्॥**[२३]

सनातनब्रह्मसदृशानाम् ऋग्यजुस्सामलक्षणानामेतेषां त्रयाणां वेदानां यज्ञसिद्ध्यर्थमेवाग्निवायुरविभ्यः सकाशाद्दोहनेन प्राप्तिरभवदित्यत्र स्प्ष्टम्। ते

च ऋगादयस्त्रयो वेदाः वाङ्मनःप्राणरूपाः सन्तीत्युक्तं वेदे। यथा- **ऋचं वाचं प्रपद्ये मनो यजुः साम प्राणं प्रपद्ये**[२४] अत्र ऋगस्य वाग्रूपत्वं, यजुषो मनोरूपत्वं, साम्नश्च प्राणरूपत्वं स्फुटं विज्ञातम्भवति। ऋग्वेदस्याग्नि-सकाशाद्दोहनं, यजुर्वेदस्य वायुसकाशाद्दोहनं, सामवेदस्य चादित्यसकाशाद्दोहन-मुक्तं प्राक्। तदेतास्तिस्रो देवताः सर्वपुरुषेष्वन्तःप्रविष्टाः सन्तीत्युच्यते तस्मिन्विषये कथयत्युपनिषच्छ्रुतिः- **अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्।**[२५] अत्राग्निः ऋग्वेदस्य, वायुर्यजुर्वेदस्य, आदित्यश्च सामवेदस्य प्रतीकमस्ति। तदुक्तमपि शतपथश्रुतौ- **अग्नेर्ऋग्वेदः, वायोर्यजुर्वेदः, सूर्यात्सामवेदः**[२६] अतोऽनेन सुस्पष्टं भवति यद् ऋग्यजुस्सामास्त्रयो वेदा एवाग्निवायुसूर्यभावेन वाङ्मनःप्राणरूपाः सन्तः समस्तेऽपि ब्रह्माण्डे विद्यमानाः सन्ति। एतेषामेव त्रयाणां वेदानां माध्यमेन सूर्यचन्द्रग्रहनक्षत्रादीनां गतिस्थिरित्यादीनि सर्वविधकार्याणि सम्पादितानि भवन्ति। वेदेषु वेदावच्छिन्नकालेनैव सूर्यस्य गतिर्निरूपितः। न कदापि सूर्यो वेदात् पृथग्भवतीत्युक्तं तैत्तिरीये-

**ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदेन तिष्ठति मध्य अह्नः।**
**सामवेदेनास्तमये महीयते वेदैरशून्यैस्त्रिभिरेति सूर्यः।।**[२७]

श्रौतवाक्येऽस्मिन् सम्यक्तयेदं सुव्यक्तमस्ति यद्भगवतः सूर्यस्योदय-कालादारभ्यास्तकालपर्यन्तं दिवसस्य त्रिषु भागेषु त्रयाणापि वेदानां प्रभावो भवत्येव। पूर्वाह्णे ऋग्वेदेन, मध्याह्ने यजुर्वेदेन, अपराह्णे सामवेदेन च प्रभावितो भवति।

**पूर्वाह्णप्रभाववर्णनम्-**

**ऋग्भिः पूर्वाह्णे दिवि देव ईयते** इति वचनादिदं सुव्यक्तं भवति यदोदेति सूर्यस्तदानीमृग्वेदस्य प्रभावो भवति तस्मात् सूर्यः प्रातःकाले ऋग्वेदैः (ऋग्वेदस्य पारायणं कुर्वन्) स्वपथे गतिं करोति। ऋगिति तत्त्वं जीवशरीरेष्वस्थिभावेन व्याप्तमस्ति। तदुक्तमपि शतपथश्रुतौ- **अस्थि वा ऋक्**[२८] इति। उपयुक्तेन श्रौतवचनेनेदं स्फुटं विज्ञायते यत्सूर्योदयकाले सूर्ये ऋक्तत्त्वं व्याप्तं भवति। तच्च ऋक्तत्त्वमस्थितत्त्वस्य सम्पोषणायोपयुक्तं मन्यते। तस्मादस्माकमृषयः प्रातरेव सूर्योदयसमकाले अरणीभ्यामग्निं मथित्वा, तत्समाधाय, चाहुतिप्रदानायास्मान् समुपदिष्टवन्तः। अद्यत्वेऽपि शरीरवैज्ञानिकाः (चिकित्सकाः) यस्य शरीरे खल्वस्थिसम्बन्धिसमस्या भवति तस्मै रोगिणे

त्वेतादृशं परामर्शं प्रयच्छन्ति यत् प्रातःकाले सूर्योदयस्नानं कर्त्तव्यमिति। अतः प्रातःकालीने सूर्यातपे प्रत्यहं यः कश्चिदपि समुपविशति तस्य शरीरस्थमस्थितत्त्वं सर्वदा परिपुष्टं भवति। परं नगरेषु तादृशी व्यवस्था सर्वेषां कृते समुपलब्धा न भवत्यत एव नगरवासिनो बहवो जनाः (**विटामिन-डी** इति तत्त्वस्याल्पत्वात्) अस्थिरोगाक्रान्ताः भवन्ति। तस्य रोगस्य निवारणं सूर्यकिरणस्नानमाध्यमेन कर्तुं शक्यते। अत एव प्रातःसन्ध्यां सम्पाद्य सूर्यार्घ्यप्रदानादिकं विहितमस्ति। एतत्सर्वमस्माकमृषिभिः तत्तत्पदार्थमनुशील्यैव निर्दिष्टम्।

**मध्याह्नप्रभाववर्णनम्-**

**यजुर्वेदेन तिष्ठति मध्य अह्नः** इति वचनादयं सूर्यो यजुर्वेदेन (यजुर्वेदस्य पारायणं कुर्वन्) अह्नो मध्यभागे (मध्याह्ने) तिष्ठति। अत्रेदं विचारणीयं यत् यजुर्वेदो मनस्तत्त्वस्याधार उक्तः, तस्मान्मध्याह्ने मनसो गतिस्तीव्रो भवत्यतो ब्रह्मचर्याश्रमेषु ये बालकाः पठन्ति, ते प्रातःकालीनं यज्ञादिकार्यं समाप्य मध्याह्नं यावदध्ययनं कुर्वन्ति। मध्याह्ने स्नानसन्ध्या-भोजनानन्तरं पुनः सायंकालीनसन्ध्याकालात्पूर्वं यावदध्ययने प्रवृत्ताः भवन्ति। सायंसन्ध्यायाः कालो यथा-

**उत्तमा सूर्यसहिता मध्यमा लुप्तभास्करा।**
**अधमा तारकोपेता सायंसन्ध्या त्रिधा स्मृता॥**[२९]

यतः सूर्यास्तात्प्रागेव सन्ध्यां सम्पादयितुं शौचस्नानादिकन्तु तत्पूर्वमेव स्यात्, अतस्तदर्थमुचितकालं यावदध्ययनं कुर्वन्ति। एवमद्यापि विद्यालयाः मध्याह्ने निश्चितरूपेण समुद्घटिता भवन्त्येव। यतस्तदानीं मनोदशा तदनुकूला भवति। सामान्यतो बौद्धिकं कार्यं कर्तुमुपयुक्तः कालस्तु स एव, तस्माद-धिकांशकार्यालयाः रात्रौ पिहिताः भवन्ति। (अहर्निशं सेवामहे इत्युद्दिश्य सञ्चालिताः केचन कार्यालयास्तु सर्वदैव समुद्घटिता एव भवन्ति, अत्रा-धिकांशशब्दस्तदर्थं प्रयुक्तः)।

**अपराह्नप्रभाववर्णनम्-**

सामवेदेनास्तमये महीयते इति वचनात्सूर्यः सायंकाले सामवेदेन (सामवेदस्य पारायणं कुर्वन्) स्वकीयास्ताचलम्प्रति याति। अत्रेदं विचारणीयम्भवति यत्सामवेदः प्राणतत्त्वस्याधारः प्रोक्तः। वाजिश्रुतौ **सूर्य एवाग्नेयश्चन्द्रमाः सौम्याऽहरेवाग्नेयं रात्रिः सौम्या**[३०] इत्युक्तमस्ति। तेन सूर्यस्याग्नेयत्वं

(प्राणतत्त्वत्वं), चन्द्रस्य च सोमत्वम् (अपानतत्त्वत्वं) स्पष्टं भवति। रात्रौ चन्द्रोदये सत्यपानतत्त्वस्याधिक्यं प्राणतत्त्वस्याल्पत्वं प्रसिद्धम्। तस्मात्सायंकाले सामवेदस्य पारायणं कुर्वन् सूर्यो याति येन रात्रावपि प्राणतत्त्वस्योपस्थितिरत्र भवेदेव। यतस्त्विदञ्जगदग्नीषोमयोः परस्परसंयोगेन निर्मितमस्ति। तदुक्तं बृहज्जाबालोपनिषदि–**अग्नीषोमात्मकञ्जगत्**[३१] एतयोरुभयोस्तत्त्वयोः सामञ्जस्यं नितान्तमावश्यकं भवति। अत एवास्माकमशनपानादिव्यवस्थापि वेदेन निर्दिष्टमस्ति। यथा– **यवे ह प्राण आहितोऽपानो व्रीहिरुच्यते**[३२] यव-गोधूमादिष्वन्नेषु प्राणतत्त्वस्याधिक्यं भवति, व्रीहिमध्ये त्वपानतत्त्वस्याधिक्यं भवति। तस्मात्पूर्वोत्तरभारते दिवा व्रीहीणामोदनम्, रात्रौ च यवगोधूमानां पिष्टानां करपट्टिका च भुज्यते। तेन दिवाभोजनेनापानतत्त्वस्य, रात्रिभोजनेन च प्राणतत्त्वस्य प्राप्तिर्भवति। एतादृशस्य भोजनादिव्यवहारस्य प्रचलनं वेदोक्तविधानानुसारमेवाद्यापि मिथिलायां प्रवर्तितमस्ति।

**विश्वस्य मूर्त्ति-गति-तेजोमयत्वम्-**

समस्तेऽस्मिन् संसारे यावन्त्यपि तत्त्वानि सन्ति तेषां सर्वेषां नामानि रूपाणि च भवन्ति, तस्मात्तस्य सत्यत्वं प्रमाणितं भवति। तदुक्तं याज्ञवल्क्येन **नामरूपे सत्यम्**[३३] इत्यर्थात् यस्य नाम च रूपञ्चास्ति तत्सत्यमिति। भौतिकसत्यत्वेनास्माकमक्षिलक्ष्यीभूतानि तत्त्वान्यत्र सत्यरूपाण्युक्तानि। तेषां काचिन्मूर्त्तिर्भवति, मूर्त्तिषु रयिप्राणस्योपस्थितिर्भवति। तदुक्तं– **मूर्त्तिरेव रयिः**[३४] इति। तेन मूर्त्तिषु यत्तत्त्वं तद्रयिरित्युच्यते, तच्चर्ग्वेदस्य तत्त्वम्। मूर्त्तिषु गतिर्भवति तस्माज्जङ्गमजीवा एकस्मात् स्थानादन्यत्र गच्छन्त्यागच्छन्ति च। सा च गतिर्याजुषी अर्थात् **यच्च जूश्चेति यजुर्भवति**[३५], अत्र जूतिर्गत्यर्थे प्रयुज्यते तस्माज्जवते ह्ययमाकाशे इत्यर्थोऽवगम्यते। अतो यजुर्वेदो गतिरूपेण जीवशरीरे तिष्ठति। सामवेदश्च तेजोभावेन सर्वत्र विद्यमानमस्ति। सूर्यात्सामवेदस्योत्पत्तिर्जाता, तेजसः मुख्यावलम्बनत्वेन सूर्य एव प्रतिष्ठितः तस्मात् सामवेदस्य तेजोमयं स्वरूपं सुसिद्धमेव। तस्मादुक्तं तैत्तिरीयेण–

**ऋग्भ्यो जातां सर्वशो मूर्त्तिमाहुरन्या गतिर्याजुषी हैव शश्वत्।**
**सर्वं तेजः सामरूपं ह शश्वत् सर्वं हेदं ब्रह्मणा हैव सृष्टम्॥**[३६]

**वेदानुसारि-दिग्व्यवस्था-**

वेदाननुसृत्यैव दिग्व्यवस्थापि दृश्यते। तदुक्तं यथा–

**ऋचां प्राची महती दिगुच्यते दक्षिणामाहुर्यजुषामपाराम्।**

**अथर्वणामङ्गिरसां प्रतीची साम्नामुदीची महती दिगुच्यते।।**[३७]

अर्थादृग्वेदस्य पूर्वदिशा, यजुर्वेदस्य दक्षिणदिशा, सामवेदस्योत्तरदिशा, अथर्ववेदस्य च पश्चिमदिशा प्रथिता। तदन्वधुना स्मार्त्तयज्ञमण्डपे चतुर्णामपि वेदपाठीनां द्वारपालत्वेन चतुर्दिग्द्वारेषु नियोजनं क्रियते।

**वेदानुसारि-वर्णव्यवस्था-**

**ऋग्भ्यो जातं वैश्यं वर्णमाहुः यजुर्वेदं क्षत्रियस्याहुर्योनिम्।**
**सामवेदो ब्राह्मणानां प्रसूतिः पूर्वे पूर्वेभ्यो वच एतदूचुः।।**[३८]

ऋग्वेदैः वैश्यानाम्, यजुर्वेदैः क्षत्रियाणाम्, सामवेदैर्ब्राह्मणानाम्, अथर्ववेदैश्च चतुर्थवर्णानामुत्पत्तिर्जातेत्युक्तमत्र।

**निष्कर्षः-**

उपर्युक्तैर्विवेचनैरधुना निष्कर्षरूपेणायं वक्तुं शक्यते यत्संसारस्य सर्वा अपि व्यवस्था वेदाननुसृत्यैव व्यवस्थिताः सन्ति। तस्माद्वेदानां स्तुतिः ब्रह्मरूपेणैवास्माकमाचार्यैः कृतम्। पदवाक्यप्रमाणपारावारपारीणेन भगवता सायणाचार्येण स्वकीयवेदार्थप्रकाशभाष्यस्यारम्भे मङ्गलाचरणे एवमुक्तं यत्-

**ब्रह्म निःश्वसितं वेदाः यो वेदेभ्योऽखिलं जगत्।**
**निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्।।**

अर्थादिमे वेदाः ब्रह्मणो निःश्वासभूताः सन्ति। तेनैव ब्रह्मणा इदं समस्तं विश्वं स्वकीयकार्यकारणभावेन सृष्टमिति चोच्यते। श्रौतग्रन्थेष्वेतादृशानां कार्यकारणसम्बन्धबोधकाना- मनेकान्युदाहरणानि विद्यन्ते। यथा-

**किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।**
**मनीषिणो मनसा पृच्छतेदुतद्यदध्यतिष्ठद् भुवनानि धारयन्।।**[३९]

अत्र ऋषयो मनीषिणः मनसा विचारयन्ति यद्यतो द्यावापृथिवी प्रकटिते तद्वनं किम्? तद्वृक्षश्च कः? इमानि भुवनानि धारयन् किमधितिष्ठति? इत्यादीन् कारणान्वेषणात्मकान् प्रश्नान् प्रकटयन्ति। ऋग्वेदे समुद्भावितानां प्रश्नानामेषामुत्तराणि तैत्तिरीयब्राह्मणे प्राप्यते, यथा-

**ब्रह्मवनं ब्रह्म स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।**
**मनीषिणो विब्रवीमि वो ब्रह्माधितिष्ठद् भुवनानि धारयन्।।**[४०]

अत्र सर्वेषामपि प्रश्नानामेकमेवोत्तरमुक्तं ब्रह्म इति। इत्याभ्यां प्रश्नोत्तरात्मकाभ्यां श्रौतवचनाभ्यामिदं स्पष्टं भवति यत्सकलस्यापि कार्यरूपस्य प्रपञ्चस्य कारणं ब्रह्मैवास्तीति। तद्ब्रह्म एव शब्दब्रह्मात्मकेन स्वरूपेण

वेदात्मना सर्वमिदं प्रपञ्चं साधु सम्पादयति। तेन वेदानां ब्रह्मवददृश्यत्वेन सर्वत्रोपस्थितिर्मन्यते। तस्माद्वेदानां सार्वभौमिकत्वं सुतरां सिद्धं भवतीति शम्।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी–

1. निरुक्ते– 1/6/20 पादटिप्पण्याम्।
2. तै.ब्रा.– 3/10/11
3. श्रीमद्भागवते– 6/1/40
4. मैत्रायण्याम्–2/6, अमृतबिन्दूपनिषदि–17
5. तै.सं.– 1/6/11/1
6. काठ– 4/13/1, ऐ.ब्रा.– 2/17/4/26, गो.ब्रा.–2/3/8; 4/12; 6/1, जै.ब्रा–2/70, तै.ब्रा– 3/2/3/1, श.प.ब्रा.– 1/1/1/13; 1/5/2/17; 3/2/2/4
7. ऐ.ब्रा.– 2/33, जै.उ.– 1/15/1/1
8. जै.ब्रा.– 2/244; तां.ब्रा.–20/14/2
9. मै.–1/9/3
10. मै.– 4/2/1, तां.ब्रा.– 4/1/4
11. अर्थसंग्रहे, धर्मलक्षणविचारे।
12. श.प.ब्रा.–14/2/2/29
13. श.प.ब्रा.–14/4/2/26
14. मैत्रायण्याम्– 4/4/2
15. मै.– 4/11/1
16. तै.सं.– 1/1/7/2
17. यक्षयुद्धिष्ठिरसंवादे– महा.वन. 313–317
18. मनुस्मृतौ– 5/44
19. आर्चज्योतिषम्–36, याजुषज्योतिषम्–3
20. शु.य.सं.– 31/7
21. श.प.ब्रा.– 1/1/4/3
22. निरुक्ते–7/2/5
23. मनुस्मृतौ–1/23
24. शु. य. सं.–36/1

25. ऐतरेयोपनिषदि- 1/2/4

26. श.प.ब्रा.- 11/5/8/3

27. तै.ब्रा.- 3/12/9/2

28. श.प.ब्रा.-1/6/3/29;30 ; 7/5/2/25

29. नित्यकृत्यार्णवे- 172 तमे पृष्ठे।

30. श.प.ब्रा.- 1/6/3/24

31. बृहज्जाबालोपनिषदि- 2/4

32. अथर्ववेदे- 11/4/13

33. श.प.ब्रा.- 14/4/4/3

34. प्रश्नोपनिषदि- 1/5

35. श.प.ब्रा.- 10/3/5/2 अयमेवाकाशो जूः यदिदमन्तरिक्षं ह्याकाशमनु जवते तदेतद्यजुर्वायुश्चान्तरिक्षं च यच्च जूश्च तस्माद्यजुरेष एव।

36. तै.ब्रा.- 3/12/9/3

37. तै.ब्रा.- 3/12/9/1

38. तै.ब्रा.- 3/12/9/2

39. ऋ.सं.- 10/31/7

40. तैत्तिरीयब्राह्मणे- 2/8/9/6

## वेदाङ्गानां प्रासङ्गिकता

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।**[१]
**युगान्तेऽन्तर्हितान्वेदान् सेतिहासान्महर्षयः।**
**लेभिरे तपसा पूर्वमनुज्ञाता स्वयम्भुवा।।**[२]

इत्याभ्यां स्मार्त्तवचनाभ्यां वेदानामनादित्वं नित्यत्वं वाग्रूपत्वं सेतिहासप्रवृत्तित्वं महर्षिभिस्तपसा प्राप्यत्वञ्च स्पष्टमेव भवति। स चायं वेदशब्दो विद्-धातोर्घञा निष्पद्यते। तत्राद्युदात्तो वेदशब्दः कुशमुष्टिवाची, अन्तोदात्तो वेदशब्दश्च ज्ञानवाचीति सर्वे विद्वांसो जानन्त्येव। तेन सर्वज्ञानविज्ञानानां स्रोतांसि वेदा एव सन्तीत्युक्तं भगवता मनुना- **सर्वज्ञानमयो हि सः।**[३] वेदेषु मन्त्राः सन्ति, मन्त्राणां प्रयोगा यागेषु भवन्ति। तदुक्तं कृष्णयज्वना मीमांसापरिभाषायां- **प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते।** मीमांसकैश्चान्यैः **प्रयोगसमवेतार्थस्मारकाः मन्त्रा** इति मन्त्रलक्षणं प्रस्तुतम्। कात्यायनेन मुनिना स्वकीये श्रौतसूत्रे- **ऋचो यजूंषि सामानि निगदा मन्त्रा**[४] इत्युक्तम्। तेषां मन्त्राणामर्थज्ञाने यानि शास्त्राणि सहायकानि भवन्ति तान्येव वेदानामङ्गानीति कथ्यन्ते। वेदस्याङ्गं वेदाङ्गमिति सामासिकार्थः।

अङ्गशब्दस्य व्यूत्पत्तिलभ्योऽर्थो भवति- **अङ्ग्यन्ते ज्ञायन्ते अमीभिरित्यङ्गम्।** अर्थात् येन साधनेन कस्यापि पदार्थस्य तत्त्वस्य वा ज्ञानमस्माभिः क्रियते तत्साधनमेव अङ्गमित्युच्यते। अङ्गानां पर्यायभूतः शब्दोऽस्ति इन्द्रियमिति। इन्द्रियाण्यस्माकं शरीरे दश प्रोक्तानि पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि च। एभिर्ज्ञानकर्मोभयेन्द्रियैः वयं ज्ञानं कुर्मः। ज्ञानस्य ज्ञानकरणस्य साधनान्येतानीन्द्रियाण्यस्माकं शरीरे यथा तिष्ठन्ति तथैव वेदशरीरे वेदाङ्गानि तिष्ठन्ति। अर्थादेतेषां हस्तपादादीनामङ्गानां सहायेन यथा वयं गमन-ग्रहण-स्पर्शन-चर्वन-उत्सर्जन-घ्राणन-दर्शन-श्रवण- आस्वादनादिकं कर्म सम्पादयामः एवमेव वेदा अपि स्वीयं कर्म स्वेनैवाङ्गेन सम्पादयन्ति। अतो वेदाङ्गानां महन्महत्त्वमस्तीत्यत्र नास्ति काचित् विचिकित्सा।

भगवता पाणिनिना स्वकीयायां शिक्षायामेवमुक्तम्-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

**ज्योतिषामयनञ्चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥**
**शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।**
**तस्मात्साङ्गमधीत्यैव ब्रह्मलोक महीयते ॥**[५]
**शिक्षाकल्पो व्याकरणं निरुक्तं छन्दसां चयः ।**
**ज्योतिषामनञ्चैव वेदाङ्गानि षडेव तु ॥**

षण्णामप्येतेषां वेदाङ्गानामुल्लेखो गोपथब्राह्मण-उपनिषद्-बौधायन-धर्मसूत्र-गौतमधर्मसूत्ररामायणादिषु प्राचीनग्रन्थेषु समुपलभ्यते। एतेन तेषां पुरातनतरत्वं सिद्ध्यत्येव नात्र काचिद्विमतिः केषामपि।

परमाधुनिकानामितिहासकाराणां कथनमिदमस्ति यत् षण्णामपि वेदाङ्गानां निर्माणं वैदिकयुगस्योत्तरार्द्धे समभवदिति। नेदं कथनमस्माकं पुरातनानामृषिमुनीनां वाक्येन सह साम्यं बिभर्ति। तस्मादिदं कथनं सर्वथा निर्मूलमेवास्तीति कथने नातिशयोक्तिर्भविष्यति ।

एतत्तु सत्यमेवास्ति यत् यावन्त्यपि शास्त्राणि धरातले विद्यमानानि सन्ति तेषां समेषां मूलस्रोतस्तु वेद एव। यथा लोके कश्चिदपि जीवः अङ्गैर्विहीनं शरीरमादाय मातुर्गर्भाद्बहिर्नागच्छति तथैव इमे वेदा अपि साङ्गा निर्मिता एवाविर्भूताः तदुक्तमपि गोपथश्रुतौ- **एवमिमे सर्वे वेदाः निर्मिताः साङ्गाः सरहस्याः सकल्पाः सब्राह्मणाः सोपनिषत्काः सेतिहासाः सान्वाख्यानाः सपुराणाः सस्वराः ससंस्काराः सनिरुक्ताः सानुशासनाः सानुमार्जनाः सवाकोवाक्याः॥**[६] इत्यनया श्रुत्या स्पष्टमेव भवति यद्वेदानामाविर्भावो यदाऽभवत् तदानीं तेषामङ्गान्यप्याविर्भूतानीति।

वस्तुतो वेदानां भाषा भावश्चोभावपि दुरूहौ स्तः। तस्माद् वेदानामर्थावगमाय वेदाङ्गानामपेक्षा भवति। वेदार्थबोधाय सहायकत्वात् तेषामुपकारकत्वं तु स्पष्टमेव।

वेदेषु पठ्यमानानां मन्त्राणामर्थज्ञानं नितरामावश्यकं भवति। अत एव भगवता यास्केनार्थज्ञानं प्रशंस्य अर्थज्ञानाभावस्य च निन्दा कृतेति। तेनोक्तं यत्-

**स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।**
**योऽर्थज्ञ इत्सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मा॥**[७]

अर्थाद्यो हि जनो वेदमन्त्रानधीत्य तस्यार्थं न जानाति स स्थाणुरिव पृथिव्यामुपरि भारहार एवास्ति। इत्यनेन कथनेन तादृशस्य मनुष्यस्य जीवनं

भारस्वरूपमुक्त्वा अर्थज्ञानाभावस्य निन्दा विहिताऽस्ति। यो हि मनुष्यो वेदार्थं जानाति स सकलं भद्रमत्रत्यमवाप्नोति। प्रेत्य च स्वर्गं गच्छतीति वेदार्थज्ञानस्य प्रशंसायामुक्तम्। भगवता मनुनापि प्रतिपादितं यत्–

**वेदशब्दार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्।**
**इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते॥**[८]

अत एभिः प्रमाणैः वेदार्थज्ञानप्रशंसावचनैरिदं स्फुटमेव विज्ञातं भवति यद् वेदाध्ययनानन्तरं तस्य अर्थज्ञानमपि आवश्यकत्वेनैव करणीयम्।

अतो वेदार्थज्ञानायोपकारकाणि वेदार्थबोधे सहायकानि चेमानि षड्वेदाङ्गान्यपि निश्चितरूपेणाध्येतव्यान्येव। एतेषां वेदाङ्गानां अध्ययनाभावे वेदार्थज्ञानं नैव कर्तुं शक्यते। **नान्यः पन्था विद्यतेऽयनाय**[९] इत्यस्मात् श्रौतवचात्। अतः सर्वविधप्रयत्नेन वेदाङ्गानामध्ययनमनिवार्यमस्ति।

**वेदाङ्गानां मुख्यमुद्देश्यम्**–

वेदाङ्गानां किमुद्देश्यमिति जिज्ञासायां संक्षेपेणेदं वक्तुं शक्यते यद् वेदार्थप्रतिपादनमेव। वस्तुतः वैदिकमन्त्राणामुचितोच्चारणाय शिक्षाशास्त्रस्य, कर्मकाण्डपक्षस्य यज्ञानुष्ठानस्य च सम्पादनाय कल्पशास्त्रस्य, शब्दानां रूपज्ञानाय, व्युत्पत्तिज्ञानाय च व्याकरणशास्त्रस्य, मन्त्रार्थज्ञानाय निर्वचनाय च निरुक्तशास्त्रस्य, मन्त्रोच्चारणकाले गतियतिनियमादिज्ञानलाभाय छन्दःशास्त्रस्य तथा अनुष्ठानस्योचितकालनिर्णयार्थं ज्योतिषशास्त्रस्य च प्रयोजनमस्ति। तदन्वत्र सर्वेषामपि वेदाङ्गानां वेदार्थज्ञाने कीदृशं महत्त्वमिति क्रमशो विवेचयामि।

**शिक्षा** :– शिक्ष् विद्योपादाने धातोः विनिर्मितस्य शिक्षाशब्दस्यार्थो भवति विद्यादानमिति। तेन शिक्षाशास्त्रं तच्छास्त्रमुच्यते येन वेदमन्त्राणामुच्चारणं शुद्धं सम्पद्येत। वेदे स्वरस्य प्राधान्यं सर्वविदितमेवास्ति। स्वरज्ञानं शिक्षाशास्त्राध्ययनेनैव भवितुमर्हति। तैत्तिरीयोपनिषदि शिक्षाशास्त्रप्रयोजनमुक्तं यथा– **अथ शीक्षां व्याख्यास्यामः– वर्णः, स्वरः, मात्रा, बलं, साम सन्तान इत्युक्तः शिक्षाध्यायः। तत्र वर्णोऽकारादिः, स्वरोदात्तादिः, मात्रा ह्रस्वादिः, बलं स्थानप्रयत्नौ, साम निषादादिः, सन्तानो विकर्षणादिः। एतदवबोधनमेव शिक्षायाः प्रयोजनम्।**[१०] अत एव पदवाक्यप्रमाणपारावारपारीणेन श्रीमत्सायणार्येण ऋग्वेदभाष्यभूमिकायामुक्तम्– **स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा।**

वस्तुतो यथा लोके मानवः घ्राणेन्द्रियेण श्वासादिकं गृहीत्वा यावदायुर्जीवति तद्वदेव शिक्षाशास्त्राध्ययनेन शुद्धमुच्चारणादिकं कर्तुं प्रशिक्षितो भूत्वा शुद्धस्वरेण मन्त्रप्रयोगञ्च कृत्वा सर्वमप्यभीष्टं साधयति। यथा श्वासं विना मनुष्यस्यायुर्न तिष्ठति तथैव मन्त्राणां सस्वरं शुद्धोच्चारणं विना कृतकर्मणः फलं न लभ्यते। अत एवोक्तं पाणिनिना– शिक्षा घ्राणं तु वेदस्य इति।

स्वरभ्रष्टस्य मन्त्रपाठस्य कीदृशं दुष्फलं भवतीति प्रकाशयता पाणिनिना लिखितम्–

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥**[११]

शतपथब्राह्मणानुसारं त्वष्टुः पुत्रः विश्वरूपसंज्ञकः त्रिशीर्षः षडक्ष आस। तस्य कठोरतपश्चर्यया क्षुब्ध इन्द्रस्तं विश्वरूपं जघान। तेन त्वष्टा क्रुद्धो भूत्वेन्द्रस्य वधाय सक्षमं **वृत्र**नामानं पुत्रं प्राप्तुमाभिचारिकं प्रयोगं कृतवान्। तस्मिंश्चानुष्ठाने **इन्द्रशत्रुर्विवर्धस्व** इति मन्त्रेण ऋत्विग्भिर्होमं विहितम्। मन्त्रपाठावसरे त्वष्टुः पुरोहिताभ्यां किलाताकुलीभ्यां बहुव्रीहिसमासोक्तार्थफलप्रदातृस्वरेण साकम् **आद्युदात्तस्य** इन्द्रपदस्य प्रयोगो विहितः, फलतो यजमान एव हतः। अत्र इन्द्रस्य वधाय इन्द्रस्य शत्रोः त्वष्टुर्वर्धनाय च षष्ठीतत्पुरुषसमासोक्तार्थस्य स्वरयुक्तस्य **अन्तोदात्ते**न्द्रपदप्रयोग आसीदपेक्षितस्तन्नाभूदतो यजमानस्य नाशोऽभवत्। इत्येतामेव शतपथोक्तां कथामत्र स्मारयति पाणिनिः।

अतः शिक्षाशास्त्रमाध्यमेन स्वरसहितवेदमन्त्राणां शुद्धोच्चारणस्य ज्ञानं भवति तस्मादस्य वेदाङ्गस्याध्ययनं कर्त्तव्यमेव वेदार्थज्ञानाय।

**कल्पः** :– वेदानां द्वितीयमङ्गमस्ति कल्पः। **कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्** इत्यभियुक्तोक्त्या वेदेषु वर्णितानां यागानां पूर्णपरिचयप्रदायकग्रन्थेषु कल्पसूत्राण्यभूतपूर्वाणि सन्ति। अत्र वेदविहितानां कर्मणां क्रमपूर्वकं व्यवस्थापनं कल्पितमस्ति। यागाः द्विविधाः श्रौताः स्मार्त्ताश्च। तत्र श्रुत्युक्तयागविधिप्रकाशकानि श्रौतसूत्राणि शुल्बसूत्राणि च प्रवृत्तानि। स्मृतिप्रतिपादितयागविधिप्रकाशकानि गृह्यसूत्राणि धर्मसूत्राणि चोपबृंहितानि। तेन मुख्यतः कल्पसूत्राणि चतुर्विधान्युक्तानि–श्रौतसूत्रम्, गृह्यसूत्रम्, शुल्बसूत्रम्, धर्मसूत्र ञ्चेति।

श्रौतसूत्रेषु अग्नित्रयाधानम्, अग्निहोत्रम्, दर्शपूर्णमासौ, पशुयागाः,

सप्तसोमसंस्थाकाः सोमयागाश्च प्रतिपादिताः सन्ति। अनेनेदं स्फुटं भवति यच्छ्रौतसूत्रेषु ब्राह्मणग्रन्थवर्णितानां श्रौताग्निसाध्यानां यज्ञानां क्रमबद्धं वर्णनं वर्तते। वेदभेदेन विविधानि श्रौतसूत्राणि सन्ति।

गृह्यसूत्रेषु गृह्याग्निसाध्यानामुपनयनविवाहश्राद्धादीनां संस्काराणां आचारयागानां त्रैवर्णिकैरनुष्ठितानाञ्च विस्तृतं विवरणं विद्यते।

शुल्बसूत्रेषु विशेषरूपेण भूमितिकविषयाणां वेदिनिर्माणप्रकाराणां ज्यामितिशास्त्रीयसिद्धान्तानाञ्च प्रतिपादनमस्ति। प्रतिपादनेनानेनैतेषां शुल्बसूत्राणां वैज्ञानिकत्वं नितरामेव सिद्ध्यति। यथा श्रौतसूत्राणि वेदभेदेन विभिन्नानि तथैव शुल्बसूत्राण्यप्यनेकानि सन्ति।

धर्मसूत्रेषु धार्मिकनियमाः, प्रजानां राज्ञाञ्च कर्त्तव्याचर्याः, चत्वारो वर्णाः, चत्वार आश्रमाः, तेषां धर्माश्च पूर्णतया निरूपिताः सन्ति। धर्मसूत्राण्येव धर्मशास्त्रप्रवर्तने हेतुभूतानि सन्तीति मन्यते।

उपर्युक्तानां कल्पसूत्राणां संख्या पर्याप्ता अस्ति। तेषां समेषां नामोच्चारणेऽपि महान् कालो भविष्यति अपेक्षितः।

**व्याकरणम् :- रक्षोहागमलघ्वसन्देहाः** इति वचनाद्वेदरक्षणोपायेषु वेदव्याख्यानपरम्परासु वेदार्थावबोधकेषु शास्त्रेषु च प्रकृतिप्रत्ययपुरस्सर-पदस्वरूपप्रतिष्ठापकत्वादर्थनिर्णयकृत् साधनेषु अन्यतमसाधनत्वे प्रयुक्तत्वाद् व्याकरणं नामाङ्गं नितान्तमेव महनीयं श्रेष्ठञ्चास्ति। तस्मादिदं शास्त्रं वेदाङ्गेष्वपि मूर्धन्यं स्थानमावहति। अत एवोक्तं पाणिनिना- **मुखं व्याकरणं स्मृतमिति।**

लोकव्यवहाराय भाषा भवत्यावश्यकी। भाषायां शुद्धता व्याकरणज्ञानेन विना नैव भवितुर्महति। अतोऽस्मिन् धरातले सर्वासामपि भाषाणां व्याकरण-मस्त्येव। सर्वास्वपि भाषासु संस्कृतभाषा मातृस्थानीयाऽस्ति। अतोऽस्याः भाषायाः व्याकरणमपि मातृवत् सर्वभाषा सम्पोषिका पूर्णसमृद्धा चास्ति। व्याकरणस्याध्ययनमिहानिवार्यत्वेन अपरिहार्यत्वेन चोक्तम्। तदुक्तमपि केनापि-

**यद्यपि बहुनाधीषे तदपि पठ पुत्र व्याकरणम् ।**
**स्वजनः श्वजनो माभूत् सकलं शकलं सकृच्छकृत् ॥**

संस्कृतव्याकरणं समुद्रवदपारमगाधञ्चास्ति। व्याकरणविषये उक्तमस्ति यत्- **बृहस्पतिश्च वक्ता। इन्द्रश्चाध्येता। दिव्यं वर्षसहस्रमध्ययनकालः अन्तं च न जगाम।** (महाभाष्ये पस्पशाह्निके) । पण्डितसमाजे प्रसिद्धगाथा अस्ति-

**समुद्रवद् व्याकरणं महेश्वरे तदर्धकुम्भोद्धरणं बृहस्पतौ।**
**तद्भागभागाच्च शतं पुरन्दरे कुशाग्रबिन्दूत्पतितं हि पाणिनौ॥**

इन्द्रः, चन्द्रः, काशकृत्स्नः, आपिशलिः, शाकटायनः, पाणिनिः, अमरः, जैनेन्द्रश्च इत्यतेऽष्टौ सन्ति व्याकरणकर्तारो विद्वत्सत्तमाः प्रथिताः। एतदतिरिक्तं कौमारं सारस्वतं शाकलञ्च व्याकरणं यत्र-तत्र प्रसिद्धमस्ति। अस्ति ह्यनन्तमतिगभीरञ्चेदं शब्दशास्त्रं तस्मादुक्तं अनुभूतिस्वरूपाचार्येण-

**इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः।**
**प्रक्रियां तस्य कृत्स्नस्य क्षमो वक्तुं कथं नरः॥**

भाष्यकाराणां पतञ्जिलिमुनीनां यशोगानेन अस्मिञ्जगति कोऽस्ति अपरिचितः खलु। लघवोऽपि बालकाः **'मुनित्रयं नमस्कृत्य'** इत्यस्य अभ्यासं सदा कुर्वन्त्येव। तत्रोक्तेषु त्रिषु मुनीषु पाणिनिपतञ्जलिकात्यायनमुनीनां नामानि स्मारयन्ति।

अतोऽनेन वर्णनेन व्याकरणरूपस्य वेदाङ्गस्य वेदव्याख्याने महती भूमिका अस्ति इत्यत्र नास्ति कस्यापि मनाक् सन्देहः।

**निरुक्तम्** :- निरुक्तपदस्य व्युत्पत्तिरेवं कुर्वन्त्याचार्याः - **अर्थाव-बोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्** इति। **निःशेषेणोक्तं निरुक्तम्** इति च। आभ्यां व्युत्पत्तिभ्यामिदं स्फुटं भवति यद्वैदिकमन्त्राणां व्याख्यानाय पदजातानां ज्ञानं नितान्तमपेक्षितं भवति। अत्र शास्त्रे चत्वारि पदजातान्युक्तानि नामाख्यातोपसर्गनिपातात्मकानि चेति। एतानि पदजातान्याश्रित्य वेदेषु स्वराणां ज्ञानं भवति। स्वरानुकूलमेवार्थप्रतिपादनमि**तीन्द्रशत्रुर्वर्द्धस्व** इत्यस्मिन् पदे अस्माभिरवलोकितम्। प्रतिकूलस्वरोच्चारणात्तस्य पदस्यार्थोऽपि प्रतिकूलोऽभवत् येन वृत्रस्य निधनं सञ्जातम्।

आदौ कश्यपप्रजापतिना निघण्टुशास्त्रस्य प्रणयनमुपदेशञ्च कृतम्। निघण्टुकालाननतरं निरुक्तस्य समयः प्रारब्धः। दुर्गवृत्तावेवमुल्लिखितमस्ति यच्चतुर्दशनिरुक्तकाराऽभूवन्। यास्ककृते निरुक्ते द्वादशनिरुक्तकाराणां नामानि निर्दिष्टाानि सन्ति। त्रयोदशोऽयं यास्कः, चतुर्दशः कः इति तु अज्ञात एवास्ति।

वेदव्याख्यानाय निरुक्तकाले अनेकपक्षा आसन् येषां नाम्नां संकेतो यास्केन एवं कृतम्- **अधिदैवतः, अध्यात्मः, आख्यातसमयः, ऐतिहासिकाः, नैदानाः नैरुक्ताः, परिव्राजकाः, याज्ञिकाश्च।** वेदार्थानुशीलनाय एतत्सर्व

ज्ञातव्यमेव। यथा लोके श्रोत्रेन्द्रियेण विरहितो मानवः बधिरो भवति एवमेव निरुक्तानामध्ययनं विना बधिर एव भवति ।

अत्र पञ्च विषयाः मुख्यरूपेण प्रतिपादिताः सन्ति, येषामुल्लेखो निम्नश्लोके विद्यते–

**वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।**
**धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥**

एवं पञ्चविधनिरूपणद्वारा निरुक्तशास्त्रं वेदव्याख्यां सम्पादयीति। लौकिकव्याकरणे एवमुक्तमस्ति यत् रूढपदानां व्युत्पत्तिर्न विधेयमिति। परं वेदे रूढशब्दानां व्युत्पत्तिः अनेकत्र दृग्गोचरा भवति– **यदसर्पत तत् सर्पिः** सर्पिषो व्युत्पत्तिर्गमनार्थकस्य सृप्धातोर्निष्पन्नो भवति। अनेन प्रकारेण यास्को निर्वचनस्य त्रीन् सिद्धान्तान् प्रतिपादितवान्। तत्रेदमुक्तं यत् सर्वेषामपि पदानां निर्वचनं यथोपलब्धयुक्तिभिः कर्तव्यमेव।

**छन्दः** :- छन्दो वेदस्य पञ्चमाङ्गमस्ति। वेदाः सन्ति छन्दोबद्धाः, अतस्तेषामुच्चारणाय छन्दोज्ञानं नितरामपेक्षितं भवति। छन्दोज्ञानं विना यो वेदाध्ययनयजनयाजनादिकार्याणि करोति तस्य तानि सर्वाणि कार्याणि निष्फलानि भवन्ति। तदुक्तं कात्यायनेन– **यो ह वा अविदितार्षेयच्छन्दो दैवतब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा स्थाणुं वर्च्छति गर्त्ये वा पात्यते प्रमीयते वा पापीयान् भवति ।**[१२]

छन्दांसि छादनादिति यास्कवचनात् **छन्द** इत्येतत्पदस्य व्युतत्पत्तिर्भवति– छन्दयति इति छन्दो वा छन्द्यतेऽनेनेति छन्दः। छद्–छादने धातोर्निष्पन्नत्वात् वेदस्यावरणत्वेन प्रयुक्तः छन्दः मन्त्रेषु प्रतिपदं स्थितमस्त्येव ।

रसशास्त्रस्य प्रवर्तको भरतमुनिरपि छन्दोविरहितं शब्दं न स्वीकरोति। यथा–

**छन्दोहीनो न शब्दोऽस्ति, न छन्दः शब्दवर्जितम् ॥**[१३]

अतो वेदव्याख्यानाय वेदार्थज्ञानाय च छन्दसां ज्ञानमपेक्षितं भवत्येव।

सर्वाण्यपि वैदिकच्छन्दांसि अक्षरच्छन्दांसि सन्ति। समस्तानामपि वैदिकच्छन्दसां संख्या षड्विंशतिर्मन्यते। यद्यपि वेदमन्त्रेषु गायत्र्यादीनि छन्दांसि अतिरिच्य **माच्छन्दः प्रमाच्छन्द**[१४] इत्यनेन संकेतेन छन्दसामनेकानि नामान्युक्तानि सन्ति। एतानि सर्वाण्यपि छन्दांसि वेदमन्त्रेषु प्रयुक्तानि सन्ति।

एभ्य एव वैदिकछन्दोभ्यो लौकिकच्छन्दसां विकासो जातः। यथा

अनुष्टप् छन्दो यथावत् लौकिककाव्ये प्रयुज्यते। त्रिष्टुप् छन्दसः सकाशात् इन्द्रवज्रोपेन्द्रवज्रेति लौककछन्दसः समुदयो मन्यते। जगतिच्छन्दसो वंशस्थस्य, शक्बरीतो वसन्ततिलकायाः समुत्पत्तिर्बभूव। अनेनैव प्रकारेणान्येषां छन्दसां लौकिकानामुदयो ज्ञातव्यः।

**छन्दः पादौ तु वेदस्य** इति कथनेनेदं स्फुटं भवति यद्यथा पद्भ्यां विहीनो जनो पङ्गुरुच्यते न क्वापि गन्तुं समर्थो भवत्येवमेव छन्दसां ज्ञानं विना वेदाध्येतारो पङ्गवो भवन्ति। मन्त्रोच्चारणस्यारोहावरोहज्ञानं विनैव मन्त्रान् पठन्ति। येन मन्त्राणां स्वराः शब्दाश्च कुण्ठिताः भवन्ति। स्वरशब्दयोः कुण्ठावशात् अर्थप्रकाशनं न भवति। अतो छन्दोज्ञानं कर्तव्यमेव।

**ज्योतिषम् :- ऋतौ ऋतौ यजतीति ऋत्विक्** इत्यनया व्युत्पत्त्या ऋतु-मास-पक्ष-तिथि-नक्षत्रानुसारं यो यजनं करोति स ऋत्विगित्युच्यते। श्रौतस्मार्त्तयज्ञेषु ये भवन्त्यधिकारिणो यजमानास्तेषां कृतेऽपि ऋत्वनुसारं कार्यारम्भो वेदेषु विहितोऽस्ति। तदुक्तं- **वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यः शरदि वैश्यः आदधीत**[१५] इति। एतेषामृतुमासपक्षतिथिनक्षत्रादीनां ज्ञानं ज्योतिषशास्त्रं विना नैव कर्तुं शक्यते। अत एवोक्तं लगधाचार्येण वेदाङ्गज्योतिषे-

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ।**
**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ।।**[१६]

वेदभेदेन लगधाचार्येण त्रयाणां ग्रन्थानां प्रणयनं कृतम्- (1) आर्चज्योतिषम्, ऋग्वेदसम्बद्धं षट्त्रिंशत्पद्यात्मकम्; (2)याजुषज्योतिषम्, यजुर्वेदसम्बद्धं ऊनचत्वारिंशत्पद्यात्मकम्; (3)आथर्वणज्योतिषम्, अथर्ववेदसम्बद्धं द्विषष्ट्युत्तरशतपद्यात्मकम्।

तदिदं ज्योतिषशास्त्रं त्रिस्कन्धमुच्यते सिद्धान्तहोरासंहिताभेदेन। वेदाङ्गेषु ज्योतिषं मूर्धनि स्थितमित्युक्तं लगधेन। यथा-

**यथा शिखा मयूराणां नागानां मणयो यथा ।**
**तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम् ।।**[१७]

शास्त्रस्यास्य प्रवर्तका अष्टादशमहर्षयः सन्ति ते यथा-

**सूर्यः पितामहो व्यासो वशिष्ठोऽत्रिः पराशरः ।**
**कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः ।**

**लोमशः पुलिशश्चैव च्यवनो यवनो भृगुः ।**
**शौनकोऽष्टादशश्चैते ज्योतिःशास्त्रप्रवर्तकाः ॥**

वेदाङ्गेषु चक्षुःस्थानीयमिदं शास्त्रं प्रसिद्धमस्ति। यथा कश्चिज्जनः चक्षूभ्यां विहीनः सन् अन्धो भवति तथैव ज्योतिषशास्त्रज्ञानं विना वेदाध्येता अन्ध एव भवति। उचितानुचितकालज्ञानं विनैव यदि कार्यारम्भः क्रियते चेत् तत्कार्यं निष्फलं भवति। यथा यज्ञारम्भो यदि स्वर्गकामनया क्रियते परन्तु मृत्युयोगे तस्यारम्भो भवेच्चेदत्रोचितफलप्राप्तौ शंका समुदेत्येव। अत एवैतच्छास्त्रं वेदोक्तकर्मसम्पादने महत्त्वपूर्णं स्थानमावहतीति।

**निष्कर्षः**–

एवमुक्तप्रकारेणेदं सिद्धं यद्वेदाङ्गानां मुख्यं प्रयोजनमस्ति वेदमन्त्राणामर्थज्ञानपूर्वकं तत्रोक्तक्रियाकलापानां सम्यगनुपालनमिति। यतस्तु नीतावुक्तमस्ति यत् **ज्ञानं भारः क्रियां विना** इति। अर्थात् क्रियाविरहितं यज्ज्ञानं तद्भारस्वरूपमेव भवति। मन्यताम्, कश्चित् पिपासुर्जलं वाञ्छति चेदिदं ज्ञातव्यमेव यत्कूपाज्जलमादाय पिपासाशान्तिः करणीयेति। सत्युपलब्धेऽपि सर्वविधोपकरणे जलोत्कर्षणज्ञानाभावे तस्य पिपासाशान्तिरसम्भवैव भवति। उदाहरणार्थं तत्र कूपोऽप्यस्ति, रज्जुरप्यस्ति, जलाहरणपात्रमप्यस्ति परं यदि जलोत्कर्षणज्ञानं नास्ति चेत्कथं जलं प्राप्तव्यमित्यवस्थायां स हस्तं सम्मृज्जन्नेव स्थास्यति न जलपानेन पिपासाशान्तिमधिगच्छति। एवमेव वेदमन्त्रोच्चारणज्ञानसम्पन्नो यदि कश्चिद्विद्वान् तत्रोक्ताभिः क्रियाभिरपरिचितो भवेच्चेत् तादृशं ज्ञानं केवलं भारस्वरूपमेव भवति। वेदार्थज्ञानस्य तात्पर्यमेवास्ति तत्रोक्तक्रियाज्ञानम्, तद्रहितोऽनर्थज्ञ इति च बोध्यम्। तस्मादुक्तं निरुक्तकृता **योऽर्थज्ञ इत्सकलं भद्रमश्नुते** इति। अतो वेदार्थज्ञानायाद्यापि वैज्ञानिके युगे वेदाङ्गानां प्रासङ्गिकता सुतरामेव सिद्ध्यतीत्यलमतिविस्तरेण।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी–

1. महाभारते, शान्तिपर्वणि– 244/55
2. स्मृतिवचनम्– उल्लेखः ऐतरेयब्राह्मणे सायणभाष्ये उपोद्घाते।
3. मनु–2/7
4. का.श्रौ.सू.– 1/3/1

5. पा.शि.–41–42
6. गोपथब्राह्मणे–पूर्व–प्र–2/1
7. निरुक्ते–1/6/19
8. मनुस्मृतौ–12/102
9. शु.य.सं.– 31/18
10. तै.उप.– शीक्षावल्ली– 1
11. पा.शि.–52
12. सर्वानुक्रमणी–1/1
13. ना.शा.–14/45
14. शु.य.सं.– 14/18
15. तै.ब्रा.–1/1
16. आर्चज्योतिषम्–36
17. वेदाङ्गज्यो–4

# वेदेष्वन्तःकरणविमर्शः

विश्ववाङ्मये वेदस्य स्थानमतीव महत्त्वपूर्णमस्ति। वेदेष्वखिल-ब्रह्माण्डस्य ज्ञानविज्ञानानि सूत्ररूपेण वर्णितानि सन्ति। बाह्याभ्यन्तरभेदेन ज्ञानं द्विविधमुक्तम्। उभयोरपि बाह्यभ्यन्तरयोर्ज्ञानयोः यदधिष्ठानं भवति तत्करणमित्युच्यते। यथा दर्शनस्य करणं चक्षुः, श्रवणस्य करणं श्रोत्रम्, स्पर्शस्य करणं त्वक्, घ्राणस्य करणं नासिका, वाग्व्यवहारस्य करणं वागित्येवमेवान्तर्ज्ञानस्य करणं मन इति। मनस्तु प्रजापतित्वेन वेदेषु स्तुतोऽस्ति। यथा–

**प्रजापतिश्चरति गर्भेऽअन्तरजायमानो बहुधा व्विजायते।**<br>**तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा॥**[१]

अर्थादयं प्रजापतिः सर्वेषां जीवानामन्तर्गर्भे चरति। तदुक्तमपि तैत्तिरीयोपनिषदि– **तत्सृष्ट्वा तदेवानुप्राविशत्।**[२] सोऽयं परमात्मा सर्वेषां जीवानामन्तःप्रविश्य अजायमानः सन् बहुधा विजायते। अत्र अजायमान इत्येको धर्मः बहुधा विजायते पुनरपरो धर्मस्तयोः द्विविरुद्धधर्मणोरेकत्र सङ्गमः प्रजापतिरूपेण समस्तभूतानामन्तःकरणे प्रदर्शितः। अयमेव प्रजापतिर्मनस्त्वेन स्तुतस्तदुक्तं श्रुतौ– **प्रजापतिर्वै मन**[३] इति।

मानवव्यवहारान्तर्गतमन्तःकरणत्वेन प्रसिद्धानां मनोबुद्ध्यहङ्कारादीनां प्रवृत्तयः प्रमुखाः भवन्ति। तदुक्तमपि वेदान्ते–

**मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्।**<br>**संशयो निश्चयो गर्वः स्मरणं विषया अमी॥**[४]

कार्यभेदेन एतान्यन्तःकरणनामान्युक्तानि तच्चान्तःकरणं मन एवास्तीति सर्वैरङ्गीक्रियते। मनः कुत्र तिष्ठतीति जिज्ञासायामुक्तं श्रुतौ– **कस्मिन्नु मनः प्रतिष्ठितं भवतीति हृदय इति।**[५] अर्थान्मनः हृदये प्रतिष्ठितं सत् प्रजापतिभावेन समस्तेऽपि शरीरे भ्रमति। तदुक्तं वेदे– **मनस्तनूषु बिभ्रतः।**[६] तदिदं मनोऽन्तर्यामित्वेन सर्वत्र गतिशीलत्वादनन्तत्वेनापि स्तुतमस्ति। यथा– **अनन्तं वै मनः**[७] अस्य मनसोऽनन्तकर्माणि वेदेषु यत्र-तत्रोपवर्णितानि यथा– **कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव।**[८] एवमनेकविधकार्यसम्पादनादनेक-

नामधारणादरूपत्वाच्च मनसोऽनन्तत्वं सुतरामेव सिद्ध्यति। यथा परमात्मा सर्वजीवशरीरेषु तिष्ठन्नप्यस्पृश्यागोचरादिभिर्विशेषणैः विभूषितो भवति तथैव न केनापि लौकिकेनोपायेन गोचरं प्रत्यक्षं वा भवतीदम्मनस्तस्मात्परमात्म-भावनया लोके वेदे च पूज्यते। **सर्वेऽपि प्राणाः मनोऽभिसम्पन्नाः**[९] इति जैमिनीयब्राह्मणोक्तवचनात् प्राणापानव्यानसमानोदानेत्येताभिर्नामभिः प्रसिद्धाः सर्वेऽपि प्राणा मनोरूपेणैव सर्वशरीरमनुसञ्चरन्ति। अस्ति हि प्राणानां महती गतिस्तस्मान्मनसो गतिरपि सर्वाधिकैवास्ति। तदुक्तमपि जैमिनीये- **मनो वाव भुवनेषु जविष्ठम्**[१०] इति।

ऐतरेयेण महीदासेन इदमुक्तं यत् **हृदयस्य रेतो मनो मनसो रेतो वाक्**[११] इति। तदिदं ब्राह्मणवाक्यं वेदमन्त्रमेव स्मारयति। यथोक्तमपि- **ऋचं वाचं प्रपद्ये मनो यजुः साम प्राणं प्रपद्ये**[१२] इति। अत्र ऋचा वाक्तत्त्वस्य, यजुषा मनस्तत्त्वस्य, साम्ना च प्राणतत्त्वस्य प्रवृत्तिः प्रदर्शिताऽस्ति। एतान्येव वाक्प्राणमनस्तत्त्वानि कामः तपः श्रमत्वेन व्याचक्षते वेदविदस्तस्याधारोऽपि वेद एव। यथा- **कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।**[१३] अत्र मन्त्रे मनसो रेतत्वेन कामः व्याख्यातः। स च कामः समुद्र इव अनन्त उक्तः काठकसंहितायां तैत्तिरीयब्राह्मणे च। यथा- **समुद्र इव हि कामः। नैव हि कामस्यान्तोऽस्ति न समुद्रस्य।**[१४] अर्थाद्यथा समुद्रोऽस्त्यगाधोऽनन्तश्च तथैव मनसो रेतः कामोऽप्यगाधोऽनन्तश्चास्ति। अत एवोक्तं याज्ञवल्क्येन शतपथब्राह्मणे- **मनो वै समुद्रः**[१५] इति। अनेन मन्त्रब्राह्मणयोर्वाक्येन स्फुटं भवति यन्मनसो रेतसः स्वरूपं यद्यनन्तोऽस्ति तर्हि मनसोऽनन्तत्वेऽपि नास्ति संशीतिलेशः।

अनन्तमयत्वादस्य मनसो परमात्मलक्षणत्वं सुतरां सिद्ध्यत्येव। सोऽयं परमात्मा सर्वेषामपि प्राणिजातानामन्तःकरणत्वेन तिष्ठतीत्यपि सिद्धमेव। तदिदमन्तःकरणत्वेन प्रसिद्धं मन एव समस्तानामपि जगच्चक्रात्मकानां बन्धनमोक्षादीनां व्यापाराणां कारकत्वेन प्रोक्तमस्ति सर्वैरप्याचार्यैः। भगवता व्यासेनाप्युक्तं- **मन एव मनुष्याणां कारणं बन्धमोक्षयोरिति।**

यो हि जीवः मनसा सम्यज्ज्ञात्वा कर्माण्याचरति स एव मनुष्य इति शास्त्रकाराणामुपदेशः। तथा चावादि यास्को मनुष्यशब्दस्य निर्वचनप्रसङ्गे- **मनुष्याः कस्मात्? मत्वा कर्माणि सीव्यन्ति। मनस्यमानेन सृष्टाः। मनस्यतिः पुनर्मनस्वीभावे। मनोरपत्यं मनुषो वेति॥**[१६] अर्थादन्तःकरणेन

मनसा निखिलमपि विषयजातं तात्त्विकार्थज्ञानपरम्परया ज्ञात्वा कर्मव्यापार-माश्रयतीति मनुष्यो भवति। न पशवोऽन्ये च जीवास्तथा कर्माण्याचरितुं सक्षमा भवन्ति। अतो मनोरपत्यं मानव इत्युक्तं यास्केन। सर्वेऽपि मनष्या मनुर्भवन्त्विति प्रार्थना ऋग्वेदे काठके च विहितास्ति। यथा- **मनुर्भव जनया दैव्यं जनम्**[१७] इति।

मदीयं मनः कीदृशमस्त्वित्यस्मिन् विषये शुक्लयजुर्वेदीय-माध्यन्दिनसंहितायां चतुस्त्रिंशदध्याये आदितः षण्मन्त्रं यावदेवमुक्तमस्ति-

**यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति।**
**दूरङ्गमञ्ज्योतिषां ज्योतिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु॥1॥**

अर्थात् यन्मनो जाग्रतः पुरुषस्य चैतन्यावस्थायां चक्षुरादीनां बाह्यकरणानामपेक्षया अधिकदूरं गच्छति, यच्च मनो विज्ञानात्मनो ग्राहकमस्ति, तदेव मनः सुप्तावस्थायां पुनरागच्छति। यन्मनो सुदूरस्थानं प्रति गमनं करोति, यदर्थप्रकाशकानां श्रोत्रेन्द्रियाणामेकमेव ज्योतिरस्ति, तन्मदीयम्मनः कल्याणकारिधर्मविषयुक् भवत्विति।

**येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।**
**यदपूर्वं यक्षमन्तः प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु॥2॥**

कर्मवन्तो बुद्धिमन्तः पुरुषाः येन मनसा सता हविरादिभि-र्द्रव्यैरनुष्ठीयमानानि यज्ञानुष्ठानात्मकानि पवित्रकर्माणि कुर्वन्ति, यन्मन इन्द्रियेभ्यः पूर्वं यष्टुं समर्थम्, यच्च मनः प्राणिमात्रस्य शरीरान्तर्वर्ति आस्ते तादृशं मदीयम्मनः कल्याणकारिधर्मविषयुक् भवत्विति।

**यत्प्रज्ञानमुतचेतो धृतिश्च यज्योतिरन्तरमृतम्प्रजासु।**
**यस्मान्नऽऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु॥3॥**

यन्मनो विशेषज्ञानजनकम् उताहो सामान्यविशेषज्ञानकारकमस्ति, यच्च मनो धैर्यरूपं सच्चिदानन्दस्वरूपम् अमरणधर्माणशीलं प्रजानामन्तर्हृदि विद्यमानं सत् सर्वेन्द्रियप्रकाशकमस्ति यद्विना न कश्चिदपि जीवः किमपि कार्यं कर्तुं प्रवृत्तो भवितुमर्हति तादृशम्मदीयम्मनः कल्याणकारिधर्मविषययुक् भवत्विति।

**येनेदं भूतं भुवनं भविष्यतपरिगृहीतममृतेन सर्वम्।**
**येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु॥4॥**

येनाविनाशिस्वरूपेण मनसा सर्वमिदमखिलं भूतं परोक्षकालसम्बन्धि

वस्तु, भुवनं वर्तमानकालसम्बन्धिवस्तु, भविष्यत् आगामिकालसम्बन्धि वस्तु त्रिकालसम्बद्धवस्तु सर्वतो विदितं भवति, येन मनसा सप्तहोता यज्ञो विस्तार्यते, (**सप्तहोतेति** पदेनात्र सप्तसंस्थात्मकस्य यज्ञविशेषस्य अग्निष्टोमादियज्ञस्य बोधो भवति यत्र मैत्रावरुणादयः सप्तहोतारो भवन्ति), तादृशम्मदीयम्मनः कल्याणकारिधर्मविषययुक् भवत्विति।

**यस्मिन्नृचः सामयजूꣳषि यस्मिन्प्रतिष्ठितारथनाभाविवाराः।**
**यस्मिंश्चित्तꣳ सर्वमोतम्प्रजानान्तमे मनः शिवसङ्कल्पमस्तु॥5॥**

यस्मिन् मनसि ऋग्भिः परिपूर्णा ऋग्वेदस्थमन्त्राः स्थिताः सन्ति, यस्मिन् सामानि प्रतिष्ठितानि, यजुर्मन्त्राश्च यत्र प्रतिष्ठिताः सन्ति रथचक्रस्य नाभौ यथा आराः प्रोताः भवन्ति तथैव सर्वेषामपि प्रजानां चित्तं सर्वपदार्थ-सम्बन्धिज्ञानं प्रोतमस्ति तादृशम्मदीयम्मनः कल्याणकारिधर्मविषययुक् भवत्विति।

**सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव।**
**हृत्प्रतिष्ठं यदजिरं जविष्ठन्तन्मे मनः शिवसङ्कल्पमस्तु॥6॥**

यथा कश्चित् सुशिक्षितः सारथी रथे नियुक्तानश्वान् प्रेरकदण्डसाहाय्येन गन्तव्यं प्रति सम्यक्तया नयति, एवमेव यन्मनो मनुष्यानतिशयेन इतस्ततो नयति। यच्च मनोऽन्तर्हृदि प्रतिष्ठितं जरावस्थया विरहितमतिशयेन वेगेन संयुक्तमस्ति तादृशम्मदीयम्मनः कलयाणकारिधर्मविषयुक् भवत्विति।

**निष्कर्षः**- श्रुतिषु यत्र तत्र सृष्टिविषयो व्याख्यातोऽस्ति, तत्र सर्वत्र प्रायेण **प्रजापतिरकामयत, सोऽश्राम्यत्, स तपोऽतप्यत**[१८] इति कामतपःश्रमाः सृष्टिहेतुत्वेन श्रूयन्ते। तेषां स्वरूपज्ञानेन सङ्कल्पितस्यास्य विषयस्य स्पष्टीकरणं कर्तुं शक्यते। आत्मनः स्वरूपप्रतिपादनाय श्रुतावेवमुक्तमस्ति यत्- **स वा अयमात्मा वाङ्मयो मनोमयः प्राणमयः प्रतिपत्तव्यः**[१९] इति। अत्र वाक्प्राणमनोमय आत्मेत्युक्तम्। तत्र मनोऽवच्छेदेन कामः, प्राणावच्छेदेन तपः, वागवच्छेदेन च श्रम इति व्यापारत्रयं विभज्य द्रष्टव्यम्। मनसो रेतत्वेन कामस्य प्रतिपादनं पूर्वमेव विहितम्। तपसः स्वरूपमुपपादयितुं श्रुतावेवमुक्तं यत्- **तपसो वैताः प्रजाः प्राजायन्त**[२०] इति। अर्थात्प्रजानामुत्पत्तौ प्राणस्य महती भूमिका भवति। **या वै मेध्या वाक् सा तपोजा**[२१] तपसः सकाशाज्जाता तपोजा सा वागिति प्रोक्ता। सा च वाक् मनसो रेत उक्ता। यथा- **मनसो रेतो वाग्वाचो रेतः कर्म**[२२] इति। यो हि मनुष्यः श्रमं विद-धाति स कर्म एव सम्पादयति। कर्म एवात्र श्रमपदस्य वाचकम्।

उपर्युक्तेन विवेचनेनेदं स्पष्टं भवति यन्मनः प्रजापतिरिव सर्वेषामपि प्रजानां पालकोऽस्ति। तस्य मनसो विविधा वृत्तयः सन्ति। आभिरेव वृत्तिभिर्मनः सर्वान्तर्यामित्वेन सञ्चरन् सर्वमिदं विश्वं प्रकटयतीत्यलमतिविस्तरेण।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. शु.य.सं.-31/19
2. तै.उप.-2/6
3. श.प.ब्रा.-4/1/122
4. वेदान्तसारे- श्रीमद्भागवते च- मनोबुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम्। चतुर्द्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया।। (3/26/14)
5. श.प.ब्रा.-14/6/9/25
6. शु.य.सं.- 3/56, ऋग्वेदे- 10/57/6, तै.ब्रा.- 3/7/14/3
7. श.प.ब्रा.- 14/6/1/11
8. श.प.ब्रा.- 14/4/3/9
9. जैमिनीयब्राह्मणे- 1/316
10. जैमिनीयब्राह्मणे- 1/20
11. ऐतरेयब्राह्मणे- 2/1/3
12. शु.य.सं.-36/1
13. ऋग्वेदे- 10/129/4, अथर्ववेदे- 19/52/1
14. काठकसंहितायाम्- 9/12, तैत्तिरीयब्राह्मणे- 2/2/5/6
15. श.प.ब्रा.- 7/5/2/52
16. निरुक्ते- 3/2/7
17. ऋग्वेदे- 10/53/6, काठकसंहितायाम्- 3/7
18. श.प.ब्रा.- 6/1/1/8
19. श.प.ब्रा.- 14/4/3/10
20. मैत्रायण्याम्- 1/10/6
21. तैत्तिरीयारण्यके- 5/6/7
22. ऐ.आ.- 2/1/3

## वेदेषु सांख्ययोगतत्त्वविमर्शः

सर्वेष्वेव देशेषु सर्व एव मनुष्यास्त्रिविधाः दृश्यन्ते, भारवाहिनः, सारग्राहिणो, जिज्ञासमानाश्च। तत्र द्वितीया त्वत्यल्पा बहवस्त्वितरे। सारग्राहिणो हि शास्त्रतो लोकतो वा तात्त्विकमर्थं तत्तच्छास्त्रतात्पर्यविषयभूतं गृहीत्वा कुशलिनः कृतकृत्याः स्युरन्येषाञ्च दीनानामुद्धाराय करुणार्द्रहृदया कदाचित्सूत्र-रूपेण केचित् किञ्चिदुपदिशन्तिस्म। ते द्विविधाः- महर्षयो मुनयश्च। तत्र महर्षयो मन्त्रसूक्तादिद्रष्टारः, मुनश्च दर्शनादिशास्त्रप्रवक्तारः। भारवाहिनोऽपि द्विविधाः पण्डितम्मन्याः मूर्खमानिनश्च। जिज्ञासमाना अपि द्विविधा एव एके ज्ञानबलदुर्विदग्धा धृष्टचरिताः वितण्डावादिनः, परे तु विनीताः शिक्षितार्थे सयुक्तिके विश्वासमुपयन्ति। तदर्थमेवेदं सर्वशास्त्रमुपयुज्यते।

तत्रेदं शास्त्रं द्विविधं लौकिकं वैदिकञ्च। तद्धि लौकिकं यदनायासेन शिक्षणीयं व्यवहारबोधकं सामान्यफलप्रदायकञ्च। वैदिकन्तु विशिष्टधीवेद्यं महार्थञ्च, यथा- द्रव्यगुणविज्ञानम्, दैवविज्ञानम्, कार्यकारणविज्ञानेन भविष्यदर्थावधारणमिति। तत्र सर्वमेवेदमार्याणां वैदिकं शास्त्रं द्वेधा प्रवृत्तं दृश्यते- वैज्ञानिकसमयेन, ऐतिहासिकसमयेन च। तत्राद्ये त्रेधा प्रतिपत्तिः- **अधिदैवतम्, अधिभूतम्, अध्यात्मञ्चेति।** तत्राधिदैविकं यत्रैतदनन्ता-काशप्रदेशान्तर्निविष्टानाम् अग्निसोमेन्द्रादित्यादीनां तेजोऽबन्नादीनाञ्च संघात-भेदादिभिरतिचमत्कारकारि जगत्तत्त्वं निरूप्यते। आधिभौतिकं यत्र पृथिव्यां जातानां शिष्ट-दुष्ट-मूढ- विपश्चित्-राज-प्रजा-शत्रुमित्रोदासीनादर्शपुरुषाणाम् आचरितस्य तत्फलस्य च कार्यकारणभावं दृष्ट्वा देशकालानुरोधेन समाज-बन्धनेन च सामयाचारिकधर्मा राजाप्रजादिषु निरूप्यन्ते। आध्यातिमकं पुनरिदं भवति यत्र पुद्गलद्रव्याणां धातुमूलजीवात्मकानामुत्पत्तिस्थितिलयसम्बन्धिनः स्वरूपधर्मा निरूप्यन्ते। सैषा वैज्ञानिकानां त्रयी विद्या सर्वविद्या भवति।

तत्रेदमवधेयं यद्वैदिककाले भारतीयतत्त्वचिन्तनस्य बीजारोपणं जातमासीत्। विविधप्राकृतिक-शक्तीनामाराधना-निमित्तम् ऋषयो मन्त्रेषु यदुद्गारं व्यक्तीकृतवन्तस्तेषु दार्शनिकं तथ्यमासीत्। कालान्तरे एभ्य एव वेदमन्त्रेभ्यो विभिन्नानां दार्शनिकसम्प्रदायानामुदयोऽभवत्। यद्यपि वैदिकमन्त्रेषु निहितानां

तात्त्विक- विचाराणां पूर्णता उपनिषत्स्वासीत्। तस्मादुपनिषदो वेदस्यान्तरूपतया **वेदान्ता** इत्युच्यन्ते। तत एव साम्प्रतिकी भारतीयतत्त्वचिन्तनस्य सुदृढा परम्परा सुस्थापिताऽभवत्। तस्या एव परम्पराया नाम दर्शनशास्त्रमिति। तेनेदं स्फुटं यद्भारतीयदर्शनस्य मूलस्रोतांसि वेदा एव सन्ति। प्रसङ्गानुसारमत्र दर्शनशब्दो विविच्यते-

**दर्शनशब्दार्थः**

दर्शनशब्दः पाणिनीयव्याकरणस्य **दृश्** धातोः **ल्युट्** प्रत्यये कृते सति निष्पद्यते। यस्यानेकेऽर्थाः- दर्शनम्, निरीक्षणम्, ज्ञानम्, अवगमनम्, प्रत्यक्षीकरणम्, मेलनादयो भवन्ति। मुख्यार्थो दर्शनमिति। व्युत्पत्तिदृष्ट्या- **दृश्यतेऽनेनेति दर्शनम्** इत्यर्थोऽवगम्यते। दर्शनमिति पदमत्र पर्यालोचनस्य विश्लेषणस्य च द्योतकमस्ति, यस्य प्रयोगस्तत्त्वचिन्तनात्मके विशिष्टेऽर्थे क्रियते। तेनेदं स्पष्टं भवति यद्येन शास्त्रेण विश्वस्य मूलतत्त्वस्य पर्यालोचनं, वस्तुनः सत्यभूतस्य तात्त्विकस्वरूपस्य च विवेचनं भवेत् तच्छास्त्रं दर्शनमित्युच्यते। भारतीयदर्शने धर्मस्य दर्शनस्य (अध्यात्मविषयस्य) च घनिष्ठः सम्बन्धः सुस्थापितो वर्त्तते। भारतीयजीवनस्य आध्यात्मिकं प्रयोजनमेव, तस्माद्दर्शनोपरि धर्मस्य रागो व्यवस्थापितो वर्त्तते।

प्राचीनकालादेव भारतीयदर्शनस्य द्वौ विभागौ स्तः- आस्तिकदर्शनं नास्तिकदर्शनञ्च। तत्र मीमांसा-वेदान्त-सांख्य-योग-न्याय-वैशेषिकस्य च गणना खल्वास्तिकदर्शने भवति। एतानि षड्दर्शनानीत्युच्यन्ते। आस्तिक-शब्दस्यार्थो नेश्वरवादीति क्रियते अपितु यानि दर्शनानि वेदेषु श्रद्धामास्थां वा निदधति तान्यास्तिकान्युक्तानि। यतस्तु षडास्तिकदर्शनेष्वपि न सर्वाण्यपीश्वरं मन्यन्ते, तथाप्येतानि वेदेषु श्रद्धां दधानत्वादास्तिकान्युच्यन्ते। नास्तिकदर्षनेषु बौद्धजैनचार्वाकादीनि परिगणितानि। यत एतानि वेदान् नाङ्गीकुर्वन्ति तस्मान्नास्तिकदर्शनान्युक्तानि।

भारतीयदर्शनस्य प्राचीनतमसिद्धान्तबोधकत्वात् सांख्यदर्शनं सर्वेष्वपि दर्शनशास्त्रेषु वरीवर्तते। अस्य सिद्धान्तस्य प्रवर्त्तकः कपिलो मुनिर्मन्यते। सांख्यविचारधारायाः मूलग्रन्थः कपिलकृतः **तत्त्वसमासः** अत्यन्तसंक्षिप्तः सारगर्भितश्चास्ति। सांख्यदर्शनस्य सिद्धान्तान् ततोऽप्यधिकं स्पष्टीकर्तुं कपिलमुनिना **सांख्यसूत्रम्** इति नाम्नः विस्तृतो ग्रन्थः प्रणीतः। तत्पश्चात् ईश्वरकृष्णेन **सांख्यकारिका** नाम्नी अत्यन्तप्रामाणिका लोकप्रिया च ग्रन्थरचना

कृता, यस्योपरि गौडपादस्य **सांख्यकारिकाभाष्यम्,** वृद्धवाचस्पतिमिश्रस्य च **सांख्यतत्त्वकौमुदी** नाम्नी व्याख्या समुपलब्धाऽस्ति।

सांख्यशब्दस्य नामकरणविषये विदुषामिदमस्ति सम्मतं यत्संख्यया सम्बद्धत्वादस्य शास्त्रस्य सांख्यदर्शनमिति संज्ञाऽभवत्। दर्शनेऽस्मिन् तत्त्वानां संख्या निर्धारिताऽस्ति। अतः संख्यात्मकमूलसिद्धान्तप्रतिपादकत्वादस्य सांख्येति संज्ञा जाता। द्वैतवादिदर्शनमिदमुच्यते, यत इदं प्रकृतिपुरुषयोः द्वयोस्तत्त्वयोः मौलिकतां साधयति। दर्शनमिदमीश्वरस्यास्तित्वं नाङ्गीकरोति।

सांख्ययोगयोः दर्शनयोरैक्यमस्तीत्यपि विज्ञायते। योगदर्शनेऽपि प्रकृतिपुरुषयोः संयोगेन सृष्टिर्भवतीत्युक्तम्। किन्तु तत्र तयोर्वियोगः स्वभावतो न भूत्वा केनापि सर्वशक्तिमता पुरुषेण भवतीत्येष एव सिद्धान्तः सांख्य-दर्शनाद्भिन्नो वर्तते। तेनेदं स्फुटं यत्सांख्यदर्शनं निरीश्वरवादी योगदर्शनञ्चेश्वर-वादीति। अन्ये सिद्धान्ताः समाना एव। तस्मादत्र सांख्ययोगतत्त्वविमर्श इति विषयः समुपस्थापितः।

### सांख्यतत्त्वमीमांसा

सांख्यदर्शने पञ्चविंशतितत्त्वानां मीमांसा कृताऽस्ति। तानि च तत्त्वानि मूलरूपेण चत्वारि- प्रकृतिः, विकृतिः, उभयात्मिका, न प्रकृतिर्न विकृतिरिति। अन्ये प्रभेदास्तेषामेव चतुर्णां विकारासते यथा-

**प्रकृतिः**- प्रकृतेरपरं नाम प्रधानः, अव्यक्तः, प्रकृतिश्च। संख्यायामेका एव।

**विकृतिः**- पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनः, पञ्चमहाभूतानि चाहत्य षोडशसंख्यकेयं विकृतिः।

**प्रकृतिविकृतिः ( उभयात्मिका )**- महत्तत्त्वम्, अहङ्कारः, पञ्चतन्मात्राः (शब्द-स्पर्श-रूप-रस- गन्धश्च) चाहत्य सप्तसंख्यका।

**न प्रकृतिर्न विकृतिः**- पुरुषः एकः।

एषां विवरणं सांख्यकारिकायामेवं मिलति- **मूलप्रकृतिरविकृति-र्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।**[१]

सांख्यदर्शनस्य महत्त्वपूर्णः सिद्धान्तः सत्कार्यवादोऽस्ति। सिद्धान्तोऽय-मस्य दर्शनस्य मूलाधारो मन्यते। अत्रेदं प्रतिपादितं यत्कार्यस्य सत्ता कारणे तिष्ठति। तत्र न्यायवैशेषिकदर्शनप्रमुखानाम् असत्कार्यवादिनां मतस्य खण्डनं

कृत्वा सत्कार्यवादस्य स्थापनं सांख्यदर्शनं करोति। वेदेष्वपि–

**हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।**[2]
**पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम्।**[3]
**प्रजापतिरकामयत– भूयान्त्स्यां प्रजायेय।**[4]

उपर्युक्तेषु वेदमन्त्रेषु परमात्मनः कारणत्वं जगतश्च कार्यत्वमुपपादितम्। न कारणं विना कार्योत्पत्तिस्तेनैव बलेन कारणरूपं परमात्मानं विना जगत्सृष्टिरूपं कार्यं न सम्भवति। अतो कार्यं बीजरूपेण कारणे विद्यमानं भवत्येव। सृष्टिचक्रप्रतिपादनक्रमे ऋग्वेदस्य प्रधाने पुरुषसूक्ते यथा–

**तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे।**
**छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।।**[5]

इत्यत्र सर्वहुन्नामकाद्यज्ञात् ऋग्यजुस्साम्नामुत्पत्तिर्वर्णिता। अत्र प्रश्नोत्पद्यते यदृग्यजुस्साम्नामुत्पत्तौ कारणं किम्? तत्रोच्यते सर्वहुन्नामको यज्ञ इति। स च यज्ञः केनानुष्ठितः? तदुच्यते– पुरुषेणेति। अत इदं सुस्पष्टं यत्पुरुषः प्रधानं कारणं येन प्रकृतिरूपो यज्ञोऽनुष्ठितः। तयोः प्रकृतिपुरुषयोः परस्परानुष्ठानेन ऋग्यजुस्साम्नामुत्पत्तिः जगदुत्पत्तिश्च भवति। अतः सांख्यशास्त्रोक्तोऽयं सिद्धान्तो वैदिकसिद्धान्तपरिपोषक एवेति सिद्ध्यति।

शतपथब्राह्मणे– **योषा वा आपो वृषाऽग्निः। मिथुनमेवैतत्प्रजननं क्रियते**[6] इत्युक्तम्। अत्रापां स्त्रीत्वम् अग्नेश्च पुंस्त्वमुक्तम्। उभयोर्मिथः सम्बन्धेन प्रजननं भवति तदा सृष्टिर्जायते। एतदेव तथ्यमुररीकृत्य उपनिषद्येवमुक्तम्– **अग्नीषोमात्मकञ्जगत्**[7] इति। तेनापीदमेव स्फुटं यदग्नीषोमाभ्यां जगतः सृष्टिर्भवतीति। गोपथब्राह्मणे शतपथब्राह्मणे च– **अग्निरेव ब्रह्म**[8] तथा च– **पुरुषो वाऽग्निः**[9] , **योषा वाऽग्निः**[10] इति चोक्तम्। एभिः श्रुतिवाक्यैर्ब्रह्मणोऽग्निरूपत्वं प्रकृतिरूपायाः योषाया अपि अग्निरूपत्वं प्रतिपादितम्। तच्च ब्रह्म प्रजोत्पादनेच्छया तपस्तप्त्वा सर्वप्रथमं सदसद्रूपं ब्रह्माणमुत्पाद्य जगदिदमसृजत्। तदुक्तम्मनुना–

**यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम्।**
**तद्विसृष्टः स पुरुषो लोके ब्रह्मेति गीयते।।**[11]

तथा– **अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्वरम्।**
**पतीन् प्रजानामसृजं महर्षीनादितो दश।।**

**मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्।**
**प्रचेतसं वसिष्ठञ्च भृगुं नारदमेव च॥**[१२]
**एवमेतैरिदं सर्वं मन्नियोगान्महात्मभिः।**
**यथा कर्मतपोयोगात् सृष्टं स्थावरजङ्गमम्॥**[१३]

उपर्युक्तेन विवरणेनेदं सिद्धं यद्यथा वेदेषु वैदिकसाहित्येषु च प्रकृतिपुरुषाभ्यां कामाग्निरूपाभ्यां विश्वप्रपञ्चसृष्टिर्व्याख्याता तथैव सांख्यदर्शनेऽपि प्रकृतिपुरुषयोः संयोगेन सृष्टिर्जातेति प्रोकतम्। **पुरुषो वाऽग्निः, योषा वाऽग्निः** इत्येताभ्यां श्रुतिवाक्याभ्यामिदमपि स्फुटं यद्वेदेषु प्रजापतिरेव कार्यकारणोभयरूपः परमत्र सांख्ये प्रकृतिपुरुषौ कार्यकारणरूपावुक्तौ। तथापि कारणं विना कार्यसिद्धेरभावात् कार्यापेक्षया कारणं महत्त्वपूर्णम्। तस्मात्कारणरूपस्य ब्रह्मणो विवरणं वेदेषु विस्तारेणोपलभ्यते। सांख्यदर्शने यथा पञ्चविंशतितत्त्वानां निरूपणं कृतं तच्च निरूपणं वैदिकसाहित्यमनुसृत्यैव वर्तते। तद्यथा–

जैमिनीयब्राह्मणे– **दश वै पुरुषस्य हस्त्या अङ्गुलयो, दशपद्याश्चत्वारि प्राङ्गाण्यात्मा पञ्चविंशष्षडिमानि पर्वाणि षडिमानि षडिमानि षडिमान्यात्मा पञ्चविंशो, परिशवो द्वादशेमा आत्मैव पञ्चविंशः।**[१४]

शांखायनारण्यके– **चतुर्विंशतिर्वै संवत्सरस्यार्धमासाः संवत्सरस्यैवाप्त्या अथो प्रजापतिर्वै संवत्सरः पञ्चविंशः।**[१५]

मैत्रायण्याम्– **पञ्चविंशेन वै स्तोमेन मनुः प्रजा असृजत्।**[१६]

ऐतरेयारण्यके– **पञ्चविंशोऽयं पुरुषो दशहस्त्या अङ्गुलयो, दश पाद्या, द्वा उरू, द्वौ बाहू, आत्मैव पञ्चविंशः**[१७] इति।

उपर्युक्तेषु ब्राह्मणारण्यकवाक्येषु पञ्चविंशतितत्त्वानां निरूपणं विहितं तदेव तथ्यमादाय सांख्यप्रवर्तकैः कपिलमुनिभिः पञ्चविंशतितत्त्वानि परिष्कृच्छोधसरण्या विवेचितानि। अतो वेदेषु सांख्ययोग्यतत्त्वानां पूर्णं विवेचनमुपलभ्यते इति कथनं युक्तियुक्तमेव।

इत्थमन्यान्यपि सांख्ययोगदर्शनतत्त्वानि तत्र तत्र प्रसङ्गानुसारं वेदेषु वैदिकसाहित्येषु च व्याख्यातानि सन्ति। नात्र लघुनिबन्धे सर्वेषां यथावन्निरूपणं कर्तुं शक्यते। अतो सूक्ष्मेक्षिकया सृष्टिविषयकं किञ्चिन्निदर्शनं प्रस्तूय स्वीयां लेखनीमवसाययामि।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. संख्यकारिकायाम्- 3
2. शु.य.सं.-23/1
3. ऋ.सं.- 10/90/2
4. श.प.ब्रा.- 6/1/1/8
5. ऋ.सं.- 10/90/7
6. श.प.ब्रा.- 1/1/1/18-20
7. बृ.जा.उप.-2/4
8. गोपथे- 1/5/15 ; श.प.ब्रा.- 10/4/1/5
9. बृहदा. उप.- 6/2/12
10. बृहदा. उप.- 6/2/13
11. मनुस्मृतौ- 1/11
12. मनुस्मृतौ- 1/34-35
13. मनुस्मृतौ- 1/41
14. जै.ब्रा.-2/354; 414
15. शां.आर.-
16. मैत्रायण्याम्- 3/10/3
17. ऐ.आर.- 1/1/2

## वेदेषु वर्णितानां मानवजीवनसम्बद्धानां मूल्यशिक्षापरकसूत्राणां विमर्शः

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥**[१]

विश्वस्याद्यो ग्रन्थः सर्वविधज्ञानविज्ञानात्मकानां मानवजीवनोद्देश्य-भूतानां रहस्यात्मकानां सूत्राणामुपदेशकोऽयं वेदः परमात्मनो द्वितीयरूपेणा-स्माकमृषिभि- रवलोकितोऽस्ति। वेदादेव समस्तजागतिकप्रपञ्चस्योत्पत्तिर्जातेति शास्त्रेष्वस्माभिरधीयते। तदुक्तमपि- **सर्वं वेदात्प्रसिद्ध्यति**[२] इति। एतादृशेऽस्मिन् गौरवशालिमहिमान्विते वेदे विश्वस्य कश्चिदपि तादृशो विषयो नास्ति यस्य वर्णनं न विद्यत इति। तदनु मानवजीवनसम्बद्धानां मूल्यशिक्षापरकसूत्राणां वर्णनन्त्वत्र पदे पदे समवलोक्यते।

विश्वस्मिन् विश्वे चतुरशीतिलक्षसंख्यकानां जीवानां योनयः सन्ति। तेषु मानवस्य श्रेष्ठत्वमस्तीत्यपि सर्वे शास्त्रविदो जानन्त्येव। यतो हि जीवानां सृष्टावग्नीषोमयोरुभयोस्तत्त्वयोः प्राधान्येनोपयोगः परमात्मना विहितस्तस्मादुक्तं बृहज्जाबालोपनिषदि- **अग्नीषोमात्मकञ्जगत्**[३] इति। तत्रेदं विचार्यते यत्सौरः प्राणोऽग्निना सह सम्बद्धः पार्थिवश्च प्राणः सोमेन सह सम्बद्धोऽस्ति। सोम एव सौर प्राणस्याधारो वर्तते **सोमेनादित्या बलिनः सोमेन पृथिवी मही**[४] इत्यनेन श्रौतवाक्यबलेनेतत्सिद्धं भवति। सर्वेऽपि जीवाः पृथिव्यामेव जायन्ते, पृथिव्यामुत्पन्नानां जीवानां पोषणं सौरप्राणेन भवति। अत एवोक्तं वेदे- **सूर्य आत्मा जगतस्तस्थुषश्च**[५] इति। अतो जीवेषु अग्नीषोमयोरुभयोस्तत्त्वयोः सम्मिश्रणन्तु स्वाभाविकमेव। तथापि केचन जीवाः पार्थिवप्राणबहुलाः केचन सौरप्राणबहुलाश्च भवन्ति। येषु जीवेषु यस्य प्राणस्याधिक्यं भवति तेषां तेन प्राणेन सहाधिकः सम्बन्धो भवति। यथा पृथिव्यामन्तो निवसतां जीवानां मध्ये केचन कृमयो जीवास्तादृशा येषां मुखं सदैव पृथिव्या सह संलग्नं भवति, अर्थात् पृथिवीसकाशादूर्ध्वं स्वीयं मुखं ते ईषदपि नोत्थापयितुं प्रभवन्ति। केषाञ्चन जीवानां मुखं किञ्चिदुपर्युत्तिष्ठति सरीसृपवर्गे गण्यमाणानां सर्पादीनामिति। केचन जीवाः पादयुक्ताः भवन्ति ते स्वपादानामुपरि

शरीरमुत्थापयन्ति परं मुखमूर्ध्वं न कर्तुं शक्नुवन्ति गवाश्वादयः। केचन पक्षिणः स्वपक्षसाहाय्येनाकाशे भ्रमन्ति। केचन वृक्षाः पादमुपरि ऊर्ध्वमुखास्तिष्ठन्ति परमेस्मात् स्थानादन्यत्र गन्तुं न प्रभवन्ति। मानवास्तु स्वपादमुपर्यास्थाय गमनागमनादिकं कुर्वन्त्योऽप्युर्ध्वमुखा एव सर्वदा तिष्ठन्ति। यस्मिन् जीवे सौरप्राणस्य यावदाधिक्यं भवति स तावदेव मुखमुपर्युत्थापने समर्थो भवति। तेनेदं फलितं यत्सर्वजीवेषु मानवः सौरप्राणबहुलोऽस्तीत्यत्र नास्ति कस्यापि लेशतोऽपि सन्देहः।

एवमिदं जगत् नानाविधैर्जीवैस्संयुक्तमस्ति तेष्वधिकसौरप्राण-युक्तत्वान्मानवो विशिष्टस्तस्मात् सर्वाण्यपि शास्त्राणि मनुष्याणां कृते प्रवृत्तानि सन्ति। मनुष्यशब्दस्य निर्वचनं कुर्वता भगवता यास्केनोक्तं- **मत्वा कर्माणि सीव्यन्ति। मनस्यमानेन सृष्टाः। मनस्यतिः पुनर्मनस्वीभावे। मनोरपत्यं मनुषो वेति।**[६] अर्थाद्यो हि जीवः सम्यज्ज्ञात्वा कर्माण्याचरति स एव मनुष्य इति शास्त्रकाराणामादेशः। न तथा ज्ञात्वा कर्माण्याचरितुमन्ये जीवाः प्रभवन्तीति स्फुटमेव। अतो मनोरपत्यं मानव इत्युक्तं यास्केन। सर्वेऽपि मनुष्या मनुर्भवन्त्विति प्रार्थना ऋग्वेदादिषु विहिताऽस्ति। यथा- **मनुर्भव जनया दैव्यं जनम्**[७] इति। अत्र मनुर्भवेति पदेन श्लेषालङ्कारविधिना द्विविधोऽर्थो घटते। मत्वा कर्माचरणं कुर्वित्येकोऽर्थः। मनुना यदुपदिष्टं तदनुपालयत्वित्यपरोऽर्थः। अर्थद्वयमप्यत्र सम्यग्घटते। यद्यन्मनुरवदत्तन्मानवाय भेषजमेवास्ति। यथा हि रुग्णो जनः भेषजसेवनेन स्वस्थो भवति तथैव मनोरुपदेशसेवनेन सम्यङ्मानवो भवतीति स्पष्टं भवति। तदुक्तमपि- **यद्वै किञ्च मनुरवदत्तद्भेषजम्**[८] **, मनुर्वै यत्किञ्चावदत्तद् भेषज्यायै इति च।**[९]

मानवजीवनसम्बद्धमूल्यशिक्षोपदेशार्थमत्र मनोः शासनात्मके ग्रन्थे मनुस्मृतौ धर्मशब्दस्य प्रयोगो दृश्यते। यदुचितं मूल्यात्मकं कर्त्तव्यं तद्धर्मः, यदनुचितं मूल्यरहितं कर्त्तव्यं तदधर्म इति। अतो मनोरभिप्रायं ज्ञात्वा मूल्यशिक्षायुक्तं जीवनं मानवैर्जीवनीयमिति। यतो **मानव्यो हि प्रजाः**[१०] इति ऋग्वेदस्योद्घोषो विद्यते।

वेदेषु वैदिकसाहित्येषु च मानवजीवनसम्बद्धानां मूल्यपरकशिक्षासूत्राणां समावेशो धर्मरूपेण कृतोऽस्ति। धर्मस्यैव रक्षणेन मानवसमाजः संरक्षितो भवतीति पुराणेष्वप्युक्तम्। यथा- **धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।**[११] अत्र पुनश्चिन्त्यते यत्किं धर्म? किमधर्म? इति। तदुक्तमृग्वेदे **केवलाघो**

**भवति केवलादी**[१२] इति। अर्थात् यो हि मानवः केवलं स्वोदरपूर्त्तये सर्वमपि कर्मव्यापारं करोति सः केवलं पापमेव सञ्चयति। अस्य तात्पर्यमिदमस्ति यत् सामाजिकीं व्यवस्थामनुपालयन् राष्ट्ररक्षणेन सह सर्वेषां मानवानां हितचिन्तनपुरस्सरं स्वाश्रितानामुदरं पूरयन् यः स्वोदरं प्रपूरयति सः धर्मिष्ठो भवति। तेनैव मूल्यस्य रक्षणं कृतमिति मन्तुं शक्यते। परेषामनुपकारं कृत्वा यः स्वोदरपूर्त्तये कर्म करोति सः पापी भवति। तस्मादुक्तं भगवता व्यासेन– **परोपकारः पुण्याय पापाय परपीडनम्**[१३] इति।

मानवजीवनसम्बन्धिमूल्यशिक्षाया एकं नैसर्गिकं सूत्रम् ईशावास्योपनिषदः प्रथमे मन्त्रे दृश्यते यथा– **तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्**[१४] इति। अत्र पूर्वपदमस्ति **तेन त्यक्तेन भुञ्जीथा** इति। अस्य तात्पर्यमिदमस्ति यत् त्यागभावेन वस्तूनामुपयोगः करणीयो न कस्यापि स्वत्वसंयुक्तं धनं बलात् स्वीकरणीयमिति। उदाहरणार्थमिह वृक्षात्फलग्रहणविषयमुपस्थाप्यते। यदा वृक्षे फलानि पक्वानि भवन्ति तदानीं वृक्षस्तानि पक्वानि फलानि स्वयमेवोत्सर्जयति। यदा वृक्षस्य वृन्तात् पृथग्भूत्वा पक्वानि फलानि स्वयमेव भूमौ निपतितानि भवन्ति तानि फलानि वृक्षत्यक्तानीति मत्वा अस्माभिर्गृहीतव्यानि। यतस्तानि स्वत्वनिवृत्तिपूर्वकं वृक्षेण त्यक्तानि, तद्ग्रहणं त्यागभावेनोपभोगरूपं भवति। न दण्डपाषाणादिप्रहारैर्वृक्षात्फलानि बलात् त्रोटयित्वा स्वीकर्त्तव्यानीति।

एवमेव समाजे यस्मिन् द्रव्ये कस्यापि स्वत्वं स्याच्चेत् तद्द्रव्यं बलान्न गृहीतव्यमपितु स्वत्वनिवृत्तिपूर्वकं त्यक्तमेव द्रव्यमन्यैर्गृहीतव्य-मित्युपदेशः। एतदर्थमस्माकं धार्मिकानुष्ठानेषु यदा कश्चिद्यजमानः स्वर्गस्थ-देवेभ्यो हविर्दानं भूर्देवेभ्यो ब्राह्मणेभ्यश्च गोदानं भूदानं वस्त्रदानं दक्षिणादानादिकं करोति तदानीं दानविधिमनुष्ठाय **इदमग्नये न मम, इदं ब्राह्मणाय न मम** इत्यादिकं त्यागांशपदमुक्त्वा स्वत्वनिवृत्तिपूर्वकं दानं करोति। त्यागांशवाक्योच्चारणेनेदं स्पष्टं भवति यद्यजमानेन तद्धनं त्यक्तमिदानीं यजमानत्यक्तं धनं ब्राह्मणादिभिः स्वीकर्त्तव्यमिति श्रौतादेशः। अनेनैव विधिना यदि समाजे सर्वे जनाः स्वत्वनिवृत्तिविषयं ज्ञात्वा धनस्योपभोगं कुर्वन्ति चेन्मानवीयमूल्यरक्षणं स्वयमेव भवति।

अद्यत्वे चौराणां कदाचारिणां स्वेच्छाचारिणां पुरुषाणां स्त्रीणाञ्चा-

धिक्यं जातमस्ति। अत एवैतद्वेदोपदिष्टस्य मूल्यस्य विनाशो जातः। अस्माकं राष्ट्रमेभिर्दुर्गुणशीलैर्मानवैर्विहीनं स्यादिति कामना वेदेषु कृताऽस्ति। यथा- **न मे स्तेनो जनपदे न कदर्यो न मद्यपो नानाहिताग्निर्नाविद्वान् न स्वैरी स्वैरिणी कुतः**[१५] इति।

सर्वेऽपि मानवाः सदा कर्मपरायणाः भवन्त्वित्येतादृशी शिक्षा वैदिकैर्ऋषिभिः प्रदत्ताऽस्ति। यथोक्तं वेदे- **कर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः**[१६] इति। **शतायुर्वै पुरुषः**[१७] इति श्रौतवचनान्मनुष्याणां शतवर्षात्मको जीवनकाल उक्तः। स यावज्जीवनं कर्माणि कर्वन्नेव जीवितुमभिलषेत्। अकर्मण्यो हि जनो समाजस्य शत्रुर्भवतीत्युक्तमृग्वेदे- **अकर्मा दस्युरभि नो अमन्तुरन्यव्रतो अमानुषः।**[१८] अत्र दस्युपदं समाजस्य शत्रुमभिलक्ष्य प्रयुक्तमस्ति। तेन चतुर्विधाः समाजस्य शत्रवोऽत्र प्रोक्तास्ते यथा- (1) अकर्मा, (2) अमनतुः, (3) अन्यव्रतः, (4) अमानुषश्च। अकर्मापदम् अकर्मण्याय कर्महीनाय वा जनाय प्रयुक्तम्, अमन्तवस्त्वज्ञानिनः, अन्यव्रतः यज्ञादिकं श्रेष्ठं कर्म विहायान्यस्मिन् कुकर्मणि प्रवृत्तः, अमानुषो मानवीयाचार-विचारव्यवहारादिभिर्विरहितश्चोक्तः। एते चत्वारः समाजस्य शत्रवः सन्ति। अत एतादृशा जना अस्माकं राष्ट्रे न स्युर्यतो ह्येते स्वीयैः कुकर्माचरणादि-भिर्मानवमूल्यं गर्ते निपातयन्ति।

ऋग्वेदस्य प्रसिद्धे अक्षसूक्ते अक्षक्रीडायां प्रवृत्ताय जनाय कितवशब्दस्य प्रयोगोऽस्ति। तत्रैकस्मिन् मन्त्रे उक्तमस्ति यत्- **अक्षैर्मा दीव्य कृषिमित् कृषस्व**[१९] इति। अर्थात् द्यूतक्रीडां मा कुरु कृषिकर्मणि प्रवृत्तो भव इति। यतस्तु कितवो यदा द्यूतक्रीडायां पराजिताः भवन्ति तदानीं तेषां का स्थितिर्भवतीति प्रतिपादयता कवषेण ऐलूषेण ऋषिणा प्रोक्तं यत् **द्वेष्टिश्वश्रूरप जाया रुणद्धि न नाथितो विन्दते मर्डितारम्।**[२०] **पिता माता भ्रातर एनमाहुर्न जानीमो नयता बद्धमेतम्।**[२१] अर्थात् तस्य श्वश्रूः जायाया माता तेन सह द्वेषं करोति, जाया चापि दुःखिता भवति, याचनां कृत्वाऽपि न कमपि सुखयितुं जनमाप्नोति। तस्य पिता भ्राता माता च विजिताय कितवायेवं कथयन्ति यत् एनं वयं न जानीमः कोऽयमिति? अत एनं रज्ज्वा बद्ध्वा इतो नयत इति। अनेनेदं स्फुटं भवति यत् द्यूतसेविनो मानवमूल्यस्य रक्षां न कर्तुं शक्नुवन्ति, अतो द्यूतक्रीडनं निषिद्धमस्ति। कृषिकर्मणा मानवमूल्यस्य सर्वविधं संरक्षणं भवति तस्मात् कृषिकर्मणोऽत्र प्रशंसा

विहिताऽस्ति। अस्माकं देशस्य जनाः कृषिकर्मणि प्रवृत्ताः सन्तो स्वदेशं विश्वगुरुत्वेन विभूषितवन्तः। तस्दस्माभिर्पठ्यते यत् भारतदेशः कृषि-प्रधानदेशोऽस्तीति।

मानवमूल्यस्य संरक्षणाय सच्चरित्राणां नागरिकाणां निर्माणमावश्यकं भवति तदर्थञ्च सुप्रशिक्षितानां सच्चरित्राणामाचार्याणामावश्यकता भवति। आचार्यपदस्य निर्वचनं कुर्वता भगवता यास्केनोक्तं- **आचारं ग्राहयत्या-चिनोत्यर्थान्। आचिनोति बुद्धिमिति वा।**[२२] यो हि मानवः आचारस्य ग्रहणं करोति, अर्थानां चयनं करोति, बुद्धिमपि चिनोति स आचार्य इत्युच्यते। तत्र सर्वप्रथमं आचारस्य ग्राहकत्वं लक्षणं प्रस्तुतमस्ति। **आचारः परमो धर्मः।**[२३] **आचारः प्रथमो धर्मः।**[२४] इत्यादय उद्घोषा आचारस्य श्रेष्ठ-धर्मरूपेण वर्णनं प्रस्तुवन्ति। यो हि जनो भवत्याचारहीनस्तं वेदमपि पावयितुं समर्थो न भवति। तदुक्तमपि- **आचारहीनं न पुनन्ति वेदा**[२५] इति।

सदाचारनियमानां परिपालनं धर्मेण सह योजयित्वाऽस्माकं पूर्वजैस्त-द्रक्षणाय महानुद्योगो विहितस्तस्यैवैतत्फलं यदद्यास्मिन् विकरालभाल-कलिकालेऽपि भौतिकवादिनां नानाविधमुत्पातादिकं प्रताडनादिकं सोढ्वाऽपि धर्मकर्मणि स्वीयां श्रद्धामादधाना जनाः सन्त्यवशिष्टाः। धार्मिकाचार्याश्चापि स्वधर्माननुपालयन्तो मानवेभ्यो मूल्यसंरक्षणायोचितं मार्गदर्शनं कुर्वन्तीति।

भारतभुवावद्यापि धर्मिष्ठाः वेदोक्तानां मानवमूल्यपरकशिक्षासिद्धान्तानां सूत्राणाञ्च संरक्षणे कटिबद्धा दृश्यन्ते। अद्यापि त्रिकालसन्ध्यावन्दनकर्तारो जना अत्र वसन्ति। नित्यसन्ध्यातर्पणादिमहायज्ञानामनुष्ठातारोऽपि बहवो वर्तन्ते। तेषामेव सदाचारपालनकारणादियं भूमिरद्यापि संरक्षिता सम्पोषिता च भवति।

विदन्त्येव भवन्तो यदत्र सूर्यप्रकाशोऽपि भवति रात्रेरन्धकारोऽपि तथैव व्याप्य तिष्ठति तस्माद्भवति कदाचिच्छैथिल्यं धर्मकर्मोभयत्रेति मत्वा पक्षद्वयस्याप्युपस्थितिः स्वीक्रियत एव। कदाचित्प्रकाशस्याधिक्यं कदाचित्तमसो बाहुल्यमिति चोभयमपि भवत्येव। परं तमसो निवारणाय प्रकाशस्योद्यमः सर्वैरेव मानवैः कर्तव्य एव। यतस्तु **भद्रवाच्याय प्रेषितो मानुष**[२६] इति वेदवचनादस्माभिस्सदा कल्याणकारिशब्दानामेव प्रयोगः करणीयः। **आर्त्यै जनवादिनम्**[२७] इति वेदवचनाज्जनवादो दुःखप्रदो भवति तस्तात् कस्यापि निन्दा, अत्रत्या वार्ता यत्र तत्रान्यत्र वा भाषणादिकं कर्म न कर्तव्यमिति।

**निष्कर्षः**- निष्कर्षरूपेणायं वक्तुं शक्यते यत् मानवजीवनसम्बद्धानां

मूल्यपरकशिक्षासूत्राणां वेदेषु भूयिष्ठं वर्णनमस्ति। सर्वेषामपि सूत्राणामत्राति-लघुनिबन्धे समुपस्थापनमसम्भवमेवास्ति। अतो निदर्शनार्थमिह कतिपयमन्त्रांशाः समुद्धृताः सन्ति। तेषामाधारेणेदं स्फुटं भवति यद्वैदिकमार्गाश्रयणेनैव मूल्यस्य रक्षणं भवितुमर्हति। **नान्यः पन्था विद्यतेऽयनाय**[२८] इति मन्त्रबलादिदं स्पष्टमेवास्ति यद्वेदमनधीत्यान्यत्र श्रमेण मूल्यशिक्षणं तत्संरक्षणञ्च नैव सम्भवमस्ति।

अद्यत्वे या शिक्षा व्यवस्था सम्पूर्णे विश्वे प्रचलिता वर्तते तस्यां मानवं मानवो भवितुं न कश्चिदुद्योगो वर्तते। वर्त्तमानशिक्षाप्रणाल्या मानवं धनोपार्जनयन्त्रं कर्तुमेव यत्नो विधीयते। परमस्माकं वैदिकी शिक्षा सर्वप्रथमं मानवं सच्चरित्रं, सदाचारयुक्तं, सन्मार्गगामिनं, सत्यसङ्कल्पसंयुक्तं, सद्विचाराहारव्यवहारादिभिः परिपूर्णञ्च करोति। तदुक्तमपि मनुना-

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**[२९]

सच्चरित्रा मानवाः पूर्वजानामग्रजानां पितृपितामहादीनां परम्परया सुशिक्षिता मौलिकीं मूल्यशिक्षामवाप्य सन्मानवा भवन्ति। एतादृशा एव मानवाः परमपुरुषार्थं मोक्षाख्यं प्राप्तुं समर्था भवन्तीति।

मन्ये, एतादृशीमेव मूल्यपरकां शिक्षाव्यवस्थामवलोक्य प्रसिद्ध-शिक्षाशास्त्रविदा कनिंघममहोदयेन पाठ्यक्रमविषये एवमुक्तम्- It (Curriculam) is a tool in the hand of the artist (Teacher) to mould his material (Pupil) according to his ideal (Objects) in his studio (School). अर्थात् सच्चरित्रस्याध्यापकस्य हस्ते पाठ्यक्रमरूपं तादृशं साधनं विद्यते येन साहाय्येन सः स्वीयां पाठशालायां स्थित्वा स्वलक्ष्यानुसारं स्वीयं शिष्यं नूतनं रूपं दातुं समर्थो भवति।

परं चिन्त्यताम्, अद्यत्वे स्वतन्त्रभारते शिक्षार्थिनस्तु परमस्वतन्त्रास्ते पाठकान् गरूनेव कदाचिद्दण्डयितुं भर्त्सयितुमपमानयितुञ्चोद्यता भवन्ति। विद्यार्थिनामौद्धत्यं तावदुत्कृष्टं पदमगाद्येन ते सर्वामपि मर्यादां विहाय क्रूरतमकर्माचरणे निर्भयेन प्रवृत्ता भवन्ति। येन केनोपायेन केवलं परीक्षायामुत्तीर्णतामेव वाञ्छन्ति। शास्त्रशिक्षणं मूल्यशिक्षणादिकञ्चाद्यतनीय शिक्षाप्रणाल्यां स्वप्नवदेव सति विद्यमानेऽप्यग्राह्यमभवत्। पाश्चात्यपद्धतीनां तावान् प्रभावा विद्यन्ते यान् विहाय प्राचीनशिक्षापद्धतेर्यत्र मानवमूल्यशिक्षण-

स्याधिक्यमस्ति तस्याः कल्पनाऽपि नैव कर्तुं शक्यते।

अद्यापि गुरोः सन्निधौ स्थित्वा गुरुकुलेष्वधीयमानेषु शिक्षार्थिषु मानवमूल्यमवलोकयितुं शक्यते। परं तादृशानां गुरुकुलानां संख्यैवातिन्यूना विद्यते। तत्र छात्रसंख्यापि न्यूनैव, न तत्र राज्याश्रयो वर्तते, न चाधुनिक-चाकचिक्यसहितभौतिकसुखसुविधाश्च तत्र वर्तन्ते। अतस्तेषां गुरुकुलानां दयनीयां दशामवलोक्य न कश्चिन्मानवः स्वं बालकं तत्र प्रेषयितुमिच्छति। यो हि धनहीनः, असहायः, अनाथो दुर्बलश्च स एव तत्र गत्वा पठतीति।

वस्तुतो मूल्यशिक्षा न केवलं शास्त्राध्ययनेनोतवा धनोपार्जनेन लभ्यते, अपितु तादृशं वातावरणनिर्माणं कर्त्तव्यं भवति, यस्यात्र पूणरूपेणाभावो विद्यते। फलतोऽद्य पुत्रो मातरं पितरञ्च गृहाद्बहिर्निष्कासयति तर्हि सम्ब-न्धिनामन्येषाञ्च सामाजिकानांन्तत्र का कथा? मानवमूल्यं तु मानवानां स्वाभाविकी वृत्तिर्भवति। मानवस्यान्तःकरणं यदि शुद्धं भवेच्चेत्तदैव मूल्यं स्थातुं शक्यते। यस्योदाहरणं नीतावेवं प्रदत्तमस्ति-

**न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरात्मनाम्।**
**स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः॥**[३०]

अतोऽस्माभिः मूल्यशिक्षणस्य स्वाभाविकं वातावरणं निर्मातव्यं तेनैवास्माकमात्मनः, परिवारस्य, समाजस्य, जनपदस्य, प्रान्तस्य, राष्ट्रस्य, विश्वस्य च सर्वविधं कल्याणं भवितुमर्हतीत्यलमतिविस्तरेण।

**जयतु संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. ऐ.ब्रा. सायणभाष्ये, उपोद्घाते
2. मनुस्मृतौ- 12.97
3. बृ.जा.उप. 2/4
4. ऋग्वेदे- 10/85/2, अथर्ववेदे-14/1/2
5. शु.य.सं.- 7/42
6. निरुक्ते- 3/2/7
7. ऋग्वेदे- 10/53/6
8. तै.सं.- 2/2/10/2

9. तां.ब्रा.-23/16/17
10. ऋग्वेदे- 10/80/16
11. महाभारते, वनपर्वणि- 313/128, मनुस्मृतौ- 8/15
12. ऋग्वेदे- 10/117/6
13. प्रसिद्धव्यासोक्तिः
14. शु.य.सं.-40/1
15. छान्दोग्योपनिषदि- 5/11/5
16. शु.य.सं.- 40/2
17. ताण्ड्यमहाब्राह्मणे.- 5/6/13
18. ऋग्वेदे- 10/22/8
19. ऋग्वेदे- 10/34/13
20. ऋग्वेदे- 10/34/3
21. ऋग्वेदे- 10/34/4
22. निरुक्ते- 1/2/2
23. देवीभागवते- 11/1/11, मनुस्मृतौ- 1/108
24. देवीभागवते- 11/1/19
25. देवीभागवते- 11/2/1
26. शु.य.सं.- 21/61
27. शु.य.सं.- 30/17
28. शु.य.सं.- 31/18
29. मनुस्मृतौ- 2/20
30. हितोपदेशे, मित्रलाभे- 17 तमः श्लोकः

## वेदेषु वर्णितानां वास्तुविज्ञानसिद्धान्तानां विमर्शः

वस्तुतो वेद इति शब्दश्रवणादृग्यजुस्सामाथर्वसंज्ञकानां शब्दराशिभूतानां चतसृणामपि संहितानां बोधो भवति। यद्यप्यापस्तम्बादिभिर्वैदिकैराचार्यैर्वेदानां द्विविधं स्वरूपं स्वीक्रियते **मन्त्रब्राह्मणयोर्वेदनामधेयम्**[१] इति। तत्र मन्त्रब्राह्मणयोर्लक्षणं प्रस्तूयता महर्षिणा जैमिनिना द्वादशलक्षण्यां पूर्वमीमांसायामुक्तं– **तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते। विधायकं वाक्यं ब्राह्मणम्**[२] इति। **ब्रह्म वै मन्त्रः**[३] इति ब्राह्मणोक्तवचनाद्ब्रह्मवेदयोरैक्यं सिद्ध्यति। अत्र ब्रह्मपदं कर्मबोधकं सद्यज्ञस्यैवोद्बोधकमिति ज्ञायते। तस्माद्यज्ञादीनां साङ्गोपाङ्गानि विधिविधानानि यत्रोक्तानि तानि ब्राह्मणानीति। ब्रह्मपदव्याख्यानावसरे प्राचीनैर्ऋषिभिरेवमुक्तम्–

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्मपरञ्च यत्।**
**शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति।।**[४]

शब्दब्रह्मरूपेणात्र शब्दराशिभूताः मन्त्रब्राह्मणात्मकाः वेदा उक्ताः। परब्रह्मपदेन च सर्वजगत्कारणभूत अनादिनिधनाव्यक्तागोचरानन्तादिपदैर्व्यवह्रियमाणो परमात्मा बुध्यते। तत्रेदमुच्यते यच्छब्दब्रह्मरूपा वेदा परब्रह्मणः मूलस्वरूपमुपवर्णयन्ति। तेनेदं सिद्धं यद्वेदेषु ये मन्त्राः पठितास्सन्ति तेषां तात्त्विकार्थज्ञानद्वारा शब्दब्रह्मणि निष्णाततामवाप्तुं शक्यते। ये जनाः शब्दब्रह्मणि निष्णाताः भवन्ति ते परब्रह्माणमधिगच्छन्तुं समर्था भवन्तीति।

तत्रापि च मन्त्रब्राह्मणात्मकेषु वेदेषु यस्य यज्ञस्वरूपस्य परमात्मनो वर्णनमस्ति सः परमात्मा मन–प्राण–वाक्–आनन्द–विज्ञानमयोऽस्तीत्युक्तम् उपनिषदादिषु। तद्यथा– **स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदंमयोऽदोमय**[५] इति।।

अनेनेदं सिद्ध्यति यद्वेदेषु सर्वविधं ज्ञानविज्ञानं सुविस्तृतेन व्याख्यातमस्ति। तस्मान्मनूक्तवचनमिदं **सर्वज्ञानमयो हि सः**[६] इति साधुरेव। तत्र ज्ञानमिति कथनेनाध्यात्मविद्याया बोधो भवति। यतस्त्वनेकस्मादेकस्मिन्नारोहणं ज्ञानं ब्रह्मविद्येत्युच्यते। तथैकस्मादनेकस्मिन्नवतरणं विज्ञानं

यज्ञविद्येति। तस्मादुक्तं श्रुतौ– **विज्ञानं यज्ञं तनुते**[७] इति। अनेनेदं स्फुटं भवति यद्ब्रह्मविद्यातिरिक्ताः सर्वा अपि विद्या अनेकत्वप्राधान्याद्यज्ञविद्याया-मर्थाद्विज्ञान एवान्तर्भवन्ति। विज्ञानस्य कर्माणि प्रयोगशालायामर्थात् प्रायोगिकस्थले सम्पाद्यन्ते, यज्ञार्थमपि यज्ञशालात्वेन प्रसिद्धैका प्रयोगशाला भवत्यपेक्षिता तस्माद्यज्ञविद्या विज्ञानमित्युच्यते। आभ्यामेव ज्ञानविज्ञानाभ्यां मानवजीवनस्य कृतकृत्यता सम्पद्यते। इदमेव ज्ञानविज्ञानयुगलं मुख्यो धर्मः। तत्र ज्ञानं निःश्रेयसजनकम्, विज्ञानन्त्वभ्युदयहेतुः। तदुक्तं परमवैज्ञानिकेन भगवता कणादेन– **यतोऽभ्युदयनिःश्रेयससिद्धिस्स धर्मः**[८] इति।

उपर्युक्तैर्विवेचनैरिदं स्फुटं यद्वेदेषु सर्वविधज्ञानविज्ञानस्य पर्याप्तसामग्र्यो विद्यन्ते। अस्माकं पूर्वजैः कृष्णाजिनेषूपविष्टैस्सत्यानुसन्धानतत्परै-र्ऋषिभिर्यत्किञ्चिदवलोकितं तत्सर्वमप्याधुनिकैर्नवीनैर्ऋषिभिरनुसन्धितमिति। रहस्यस्यास्योद्घाटनमृग्वेदस्यैकेन मन्त्रेण भवति यथा–

**अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स देवाँ एह वक्षति ॥**[९] इति।

अत्र पूर्वेभिः ऋषिभिरिति कथनेन पुरातनैर्वशिष्ठात्रिकश्यपादिभि-र्मन्त्रद्रष्टृभिरिति बुध्यते। नूतनैरिति पदेन चान्यैः श्रुतर्षिभिरिति, तैश्च पुरातनैर्नूतनैश्च ऋषिभिस्सोऽग्निरीड्य इति स्फुटं भवति। सम्प्रत्यनुसन्धान-शब्दोच्चारणेन तदेवार्थमवगम्यते। यथा– अन्विति पदमानन्तर्यस्य बोधकम्। सन्धानमितीक्षणम्। उभयमपि मिलित्वाऽनुसन्धानमिति सिद्ध्यति। अस्यानु-सन्धानपदस्यानेके पर्याया विद्यन्ते– अन्वेषणम्, गवेषणम्, अन्वीक्षणम्, शोधकार्यमित्यादयः। अत्र प्रश्नोत्पद्यते यदनुसन्धानं कस्य भवति ? तत्रेदमुच्यते यद्यस्य वस्तुनः पूर्वं सन्धानं कृतं स्यात्तस्यैवेदानीं पुनरवलोकनायानुसन्धानं क्रियते। शब्दोऽयं वैज्ञानिकभाषायां प्रयुक्तः। तस्माद्वेदेषु वैज्ञानिकविषयाणां विवेचनमस्तीति कथने न कस्यापि विप्रतिपत्तिरिति।

विज्ञानमिति पदस्यार्थो भवति विशिष्टं ज्ञानम्। तत्र भवानमरसिंहेनोक्तं– **मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः**[१०] इति। भगवता श्रीकृष्णेनाप्युक्तम्– **ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः**[११] इति। अर्थाच्छिल्पशास्त्रादिषु यदाविष्कारात्मकं ज्ञानं व्याख्यातं तद्विज्ञानपदबोध्यमिति। यज्ञादिकं शिल्पशास्त्रान्तर्गतमेव स्वीक्रियते, यतस्तत्र वेद्यादिसाधनं शिल्पानुमतमेव भवति। याज्ञिकप्रक्रिया चापि पूर्णतो वैज्ञानिकी भवति, तत्र यजमानस्या-सद्वृत्तेर्विनाशः सद्वृत्तेरुदश्च क्रियते, तेन स स्वर्गमाप्नोति। एतस्मादेव कारणात्–

**आत्मसंस्कृतिर्वै शिल्पानि आत्मानमेवास्य तत्संस्कुर्वन्ति**[१२] तथा च- **आत्मा वै यज्ञः**[१३] इत्युक्तं श्रुतिषु। आत्मसंस्काररूपं कर्म नावैज्ञानिकं भवितुमर्हति। यत आत्मनो विज्ञानरूपत्वं स्वयं सिद्धमेव। तस्य विज्ञानरूपस्यात्मनः संस्कारो विज्ञानं विना कथं शक्यम्? अतो यज्ञस्य वैज्ञानिकत्वमुक्तं पूर्वम्। आधुनिकविज्ञानानुसारं येषां वैज्ञानिकविषयाणा-मध्ययनमुद्घुष्टं तत्सर्वमत्र वेदे विस्तृतेन व्याख्यातमस्ति। यथा- भौतिकविज्ञानम्, रसायनविज्ञानम्, वनस्पतिविज्ञानम्, जन्तुविज्ञानम्, प्रौद्योगिकीविज्ञानम्, कृषिविज्ञानम्, गणितविज्ञानम्, ज्योतिर्विज्ञानम्, वृष्टिविज्ञानम्, पर्यावरणविज्ञानम्, अन्तरिक्षविज्ञानम्, भूगर्भविज्ञानम्, आयुर्विज्ञानम्, सूर्यविज्ञानम्, अग्निविज्ञानम्, खगोलविज्ञानम्, पिण्डविज्ञानम्, ब्रह्माण्डविज्ञानम्, वास्तुविज्ञानम् इत्यादीनि सर्वाण्यपि विज्ञानानि वैदिकयज्ञविज्ञानान्तर्गतानि सन्ति।

वेदेषु उपर्युक्तैराधुनिकविज्ञानविषयैश्चाप्यधिकविषयाणां वर्णनान्युप-लभ्यन्ते तानि च विज्ञानान्यस्माभिर्विस्मृतानि सम्भाव्यते यत्कालान्तरेषु तान्यस्माकं साक्षात्कृतानि स्युः, परमधुना दार्ढ्येन वक्तुमशक्यानि। तदेतस्यां परिस्थिताविह प्रकृतविषयमनुसृत्य वास्तुविज्ञानदृशा तावत्किञ्चिद्विचार्यते।

वास्तुशब्दस्य निर्वचनं प्रस्तूयता निर्वचनशास्त्रप्रवक्त्रा वैज्ञानिकान्वेषण-शीलवता भगवता यास्काचार्येणोक्तम्- **वास्तुर्वसतेर्निवासकर्मणः**[१४] इति। पाणिनीयव्याकरणस्य **वस-निवासे**[१५] इत्यस्माद्धातोः **वसेस्तुन् वसेर्णिच्च**[१६] इत्यनयोः सूत्रयोः **वस्**धातौ **तुन्**-प्रत्यये कृते सति वस्तुशब्दो निष्पद्यते। **वस्**-धातौ **णित्** प्रत्यये कृते सति **णित्वादु- पधावृद्धिस्**तेन वासशब्दो निष्पन्नो भवति। वासशब्दे च पुनः **तुन्**-प्रत्यये कृते सति 'वस्तु' शब्दो निष्पद्यते। वस्तुशब्दे च **णि**त्वात् **वास्तु**रिति शब्दो निष्पद्यते। तस्य च **वास्तोः पाता पालयिता वा वास्तोष्पति**रिति वैदिको देवविशेषः। वास्तुशब्दस्यार्थो भवति वासयोग्यं यत्स्थानं तद्वास्त्विति। अस्य वासयोग्यस्य स्थानस्यावश्यकता सर्वेभ्योऽपि देव-दानव-मानव- पशु-पक्षि-कृमि-कीट-पतङ्ग-पिपीलिका-लता-गुल्म-वृक्ष- वनस्पत्यन्नौ- षध्यादिभ्यो वर्तत एव। यतस्तु यत्र यो वसति तदेव तस्य वास्तुः।

वस्तुतः सर्वेऽपि देवाः प्राणिनश्च कस्मिंश्चिदपि स्थानविशेषे निवसन्ति। यथा वैकुण्ठे विष्णुः, कैलाशे शिवः, स्वर्गे इन्द्रादयो देवाः, पाताले दानवाः, पृथिव्यां गृह-भवन-प्रासाद-आलय-निलय-पुर-वेश्मादिषु च मानवाः,

मानवनिर्मितगोष्ठादिषु गवाश्वादयो ग्राम्यपशवः, समुद्रनदीतडागादिषु जलचरजीवाः, वृक्षकोटरेषु नीडेषु वा खगाः, गुहासु गहनवनेषु च सिंहव्याघ्रादयो वनचरा वन्यप्राणिनः, बिलेषु मूषकमण्डूकसर्पपिपीलिकादयो जीवाः, धरणी-माश्रित्य वृक्षवनस्पत्यन्नौषध्यादयो निवसन्ति।

वेदेषु वैदिकवाङ्मयेषु च क्वचिदपि कस्यचिदेकस्यैव जातेः व्यक्तेश्च कल्याणार्थं न किमप्युक्तमपितु समस्तसंसारस्य समस्तप्राणिणाञ्च कल्याणाय बहुत्रोक्तमस्ति। यथा- **योगक्षेमो नः कल्पताम्**[१७] अत्र **नः** बहुवचनात्मकः शब्दः, यस्यार्थो भवत्यस्माकमिति। एवमेवान्यत्रापि **शं नो देवीः**[१८]**, स नो वसून्याभर**[१९]**, शं नो अस्तु द्विपदे शं चतुष्पदे**[२०]**, वयं स्याम पतयो रयीणाम्**[२१]**,** इत्यादिषु स्थलेष्वपि बहुवचनस्यैव प्रयोगो वर्तते। तेनेदं स्पष्टं यद्वास्तु- प्रयोजनमपि सर्वेभ्य एव प्राणिभ्यो वर्णितम्, तथाप्यधुना सर्वप्राणिषु मानवस्योत्कृष्टत्वं सर्वविधज्ञानविज्ञानशीलत्वं, सुखसमृद्ध्यर्थं सततपरिश्रमशीलत्वमवलोक्य च तेभ्य एव विशेषरूपेण वास्तुप्रयोजनं शास्त्रेषु निर्दिष्टम्। यतः सुखर्द्धि-सन्तति-धनानि च सर्वदा सर्वेषां नृणां प्रियाणि भवन्ति। तैत्तिरीयसंहितायामुक्तं यत्- **बहिः प्राणो वै मनुष्य**[२२] इति। अर्थान्मानवाः बाह्यसुखमवलोक्य तत्प्राप्तुं सततं यत्नशीला भवन्ति। बाह्यसुखेषु भोजनं वस्त्रमावासश्च मुख्यरूपेण मनुष्येभ्यः कल्पिताः। मनुष्याणां कृते यावन्त्योऽप्यावश्यकताः सन्ति निर्दिष्टा- स्तास्वावश्यकतासु एतास्तिस्रो मुख्याः। आसु तिसृष्वावश्यकतास्वपि आद्ये द्वे आवश्यकते भोजनवस्त्ररूपे तदैव सम्पूर्णे भवतः यदाऽन्तिमा आवासजन्याऽऽवश्यकता पूर्णा भवति। यत आवासस्थानं विना भोज्यवस्तूनां परिधानानाञ्च रक्षणमसम्भवम्। तस्मात्तयोरभिवृद्ध्यर्थमन्तिमाऽऽवश्यकता खल्वावासरूपाऽत्यन्तमहत्त्वपूर्णाऽस्ति। अत एव श्रौताचार्यास्तेषामनुयायिनोऽन्येप्याचार्याः सर्वास्वावश्यकतासु देश-पुर-निवास-वेश्मादीन् श्रेयस्करत्वेन स्वीकृतवन्तः, तदनुसृत्यैवात्र किञ्चिद्विचार्यते।

**निरुक्तशास्त्रे- गृहनामानि द्वाविंशतिः**[२३] यथा- 1.गयः, 2.कृदरः, 3.गर्त्तः, 4.हर्म्यम्, 5.अस्तम्, 6.पस्त्यम्, 7.दुरोणे, 8.नीळम्, 9.दुर्याः, 10. स्वसराणि, 11.अमा, 12.दमे, 13.कृत्तिः, 14.योनिः, 15.सद्म, 16. शरणम्, 17.वरूथम्, 18.छर्दिः, 19.छदिः, 20.छाया, 21.शर्म, 22. अज्मेति द्वाविंशतिर्गृहनामानि निघण्टौ पठितानि। अन्यत्र च सदनम्, गृहम्,

शालेत्यादयोऽप्यनेके शब्दाः प्रयुक्ताः सन्ति। एतेषां शब्दानां विस्तृतं विवेचनम्मया विद्यापीठीयवास्तुशास्त्रविभागेन प्रकाशितायां 2015 तमाब्दीयायां **वास्तुशास्त्रविमर्शा**ख्यपत्रिकायां कृतं तस्मादत्र पिष्टपेषणमकृत्वैव वास्तुविज्ञानसिद्धान्तविमर्शम्प्रत्यग्रेसरामि।

वस्तुतः निवासस्थानस्य निर्माणार्थमुचितभूमेश्चयनं सर्वप्रथम-मावश्यकम्भवति। तत्रापि भूपरीक्षणम्, दिक्साधनं, वर्णव्यवस्थया परिवेशविशेषेण च भूमेः परिमापनम्, इष्टानिर्माणम्, इष्टकास्थापनम्, गृहपरिमाणम्, इष्टकाचयनम्, द्वारनिर्माणमित्यादयो विविधा विषयाश्चिन्त्यन्ते। एते सर्वेऽपि विषयाः वेदेषु वर्णितेषु यज्ञपरम्परायां साधु चर्चितास्सन्ति। तानेव विषयानादाय क्वचित्कतिचित्परिवर्तनेन वेदाङ्गभूते ज्योतिषशास्त्रावयवे वास्तुशास्त्रे पुरातनैरस्माकमृषिभिर्नूतनं सिद्धान्तं प्रदर्शितमिति। तेनेदं स्फुटमेव प्रतिभाति यद्वेदेषु वास्तुविज्ञानसिद्धान्ताः सन्त्यनुस्यूता इति। तदन्विह वेदेषु वर्णितानां केषाञ्चन प्रमुखवास्तुविज्ञानसिद्धान्तानां विमर्शो विधीयते।

**भूचयनम्**- निर्माणकार्यं कर्तुं सर्वप्रथममिदं विचिन्त्यते यत्कुत्र निर्माणकार्यमुचितं भविष्यतीति। तदर्थमियं भूमिरेव प्रतिष्ठेत्युक्ता **अभूद्वाऽइयं प्रतिष्ठेति। तद् भूमिरभवत्**[२४] इति श्रौतवचनात्। यतो ह्यत्रैव गृहनिर्माणं क्रियते। तदेव गृहं प्रतिष्ठावाचकमिति। यथा- **गृहा वै दुर्याः**[२५], **गृहा वै प्रतिष्ठा**[२६], **गृहा गार्हपत्यः**[२७], **प्रतिष्ठा गार्हपत्यः**[२८] एभिः श्रौतवचनैरिदं स्पष्टं भवति। सेयं भूमिः कीदृशी स्याद्यत्र यज्ञायोपयुक्तं गृहनिर्माणं कर्तुं शक्येत? इत्यस्मिन् विषये प्राह महर्षिकात्यायनेन स्वकीये शुल्बसूत्रे-

**संख्याज्ञः परिमाणज्ञः समसूत्रनिरञ्छकः।**
**समभूमौ भवेद्विद्वान् शुल्बवित् परिपृच्छकः॥**[२९]

समे भूमौ शुल्बशास्त्रस्य ज्ञाता निर्माणकार्यं कुर्यादिति। समत्वज्ञानाय चापि कात्यायनो वदति-

**न जलात्सममन्यत् स्यान्नान्यद्वृत्तात्प्रमा भवेत्।**
**नान्यद्दूरं भ्रमादूर्ध्वं नान्यत्सूत्रादृजुर्भवेत्॥**[३०]

एवमुक्तप्रकारेण भूमेस्समत्वं विज्ञाय निर्माणकार्यं करणीयमित्यस्माक-मृषीणामभिप्रायो वर्तते। एवमेव विधिना वास्तुशास्त्रविद्भिरपि समे भूमौ गृहनिर्माणादिकं समुपदिष्टमिति।

**भूपरीक्षणम्**- भूपरीक्षणायादौ सायंकाले हस्तपरिमितं चतुरस्रं गर्तं

कृत्वा जलेनापूर्य प्रातःकाले तस्य गर्तस्य स्वरूपमवलोक्य वासस्थानाय योग्यायेग्यभूमिज्ञानं क्रियते सैषा विधिर्वास्तुशास्त्रविद्भिरुक्ता। वैदिकयज्ञे वेदिखननरूपं भूपरीक्षणं व्याख्यातमस्ति। तद्यथा- **अपरेणाऽऽहवनीयं वेदिं खनति त्र्यङ्गुलखाताम्**[३१] **आमूलोच्छेदनादोषधीनाम्**[३२] इत्यत्रेदमवधेयं यत् यस्मिन् देशे वेदिः परिमीयते तत्र रूढानामोषधीनां मूलं यावता खननेन उच्छिद्येत् तावत् खातव्यमिति। साम्प्रतमपि भूपरीक्षणायैषैव प्रक्रिया स्वीक्रियते परं तत्र भेदोऽयमस्ति यच्छ्रौते वेदिनिर्माणाय त्र्यङ्गुलं खन्यते, अत्र भूपरीक्षण-विधौ हस्तपरिमितमिति। तेनास्य विधेः वेदमूलकतैव सिद्ध्यति।

**दिक्साधनम्**- दिक्साधनविधिं ब्रुवता भगवता कात्यायनेनोक्तं यत्- **समे शङ्कुं निखाय, शङ्कुसम्मितया रज्ज्वा मण्डलं परिलिख्य, यत्र लेखयोः शङ्क्वग्रच्छाया निपतति तत्र शङ्कुं निहन्ति सा प्राची।**[३३] समतले भूमौ शङ्कुमेकं संस्थाप्य शङ्कुसम्मितया रज्ज्वैकं मण्डलं परितो विलिख्य प्रातः काले यत्र रेखायां शङ्क्वग्रच्छाया पतति सा प्रतीची सायंकाले च रेखायां यत्र छाया निपतति सा प्राची दिग्भवति। एवं पूर्वपश्चिमयोस्साधनं कृत्वा उदीच्यवाच्योस्साधनं विधीयते। तदर्थं सूत्रमिममवलोक्यताम्- **तदन्तरथं रज्ज्वाऽभ्यस्य, पाशौ कृत्वा, शङ्कोः पाशौ प्रतिमुच्य, दक्षिणाऽऽयम्य, मध्ये शङ्कुं निहन्त्येवमुत्तरतः सोदीची।**[३४] शङ्कुसम्मितां रज्जुं द्विगुणीकृत्य तदुभयतः पाशौ कृत्वा पूर्वपश्चिमयोः शङ्क्वोः पाशौ कृत्वा मध्यमं पाशं दक्षिणस्यामाकृष्य तत्र शङ्कुं निहन्ति सा दक्षिणा दिक्, एवमेव विपर्यस्योत्तरस्यामाकृष्य शङ्कुं निहन्ति सोदीची दिग्भति। एवमेव किञ्चित्परिवर्तनेन वास्तुशास्त्रेऽपि दिक्साधनविधिरुक्ता।

**भूपरिमापनम्**- वेदप्रतिपादितेषु यज्ञेषु यागविहारनिर्माणाय मण्डपशालेत्यादीनां निर्माणायाध्वर्युना परिमापनं क्रियते। तदुक्तमपि- **यज्ञस्य मात्रां विमिमीत उ त्वः**[३५] इति। भगवता कात्यायनेन वेदिमापनविधिं वर्णयता प्रोक्तं यत्- **औपवसथ्यात्पूर्वेऽहनि पौर्वाह्णिक्या प्रचर्य वेदिं मिमीते**[३६] इति। अर्थादध्वर्युः उपवसथदिनस्य पूर्वाह्णकृत्यं सम्पाद्य वेदिमापनं करोत्यध्वर्युः। **पूर्वार्द्ध्यात्स्तम्भात्पुरस्तात् त्रिषु प्रक्रमेषु शङ्कुं निहन्ति सोऽन्तःपात्यः। तस्मात्पुरस्तात्षट्त्रिंशति। दक्षिणोत्तरौ च पञ्चदशसु पञ्चदशसु। अर्द्धसप्तदशेषु वा। पूर्वार्द्ध्याच्च द्वादशसु द्वादशसु।**[३७] एवमुक्तविधानेनात्र सोमयागस्य वेदिमापनमुक्तम्। प्रतियज्ञवेदिमापनविधानं भिन्नं भिन्नमुक्तमस्ति। तदुक्तं

श्लोकशुल्बे–

**आधाने पदिकं कुर्यात् द्विपदः सौमिको भवेत्।**
**अग्नौ तु त्रिपदं कुर्यात् प्रक्रमं याज्ञिको बुधः॥**[३८]

प्रक्रमेण मापनं क्रियते, तदग्न्याधानकाले पादमात्रः, सोमयागीय–वेदिमापने पदद्वयस्य, चयनयागीय वेदिमापने च पदत्रयस्य प्रक्रमः स्वीक्रियते। एवमेव वास्तुशास्त्रेऽपि ब्राह्मणादिवर्णक्रमेण गृहनिर्माणार्थं भूपरिमापनं भिन्नं भिन्नमुक्तमस्ति।

**इष्टकानिर्माणम्**– इष्टिकाकरणविधिः देवयाज्ञिकेनाह– **यजमानेनोर्ध्वबाहुना प्रपदोत्थितेन वा समं वंशं मित्वा पुरुषप्रमाणस्य त्रिंशांशं द्वात्रिंशांशं वाऽतिरिक्तं वंशच्छेदनेन तावत्प्रमाणं कुर्यात्। ततस्तस्य वंशस्य समा दश विभागाः शलाकादिभिर्वा मित्वा कार्याः। दशस्वपि भागेषु वंशे क्षुरिकादिना वंशस्य त्वचं छित्वा चिह्नानि कार्याणि। तस्य वंशस्य दशमेन भागेन पदं भवति। पदस्य द्वादशो भागोऽङ्गुलम्। एवं विधैरङ्गुलैर्द्वादशाङ्गुलं समचतुरस्रं पद्यानां प्रमाणं सारदारुकाष्ठैः कारयितव्यम्। षडङ्गुलं समचतुरस्रं पादभागानां प्रमाणं द्वितीयम्। षडङ्गुलदीर्घं त्र्यङ्गुलविस्तारमर्द्धपादभागानां प्रमाणम्। त्र्यङ्गुलं समचतुरस्रं चतुर्भागानाम्। अष्टादशाङ्गुलदीर्घं द्वादशाङ्गुलविपुलमद्ध्यर्द्धानां प्रमाणम्। अष्टादशाङ्गुलं समचतुरस्रं जङ्घामात्रीणां प्रमाणम्। चतुर्विंशत्यङ्गुलं समचतुरस्रं बृहतीनां प्रमाणम्। चतुर्विंशत्यङ्गुलदीर्घ– मष्टादशाङ्गुलविपुलं त्रिग्राहिणीनां प्रमाणम्। द्वादशाङ्गुलदीर्घं षडङ्गुलविस्तारमर्द्धपद्यानां प्रमाणम्। चतुर्विंशत्यङ्गुलदीर्घं द्वादशाङ्गुलविस्तारमर्द्धबृहतीनां प्रमाणम्। वक्राणां कृते चतुर्विंशत्यङ्गुलं समचतुरस्रं साधयित्वा तस्योत्तरांशे शङ्कुं निखायार्द्धव्यामप्रमाणां रज्जुमुभयतः पाशां कृत्वोत्तरां सशङ्कौ एकं पाशं प्रतिमुच्य दक्षिणांसस्योपरि लम्बायमानां तां रज्जुं दक्षिणत आकृष्या–र्द्धव्यामप्रमाणां रेखां कृत्वा पाशप्रोतशङ्कुना प्रदक्षिणं तावद्वृत्तं लिखेत् यावत्सार्द्धव्यामपरिमिता रज्जुस्तस्य चतुरस्रस्य दक्षिणश्रोणेरुपर्यायाति। ततो दक्षिणश्रोणेरारभ्य रज्जुप्रान्तं यावद्रेखां कुर्यात्। ततश्चतुरस्रस्य पश्चिमोत्तरपूर्वपार्श्वानि मार्जयेत्। अवशिष्टं क्षेत्रं वक्राणां प्रमाणम्। एतादृशं क्षेत्रं विलोक्य वक्रदारुघटनेन वक्राप्रमाणं निष्पादनीयम्। सर्वेषां प्रमाणानां चतुरङ्गुलं वा षडङ्गुलं वा मत्या वोच्छ्रायप्रमाणं भवति। अर्द्धेनार्द्धोत्से–**

**धानां पद्यार्द्धपद्यानामुत्सेधो भवति। षडङ्गुलपक्षे त्र्यङ्गुलं चतुरङ्गुलपक्षे च द्वयङ्गुलम्। तत्प्रमाणद्वयं पद्यानामर्द्धपद्यानां च पृथक् करणीयम्। एवं त्रयोदशप्रमाणानि समानि श्लक्ष्णानि च कारयित्वा तैरिष्टकाः समभूमौ निष्पादनीयाः।**

**वास्तुशास्त्रे इष्टकाप्रमाणम्**- वास्तुशास्त्रे ब्राह्मणाय एकविंशत्यङ्गुललम्बप्रमाणा 21/2 =10.1/2 अङ्गुलविस्तृता 21/4= 5. 1/4 अङ्गुलस्थूला इष्टका विहितास्सन्ति। एवमेव क्षत्रियाय सप्तदशाङ्गुललम्बमाना, 17/2= 8.1/2 अङ्गुलविस्तृता 17/4=4.1/2 अङ्गुलस्थूला इष्टकाः। तथा च वैश्याय 13 अङ्गुललम्बमाना, 13/4= 6.1/2 अङ्गुलविस्तृताः, 13/4= 3.1/4 अङ्गुलस्थूला इष्टकाः। शूद्राय च 9 अङ्गुललम्बप्रमाणा 9/2=4.1/2 अङ्गुलविस्तृताः, 9/4=2.1/4 अङ्गुलस्थूला इष्टकाः शुभफलप्रदायिकाः भवन्ति।

एतस्मान्न्यूनाधिकप्रमाणा इष्टका नैव निर्मातव्याः। यतो हि उपर्युक्तप्रमाणादितरा इष्टकाः शुभप्रदा न भवन्ति। उक्तप्रमाणान्न्यूनाः प्रमाणाद-धिकाश्चेष्टकाः पुत्रं नाशयन्ति, छिन्नभिन्नाः व्ययं वर्धयन्ति, तथा च भ्रष्टविवर्णदेहा धनसम्बन्धिदुःखं प्रयच्छन्ति। प्रस्तरभवने शिल्पिजनानाम् इच्छानुसारम् इष्टकानिर्माणं करणीयम्। तद्यथा-

**शिलाप्रमाणं क्रमशः प्रदिष्टं वर्णानुपूर्व्येण तथाङ्गुलानाम्।**
**अथैकविंशद् घनविश्वनन्दा विस्तारके व्यासमितं तदर्धम्॥**
**तदर्धमानं त्वथ पिण्डिका स्यादूर्ध्वाधिका न्यूनतरा न कार्या।**
**प्रमाणहीना सुतनाशकारिणी, व्यङ्गाव्ययं, भ्रष्टविवर्णदेहा॥**
**धनार्तिदा विस्तरगेहमाने कार्या शिला शिल्पिजनाऽनुकूला॥**[४०]

**एकविंशद्द्विजाग्र्याणां क्षत्राणां दशसप्त च।**
**त्रयोदश तु वैश्यानां शूद्राणां तु नवाङ्गुलम्॥**[४१]

**प्रासादे तु हस्तयामाः कार्याः**- राजभवनं देवमन्दिरं वा निर्मातुं विधिपूर्वकं शोभनाश्चतुरस्राः समाः हस्तप्रमाणलम्बाकाराः, हस्तसम्मिताः विस्तृताश्चेष्टकाः निर्मातव्याः। तदुक्तं वास्तुरत्नाकरे-

**प्रासादादौ विधानेन कर्त्तव्याः सुमनोहराः।**
**चतुरस्राः समाः कृत्वा समन्ताद्धस्तसम्मिताः॥**[४२]

**विशेषः**- षोडशाङ्गुललम्बाकाराः, दशाङ्गुलविस्तृताः, इष्टका उत्तमाः

भवन्ति। तथा च पञ्चदशाङ्गुललम्बाकाराः नवाङ्गुलविस्तृताश्च मध्यमाः (न तूत्तमाः, न निकृष्टाः) भवन्ति। चतुर्दशाङ्गुललम्बाकाराः, अष्टाङ्गुल-विस्तृता इष्टकाः निकृष्टाः भवन्ति। एतासामिष्टकानां विस्तृतानाञ्च तृतीयांशसमाः स्थूलाकारा इष्टका निर्मातव्याः । तद्यथा-

**दैर्घ्ये चन्द्रकलाङ्गुलोत्तमशिला मध्यङ्गुलो नान्तिमा।**
**व्यासो दिङ्नवभूभृदुच्छ्रितिरपि त्र्यंशेन विस्तारतः॥**[४३]

**अन्यच्च**- पञ्चदशाङ्गुललम्बाकारा इष्टका विजया, सप्तदशाङ्गुललम्बाकारा इष्टका मङ्गला, द्वादङ्गुललम्बाकारा इष्टका निर्मला, त्रयोदशाङ्गुल-लम्बमानेष्टका सुखदा चेति कथ्यते। तद्यथा-

**तिथ्यङ्गुलानि विजया मङ्गला सप्तचन्द्रकैः।**
**पक्षेन्दुभिर्निर्मला स्यात्सुखदा रामपक्षकैः।**
**प्रमाणमिष्टकायाश्च गर्गाद्यैर्मुनिभिः स्मृतम्॥**[४४]

**उपसंहारः-**

उपसंहर्तुमुद्यतसन्नहमेवं ब्रवीमि यद्वास्तुशास्त्रे गृहनिर्माणाय ये विधयः प्रोक्तास्सन्ति ते सर्वे वेदोक्तप्रमाणान्याश्रित्यैव विहितास्सन्ति। भूचयनादारभ्येष्टकाचयनं यावत्सर्वेऽपि विधयः वेदाधारिता एव प्रयुक्तास्सन्ति। अद्यत्वे इष्टकानां निर्माणे ये विधयः समाचरिता भवन्ति तेष्विष्टका-निष्पादनकालिकविधयो मुख्यरूपेणानुक्रियन्त एव। यथा-

चयनयागे इष्टकानां निर्माणाय विविधाः प्रक्रियाः प्रोक्तास्सन्ति। तासु प्रक्रियासु आर्द्र प्रमाणम् इष्टकाप्रमाणादधिकं कर्त्तव्यमिति शास्त्रविद्भिः निर्दिष्टम्। अत्र प्रश्नः समुदेति यत् इष्टकानाम् आर्द्रप्रमाणं कति परिमाणकं भवेत्? इत्यस्य प्रश्नस्योत्तरं शुल्बसूत्रकृता भगवता कात्यायनेन प्रोक्तं यत्-

**ह्रसते शोषपाकाभ्यां द्वात्रिंशद्भागमिष्टका।**
**तस्मादार्द्रप्रमाणं तु कुर्यान्मानाधिकं बुधः॥**[४५]

अर्थात् आर्द्रप्रमाणं द्वात्रिंशद्भागादधिकं कर्त्तव्यमिति शुल्बसूत्र-कारस्यादेशः। तत्रापि देवयाज्ञिकादिषु पद्धतिषु त्र्यालिखिता इष्टकाः भवेयुरिति निर्देशो लभ्यते। त्र्यालिखितासु इष्टकासु त्रिविधाः रेखाः भवन्ति। तत्र काश्चन इष्टका **वक्रा**लिखिता **UUU**, काश्चन **तिरश्चा**लिखिताः- - - , काश्चन चेष्टकाः **ऋज्वा**लिखिताः । । । भवन्ति।

एतासाम् इष्टकानां निर्माणाय पूर्वं सारदारुनिर्मितम् इष्टकाकरणयन्त्रम् इष्टका प्रमाणात् द्वात्रिंशद्भागाधिकं निर्मीयते। तेन यन्त्रमाध्यमेन या इष्टका निर्मीयन्ते ताः पाकशोषाभ्यामनन्तरं समुचितप्रमाणयुताः भवन्ति।

अद्यापि लोके अनयैव प्रक्रियया इष्टकाकरणयन्त्रमाध्यमेन इष्टकाः निर्मीयन्ते। त्र्यालिखिता इति स्थाने अक्षरत्रयं लिखितं भवति इष्टकानामुपरि यथा- **भारत, महान्, आजाद** इत्यादयः शब्दाः वर्णत्रयात्मका इष्टकानिर्माणयन्त्रे व्यत्यासेन उट्टङ्किताः भवन्ति इति अस्माभिः सर्वैरपि समवलोक्यत एव। तेनेदं सिद्धमेव यद्वास्तुविज्ञानसिद्धान्ताः वेदेषु प्रौढत्वेनोपवर्णितास्सन्ति।

**जयतु भारतम्। जयतु संस्कृतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. आपस्तम्बश्रौतसूत्रे-24/1/31
2. मीमांसा परि.- पृष्ठ-4 (वेदद्वैविध्यम् इति प्रकरणे)
3. शतपथब्राह्मणे-7/1/1/5
4. अमृतबिन्दूपनिषदि-17 ; मैत्रायण्याम्-6/12
5. बृहदारण्यकोपनिषदि-4/4/5।
6. मनुस्मृतौ-2/7
7. तैत्तिरीयारण्यके-8/5/1 ; तैत्तिरीयोपनिषदि-2/5/1
8. वैशेषिकसूत्रे-1/2
9. ऋग्वेदे-1/1/
10. अमरकोषे-धीवर्गे-6 तमे श्लोके
11. श्रीमद्भगवद्गीतायां-7/2
12. गोपथब्राह्मणे-2/6/7
13. शतपथब्राह्मणे-6/2/1/7
14. निरुक्ते-10/2/16
15. भ्वादिगणे- परस्मैपदी, सिद्धान्तकौमुद्याम्
16. उणादिप्रकरणे- सू.-75 तथा 657
17. शु.य.संहिता -2/22
18. ऋग्वेदसंहितायाम्- 10/9/4 , साम-33, अथर्व सं.-1/6/1 , शु.य.संहिता-36/12 , तै.ब्रा-1/2/1/1 , तै.आ.-4/42/4

19. ऋ.संहिता-10/191/1,    शु.य.संहिता-15/30
20. ऋ.संहिता-10/165/1
21. शु.य.संहिता-19/44 , 'अथा नो वर्धया रयिम्'-
    शु.य.सं.-15/56, 3/14
22. तै.संहिता- 6/1/1/4
23. निघण्टौ-3/4
24. श.प.ब्रा.- 6/1/1/15;3/7
25. ऐ.ब्रा.-1/13, श.प.ब्रा.-1/1/2/22, 3/3/4/30
26. श.प.ब्रा.- 1/1/1/19; 9/3/19; 2/4/1/7
27. मै.-1/5/10; काठ.-8/7; क.-7/4; जै.- 1/61
28. तै.सं.- 5/2/3/6; काठ.- 20/1; क.- 31/3; ऐ.ब्रा.-8/24
29. कात्यायनश्लोकशुल्बे- श्लोक:-3
30. कात्यायनश्लोकशुल्बे- श्लोक:-4
31. कात्यायनश्रौतसूत्रे- 2/6/1   32. कात्यायनश्रौतसूत्रे- 2/6/2
33. का.शु.सू. दिक्साधनप्रकरणे सू. 2
34. का.शु.सू. दिक्साधनप्रकरणे सू. 3
35. ऋ..सं.-10/71/11
36. का.श्रौ.सू.- 8/3/6
37. का.श्रौ.सू.- 8/3/7-11
38. का.शुल्बसूत्रे- श्लोक-34
39. दे.या.प.पृ.सं. 517-518
40. विश्वकर्मप्रकाशे 50-51
41. वा.र. 6.1-2 टीकायाम्
42. विश्वकर्मप्रकाशे 6.17
43. वास्तुराजवल्लभे 5.12
44 वा.र. 6.5
45. कात्यायनश्लोकशुल्बे- 30

# वेदेषु विश्वहितचिन्तनम्

प्राच्यानां मतिमतां वेदजुषां मनीषिणां सम्मतौ वेदाः सन्त्यनादयस्त्रिकालाबाधिता अपौरुषेयाः परब्रह्मपरमात्मनो निःश्वासभूताश्च। तदुक्तमपि–

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥[१]**

**अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि॥[२]**

आभ्यां श्रौतस्मार्त्तवचनाभ्यां परमात्मनः सकाशादुत्पन्नत्वाद्वेदस्यापि परमात्मवदेव नित्यत्वमपौरुषेयत्वं सर्वप्रपञ्चोत्पादकत्वादिकञ्च सुस्पष्टं भवति। वस्तुतो वेद इति शब्दश्रवणादृग्यजुस्सामाथर्वसंज्ञकानां शब्दराशिभूतानां चतसृणामपि संहितानां बोधो भवति। यद्यप्यापस्तम्बादिभिर्वैदिकैराचार्यैर्वेदानां द्विविधं स्वरूपं स्वीक्रियते **मन्त्रब्राह्मणयोर्वेदनामधेयम्**[३] इति। तत्र मन्त्रब्राह्मणयोर्लक्षणं प्रस्तूयता महर्षिणा जैमिनिना द्वादशलक्षण्यां पूर्वमीमांसायामुक्तं– **तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते। विधायकं वाक्यं ब्राह्मणम्**[४] इति। **ब्रह्म वै मन्त्रः**[५] इति ब्राह्मणोक्तवचनाद्ब्रह्मवेदयोरैक्यं सिद्ध्यति। अत्र ब्रह्मपदं कर्मबोधकं सद्यज्ञस्यैवोद्बोधकमिति ज्ञायते। तस्माद्यज्ञादीनां साङ्गोपाङ्गानि विधिविधानानि यत्रोक्तानि तानि ब्राह्मणानीति। ब्रह्मपदव्याख्यानावसरे प्राचीनैर्ऋषिभिरेवमुक्तम्–

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्मपरञ्च यत्।**
**शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति॥[६]**

शब्दब्रह्मरूपेणात्र शब्दराशिभूताः मन्त्रब्राह्मणात्मकाः वेदा उक्ताः। परब्रह्मपदेन च सर्वजगत्कारणभूत अनादिनिधनाव्यक्तागोचरानन्तादिपदैर्व्यवह्रियमाणो परमात्मा बुध्यते। तत्रेदमुच्यते यच्छब्दब्रह्मरूपा वेदा परब्रह्मणः मूलस्वरूपमुपवर्णयन्ति। तेनेदं सिद्धं यद्वेदेषु ये मन्त्राः पठितास्सन्ति तेषां तात्त्विकार्थज्ञानद्वारा शब्दब्रह्मणि निष्णाततामवाप्तुं शक्यते। ये जनाः शब्दब्रह्मणि निष्णाताः भवन्ति ते परब्रह्माणमधिगच्छन्तुं समर्था भवन्तीति।

तत्रापि च मन्त्रब्राह्मणात्मकेषु वेदेषु यस्य यज्ञस्वरूपस्य परमात्मनो

वर्णनमस्ति सः परमात्मा मन-प्राण-वाक्-आनन्द-विज्ञानमयोऽस्तीत्युक्तम् उपनिषदादिषु। तद्यथा- **स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदंमयोऽदोमय**[७] इति।।

अनेनेदं सिद्ध्यति यद्वेदेषु सर्वविधं ज्ञानविज्ञानं सुविस्तृतेन व्याख्यातमस्ति। तस्मान्मनूक्तवचनमिदं **सर्वज्ञानमयो हि सः**[८] इति साधुरेव। तत्र ज्ञानमिति कथनेनाध्यात्मविद्याया बोधो भवति। यतस्त्वनेक-स्मादेकस्मिन्नारोहणं ज्ञानं ब्रह्मविद्येत्युच्यते। तथैकस्मादनेकस्मिन्नवतरणं विज्ञानं यज्ञविद्येति। तस्मादुक्तं श्रुतौ- **विज्ञानं यज्ञं तनुते**[९] इति। अनेनेदं स्फुटं भवति यद्ब्रह्मविद्यातिरिक्ताः सर्वा अपि विद्या अनेकत्वप्राधान्याद्यज्ञ-विद्यायामर्थाद्विज्ञान एवान्तर्भवन्ति। विज्ञानस्य कर्माणि प्रयोगशालायामर्थात् प्रायोगिकस्थले सम्पाद्यन्ते, यज्ञार्थमपि यज्ञशालात्वेन प्रसिद्धैका प्रयोगशाला भवत्यपेक्षिता तस्माद्यज्ञविद्या विज्ञानमित्युच्यते। आभ्यामेव ज्ञानविज्ञानाभ्यां मानवजीवनस्य कृतकृत्यता सम्पद्यते। इदमेव ज्ञानविज्ञानयुगलं मुख्यो धर्मः। तत्र ज्ञानं निःश्रेयसजनकम्, विज्ञानन्त्वभ्युदयहेतुः। तदुक्तं परमवैज्ञानिकेन भगवता कणादेन- **यतोऽभ्युदयनिःश्रेयससिद्धिस्स धर्मः**[१०*] इति।

उपर्युक्तैर्विवेचनैरिदं स्फुटं यद्वेदेषु सर्वविधज्ञानविज्ञानस्य पर्याप्तसामग्र्यो विद्यन्ते। अस्माकं पूर्वजैः कृष्णाजिनेषूपविष्टैस्सत्यानुसन्धानतत्परैर्ऋषिभि-र्यत्किञ्चिदवलोकितं तत्सर्वमप्याधुनिकैर्नवीनैर्ऋषिभिरनुसन्धितमिति। रहस्यस्या-स्योद्घाटनमृग्वेदस्यैकेन मन्त्रेण भवति यथा- **अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स देवाँ एह वक्षति ।।**[११] इति।

अत्र पूर्वेभिः ऋषिभिरिति कथनेन पुरातनैर्वशिष्ठात्रिकश्यपादिभि-र्मन्त्रद्रष्टृभिरिति बुध्यते। नूतनैरिति पदेन चान्यैः श्रुतर्षिभिरिति, तैश्च पुरातनैर्नूतनैश्च ऋषिभिस्सोऽग्निरीड्य इति स्फुटं भवति। सम्प्रत्यनु-सन्धानशब्दोच्चारणेन तदेवार्थमवगम्यते। यथा- **अन्विति पदमानन्तर्यस्य बोधकम्**। सन्धानमितीक्षणम्। उभयमपि मिलित्वाऽनुसन्धानमिति सिद्ध्यति। अस्यानुसन्धानपदस्यानेके पर्याया विद्यन्ते- अन्वेषणम्, गवेषणम्, अन्वीक्षणम्, शोधकार्यमित्यादयः। अत्र प्रश्नोत्पद्यते यदनुसन्धानं कस्य भवति ? तत्रेदमुच्यते यद्यस्य वस्तुनः पूर्वं सन्धानं कृतं स्यात्तस्यैवेदानीं पुनरवलोकनायानुसन्धानं

क्रियते। शब्दोऽयं वैज्ञानिकभाषायां प्रयुक्तः। तस्माद्वेदेषु वैज्ञानिकविषयाणां विवेचनमस्तीति कथने न कस्यापि विप्रतिपत्तिरिति।

विज्ञानमिति पदस्यार्थो भवति विशिष्टं ज्ञानम्। तत्र भवानमरसिंहेनोक्तं- **मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः**[१२] इति। भगवता श्रीकृष्णेनाप्युक्तम्- **ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः**[१३] इति। अर्थाच्छिल्पशास्त्रादिषु यदाविष्कारात्मकं ज्ञानं व्याख्यातं तद्विज्ञानपदबोध्यमिति। यज्ञादिकं शिल्पशास्त्रान्तर्गतमेव स्वीक्रियते, यतस्तत्र वेद्यादिसाधनं शिल्पानुमतमेव भवति। याज्ञिकप्रक्रिया चापि पूर्णतो वैज्ञानिकी भवति, तत्र यजमानस्या- सद्वृत्तेर्विनाशः सद्वृत्तेरुदश्च क्रियते, तेन स स्वर्गमाप्नोति। एतस्मादेव कारणात्- **आत्मसंस्कृतिर्वै शिल्पानि आत्मानमेवास्य तत्संस्कुर्वन्ति**[१४] तथा च- **आत्मा वै यज्ञः**[१५] इत्युक्तं श्रुतिषु। आत्मसंस्काररूपं कर्म नावैज्ञानिकं भवितुमर्हति। यत आत्मनो विज्ञानरूपत्वं स्वयं सिद्धमेव। तस्य विज्ञानरूपस्यात्मनः संस्कारो विज्ञानं विना कथं शक्यम्? अतो यज्ञस्य वैज्ञानिकत्वमुक्तं पूर्वम्। आधुनिकविज्ञानानुसारं येषां वैज्ञानिकविषयाणा- मध्ययनमुद्घुष्टं तत्सर्वमत्र वेदे विस्तृतेन व्याख्यातमस्ति। यथा- भौतिकविज्ञानम्, रसायनविज्ञानम्, वनस्पतिविज्ञानम्, जन्तुविज्ञानम्, प्रौद्योगिकीविज्ञानम्, कृषिविज्ञानम्, गणितविज्ञानम्, ज्योतिर्विज्ञानम्, वृष्टिविज्ञानम्, पर्यावरणविज्ञानम्, अन्तरिक्षविज्ञानम्, भूगर्भविज्ञानम्, आयुर्विज्ञानम्, सूर्यविज्ञानम्, अग्निविज्ञानम्, खगोलविज्ञानम्, पिण्डविज्ञानम्, ब्रह्माण्डविज्ञानम् इत्यादीनि सर्वाण्यपि विज्ञानानि वैदिकयज्ञविज्ञानान्तर्गतानि सन्ति।

वेदेषूपर्युक्तैराधुनिकविज्ञानविषयैश्चाप्यधिकविषयाणां वर्णनान्युपलभ्यन्ते तानि च विज्ञानान्यस्माभिर्विस्मृतानि सम्भाव्यते यत्कालान्तरेषु तान्यस्माकं साक्षात्कृतानि स्युः, परमधुना दाढ्येन वक्तुमशक्यानि।

यज्ञानां विषये भगवता मनुना प्रोक्तं- **द्रव्यं देवता त्याग**[१६] इति। अर्थाद्यत्राग्न्यादिदेवतामुद्दिश्य सोमादिद्रव्याणामाहुतिर्दीयते तत्र यज्ञः सम्पद्यते। प्रसिद्धे सोमयागे लतारूपः सोम एव कण्डनेन रसतामापाद्य हूयते। इष्ट्यादिषु यत्र सोमाहुतिर्न भवति तत्रापि येषु द्रव्येषु सोमस्य प्राधान्यं तान्येव घृततण्डुलादीनि द्रव्याणि हूयन्ते। तदुक्तं बृहज्जाबालोपनिषदि- **अग्नीषोमात्मकञ्जगत्**[१७] इति। आभ्यामग्नीषोमाभ्यां पारस्परिकधर्मेण विविधो यागः सम्पद्यते। स एव यज्ञो मनुष्याणां मुख्यो धर्मः, जगत

उत्पादको रक्षकश्चेत्यार्यशास्त्रेषु पदे पदे गीतम्। अयं यज्ञ एव मनुष्याणां देवानां च परस्परसम्बन्धस्थापकः। तथा चावादि श्रीकृष्णः–

**देवान् भावयतानेन ते देवा भावयन्तु वः।**
**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥**[१८]

यज्ञेन मनुष्या देवान् भावयन्ति, भाविताः पूजिताश्च देवा मनुष्यानुपकुर्वन्तीति देवानां मनुष्याणां च पारस्परिकः सम्बन्धो वैदिकप्रक्रियायां व्याख्यातः। भावस्य स्वरूपमुपवर्णयता निरुक्तस्य प्रसिद्धेन टीकाकारेण झोपाह्वेन मुकुन्दमहोदयेनेदमुक्तं यद्भावो भावना सैवोत्पादना सैव च क्रिया। अर्थाद्भावस्य यो विकारस्स क्रियाया एव विकारस्तस्माद्भावविकार इति कथनेन क्रियाविकारस्यैव बोधो भवति। क्रिया च खलु कर्मव्यापाररूपा, स च व्यापारः बहुविध उक्तः। तेन क्रियायाश्चाप्यनेकरूपता सिद्ध्यत्येव। सर्वाप्येषा क्रिया त्रेधा– यज्ञो दानं तपश्चेति। तिस्रश्चेमाः क्रियाः मनोवाक्प्राणेषु सन्निहिताः सन्तः वेदरूपतामेवाकलयन्ति। तद्यथोक्तं श्रुतौ– **ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये सामप्राणं प्रपद्ये**[१९] इति। अस्मिन् मन्त्रवाक्ये ऋग्वेदो वाग्रूपेण, यजुर्वेदो मनोरूपेण, सामवेदश्च प्राणरूपेण स्तुतः। कथनस्यास्य तात्पर्यमिदमस्ति यत्सर्वेषामपि वस्तूनां त्रीणि मण्डलानि भवन्ति। पिण्डरूपमेकं मण्डलम्, यदृगित्युच्यते। पिण्डेषु प्राणास्तिष्ठन्ति, ये पिण्डाद् बहिर्विविधेषु मण्डलेषु प्रसृताः भवन्ति। एषां प्राणानां यदन्तिमं मण्डलं तद्द्वितीयं साममण्डलमित्युच्यते। तेषु च यत्प्राणरूपमग्नितत्त्वं व्याप्तं तदेव तृतीयं मण्डलं यजुरित्युच्यते। तदेतत्सूर्यमण्डलमधिकृत्य श्रुतिराह– **यदेतन्मण्डलं तपति तन्महदुक्थं ता ऋचः स ऋचां लोकः। अथ यदेतदर्चिर्दीप्यते तन्महाव्रतं तानि सामानि स साम्नां लोकः। अथ य एतस्मिन् मण्डले पुरुषः सोऽग्निस्तानि यजूंषि स यजुषां लोकः। सैषा त्रय्येव विद्या तपति।**[२०] इत्थं मण्डलत्रयमभिलक्ष्य विद्यात्रयप्रतिपादनेन स्वरूपतो वेदस्य त्रैविध्यमुक्त–मस्माकं पूर्वाचार्यैः। तयैव त्रय्या विद्यया समस्तविश्वमण्डलस्य सर्वतोभावेन निरूपणं कुर्वता श्रुतावुक्तं–

**ऋग्भ्यो जातां सर्वशो मूर्तिमाहुः सर्वा गतिर्याजुषी हैव शश्वत्।**
**सर्वं तेजः सामरूपं हि शश्वत् सर्वं हीदं ब्रह्मणा हैव सृष्टम्॥**[२१]

अथ यदेव किञ्चिदृग्यजुस्सामसाध्यमग्निप्रयुक्तं कर्मजातं स यज्ञः। यज्ञेनैव सर्वे देवाः, पशवो मनुष्याश्च सर्वविधं कल्याणमाप्नुवन्तीत्यत्र

नास्ति काचिद्विप्रतिपत्तिः। उक्तमपि–

**यज्ञेन देवा जीवन्ति यज्ञेन पितरस्तथा।**
**देवाधीनाः प्रजाः सर्वा यज्ञाधीनाश्च देवताः॥**
**यज्ञो हि भगवान् विष्णुर्यत्र सर्वं प्रतिष्ठितम्।**
**यज्ञार्थं पशवः स्रष्टा देवास्त्वौषधयस्तथा॥**
**यज्ञार्थं पुरुषाः स्रष्टाः स्वयमेव स्वयंभुवा।**
**यज्ञश्च भूत्यै सर्वस्य तस्माद्यज्ञपरो भवेत्॥**
**यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः।**
**धनं यद्यज्ञशीलानां देवस्वं तं विदुर्बुधाः॥**
**यज्ञेन सम्यक् पुरुषस्तु नाके सम्पूज्यमानस्त्रिदशैर्महात्मा।**
**प्राप्नोति सौख्यानि महानुभावाः तस्मात्प्रयत्नेन यजेत यज्ञैः॥**[२२]

अनेन कथनेनेदं सुव्यक्तं भवति यद्विश्वमिति कथनेन सर्वेषामपि देव–दानव–मनुष्य–पशु–पक्षि–कृमि–कीट–लता–गुल्म–वृक्ष–वनस्पत्यौषध्यन्ना–दीनां प्राणतत्त्वसंयुक्तानां प्राणिविशेषाणां गणना भवति। तेषां समेषामपि विश्वस्मिन्नवस्थितानां भूतभौतिकानां हितं वेदेषु यज्ञमुखेन निहितं वर्तते। समस्तस्यापि विश्वस्य कल्याणार्थं वेदस्य महत्त्वपूर्णमवदानमस्ति। यतो वेदेभ्य एव समस्तानां यज्ञ–यागादिक्रियाकलापानां ज्ञानं सम्भवति। यज्ञ–यागाद्यनुष्ठान–माध्यमेनैव सर्वेषां वास्तविकं कल्याणं सम्भवति। अत एव वेदेषु यज्ञादीनां प्राचुर्येण वर्णनमुपलभ्यते। यस्मै कस्मैचिदपि कामावाप्तये यज्ञानुष्ठानं क्रियते तत्सर्वमपि फलमग्निनैव प्राप्यते। तदुक्तमृग्वेदे– **अग्निना रयिमश्नवत पोषमेव दिवे दिवे। यशसं वीरवत्तमम्॥**[२३] स एवाग्निर्विश्वेषां हितसम्पादकोऽस्ति तदुक्तं यथा– **त्वमग्ने यज्ञानां होता विश्वेषां हितः। देवेभिर्मानुषे जने॥**[२४] अग्निवायुरविभ्य एवास्य विश्वस्य निर्माणं पालनं पोषणाद्यभिरक्षणञ्च संभवति। त्रिभ्य एभ्य एव देवेभ्यः सकाशाद्वेदानां दोहनं यज्ञसिद्ध्यर्थं सञ्जातमिति मन्वादिभिर्मुक्तकण्ठेनोक्तम्। तद्यथा–

**अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।**
**दुदोह यज्ञसिद्ध्यर्थमृग्यजुस्सामलक्षणम्॥**[२५]

**निष्कर्षः–**

निष्कर्षरूपेणायं वक्तुं शक्यते यद्वेदेषु यज्ञानां वर्णनमस्ति, यज्ञाश्च विश्वहितसम्पादने प्रमुखसाधनत्वेन वर्णिताः सन्ति। हितस्वरूपे गृहे सुखपूर्वकं

गन्तुमेको यज्ञ एव मार्गोऽस्ति नान्यः कश्चित्। अत एवोक्तं वेदे- **नान्यः पन्था विद्यतेऽयनाय।**[२६]

अत इदमुच्यते यत्सर्वविधं हितं कल्पयितुं यज्ञानुष्ठानं कर्तव्यम्। न केवलं मनुष्या एवापितु देवा अपि यज्ञानामनुष्ठानेन स्वीयं सर्वविधं कल्याणं सम्पादयन्ति। अतो यज्ञमुखेन वेदाः समस्तस्यापि विश्वस्य हितं सम्पादयन्तीति कथनं युक्तियुक्तमेव। अन्येऽपि बहवो विषयाः सन्ति ये वेदेषु विश्वहितसम्पादनमिति तथ्यमुररीकर्तुं प्रस्तोतुमिह शक्यन्ते। परं नात्र लघु-निबन्धे तेषां समेषामुल्लेखः सम्भवति। अतो विस्तारभयादत्रैव विरमामीत्यलमतिविस्रेण।

**जयतं संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. ऐत.ब्रा.सा.भाष्ये उपोद्घाते उल्लिखितमेतत् स्मार्त्तवचनम्।
2. बृहदारण्यकोपनिषदि- 2/4/10
3. आपस्तम्बश्रौतसूत्रे-24/1/31
4. मीमांसा परि.- पृष्ठे-4 (वेदद्वैविध्यम् प्रकरणे)
5. शतपथब्राह्मणे-7/1/1/5
6. अमृतबिन्दूपनिषदि-17 ; मैत्रायण्याम्-6/12
7. बृहदारण्यकोपनिषदि-4/4/5
8. मनुस्मृतौ-2/7
9. तैत्तिरीयारण्यके-8/5/1 तैत्तिरीयोपनिषदि-2/5/1
10. वैशेषिकसूत्रे-1/2
11. ऋग्वेदे-1/1/
12. अमरकोषे-धीवर्गे-6 तमे श्लोके
13. श्रीमद्भगवद्गीतायां-7/2
14. गोपथब्राह्मणे-2/6/7
15. शतपथब्राह्मणे-6/2/1/7
16. का.श्रौ.सू.-1/2/2
17. बृ.जा.उप.-2/4

18. भगवद्गीतायाम्- 3/11
19. शुक्लयजुर्वेदे- 36/1
20. शतपथब्राह्मणे-10/5/2/1-2
21. तैत्तिरीयब्राह्मणे- 3/12/9/1
22. विष्णुधर्मोत्तरपुराणे- 162/1-4,7
23. ऋग्वेदे- 1/1/3
24. समवेदे- 1/1/1/2
25. मनुस्मृतौ- 1/23
26. यजुर्वेदे- 31/18

# वेदमन्त्रेषु प्रयुक्तानां केषाञ्चिदलङ्काराणां विमर्शः

विश्वस्य समस्तानामपि साहित्यानामुत्सो वेद एवास्ति। विश्वस्मिन् विश्वे यावन्त्यपि ज्ञानविज्ञानानि सन्ति प्रसृतानि तानि सर्वाण्यपि वेदादेव निःसृतानि सन्ति। एतदेव तथ्यमुररीकर्तुं **सर्वज्ञानमयो हि सः**[1] इत्यवादि भगवान् मनुः। सर्वज्ञानमिति कथनेनैवालङ्कारविषयकं ज्ञानमपि तत्र निगूढमस्तीत्यस्यापि सङ्केतो लभ्यत एव। यद्यपि वेदेषु न क्वाप्यलङ्कारशब्दस्य परिभाषा तद्भेदानां वा परिचयो वर्णितोऽस्ति। परमवान्तरकालिकैः साहित्य-शास्त्रमर्मज्ञैर्विलक्षणप्रतिभासम्पन्नैर्विद्वत्तल्लजैर्लक्षणग्रन्थप्रणेतृभिराचार्यै-र्वाल्मीकिव्यास-भासकालिदासादीनां ग्रन्थेष्वलङ्कारदृष्ट्यानुशीलनकर्म-व्यापृताभिः काव्यरसास्वादनपटुभिस्तत्तत्स्थलेष्वलङ्कारादीनां कीदृशो रम्यः प्रयोग? इति व्यवस्थापनपुरस्सरमध्ययनं कृतम्। तदन्वत्र **वाक्यं रसात्मकं काव्यम्, ध्वनिरात्मा काव्यस्य, रीतिरात्मा काव्यस्य** चेत्यादिभि-रुदाहरणैर्वेदोत्तरकालीनानां काव्यशास्त्रस्य षट्सम्प्रदायप्रवर्त्तकानामाचार्याणां सिद्धान्ता अस्माकमक्षिलक्षिभूताः सन्ति। तेन रसालङ्काररीतिध्वनिरौचित्य-वक्रोक्तयश्चैते षट्सम्प्रदायाः विकसिताः सञ्जाताः। तेष्वलङ्कारसम्प्रदाय-मभिलक्ष्य तावत्किञ्चिद्विचार्यते।

पाणिनीयव्याकरणानुसारम् **अलं भूषण-पर्याप्ति-वारण-निषेधेषु** इत्यस्माद्धातोरलङ्कारशब्दस्य निष्पन्नत्तिर्मन्यते तेनालङ्करणमित्यलङ्कार इत्यर्थोऽवगम्यते। अलङ्कारशब्दस्य व्युत्पत्तिः **अलङ्क्रियतेऽनेनेत्यलङ्कार** इत्याचार्याः कुर्वन्ति। तेनेदं स्फुटं भवति यद्यथा लोके कश्चिन्मानवो वस्त्राभूषणादिभिरलङ्कृतः सन् सभायां सुशोभते तथैव शब्दार्थैर्विभूषितं वाक्यं पद्यं वा रमणीयं सत् सहृदयाणां हृदयमावर्जयति। तस्मादेव कारणाद्दण्डिना प्रोक्तं यत्- **काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते**[2] इति। काव्यं त्रिविधं गद्यपद्यचम्पूमयमिति। तेषु त्रिविधेष्वेषु काव्येषु शोभाधायकगुणविशेषा ये धर्मा भवन्ति त एव धर्मा अत्रालङ्कारपदेन व्यवहृताः सन्ति।

उदाहरणार्थमस्माभिर्विष्ण्विन्द्रशिवसूर्यदुर्गादीनां देवतानां प्रतिदिनं स्तुतिः क्रियते। स्तुतिपरकेषु मन्त्रवाक्येष्वेवमवलोक्यते यद्यस्या देवताया स्तुतये यस्य मन्त्रस्य प्रयोगो विधीयते तस्यां स्तुतौ तस्या देवतायाः स्वरूपादीनां

वर्णनं स्मर्यते। अत एव यास्ककृतनिरुक्तस्य प्रसिद्धटीकाकारेण म0म0मुकुन्दझामहोदयेन स्तुतिपदस्यार्थं कुर्वता प्रोक्तं यत्- **स्तुतिश्चतुर्विधा नाम्ना बन्धुभिः कर्मणा रूपेणेति।** तथा चोक्तम्- **स्तुतिर्नामरूपकर्म-बन्धुभिरिति।**[३] तत्र रूपकर्मबन्ध्वादयस्त्वलङ्कारविषया मन्यन्ते। न केवलं वेदमन्त्रेष्वेवापितु लौकिकेष्वपि मन्त्रेषु तथैव व्यवहारो दृश्यते। वेदमन्त्रे यथा-

**विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि।**
**यो अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायः॥**[४]

एवमेव पौराणिकमन्त्रेष्वपि-

**सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणं**
**सहारवक्षस्थलकौस्तुभस्त्रियं नमामि विष्णुं शिरसा चतुर्भुजम्॥**[५]

स्तुत्यात्मकयोरुभयोरपि वैदिकपौराणिकमन्त्रयोर्भगवतः श्रीविष्णोः नाम्नः, रूपस्य, कर्मणश्च वर्णनं कृतमस्ति। एवंविधेष्वनेकेषु स्थलेषु विविध देवीदेवानाञ्चालङ्कारिकं वर्णनमुपलभ्यते।

वस्तुतस्तु अलङ्कारविद्भिराचार्यैरलङ्कारस्य त्रिषु वर्गेषु निरूपणं कृतं शब्दालङ्कार-अर्थालङ्कार- उभयालङ्कारभेदैः। त्रिविधानामेषामलङ्काराणां पुनरनेके भेदाः प्रभेदाश्च सञ्जातास्तेषां भूयिष्ठा संख्या विद्यते। शब्दकल्पद्रुम-कारेण राजाराधामोहनदेवेन द्वाविंशत्युत्तरशतसंख्यकानामलङ्काराणां नामानि लक्षणोदाहरणानि च स्वकीये कोशे सङ्कलितानि। तद्दृष्ट्वेषो विचारः समुदेति यदितोऽप्यलङ्काराणां संख्या भवितुमर्हतीति। यतस्तु न कश्चिदपि ग्रन्थकारः क्वचिदपीदमित्थमिति ब्रवीति। एतेषां बहुविधभेदभिन्नानामलङ्काराणां विचारसरण्याः धाराऽपि वेदादेव प्रवहितेति कथनं सम्पोषयितुम् अस्त्यावश्यकता गवेषणायाः। यतः सर्वेषामपि शास्त्राणां तत्त्वानां विषयाणां चिन्तनानाञ्च वर्णनं सूत्ररूपेण वेदमन्त्रेषु यत्र-तत्रोपलभ्यते। यद्यपि यथाविधमुत्तरवैदिक-कालिकसाहित्येष्वलङ्कारादीनां निरूपणमभवत्तथाविधचिन्तनदृष्ट्या वेदेषु न क्वचिदप्यलङ्कारस्यैतादृशानां भेदप्रभेदानां परिभाषाः लक्षणान्युदाहरणानि च प्रतिपादितानि सन्ति। परञ्चोत्तरवैदिकयुगे तद्विषये ये विचाराः प्रस्तुता आलङ्कारिकैस्तथाविधमन्वेषणेनानेकत्र तादृशा मन्त्राः समुपलभ्यन्ते येनेदं स्फुटमेव विज्ञातं भवति यद्वैदिककाले इतोऽप्यधिकं शास्त्रचिन्तनमासीदिति। अत एव नाट्यशास्त्रस्य प्रवर्त्तकेन रससम्प्रदायस्य चोद्भावकेन भरतमुनिना

प्राह यन्मया सर्वेभ्योऽपि वेदेभ्यस्तत्त्वान्यादायैवास्य शास्त्रस्य प्रणयनं कृतम्। तत्र संवादस्य ग्रहणं ऋग्वेदात्, गीतस्य सामवेदात्, नाट्ये मुख्यरूपेण प्रयुज्यमानस्याभिनयस्य ग्रहणं यजुर्वेदात्, अथर्ववेदाच्च रसस्य ग्रहणं कृतमिति। तदुक्तमपि–

**जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि।।**[६]

अनया भरतोक्त्या सुस्पष्टमेव प्रतिभाति यद्वेदे यद्यपि कस्यापि शास्त्रस्य तादृशं भिन्नं-भिन्नं निरूपणन्तु नास्ति परं सर्वाण्यपि शास्त्राणि सर्वा अपि विद्याः वैदिकमन्त्रेषु श्रौतप्रयोगेषु च निगूढाः सन्तीत्यत्र नास्ति लेशतोऽपि सन्देहस्यावसरः।

एवमुक्तप्रकारेणोत्तरवैककलीनैराचार्यैः प्रतिपादितानामलङ्कारस्यानेकेषां भेदानां दर्शनं वेदेषु यत्र-तत्र स्थलेषु जायते। **अनन्ता वै वेदाः**[७] इति तैत्तिरीयश्रुत्युक्तवाक्येन वेदानामानन्त्यं सिद्ध्यति। तस्मादनन्तवेदात् ईषत्प्रयासेन सर्वजनबोधगम्यानां कतिपयानामालङ्कारिकरूपसम्पन्नानां मन्त्राणामुपस्थापन-महमत्र कर्तुमभिलषामि।

वस्तुतस्त्वस्माकमृषयो महान्तो वैज्ञानिका आसन्। ते क्रान्तदर्शिनः कथ्यन्ते तेषां विषये **कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधात्**[८] इति ब्रवीत्यस्माकमुपनिषत्। तादृशानां याथातथ्यतोऽर्थाना-मवलोकयितृणां मनुष्यदेवानामृषीणां काव्यविषये वेदः स्वयमेवेदं कथयति **देवस्य पश्य काव्यं न ममार न जीर्यति**[९] इति। ऋषीणां काव्यानि वेदा एव सन्ति। काव्यं त्रिविधमुक्तं गद्यपद्यचम्प्वात्मकम्। तदनु संहिताभेदाद्वेदाः सन्ति चत्वारः परं स्वरूपभेदात्त्रिविधा एव। तत्रायमृग्वेदः पद्यात्मकोऽस्ति, यजुर्वेदो गद्यपद्योभयात्मकोऽस्ति, सामवेदः पद्यात्मको गानविशेषश्चोक्तः। तस्य लक्षणं प्रदत्तं महर्षिणा जैमिनिना **तेषामृग् यत्रार्थवशेन पादव्यवस्था। गीतिषु सामाख्या। शेषे यजुः शब्दः।**[१०] शुक्लयजुर्वेदसंहितायामुव्वटभाष्ये ऋग्यजुषमिति पदस्य टिप्पण्याम्– **नियताक्षरपादावसाना ऋक्। अनियताक्षरपादावसानं यजुः। प्रगीतं मन्त्रवाक्यानाम्।** इत्युक्तमस्ति। तान्येव लक्षणान्यनुशील्य साहित्यिकैराचार्यैः गद्यपद्यचम्प्वात्मकानि त्रिविधानि काव्यानि स्वीक्रियन्त इति मदीयस्तर्कः।

वस्तुतः पाणिन्यादयो वैयाकरणाः **सुप्तिङन्तं पदमि**ति सूत्रानुसारं

द्विविधं पदं स्वीकुर्वन्ति। निरुक्तकृता भगवता यास्केन **तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमनि भवन्ति**[११] इत्यनेन सूत्रेण पदचतुष्टयमुक्तम्। पदचतुष्टयानामेषां **सत्त्वप्रधानानि नामानि, भावप्रधान-माख्यातम्, उच्चावचा पदार्था (उपसर्गाः) भवन्तीति गार्ग्यः, उच्चावचेष्वर्थेषु निपतन्तीति निपाताः** इत्यादीनि लक्षणानि प्रदत्तानि सन्ति। निपातानां व्याख्यानावसरे यास्केनोक्तं यत् **अथाप्युपमार्थेऽपि कर्मोपसङ्ग्रहार्थेऽपि पदपूरणाः। तेषामेते चत्वार उपमार्थे भवन्ति।**[१२] तत्र **इव, न, चित्, नू** इत्येते चत्वारो निपाता वेदेषु प्रायेणोपमार्थे प्रयुक्ताः भवन्ति। यद्यपि इवेति निपातो वेदेष्वपि लौकिकसाहित्येष्वपि उपमार्थकस्य वाचकत्वेनाङ्गीक्रियते। अत्रेदमपि विचारणीयं भवति यत्किं यास्केन उपमार्थे प्रयुज्यमाणानामेव चतुर्णां निपातानामेव सङ्केतः कृतः उतान्येषामलङ्काराणां विषयेऽपि? तदुच्यते यत् यास्केनालङ्कारदृष्ट्या निरुक्तस्य प्रणयनं न कृतमपितु वेदार्थप्रतिपादनक्रमे समागतानां तत्तद्विषयाणामेवोपस्थापनं विहितम् अत एवान्येषामलङ्काराणां प्रयोगस्तेन प्रसङ्गानुसारमत्र नोक्तः। परन्तु वेदमन्त्राणामनुशीलनेनेदं स्फुटमेव विज्ञातं भवति यद्वेदेषु विविधानामप्यलङ्काराणामुदाहरणानि विद्यमानानि सन्ति। निदर्शनार्थमिह केषाञ्चनालङ्काराणामुपस्थापनं क्रियते।

**उपमालङ्कारः-**

वेदमन्त्रेषूपमायाः भूयिष्ठप्रयोगाः सन्ति, तस्मादेव कारणाद्यास्कोऽपि उपमामेवोदाहरणत्वेन स्वीकृतवान्। तत्र **इव, न, चित्, नु** इत्येतेषामुपमा-बोधकानां चतुर्णामपि निपातानामुदाहरणं प्रस्तूयते।

(1) **इव** यथा- **अग्निरिव मन्यो त्विषितः**[१३] इति। अत्र अग्निरिव तीक्ष्णः। इन्द्र इव विक्रान्त इत्यर्थोऽवगम्यते।

(2) **न** यथा- **दुर्मदासो न सुरायाम्**[१४] इत्यस्मिन् वाक्ये नकारात्मिकाया उपमायाः प्रदर्शनमस्ति। सुरायां पीतायां जायमाना दुष्टमदा यथा पातारं मादयन्ति तद्वत् एते स्तोतारः त्वां स्तुवन्तीत्यर्थः। **वृक्षे न वसतिं वयाः** इत्यत्रापि नकारस्तूपमाया एव निदर्शकः। यथा रात्रौ पक्षिणः वृक्षे वसन्त्येवमेव वयं मनुष्याः गृहे सुखपूर्वकं निवसामः।

(3) **चित्** यथा- **दधिचित्**[१५], इत्यत्रौदन इति वाक्यशेषः। दधितुल्यस्तद्रूप इत्यर्थः। **कुल्माषाँश्चिदाहर** इत्ययत्रापि चिदिति निपातस्तूपमाबोधकोऽस्ति।

(4) **नु** यथा- **वृक्षस्य नु ते पुरुहूत वयाः**। इत्यर्थात् यथा वृक्षस्य शाखा

विरोहन्ति तद्वत् हे बहुभिराहूत इन्द्र! ते पूर्वकालभवाः रक्षाः विशेषेण रोहन्ति।

ऋग्वेदस्य मण्डूकसूक्ते वर्षाकालस्यैको रमणीयो दृश्यो वर्णितोऽस्ति। अत्रैकस्य दर्दुरस्य शब्दं श्रुत्वाऽपरो मण्डूको पूर्वोच्चारितध्वनौ नैजं स्वरं सम्मेलयित्वा शब्दयति। तत्रोपमाया निदर्शनं यथा- **शाक्तस्येव वदति शिक्षमाणः**[१६] अर्थात् गुरुवचनं श्रुत्वा वेदध्वनिकर्तारः शिष्याः यथा गुरुणा सह मिलित्वा समानस्वरेण वेदपाठं कुर्वन्ति एवमेव एते मण्डूका अपि शब्दं कुर्वन्ति।

एवमेव **सुषारथिरश्वानिव यन्मनुष्यान्नेनीयते**,[१७] **सक्तुमिव तितउना**,[१८] **सेनेव सृष्टामं दधाति**[१९], **स नः पितेव सूनवे**[२०], **जायेव पत्य उशती सुवासा**[२१] इत्यादिषु स्थलेषु इवकारेणोपमाया सुष्ठु निदर्शनमस्ति। इतोऽप्यनेकान्युदाहरणानि सन्ति सर्वेषामत्रोपस्थानं नैव शक्यमत एवाग्रेसरामि। यथैवोपमाया निदर्शनमस्ति वेदेषु तद्वदेवान्येषामनुप्रासादीनामप्यलङ्काराणां बहवः प्रयोगा वेदमन्त्रेषूपलभ्यन्ते। तेषामत्र संक्षेपेण सूत्रपातमेव क्रियते। यथा-

**अनुप्रासः- हिरण्यकर्ण मणिग्रीवमर्णः**[२२], **अव्ययानि पव्यया**[२३], **उद्ग्राभञ्च निग्राभञ्च**[२४], **धान्याय धन्वसि**[२५], **यमसूरसूत**[२६], **जारः कनीनां पतिर्जनीनाम्**[२७], **विभूतय ऊतय**[२८] इत्यादिषु स्थलेष्वनुप्रासच्छटाया विहङ्गमो दृश्यो वर्तते।

**लुप्तोपमा**- यत्रोपमा बहुविधदृष्टान्तेन प्रदर्शिता तत्रैव वेदेषु लुप्तोपमाया अपि विस्तृतः प्रयोगोऽस्ति। यथा- **संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः**[२९] अत्र इव पदं लुप्तमस्ति। यथा ब्राह्मणा व्रतमाचरन्ति तद्वदेव एते मण्डूका अपि संवत्सरसत्रस्यानुष्ठानं कुर्वन्तो वर्षपर्यन्तं संवत्सरसत्रात्मकं यागं कुर्वाणास्तिष्ठन्तीत्यर्थोऽवगम्यते। परमत्र मन्त्रे इव पदं लुप्तमस्ति, अतो लुप्तोपमाऽलङ्कारः सिद्ध्यति।

**यमकालङ्कारः- प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्निर्भवेह।**[३०] अत्रैकोऽग्निः विद्वान्, एकोऽग्निरुख्यः, एकश्चितिरूपः, एकश्चाग्रगन्ता (पुरोगन्ता) इत्युक्तः। एकस्मिन्नेव मन्त्रे प्रयुक्तानां चतुर्णमपि अग्निपदानां चत्वारोऽर्थाः वर्तन्ते अतोऽनुप्रासः।

**पुनरुक्तवदाभासः- अश्वहयः**[३१] इत्यत्र अश्वो हयश्चेत्युभौ शब्दौ समानार्थवाचकौ स्तः। उभयमपि पदमत्र प्रयुक्तमस्ति। अत्रार्थदृष्ट्या

यद्यपि पुनरुक्तिर्नास्ति तथापि पुनरुक्तेराभासो भवति।

**यमकालङ्कारः**- **कुह्या कुह्याकृते**[३२], **अंहो युवस्तन्वस्तन्वते**[३३] इत्यादिषु स्थलेषु यमकालङ्कारस्य विहङ्गमो दृश्यो वर्तते।

**श्लेषालङ्कारः**- श्लेषालङ्कारस्यापि बहुलप्रयोगो वेदेषु लभ्यते। यथा- **प्रबोधया पुरंधि जार आससतीमिव**[३४], **याहि राजेवामवान्**[३५] इत्यादिषु स्थलेषु।

**समासोक्त्यलङ्कारः**- **इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः।**[३६] अत्र समुद्रव्यचसं पदं सामासिकं प्रयुक्तम्। समुद्रवत् व्यचो व्याप्तिर्यस्य तं समुद्रवद्व्यापकं विविधाञ्चनं नानागतिं सर्वाः स्तुतयो वर्द्धयन्ति।

उपर्युक्तेन विवेचनेनेदं स्फुटं भवति यद्वेदेष्वलङ्काराणामनेकविधं स्वरूपमुपलब्धं भवति। अत्रास्त्यावश्यकता तदनुरूपान्वेषणस्य तदनुरूपस्य निर्गलितोऽर्थप्रकाशनस्य च। अत एवास्माभिर्गवेषकैरध्येतृभिश्च वेदमन्त्रेषु प्रयुक्तानां तत्तत्पदानामाधुनिककाव्यशास्त्रसरण्या समुचितं व्याख्यानं करणीयं तत्तदनुकूलमध्येतव्यं तद्दृष्ट्यैवान्वेषणीयमपि, येन वेदविषयकाणां विविधानां भ्रान्तीनां निराकरणं सम्भवेदिति शम्।

पादटिप्पणी-

1. मनु-2/6
2. काव्यादर्शे- 2/1
3. निरुक्ते दैवतकाण्डस्यारम्भे मुकुन्दझाबख्शीटीकायाम्
4. शु.य.सं.- 5/18
5. विष्णुस्तोत्रम्
6. नाट्यशास्त्रे-1/17
7. तैत्तिरीयब्राह्मणे-3/10/11/3
8. शु.य.सं.-40/8
9. अथर्ववेदे-10/8/32
10. जैमिनिसूत्रे- 2/1/32,33, 38 सूत्राणि
11. निरुक्ते-1/1/1
12. निरुक्ते- 1/2/1
13. ऋग्वेदे- 8/3/19/2
14. ऋग्वेदे- 5/7/19/2

15. निरुक्ते- 1/2/2
16. ऋग्वेदे- 7/103/5
17. शु.य.सं.- 34/6
18. ऋग्वेदे-8/2/23
19. ऋग्वेदे- 1/5/10/7
20. शु.य.सं.-3/24
21. ऋग्वेदे-1/124/7
22. ऋग्वेदे-1/122/14
23. ऋग्वेदे-9/86/34
24. शु.य.सं-17/64
25. ऋग्वेदे-9/86/34
26. ऋग्वेदे-3/39/3
27. ऋग्वेदे-1/66/4
28. ऋग्वेदे-1/8/9
29. ऋग्वेदे-7/103/1
30. शु.य.सं.-17/66
31. ऋग्वेदे-10/26/5
32. ऋग्वेदे-8/24/30
33. ऋग्वेदे-5/15/3
34. ऋग्वेदे-1/134/3
35. ऋग्वेदे-4/4/1, शु.य.सं.- 13/9
36. शु.य.सं.- 12/56

# विश्वकल्याणार्थं वेदस्यावदानम्

सर्वविदितमेवैतद्यद्वेदा अस्माकं जीवनाधायकाः, सर्वविधकल्याण-कारकाः, सर्वविद्यानिधिभूताश्च सन्ति। साम्प्रतमुपलभ्यमानाः सर्वेऽपि ज्ञानविज्ञानात्मकाः विषयाः वेदादेव प्रसृताः। तथ्यमेतत्प्रकाशयन् भगवान् मनुराह- **सर्वज्ञानमयो हि सः**[१] इति। एतस्मादेव कारणाद्वेदाना-मध्ययनमिहापरिहार्यत्वेनानिवार्यत्वेन चोपदिष्टम्। तदुक्तमपि मनुना-

**योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।**
**स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥**[२]

अर्थाद्यो हि द्विजो वेदमनधीत्यान्यत्र श्रमं विदधाति स इह शूद्रो मतः। अत इदमुच्यते यद्वेदानामध्येतारो मेधाविनः विद्वांसश्चेह निवसन्तोऽपि ब्रह्मभूयाय इव कल्प्यन्ते। तदुक्तम्मनुना-

**वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्।**
**इहैवलोके तिष्ठन्स ब्रह्मभूयाय कल्पते॥**[३]

मनूक्तवचनेनानेनेदं सुव्यक्तं भवति यद्वेदस्यार्थतत्त्वज्ञानस्य महत्त्वमत्युत्कृष्टतममस्ति। अर्थतत्त्वज्ञानाय चानेकविधवैदिकसाहित्यस्या-ध्ययनमनिवार्यमस्ति तदुक्तं केनचिद्विदुषा-

**वेदे काञ्चनपत्तने परिलशद्वेदान्तदुर्गो महान्**
**मीमांसा परिखा विभाति पुरतः शाब्दं लशद्गोपुरम्।**
**योगो यामिनिजागरूकनिचयः सांख्यं विवेकात्मकं**
**धर्मं चोरयितुं विशन्ति सुभगाः नैयायिकाः रक्षकाः॥**

उपर्युक्तानां शास्त्राणामध्ययनं विना वैदिकपदानां तात्त्विकार्थ-ज्ञानमसम्भवमिति सर्वैरप्यङ्गीक्रियत एव। वेद इति शब्दश्रवणादृग्यजु-स्सामाथर्वसंज्ञकानां शब्दराशिभूतानां चतसृणामपि संहितानां बोधो भवति। यद्यप्यापस्तम्बादिभिर्वैदिकैराचार्यैर्वेदानां द्विविधं स्वरूपं स्वीक्रियते **मन्त्र-ब्राह्मणयोर्वेदनामधेयम्**[४] इति। तत्र मन्त्रब्राह्मणयोर्लक्षणं प्रस्तूयता महर्षिणा जैमिनिना द्वादशलक्षण्यां पूर्वमीमांसायामुक्तं- **तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते। विधायकं वाक्यं ब्राह्मणम्**[५] इति। **ब्रह्म वै मन्त्रः**[६] इति ब्राह्मणोक्तवचनाद्ब्रह्मवेदयोरैक्यं सिद्ध्यति। अत्र ब्रह्मपदं कर्म-

बोधकं सद्यज्ञस्यैवोद्बोधकमिति ज्ञायते। तस्माद्यज्ञादीनां साङ्गोपाङ्गानि विधि विधानानि यत्रोक्तानि तानि ब्राह्मणानीति। ब्रह्मपदव्याख्यानावसरे प्राचीनैर्ऋषिभिरेवमुक्तम्-

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्मपरञ्च यत्।**
**शाब्दे ब्रह्मणि निष्णातः परब्रह्माधिगच्छति॥**[७]

शब्दब्रह्मरूपेणात्र शब्दराशिभूताः मन्त्रब्राह्मणात्मकाः वेदा उक्ताः। परब्रह्मपदेन च सर्वजगत्कारणभूत अनादिनिधनाव्यक्तागोचरानन्तादिपदै-र्व्यवह्रियमाणो परमात्मा बुध्यते। तत्रेदमुच्यते यच्छब्दब्रह्मरूपा वेदा परब्रह्मणः मूलस्वरूपमुपवर्णयन्ति। तेनेदं सिद्धं यद्वेदेषु ये मन्त्राः पठितास्सन्ति तेषां तात्त्विकार्थज्ञानद्वारा शब्दब्रह्मणि निष्णाततामवाप्तुं शक्यते। ये जनाः शब्दब्रह्मणि निष्णाताः भवन्ति ते परब्रह्माणमधिगच्छन्तीति।

तत्रापि च मन्त्रब्राह्मणात्मकेषु वेदेषु यस्य यज्ञस्वरूपस्य परमात्मनो विषये व्याख्यानमस्ति स मन-प्राण-वाक्-आनन्द-विज्ञानमयोऽस्तीत्युक्तः उपनिषदादिषु। तद्यथा- **स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदंमयोऽदोमय**[८] इति॥

अनेनेदं सिद्ध्यति यद्वेदेषु सर्वविधज्ञानविज्ञानं सुविस्तृतेन व्याख्यातमस्ति। तस्मान्मनूक्तवचनमिदं **'सर्वज्ञानमयो हि सः'** इति साधुरेव। तत्र ज्ञानमिति कथनेनाध्यात्मविद्याया बोधो भवति। यतस्त्वनेकस्मादे-कस्मिन्नारोहणं ज्ञानं ब्रह्मविद्येत्युच्यते। तथैकस्मादनेकस्मिन्नवतरणं विज्ञानं यज्ञविद्येति। तस्मादुक्तं श्रुतौ- **विज्ञानं यज्ञं तनुते**[९] इति। अनेनेदं स्फुटं भवति यद्ब्रह्मविद्यातिरिक्ताः सर्वा अपि विद्या अनेकत्वप्राधान्याद्यज्ञ-विद्यायामर्थाद्विज्ञान एवान्तर्भवन्ति। विज्ञानस्य कर्माणि प्रायोगिकस्थलान्य-पेक्षन्ते, अतो विज्ञानं यज्ञविद्येत्युच्यते। आभ्यामेव ज्ञानविज्ञानाभ्यां मानवस्य कृतकृत्यता सम्पद्यते। इदमेव ज्ञानविज्ञानयुगलं मुख्यो धर्मः। तत्र ज्ञानं निःश्रेयसजनकम्, विज्ञानन्त्वभ्युदयहेतुः। तदुक्तं कणादेन-**यतोऽभ्युदय-निःश्रेयससिद्धिस्स धर्मः**[१०] इति।

उपर्युक्तैर्विवेचनैरिदं स्फुटं यद्वेदेषु सर्वविधज्ञानविज्ञानस्य पर्याप्तसामग्र्यो विद्यन्ते। अस्माकं पूर्वजैः कृष्णाजिनेषूपविष्टैस्सत्यानुसन्धान-

तत्परैर्ऋषिभिर्यत्किञ्चिदवलोकितं तत्सर्वमप्याधुनिकैर्नवीनैर्ऋषिभिरनुसन्धितमिति। रहस्यस्यास्योद्घाटनमृग्वेदस्यैकेन मन्त्रेण भवति यथा–

**अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति।।**[११] इति।

अत्र पूर्वेभिः ऋषिभिरिति कथनेन पुरातनैर्वशिष्ठात्रिकश्यपादिभिर्मन्त्रद्रष्टृभिरिति बुध्यते। नूतनैरिति पदेन चान्यैः श्रुतर्षिभिरिति, तैश्च पुरातनैर्नूतनैश्च ऋषिभिस्सोऽग्निरीड्य इति स्फुटं भवति। सम्प्रत्यनुसन्धानशब्दोच्चारणेन तदेवार्थमवगम्यते। यथा– अन्विति पदमानन्तर्यस्य बोधकम्। सन्धानमितीक्षणम्। उभयमपि मिलित्वाऽनुसन्धानमिति सिद्ध्यति। अस्यानुसन्धानपदस्यानेके पर्याया विद्यन्ते– **अन्वेषणम्, गवेषणम्, अन्वीक्षणम्, शोधकार्य**मित्यादयः। अत्र प्रश्नोत्पद्यते यदनुसन्धानं कस्य भवति? तत्रेदमुच्यते यद्यस्य वस्तुनः पूर्वं सन्धानं कृतं स्यात्तस्यैवेदानीं पुनरवलोकनायानुसन्धानं क्रियते। शब्दोऽयं वैज्ञानिकभाषायां प्रयुक्तः। तस्माद्वेदेषु वैज्ञानिकविषयाणां विवेचनमस्तीति कथने न कस्यापि विप्रतिपत्तिरिति।

विज्ञानमिति पदस्यार्थो भवति विशिष्टं ज्ञानम्। तत्र भवानमरसिंहेनोक्तं– **मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः**[१२] इति। भगवता श्रीकृष्णेनाप्युक्तम्– **ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः**[१३] इति। अर्थाच्छिल्पशास्त्रादिषु यदाविष्कारात्मकं ज्ञानं व्याख्यातं तद्विज्ञानपदबोध्यमिति। यज्ञादिकं शिल्पशास्त्रान्तर्गतमेव स्वीक्रियते, यतस्तत्र वेद्यादिसाधनं शिल्पानुमतमेव भवति। याज्ञिकप्रक्रिया चापि पूर्णतो वैज्ञानिकी भवति, तत्र यजमानस्यासद्वृत्तेर्विनाशः सद्वृत्तेरुदयश्च क्रियते। तेन स स्वर्गमाप्नोति। एतस्मादेव कारणात्– **आत्मसंस्कृतिर्वै शिल्पानि आत्मानमेवास्य तत्संस्कुर्वन्ति**[१४] तथा च– **आत्मा वै यज्ञः**[१५] इत्युक्तं श्रुतिषु। आत्मसंस्काररूपं कर्म नावैज्ञानिकं भवितुमर्हति। यत आत्मनो विज्ञानरूपत्वं स्वयं सिद्धम्। तस्य विज्ञानरूपस्यात्मनः संस्कारो विज्ञानं विना कथं शक्यम्? अतो यज्ञस्य वैज्ञानिकत्वमुक्तं पूर्वम्। आधुनिकविज्ञानानुसारं येषां वैज्ञानिकविषयाणामध्ययनमुद्घुष्टं तत्सर्वमत्र वेदे विस्तृतेन व्याख्यातमस्ति। यथा– भौतिकविज्ञानम्, रसायनविज्ञानम्, वनस्पतिविज्ञानम्, जन्तुविज्ञानम्, प्रौद्योगिकीविज्ञानम्, कृषिविज्ञानम्, गणितविज्ञानम्, ज्योतिर्विज्ञानम्, वृष्टिविज्ञानम्, पर्यावरणविज्ञानम्, अन्तरिक्षविज्ञानम्, भूगर्भविज्ञानम्, आयुर्विज्ञानम्, सूर्यविज्ञानम्, अग्निविज्ञानम्, खगोलविज्ञानम्, पिण्डविज्ञानम्,

ब्रह्माण्डविज्ञानम् इत्यादीनि सर्वाण्यपि विज्ञानानि वैदिकयज्ञविज्ञानान्तर्गतानि सन्ति।

वेदेषु उपर्युक्तैराधुनिकविज्ञानविषयैश्चाप्यधिकविषयाणां वर्णनान्युपलभ्यन्ते तानि च विज्ञानान्यस्माभिर्विस्मृतानि सम्भाव्यते यत्कालान्तरेषु तान्यस्माकं साक्षात्कृतानि स्युः, परमधुना दाढ्र्येन वक्तुमशक्यानि।

जगति सर्वेष्वेव जडचेतनात्मकषु पदार्थेषु गत्यागती प्रवर्तेते। सर्वत्र व्याप्तो ह्यग्निः प्राणो भूतसहकृतः स्वभावेन प्रतिक्षणं निष्क्राम्यति, तेन जाता क्षतिश्चापरत आगतेन सोमेनाग्निरूपतामाप्तेन प्रपूर्यत इति सर्वेषामेव पदार्थानां जीवनं यज्ञायत्तम्। यत्रागतिरधिका, गतिश्चाल्पा तत्पुष्टी भवति। यत्र तु गतिरधिका, आगतिश्च यमेन विच्छिन्नतयाल्पा तज्जीर्ण भूत्वा विनश्यतीति भावविकारविवरणे निरुक्तादिषु स्पष्टीकृतम्। प्रक्रियेयं प्राकृतिकी खलु। इमामेव प्राकृतिकीं प्रक्रियामालम्ब्य कृत्रिमा यज्ञा विहिताः। यज्ञानां विषये भगवता मनुना प्रोक्तं- **द्रव्यं देवता त्याग**[१६] इति। अर्थाद्यत्र अग्न्यादिदेवतामुद्दिश्य सोमादिद्रव्याणामाहुतिर्दीयते तत्र यज्ञः सम्पद्यते। प्रसिद्धे सोमयागे लतारूपः सोम एव कण्डनेन रसतामापाद्य हूयते। इष्ट्यादिषु यत्र सोमाहुतिर्न भवति तत्रापि येषु द्रव्येषु सोमस्य प्राधान्यं तान्येव गव्यघृतदुग्धादीनि तण्डुलादीनि च हूयन्ते। तदुक्तं बृहज्जाबालोपनिषदि- **अग्नीषोमात्मकञ्जगत्**[१७] इति। अत्रोच्यते यद्द्विविधाः हि लोके भवन्ति पदार्थाः- ऋतरूपाः, सत्यरूपाश्च। यद्धि केन्द्रबद्धं न तिष्ठति प्रत्युतमेव विकीर्णभावेन प्रसरति, तदृतमित्युच्यते। यथा वायुरापः सोम इत्येकस्यैव तत्त्वस्येमास्तिस्रोऽवस्थाः- स्थूलावस्था आपः, तासां सूक्ष्मावस्था वायुः, तदपेक्षयापि सूक्ष्मतमावस्था सोमः। सोऽयं सोमः सर्वत्राकाशेऽभिव्याप्तः। यथोक्तं सोमस्तुतिमन्त्रे-

**त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः।**
**त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ।।**[१८]

सोऽयं सोमः सर्वस्मिन्नन्तरिक्षे ऋतरूपेण स्थितः। शतपथब्राह्मणेऽप्युक्तम्- **अन्नाद एवाग्निरभवदन्नं सोमोऽन्नादश्च वा इदं सर्वमन्नं च**[१९] इति।

अग्निस्तु केन्द्राधारेण तिष्ठतीति स सत्यः। अग्निरयं विकसनशीलः केन्द्राद्बहिरभितो विकसन्नभिव्याप्नोति। सोमस्तु संकोचशीलोऽभितः

संकुचन्नग्नौ पतति, सेयमेव सोमस्याग्नावाहुतिः। अनयैवाहुति प्रक्रियया यज्ञस्य स्वरूपं सुस्पष्टं भवति। यज्ञ एव हि मनुष्याणां मुख्यो धर्मः। स एव जगतामुत्पादको रक्षकश्चेत्यार्यशास्त्रेषु पदे पदे गीतम्। अयं यज्ञ एव मनुष्याणां देवानां च परस्परसम्बन्धस्थापकः। तदुक्तं भगवता भगवद्गीतायाम्–

**देवान् भावयतानेन ते देवा भावयन्तु वः।**
**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥**[२०*]

यज्ञेन मनुष्या देवान् भावयन्ति, भाविताः पूजिताश्च देवा मनुष्यानुपकुर्वन्तीति देवानां मनुष्याणां च पारस्परिकः सम्बन्धो वैदिकप्रक्रियायां व्याख्यातः।

भावस्य स्वरूपमुपवर्णयता निरुक्तस्य प्रसिद्धेन टीकाकारेण झोपाह्वेन मुकुन्दमहोदयेनेदमुक्तं यद्भावो भावना सैवोत्पादना सैव च क्रिया। अर्थाद्भावस्य यो विकारस्स क्रियाया एव विकारस्तस्माद्भावविकार इति कथनेन क्रियाविकारस्यैव बोधो भवति। क्रिया च खलु कर्मव्यापाररूपा, स च व्यापारः बहुविध उक्तः। तेन क्रियायाश्चाप्यनेकरूपता सिद्ध्यत्येव। सर्वाप्येषा क्रिया त्रेधा– यज्ञो दानं तपश्चेति। तिस्रश्चेमाः क्रियाः मनोवाक्प्राणेषु सन्निहिताः सन्तः वेदरूपतामेवाकलयन्ति। तद्यथोक्तं श्रुतौ– **ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये सामप्राणं प्रपद्ये**[२१] इति। अस्मिन् मन्त्रवाक्ये ऋग्वेदो वाग्रूपेण, यजुर्वेदो मनोरूपेण, सामवेदश्च प्राणरूपेण स्तुतः। कथनस्यास्य तात्पर्यमिदमस्ति यत्प्रत्येकेषां वस्तूनां त्रीणि मण्डलानि भवन्ति। पिण्डरूपमेकं मण्डलम्, यदृगित्युच्यते। तस्मात् पिण्डाच्च तदीयाः प्राणा निष्क्रम्य बहिश्चरन्ति। यस्मिन् स्वल्पे महति वा प्राणे यावती शक्तिः, तावद्दूरमेव स प्रचरति। पार्थिवेषु पदार्थेष्वग्निरेव प्राणः। स चायमग्निप्राणो द्विविधः– चित्यः चितेनिधेयश्च। चित्याः प्राणा मर्त्याः, चितेनिधेयास्त्वमृताः। तत्र चित्याः प्राणाः स्वचयनेन वस्तुस्वरूपं निष्पादयन्ति, तद्रक्षण एव च व्यापृतास्तत्रैव तिष्ठन्ति। चितेनिधेयास्तु बहिरपि प्रचरन्ति। एषां प्राणानां यदन्तिमं मण्डलं तत्साममण्डलमित्युच्यते। यावती यस्य ऋग्भवति तदनुकूलमेव तस्य सामेति समत्वात् सामशब्दः प्रयुज्यत इति तदभिप्रायः। ऋचमारभ्य सामपर्यन्तं प्रत्येकस्मिन् बिन्दौ शतशो मण्डलानि सन्ति, तेषु च यत्प्राणरूपमग्नितत्त्वं व्याप्तं तदेव यजुरित्युच्यते। तदेतत्सूर्यमण्डलमधिकृत्य वर्तते अत एव शतपथश्रुतिराह– **यदेतन्मण्डलं तपति तन्महदुक्थं ता ऋचः स ऋचां**

**लोकः। अथ यदेतदर्चिर्दीप्यते तन्महाव्रतं तानि सामानि स साम्नां लोकः। अथ य एतस्मिन् मण्डले पुरुषः सोऽग्निस्तानि यजूंषि स यजुषां लोकः। सैषा त्रय्येव विद्या तपति।**[२२] इति।

अथ यदेव किञ्चिदृग्यजुस्सामसाध्यमग्निप्रयुक्तं कर्मजातं स यज्ञः। अनेन कथनेनेदं सुव्यक्तं भवति यद्विश्वकल्याणार्थं वेदस्य महत्त्वपूर्ण-मवदानमस्ति। यतो वेदेभ्य एव समस्तानां यज्ञ-यागादिक्रियाकलापानां ज्ञानं सम्भवति। यज्ञेनैव सर्वे देवाः, पशवो मनुष्याश्च सर्वविधं कल्याणमाप्नुवन्तीत्यत्र नास्ति काचिद्विप्रतिपत्तिः। उक्तमपि-

**यज्ञेन देवा जीवन्ति यज्ञेन पितरस्तथा।**
**देवाधीनाः प्रजाः सर्वा यज्ञाधीनाश्च देवताः॥**
**यज्ञो हि भगवान् विष्णुर्यत्र सर्वं प्रतिष्ठितम्।**
**यज्ञार्थं पशवः स्रष्टा देवास्त्वौषधयस्तथा॥**
**यज्ञार्थं पुरुषाः स्रष्टाः स्वयमेव स्वयंभुवा।**
**यज्ञश्च भूत्यै सर्वस्य तस्माद्यज्ञपरो भवेत्॥**
**यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः।**
**धनं यद्यज्ञशीलानां देवस्वं तं विदुर्बुधाः॥**
**यज्ञेन सम्यक् पुरुषस्तु नाके**
**सम्पूज्यमानस्त्रिदशैर्महात्मा।**
**प्राप्नोति सौख्यानि महानुभावाः**
**तस्मात्प्रयत्नेन यजेत यज्ञैः॥**[२३]

**जयतं संस्कृतम्। जयतु भारतम्। जयन्तु वेदाः।**

पादटिप्पणी-

1. मनुस्मृतौ-2/7
2. मनुस्मृतौ-2/168
3. मनुस्मृतौ- 12/102
4. आपस्तम्बश्रौतसूत्रे-24/1/31
5. मीमांसा परि.- पृष्ठ-4 (वेदद्वैविध्यम् प्रकरणे)
6. शतपथब्राह्मणे-7/1/1/5

7. अमृतबिन्दूपनिषदि–17 ; मैत्रायण्याम्–6/12
8. बृहदारण्यकोपनिषदि–4/4/5
9. तैत्तिरीयारण्यके–8/5/1 तैत्तिरीयोपनिषदि–2/5/1
10. वैशेषिकसूत्रे–1/2
11. ऋग्वेदे–1/1/
12. अमरकोषे–धीवर्गे–6 तमे श्लोके
13. श्रीमद्भगवद्गीतायां–7/2
14. गोपथब्राह्मणे–2/6/7
15. शतपथब्राह्मणे–6/2/1/7
16. का.श्रौ.सू.–1/2/2
17. बृ.जा.उप.–2/4
18. ऋ.सं.–1/91/22
19. श.प.ब्रा.–11/1/6/19
20. भगवद्गीतायाम्– 3/11
21. शुक्लयजुर्वेदे– 36/1
22. शतपथब्राह्मणे–10/5/2/1–2
23. विष्णुधर्मोत्तरपुराणे–162/1–4,7

## उपनयनसंस्कारस्य महत्त्वं वैज्ञानिकत्वञ्च

सम् उपसर्गपूर्वकं 'कृ' धातोः घञान्निष्पन्नस्यास्य संस्कारशब्दस्य पूर्णः, विशोधनम्, अनुशीलनम्, पवित्रीकरणम्, अन्तःशुद्धिकरणम्, गुणाधानम्, शृङ्गारः, अलङ्कारः, पुनीतकृत्यम्, धार्मिककृत्यम्, अनुष्ठान-मादयोऽनेकेऽर्थाः भवन्ति। सोऽयं संस्कारः मेदिनीकोशानुसारं प्रतियत्नानुभव-मानसकर्मादिकमर्थमभिधत्ते। न्यायदर्शनानुसारं गुणविशेषोऽयं संस्कारः त्रिविधः- (1) वेगाख्यः (वेगेन कर्मणा वोत्पद्यते), (2) स्थितिस्थापकः (पृथिवीगुणः, अतीन्द्रियः स्पन्दनकारणश्च भवति), (3) भावना (आत्मनोऽतीन्द्रियगुणः, स्मरणस्य प्रत्यभिज्ञायाश्च कारणः) चेति।

पारिभाषिकदृष्ट्या शरीरस्य कस्यचिद्वस्तुनो वा शुद्ध्यर्थं विकासाय च काले काले यानि कर्माण्यनुष्ठीयन्ते तानि संस्कारपदवाच्यानि। एतत्कर्म विशिष्टप्रकारकस्यादृष्टफलस्योत्पादकमुच्यते। वस्तुतः शरीरस्यास्य कतिविधाः संस्काराः भवन्ति? इत्यस्मिन् विषये धर्मशास्त्राचार्येषु नैकमत्यं दृश्यते। यथा महर्षिगौतमस्य मतानुसारेणाष्टचत्वारिंशत् संस्काराः विनिश्चिताः। ते सन्ति- **गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, अन्नप्राशनम्, चौलम्, उपनयनम्, चत्वारिवेदव्रतानि, स्नानम्, सहधर्मचारिणीसंयोगः, पञ्चमहायज्ञानामनुष्ठानम्, अष्टका, पार्वणम्, श्राद्धम्, श्रावणी, आग्रहायणी, चैत्री, आश्वयुजी, सप्तपाकयज्ञसंस्थाः, अग्न्याधेयम्, अग्निहोत्रम्, दर्शपूर्णमासौ, चातुर्मास्यानि, आग्रयणेष्टिः, निरूढपशुबन्धः, सौत्रामणीचेति सप्तहविर्यज्ञसंस्थाः, अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोर्याम इति सप्तसोमयागसंस्थाः।**[१] एते चत्वारिंशत् संस्काराः। अष्टौ आत्मगुणाः- **दया सर्वभूतेषु, शान्तिः, अनसूया, शौचम्, अनायासो माङ्गल्यम्, अकार्पण्यम्, अस्पृहा चेति।** यस्य एते चत्वारिंशत् संस्काराः सन्ति परञ्चाष्टौ आत्मगुणाः न सन्ति स ब्रह्मणः लोकं न गच्छति सायुज्यमपि न प्राप्नोतीत्यर्थः। यस्य जनस्य पार्श्वे एते संस्काराः तथा चाष्टौ आत्मगुणाः सन्ति स ब्रह्मणः लोकं गच्छति सायुज्यमपि प्राप्नोतीत्यर्थः।

महर्षि आङ्गिरसेन पञ्चविंशतिसंस्काराः निगदिताः।[२] पञ्चविंशति-

संस्काराणां नित्यनैमित्तिकमासिकवार्षिकभेदेन चातुर्विध्यमाहाश्वलायनः। **नैमित्तिकाः षोडशोक्ताः समुद्वाहावसानकाः। सप्तैवाग्रयणाद्याश्च संस्काराः वार्षिका मता। मासिकं पार्वणं प्रोक्तमशक्तानां तु वार्षिकम्। महायज्ञास्तु नित्याः स्युः संध्यावच्चाग्निहोत्रवदिति।**

पारस्करगृह्यसूत्रकारैर्महर्षिपारस्करैः त्रयोदशसंस्काराः स्वीक्रियन्ते। तत्र **विवाहः, गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चूड़ाकरणम्, उपनयनम्, केशान्तः, समावर्तनमन्त्येष्टिसंस्कारश्च**। मनुना द्वादशसंस्काराः प्रोक्ताः परं मुख्यरूपेण षोडशसंस्कारा समाजे प्रचलिताः सर्वमान्याश्च सन्ति, ते यथा- **गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चूड़ाकरणम्, कर्णवेधः, विद्यारम्भः, उपनयनम्, वेदारम्भः, केशान्तः, समावर्त्तनम्, विवाहः, अन्त्येष्टिश्च।** एवमेव संस्कारद्वारा कस्यापि वस्तुन उत्कर्षो भवति। जीर्णमन्दिराणां, मठानां, गृहाणां, वस्तूनाञ्च पुनरुद्धारोऽपि संस्कारशब्देनैवोच्यते। वेदेषु वैदिकसाहित्येषु चास्य महन्महत्त्वं वर्णितमस्ति।

संसारस्याद्यो ग्रन्थो वेदो मन्यते। ऋग्यजुस्सामाथर्वभेदेन वेदाश्चत्वार उक्ताः। वेदेषु येषां कर्मणां वर्णनमुक्तं तेषां सम्यक्तया प्रतिपादनाय तदानीन्तनैरस्माकं पूर्वजैर्ऋषिभिरनेकविधसाहित्यानि विनिर्मितानि, तानि सर्वाण्यपि वेदसम्बद्धानां विपुलकर्मानुष्ठानविषयाणां प्रतिपादकत्वात् वैदिकसाहित्यान्तर्गतान्येव स्वीक्रियन्ते। तेषु वैदिकसाहित्येषु षडङ्गानि प्रमुखानि सन्ति। षडङ्गेष्वपि कल्पनामकमङ्गं तत्स्वरूपवर्णनत्वादतिमहत्त्वपूर्णमिति सर्वैरप्याचार्यैरङ्गीक्रियन्ते। तदुक्तं सायणाचार्येण- **कल्प्यते समर्थ्यते यागप्रयोगोऽत्र** इति।[3] वृत्तिकारेण विष्णुमित्रेणाप्याह- **कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्**[4] इति।

कथनस्याभिप्रायोऽयमस्ति यत्कर्मकाण्डस्य विपुलानां विधिविधानानां, विविधप्रयोगानुष्ठानां, नियमोपनियमानां, सामाजिकपरम्पराणां, लोककल्याणकारिकर्मणाञ्च संक्षेपेणासंदिग्धरूपेण च प्रस्तुतीकरणमेव कल्पशास्त्रस्याभीष्टम्। तदिदं शास्त्रं सूत्रात्मकं श्रौतगृह्यधर्मशुल्बभेदेन च चतुर्विधम्। सूत्रात्मकसाहित्यविषये विदुषामभिप्रायो वर्तते यत्-

**स्वल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।**
**अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः॥**[5]

अर्थाद्यद्वाक्यमत्यन्तसूक्ष्मशैल्या बहुविस्तृतं तथ्यं रहस्यञ्चोपस्थापने समर्थ भवति तत्सूत्रमित्युच्यते। तदनुसारमिदं कल्पसाहित्यं सूत्रात्मकत्वात् कल्पसूत्रमिति कथ्यते। चतुर्विधेषु कल्पसूत्रेषु श्रौतसूत्रमाद्यं, तत्र त्रेताग्निसाध्यानां श्रुतिप्रतिपादितानामिष्टिपशुसोमानां यागानुष्ठानानां वर्णनानि सन्ति। द्वितीये गृह्यसूत्रे गृह्याग्निसाध्यानां गृहस्थजीवनसम्बद्धानां स्मृतिप्रतिपादितानां परम्परा-निहितानां स्मार्तकर्मणां वर्णनानि सन्ति। तृतीये धर्मसूत्रे वर्णाश्रमधर्माणां विवेचनानि सन्ति। तुरीये शुल्बसूत्रे च यज्ञवेदिनिर्माणाय विविधानां गणितीय-ज्यामितिकविधीनां प्रतिपादनानि सन्ति।

गह्यसूत्रेषु स्मृतिग्रन्थेषु च मानवजीवनोद्देश्यभूतानां पूर्वोक्तसंस्काराणां प्रतिपादनमस्ति। उक्तेषु संस्कारेषु प्रकृतनिबन्धस्याधारत्वेनेहोपनयनसंस्कारविषयो विविच्यते।

**उपनयनसंस्कारस्य महत्त्वम्-**

'उप' इत्युपसर्गपूर्वकात् 'नी' धातोः 'ल्युट्' प्रत्यये कृते सत्युपनयनशब्दो निष्पद्यते। यस्यार्थो भवति निकटे नयनमिति। अत्र प्रश्नोत्पद्यते यत् कस्य निकटे नयनम्? तदुच्यते यद्गुरोः निकटे नयनमिति। अनेन निकटनयनात्मकेन कर्मानुष्ठानेन जनकः स्वपुत्रं विद्याध्ययनायाचार्यमुपनयति। यदैषो विधिरनुष्ठीयते तदनन्तरं बालको वेदाध्ययनरूप्यागामिसंस्कारस्या-धिकारमाप्नोति। उपनयनसंस्कारद्वारा बालकस्य द्वितीयं जन्म भवति। मातापित्रोः सकाशाद्यज्जन्म भवति तत्तु शारीरिकं जन्म, परमाचार्यकुले (गुरुकुले) यज्ज्ञानमयं द्वितीयं जन्म भवति तत्तस्य बौद्धिकं जन्मैव। तदुक्तम्मनुना-

**तत्र यद्ब्रह्मजन्मास्य मौञ्जीबन्धनचिह्नितम्।**
**तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते॥**[६]

अर्थान्मातुः सकाशादाद्यं जन्मानतरं मौञ्जीबन्धनरूपेणोपनयन-संस्कारेण तस्य द्वितीयं जन्म भवति। मनुस्मृतेः प्रसिद्धभाष्यकारेण कुल्लूकभट्टेन माणवकस्य तृतीयमपि जन्म प्रोक्तं ज्योतिष्टोमादियज्ञदीक्षारूपम्। तत्र **प्रथमद्वितीयतृतीयजन्मकथनञ्चेदं द्वितीयजन्मस्तुत्यर्थम्, द्विजस्यैव यज्ञदीक्षायामप्यधिकारात् इति।**[७] उक्तेषु त्रिष्वपि जन्मसु यदेतद्ब्रह्मग्रहणार्थं जन्मोपनयनसंस्काररूपं मेखलाबन्धनोपलक्षितम्, तत्रास्य माणवकस्य सावित्री (गायत्रीमन्त्रः) माता, आचार्यश्च पिता भवति मातृपितृसम्पाद्यत्वाज्जन्मनः। यतो ह्युपनयनात् प्राक् न किञ्चित् श्रौतं स्मार्तं कर्मकर्तुमधिक्रियते

अश्रोत्रियत्वात्। उक्तञ्चापि भगवता कात्यायनेन श्रौतकर्माधिकारिनिरूपणप्रसङ्गे- **अङ्गहीनाऽश्रोत्रियषण्ढशूद्रवर्जम्।**[८] अत्राङ्गहीनाः पङ्ग्वन्धबधिरादयः, अश्रोत्रियोऽनधीतवेदः, षण्ढो नपुंसकः, शूद्रश्च संस्कारहीनस्तेषामनधिकारः। श्रुत्युपदेशस्तूपनयना नन्तरमेव भवतीत्युक्तं प्राक्, तदर्थञ्चाचार्य एव समर्थस्तस्मादाचार्यस्य पितृत्वमुक्तं मनीषिभिः। तस्याचार्यरूपपितुः सकाशाद्-द्विजत्वप्राप्तो जनः वेदाध्ययनसयाधिकारी भवति। द्विजानां कृते वेदाध्ययनस्य, तपोविशेषस्य, यज्ञानुष्ठानस्य च महन्महत्त्वमुपपादितम् ऋषिभिः। मनुना प्रोक्तञ्चापि-

**योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।**
**स जीवन्नेव शूद्रत्वमाशुगच्छति सान्वयः॥**
**वेदमेव सदाभ्यस्येदत्तपस्तप्स्यन्द्विजोत्तमः।**
**वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते॥**[९]

अनेन स्फुटं भवति यदुपनयनसंस्कारो वेदादिशास्त्राणामध्ययनार्थं भारतीयसयहित्यभाण्डागारे प्रवेष्टुञ्च प्रवेशपत्रमिवास्ति। उपनयनसंस्कारं विना द्विजत्वप्राप्तिर्न भवति, तद्विना त्रैवर्णिकानां विवाहसंस्कारोऽप्यसम्भवः। यतो न त्रैवर्णिको शूद्राय सुतादानं कर्तुमिच्छति लोके। अनुपनीतो ब्राह्मणोऽपि शूद्रवदेवोक्तस्तस्मात्तस्मै अपि न कोऽपि सुतादाने प्रवत्तो भविष्यतीति निश्चितमेव। दारग्रहणं (विवाहसंस्कारं) विना न कश्चित्पुरुषः पूर्णो भवति। तदुक्तमपि श्रुतौ- **अर्धो ह वा एष आत्मनो यज्जाया तस्माद्यावज्जायां न विन्दते नैव प्रजायते, तर्हि हि सर्वो भवति सर्व एतां गतिं गच्छानीति तस्माज्जायामामन्त्रयते।**[१०] तैत्तिरीयेणापि- **अर्धात्मा वा एष यजमानस्य यत्पत्नी**[११] इति। तथा च- **अयज्ञो वा एष योऽपत्नीकः। न प्रजाः प्रजायेरन्। अथो अर्धो वा एष आत्मनो यत्पत्नी।**[१२] इत्यादिभिः श्रौतवचनैरिदं स्पष्टं यत् पत्नीं विना यजमानपुरुषोऽयमर्द्धवृगलमिवोत्पद्यते प्राणार्द्धमयत्वात्। तस्यायमाकाशः पत्न्या पूर्यते। ततोऽसौ कृत्स्नप्राणः पूर्णरूपो भवति। यदि यज्ञकर्तुराध्यात्मिकः प्राणोऽर्द्धखण्डः स्यात्तर्हि कृत्स्नस्याकृत्स्नेन योगोऽसमञ्जसः स्यात्। तस्मात् पत्न्या सहकृतः पतिर्यज्ञायाधिक्रियते। यतो ह्यग्निग्रहणं त्वाधानेनैव भवति। आधानञ्च प्रथमं गृह्याग्नेरेव विहितं तदर्थं **आवसथ्याधानं दारकाले**[१३] **दायाद्यकाल एकेषाम्**[१४] इत्यनयोः सूत्रयोराधानस्य दारकाले (विवाहकाले) चतुर्थीकर्मानन्तरं, पितृधनविभागकाले च विहितत्वाद्विवाहा-

नन्तरमाधानाधिकारो विहितः। श्रौताग्नीनामाधानञ्च **वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यो, वर्षासु वैश्यः**[१५] इत्यादिवाक्यैः त्रैवर्णिकान्प्रति तत्तद्वर्णोद्देशेन **अमावास्यायामग्न्याधेयम्**[१६] इत्यादिना तत्तत्काले विहितं कर्म। अनेन चाधानेन श्रौतानामग्नीनां सिद्धिः। **जातपुत्रः कृष्णकेशोऽग्नीनादधीत**[१७] इत्यादिश्रुत्या पञ्चविंशतेरुपरि चत्वारिंशतो वर्षेभ्यः पूर्वं सपत्नीकेन पुरुषेणानुष्ठेयम्। जातपुत्रत्वं तदैव सिद्ध्यति यदा स विवाहितो भवति। विवाहश्चोपनयनानन्तरं वेदाध्ययनानन्तरमेव सम्भवति। अत एवोपनयनस्य यज्ञकर्मारब्धुं महन्महत्त्वं वर्तते।

**उपनयनस्य कालः-**

यथा यज्ञाद्यनुष्ठानेषु शूद्रवर्जितानां त्रैवर्णिकानामधिकार उक्तस्तस्मात्त्रैवर्णिकानामेवोपनयनमपि विहितम्। तदुक्तम्मनुना-

**गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।**
**गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः॥**
**ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।**
**राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे॥**
**आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते।**
**आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः॥**
**अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः।**
**सावित्री पतिता व्रात्या भवन्त्यार्यविगर्हिताः॥**
**नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित्।**
**ब्राह्मान्यौनांश्च सम्बन्धानाचरेद्ब्राह्मणैः सह॥**[१८]

अर्थाद्गर्भवर्षादष्टमे वर्षे ब्राह्मणस्य, एकादशे राजन्यस्य, द्वादशे च वैश्यस्योपनयनं कर्त्तव्यम्। वेदाध्ययनतदर्थज्ञानादिप्रकर्षकृतं तेजो ब्रह्मवर्चसं तत्कामस्य गर्भपञ्चमे वर्षे, बलार्थिनो राजन्यस्य गर्भषष्ठे, बहुकृष्यादिचेष्टार्थिनो वैश्यस्य गर्भाष्टमे वर्षे उपनयनं कार्यम्। ब्राह्मणस्य षोडशवर्षपर्यन्तं, राजन्यस्य द्वाविंशतिवर्षपर्यन्तं, वैश्यस्य चतुर्विंशतिवर्षपर्यन्तं सावित्र्यर्थे वचनमुपनयनं नातिक्रान्तकालं भवति। तदूर्ध्वं सावित्रीपतिता उपनयनहीनाः शिष्टगर्हिताः व्रात्यसंज्ञाः भवन्ति। एतैरपूतैर्व्रात्यैः यथाविधिप्रायश्चित्तमकुर्वद्भिः सह आपत्कालेऽपि कदाचित् अध्यापनकन्यादानादीन् सम्बन्धान्ब्राह्मणो नानुतिष्ठेत्।

धर्मसूत्रे महर्ष्यापस्तम्बेनोपनयनार्थम् ऋतुविशेषमुक्तम्। तद्यथा- **वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, शरदि वैश्यम्।**[१९]

उपनयनायोपदिष्टेष्वेव ऋतुष्वाधानस्यापि विधानमुक्तं ब्राह्मणग्रन्थेषु श्रौतसूत्रेषु च। तस्मात् उपनयनसंस्कारस्य वैज्ञानिकं महत्त्वमपि सिद्ध्यति।

**उपनयनसंस्कारस्य वैज्ञानिकत्वम्-**

विदन्त्येव भवन्तस्सर्वे यद्विज्ञानशब्दस्यार्थो भवति विशिष्टं ज्ञानमिति। वेदमन्त्राणामध्ययनं ज्ञानं तत्रोपदिष्टं यज्ञानुष्ठानादिकं च विशिष्टत्वा-द्विज्ञानमित्युच्यते। तदुक्तं तैत्तिरीयेण- **विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च।**[२०] अर्थाद्विज्ञानेन यज्ञस्यविस्तारः कर्मणाञ्च विस्तारो भवति। अत एव यज्ञस्य श्रेष्ठतमकर्मरूपेण वर्णनं श्रुतौ कृतमस्ति- **यज्ञो वै श्रेष्ठतमं कर्म**[२१] इति।

यदा हि माणवकस्योपनयनसंस्कारो भवति तदैव स वेदोक्तानि वैज्ञानिकतथ्यान्यवबोद्धुं समर्थो भवति। तत्राप्येदं विशेषेणावधेयं यद्यस्मिन् कर्मणि विज्ञानबोधकसामर्थ्यं भवति तस्मिन् विज्ञानं स्वतस्तिष्ठत्येव। अत इदं तु प्रथमं वैज्ञानिकत्वमुपनयनस्य। अन्यान्यपि वैज्ञानिकत्वानि प्रतीक-रूपेणोपनयनसंस्कारे दृश्यन्ते। तानि यथा-

**यज्ञोपवीतधारणम्-**

यज्ञोपवीतनिर्माणप्रसङ्गे इदमुक्तं यदसयायामः पुरुषस्य चतुरङ्गुल-प्रमाणस्य षण्णवतिगुणितो भवेत्। तत्रेदं विज्ञानं यदेकपुरुषस्य षण्णवत्यङ्गुलपरिमाणस्य व्यामो भवति। (हस्तद्वयप्रसारणेन यावदायामो भवति तद्व्याम इत्युच्यते) तदुक्तं श्लोकशुल्बे कात्यायनेन- **व्यामस्यात्र प्रमाणं तु चतुर्न्यूनं शताङ्गुलम्।**[२२] इत्यनेन सूत्रेण शताङ्गुलेषु चतुरङ्गुलं न्यूनं मानं व्यामस्य भवति। तदनुसारं (100-4=96) षण्णवत्यङ्गुलस्य व्यामः सिद्धः। अत्रोक्तं चतुरङ्गुलं जाग्रत्-स्वप्न-सुषुप्त-तुरीयाणां चतसृणामवस्थानां बोधकमस्ति। उपवीते त्रीणि सूत्राणि भवन्ति तान्यपि सत्त्व-रजस्-तमस् इति तत्त्वत्रयाणां प्रतीकानि भवन्ति, तानि पुरुषाणां ऋणत्रयाणां स्मारकाणि भवन्ति। यदुक्तं श्रुतौ- **जायमानो ह ब्राह्मणो त्रिभिर्ऋणैर्ऋणवान् भवति**[२३] इति। तैः त्रिभिर्ऋणैः ऋणवान् मनुष्यः मोक्षरूपं चतुर्थं पुरुषार्थं प्राप्तुं समर्थो न भवति। तदुक्तम्मनुना- **ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः॥**[२४] एतद्विज्ञानमजानन् यो हि द्विजो पुरुषार्थचतुष्टयप्राप्तये प्रवृत्तो भवति स नरकं व्रजतीत्युक्तम्।

**अजिनधारणम्–**

उपनयनावसरे ब्रह्मचारिणां कृते अजिनधारणस्य विधानमुक्तम्। तत्र कृष्णमृगचर्मधारणं ब्राह्मणेभ्यः, रौरवं (रुरूमृगचर्म) धारणं राजन्येभ्यः, अजाचर्मधारणं वैश्येभ्यश्च विहितम्। चर्मशब्दस्यार्थं कुर्वता महीधरेणोक्तं यत् अजिनस्य चर्मेति मानुषं नाम शर्मेति दैवं नाम। शर्मेति सुखनाम। सुखोपलब्धिस्तद्बाधकानां निरसनेन भवति। तत्रेतिहासः प्रोक्तः यत्– **पुरा यज्ञो देवेषु रुष्टः कृष्णमृगो भूत्वाऽगमत्तदा देवा ज्ञात्वा तदीयां त्वचमुत्कृत्य जगृहुस्तस्माच्चर्मस्तरणमित्याहुः।**[२५] कथेयं दर्शपूर्णमासयागप्रकरणे कृष्णाजिनादानप्रसङ्गे उक्ता। तेनेदं स्फुटं भवति यदजिनधारणेन अरातयः शत्रवो नष्टाः भवन्ति। ब्रह्मचारिशरीरे विद्यमानं कोमलं त्वक् परिरक्षितुमदितेः त्वग्रूपमजिनं धार्यते, तेन तस्य शरीरस्य दाढ्यं कल्प्यते। अजिनधारणार्थं मन्त्रो यथा– **मित्रस्य चक्षुर्द्धरुणं बलीयस्तेजो यशस्वि स्थविरं समिद्धं अनाहनस्यं वसनं जरिष्णुः परीदं वाज्यजिनं दधेऽहम्।**[२६] एतादृशं वैज्ञानिकत्वं त्वत्र स्फुटमेव दृश्यते।

**मौञ्जीधारणम्–**

मुञ्जमयी त्रिगुणा समगुणत्रयनिर्मिता सुखस्पर्शा ब्राह्मणस्य मेखला भवति। क्षत्रियस्य मूर्वामयी ज्या धनुर्गुणरूपमेखला, वैश्यस्य शणसूत्रमयी च मेखला भवति। उपर्युक्तविधानेन मौञ्जीधारणेन शरीरे दीप्तिः, अपावित्र्यनाशः, सौभाग्यवर्द्धनञ्च भवति। इयं वैज्ञानिकी परिशुद्धिः प्राणपानयोः सुस्थापनया शरीरं शक्तिसमन्वितं करोति। तदुक्तमपि मौञ्जीधारणमन्त्रे–

**इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनतीम आगात्।**
**प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयम्।।**[२७]

एवमुपर्युक्तविधानेन दण्डधारणं, छत्रधारणञ्च कृत्वा ब्रह्मचारी पूर्णतो वैज्ञानिकं स्वरूपमाधाय विज्ञानविदो गुरोराश्रमे तिष्ठन् यज्ञानुष्ठानरूपप्रयोगेण नित्यं नूतनमाविष्कारादिकं कर्तुं समर्थो भवति। यज्ञानुष्ठानेन स्वाध्यायाऽध्ययनेन च ब्रह्मचारिणोऽन्तःकरणे नित्यं नवीनाः दिव्यचेतनाः जायन्ते। ताभिः चेतनाभिः स स्वव्यक्तित्वमवगच्छति। तत्राध्यात्मिको विकासः, आधिदैविको विकासः, आधिभौतिको विकासश्च स्पष्टमेव प्रतिभाति। अस्यैवात्मसंस्काररूपस्य सर्वाङ्गीणविकासस्य नाम विज्ञानमस्ति। शिल्पमेव विज्ञानमुच्यते तदुक्तममरसिंहेनामरकोषे– **मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।**[२८]

इति। तदुक्तमपि गोपथब्राह्मणे– **आत्मसंस्कृतिर्वै शिल्पानि आत्मानमेवास्य तत्संस्कुर्वन्ति।**[२९] अर्थाद्येन विज्ञानेनात्मनः संस्कारो विधीयते तच्छिल्पमित्युच्यते। शतपथब्राह्मणे तु **यद्वै प्रतिरूपं तच्छिल्पम्**[३०*] इत्येवमुक्तम्। काठकेऽपि– **शिल्पैर्हि सर्वं कुर्वन्ति**[३१] इत्युक्त्वा शिल्पेन सर्वविधमभीष्टं सम्पाद्यते'ति स्पष्टमेवोक्तम्। महर्ष्यैतरेयेणापि **आत्मसंस्कृतिर्वाव शिल्पानि छन्दोमयं वा एतैर्यजमान आत्मानं संस्कुरुते।**[३२] इत्युक्त्वा शिल्पद्वारा यजमानस्यात्मसंस्कारस्य विधानमुक्तम्। एतत्सर्वमपि तथ्यमवलोक्य कौषीतकिना शिल्पस्य प्राणरूपत्वं प्रतिपादितम्। तद्यथा– **प्राणाः शिल्पानि**[३३] इति। ताण्ड्ये तु– **तौ वा एताविन्द्रस्तोमौ ( अभिजिद्विश्वजितौ ) वीर्यवन्तौ शिल्पं वा एतौ नाम स्तोमावास्ताम्।**[३४] मन्त्रेऽस्मिन् स्तोमरूपेण शिल्पो व्याख्यातोऽस्ति। स्तोमविषये इदमुच्यते यत्साम्नः केन्द्रादारभ्यान्तिमपृष्ठपर्यन्तं ये त्रयस्त्रिंशद्भागा अनुपदमेवोक्ताः, तत्राद्यास्त्रयः पिण्डे संनिविशन्ते, तान् विहाय परतः षड्भिः षड्भिरेकैकः संघातः प्रकल्प्यते, स संघातवाचकेन स्तोमपदेन व्यवह्रियते। वैदिकवाङ्मये स्तोमस्य सर्वव्यापकत्वमुक्तम्। तद्यथा– **सर्वं हीदं स्तोमा एव**[३५] इति। काठके तु सृष्टिसंरचनायां हेतुत्वेनैव निरूपितः। यथा– **प्रजापतिः प्रजा असृजत् ताः स्तोमभागैर् एवासृजत, यदेत उपधीयन्ते, प्रजननाय**[३६] इति। शतपथश्रुतौ तु– **आदित्य स्तोमभागाः, हृदयं वै स्तोमभागाः**[३७] इति चोक्तम्। अनेनेदं स्फुटं यदुपनयनसंस्कारस्य वैज्ञानिकं महत्त्वं सुतरां सिद्ध्यति। इत्यलमतिविस्तरेण।

पादटिप्पणी–

1. संस्कारभास्करः – पृ. सं.–1
2. तत्रैव – पृ. सं.–2
3. सायणाचार्यः, ऋग्वेदभाष्यभूमिकायाम्।
4. ऋकप्रातिशाख्ये, वर्गद्वयवृत्तौ।
5. हिन्दूधर्मकोशे– 676 तमे पृष्ठे सूत्रशब्दव्याख्याने।
6. मनुस्मृतौ– 2/170
7. मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने। तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात्।। मनुस्मृतौ– 2/169
8. का.श्रौ.सूत्रे– 1/1/5
9. मनुस्मृतौ– 2/168

10. श.प.ब्रा.- 5/2/1/10
11. तै.ब्रा.- 3/3/3/5
12. तै.ब्रा.- 3/3/3/5
13. पा.गृ.सू.- 1/2/1
14. पा.गृ.सू.-1/2/2
15. वसन्ते ब्राह्मणस्याग्न्याधेयम्। शां.श्रौ.सू.-2/1/1, श.प.ब्रा.-2/1/3/5
ग्रीष्मे क्षत्रियस्य- शां.श्रौ.सू.-2/1/2,
वर्षासु वैश्यस्य- शां.श्रौ.सू.-2/1/3,
16. का.श्रौ.सू.- 4/7/1
17. का.श्रौ.सू. भूमिकायां विद्याधरशर्मणा- 32 तमे पृष्ठे ।
18. मनुस्मृतौ- 2/36-40
19. आप.धर्मसूत्रे- 1/1/1/19
20. तै.आर.- 8/5/1, तै.उप.- 2/5/1
21. श.प.ब्रा.- 1/7/1/5
22. श्लोकशुल्बे, श्लोक-26
23. तै.सं.-3/10/5
24. मनुस्मृतौ- 6/35
25. श.प.ब्रा.-1/1/4/1
26. पा.गृ.सू.- 104 तमे पृष्ठे
27. पा.गृ.सू.- 2/2/8
28. अमरकोषे धीवर्गे श्लोक-6
29. गोपथब्राह्मणे- 2/6/7
30. श.प.ब्रा.- 3/2/1/5
31. काठकसंहितायाम्- 8/5
32. ऐतरेयब्राह्मणे- 6/27
33. कौषीतकिब्राह्मणे- 25/12/13
34. ताण्ड्यब्राह्मणे- 16/4/8
35. जैमिनीयब्राह्मणे- 2/314 : 325
36. काठकसंहितायाम्- 21/28520
37. शतपथब्राह्मणे- 8/5/4/2, 8/5/4/3

## वर्त्तमानसन्दर्भे विवाहसंस्कारस्योपयोगिता वैज्ञानिकता च

**द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षाकल्पोव्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते।**[१]

मुण्डकोपनिषद्युक्तेनानेन वचनेनेदं स्फुटं भवति यत्षडङ्ग-सहिताश्चत्वारोऽपि वेदा अपराविद्याऽन्तर्गताः। अपराविद्यारूपेषु चतुर्ष्वपि वेदेषु मुख्यरूपेण यज्ञाद्यनुष्ठानानां वर्णनान्युपलभ्यन्ते। यज्ञानां विषये शतपथब्राह्मणमेवं वक्ति- **यज्ञो वै श्रेष्ठतमं कर्म**[२] इति। गीतायामप्यवादि श्रीकृष्णः- **यज्ञः कर्मसमुद्भवः**[३] इति। तथा च **कर्मणो गहना गति**[४] रित्यनेन वचनेन कर्मणामनेकविधत्वमपि प्रत्यपादि। तात्पर्यमिदमस्ति यत्संसारे यावन्ति कर्माणि सन्ति तेषु समस्तेष्वपि कर्मव्यापारेषु यज्ञानुष्ठानात्मकं कर्म श्रेष्ठतमं विद्यते। यस्मात्किमप्यन्यद्विशिष्टं न भवति तदर्थं तमप्प्रत्ययस्य प्रयोगो दृश्यते। अत एवेदं सिद्धं यद्यज्ञाद्भिन्नं न किमप्यन्यत्कर्मेति। तेषां यज्ञानुष्ठानादीनां विशेषरूपेण वर्णनं षट्स्वपि वेदाङ्गेषु कल्पनाम्नि शास्त्रे वर्तते। कल्पशब्दस्यार्थो भवति **कल्प्यते समर्थ्यते यागप्रयोगोऽत्र कल्पः।**[५] वृत्तिकारेण विष्णुमित्रेण चोक्तम्- **कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रमिति।**[६] पाणिनिना अन्यैराचार्यैश्च कल्पसूत्राणां कृते **प्रोक्तसाहित्यमि**ति नामान्तरं निर्दिष्टम्। कथनस्य तात्पर्यमिदमस्ति यत्कर्मकाण्डस्य विपुलानां विधिविधानानाम्, विभिन्नानां प्रयोगानुष्ठानानाम्, नियमोपनियमानाम्, सामाजिकप्रथा-परम्पराणाम्, लोकव्यवस्थाऽऽस्थादीनाञ्च संक्षेपेणासंदिग्धरूपेण प्रस्तुतीकरणमेव कल्पसूत्राणामभीष्टम्। श्रूयते यत्पूर्वं त्रिंशदुत्तरशताधिकमेकसहस्राणि कल्प-सूत्राण्यासन्, तेष्विदानीं सम्भवतः पञ्चाशदेवोपलब्धास्सन्ति। समुपलब्धेषु कल्पसूत्रेषु सप्तपाकयज्ञसंस्थानाम् (गृह्ययज्ञानाम्), सप्तहविर्यागसंस्थानाम्, सप्तसोमयागसंस्थानाम्, पञ्चमहायज्ञानाम्, षोडशसंस्काराणाञ्चाहत्य द्विचत्वारिंशत्कर्मणां प्रतिपादनं सविधिनिरूपणञ्च कृतमस्ति।

कल्पसूत्राणि सन्ति चतुर्विधानि-**श्रौतसूत्र-गृह्यसूत्र-धर्मसूत्र-शुल्बसूत्राणि** च। तत्र श्रौतसूत्रेषु श्रुतिप्रतिपादितानां त्रैताग्निसाध्यानां दर्शपूर्णमासादियज्ञानां वर्णनानि सन्ति। गृह्यसूत्रेषु गृह्याग्निसाध्यानां यागानां

विस्तृतानि विवेचनानियुपलभ्यन्ते। एषु गृहस्थजीवनसम्बद्धानि प्रायशो सर्वाण्यपि कर्माणि वर्णितानि सन्ति। गृह्यसूत्राणाम्मूले स्मृतिग्रन्थाः परम्पराश्च निहिताः सन्ति तस्मादेव कारणात् स्मृतिप्रतिपादिता इमे स्मार्तयज्ञा इत्युच्यन्ते। धर्मसूत्रेषु वर्णाश्रमधर्माणामुल्लेखोऽस्ति। शुल्बसूत्रेषु च यज्ञवेदीनिर्माणार्थे विभिन्नानां गणितीयज्यामितिकविधीनाञ्च प्रतिपादनमस्ति। कल्पसूत्रान्तर्गत-गृह्यधर्मसूत्रयोश्चाचारविचारविधिक्रियासंस्कारादीनां विधिवत्प्रतिपादनं विहितम्। तदनुसारं प्रकृतेऽस्मिन्निबन्धे विवाहसंस्कारस्योपयोगिता वैज्ञानिकता चेति विषयमनुसृत्य प्रतिपादनं कर्तव्यमिति धिया प्रकृतमनुसरामि। वीत्युपसर्गपूर्वकं वह् प्रापणे धातोः घञ्प्रत्यये कृते सति विवाहशब्दो निष्पद्यते, यस्यार्थो भवति विशेषेण वहनमिति। विवाहो नाम संस्कारविशेषः। संस्कारो हि मानवजीवनस्य महत्त्वपूर्णमङ्गमस्ति। व्यक्तित्वविकासद्वारा मानवकल्याणं, समाजेन सह तस्य सामञ्जस्यस्थापनञ्च संस्कारस्य मुख्यमुद्देश्यम्। समित्युपसर्गपूर्वकं कृञ्धातोः घञ्प्रत्ययान्निष्पन्नस्यास्य संस्कारशब्दस्यार्थो भवति पूर्णतेति। यद्यपि **स्वभावसुन्दरं वस्तु न संस्कारमपेक्षते**[७] इति। तथाप्यन्तःशुद्ध्यर्थं पवित्रीकरणार्थञ्च संस्कारो भवत्यावश्यकः। यथोक्तं भर्तृहरिणा- **यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत्**[८] इत्यनेन कथनेनेदं सिद्ध्यति यत्संस्कारो हि स्वपूर्वजन्मवासनानां पुनर्जीवनायावश्यको भवति। तर्कसंग्रहेऽपि- **संस्कारमात्रजन्यं ज्ञानं स्मृतिरित्युक्तम्।** तस्मादिदं कर्मविशेष आत्मनः शुद्ध्यर्थं शरीरशुद्ध्यर्थञ्चाचर्यते। यथोक्तम्मनुना-**संस्कारार्थे शरीरस्य यथाकालं यथाक्रममिति।**[९] अनेन कथनेनेदं स्फुटं भवति यद्गृह्यसंस्काराः शरीरशुद्ध्यर्थमेव क्रियन्ते। यतस्तु पवित्रीकरणमन्त्रेऽपि पठ्यते **स बाह्याभ्यन्तरः शुचिरि**रिति। तत्र शरीरस्य बाह्यशुद्धिः स्नानादिभिर्भवति परमन्तश्शुद्धिस्तु धर्मशास्त्रोक्तैस्संस्कारैरेव भवितुमर्हति। अन्तः शुद्धिं बिना कृतकर्मणां फलानि नोपलभ्यन्ते। एतदर्थमुक्तं श्रुतौ- **देवो भूत्वा देवानाप्येति** [१०] अर्थाद्देवतानां यजनात्प्राक् देवत्वप्राप्ति-रावश्यकी तस्माद्देवत्वप्राप्तये बाह्याभ्यन्तरशुद्धिः क्रियते। अतएव संस्काराणामावश्यकत्वमुक्तमस्माकमृषिभिः। संस्कारेषु विवाहसंस्कारस्य महत्त्वपूर्णं स्थानं वर्त्तते। यतोऽनेन संस्कारमाध्यमेन ब्रह्मचर्याश्रमाद्-गृहस्थाश्रमप्रवेशो भवति। एतदेवाभिलक्ष्यात्र विवाहसंस्कारस्योपयोगिताविषये तावत्किञ्चिद्विचार्यते।

**विवाहसंस्कारस्योपयोगिता–**

धर्मशास्त्रेषु ब्रह्मचर्याश्रम-गृहस्थाश्रम-वानप्रस्थाश्रम- सन्यासाश्रमेति चत्वार आश्रमा: प्रोक्ता:। चतुर्ष्वप्याश्रमेषु गृहस्थाश्रमस्य श्रेष्ठत्वमुक्तम्मनुना यथा–

**ब्रह्मचारीगृहस्थश्च वानप्रस्थो यतिस्तथा।**
**एते गृहस्थप्रभवश्चत्वारः पृथगाश्रमाः।।**
**सर्वेषामपि चैतेषां वेदस्मृतिविधानतः।**
**गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान्बिभर्ति हि।।**[११]

उपर्युक्तानां ब्रह्मचार्याहीनां मध्ये गृहस्थस्य श्रूयमाणत्वेन प्रायशोऽग्निहोत्रादिविधानाद् गृहस्थो मन्वादिभि: श्रेष्ठ उच्यते। यथा यस्माद्ब्रह्मचारिवानप्रस्थयतीनसौ भिक्षादानेन पोषयति तेनाप्यसौ श्रेष्ठ:। यथोक्तं मनुस्मृते: प्रसिद्धटीकाकारेण श्रीमता कुल्लूकभट्टेन- **यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहमिति।**[१२] गृहस्थाश्रमस्य प्रशंसायामुक्तम्मनुना–

**यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम्।**
**तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्।।**[१३]

कथनस्यास्य तात्पर्यमिदमस्ति यद्यथा सर्वे नदीनदा: गङ्गाशोणाद्या: समुद्रेऽवस्थितिं लभ्यन्त एवं गृहस्थादपरे सर्वाश्रमिणस्तदधीनजीवनत्वाद् गृहस्थसमीपेऽवस्थितिं लभन्ते।

गृहस्थाश्रमे प्रवेशस्तु विवाहसंस्कारादेव जायते। विवाहानन्तरमेव ब्राह्मणो गहस्थपदवाच्यो भवति। यो हि ब्राह्मण: कृतदारपरिग्रहो भवति स एवाग्याधानस्याधिकारीत्यप्युक्तं श्रुतौ- **जातपुत्रः कृष्णकेशोऽग्नीनादधीत**[१४] इति। आचार्यपारस्करेण विवाहकाल एवावसथ्याग्नेराधानस्य विधानमुक्तम्- **आवसथ्याधानं दारकाले दायाद्यकाल एकेषाम्**[१५] इत्यनेन सूत्रेण। तत्र वैवाहिकचतुर्थीहोमानन्तरं पारस्करोक्तविधिना सम्पादितोऽग्नि: स्मार्ताग्नि-रित्युच्यते। गृह्य:, आवसथ्य:, औपासन इति च पर्याय:। यदि तु दैवान्मानुषाद्वा कस्माच्चिदपराधात् न ग्रहणं सुशकं तदा दायाद्यकाले तेनैव विधिना सम्पादनीयो भवति। अत्र यद्यपि **कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दायाद्यकालाहृते वापि श्रौतं वैतानिकाग्निषु।।**[१६] इति याज्ञवल्क्यादिस्मृतिमवलम्ब्य शान्तिकपौष्टिकादिकमपि गृह्योऽग्नौ कुर्यादित्युक्तं देवयाज्ञिकेन यथा-**श्रौतं सर्वं कर्म वैतानिकेषु विहाराहेंषु**

**गार्हपत्याहवनीयदक्षिणाग्निषु कर्त्तव्यम्, स्मार्तञ्चावसथ्येऽग्नौ**[१७] इति। तथापि शान्तिकपौष्टिकादिकर्मणो बहिःशालायामनुष्ठानविधानेन विना वचनमावसथ्याग्नेः स्वायतनाद् बहिर्नयने लौकिकत्वापत्या बहिःशालायां विहितानि सर्वाणि सीमन्तादीनि लौकिकाग्नावेवानुतिष्ठन्ति शिष्टाः। अतः पाकयज्ञा ये चात्मसंस्कारास्ते सर्वे गृह्येऽग्नौ क्रियन्ते। अन्यत्सर्व पुत्रसंस्कारकं शान्तिकपौष्टिकादि च पौकिकाग्नावेवेति।

अर्थाद्विवाहावसरे औपासनाग्नेराधानस्य विधानादग्निहोत्रादिषु श्रौतकर्मसु गृहस्थानामेवाधिकारो भवति। यतस्तु **यद्यजते तद्यजमानः**[१८] **यजमानो वै हव्यदातिः**[१९] **यजमानो वै यज्ञपतिः**[२०] इत्यादिभिर्वाक्यैरिदं स्फुटं भवति यद्यो हि मनुष्य आत्मने फलमभिसन्धाय देवयजने प्रवर्तमानोऽन्तर्वेदि कर्म कुरुते स यजमानः। स एव मुख्यो यज्ञकर्ता न त्वन्यः। स एव यज्ञेषु देवेभ्यो हवींषि प्रयच्छति। तस्मात्स एव यज्ञपतिरित्युच्यते। स च यजमानोऽर्द्धबृगलमिवोत्पद्यते प्राणार्द्धमयत्वात्। तस्यायमाकाशः पत्न्या पूर्यते। उक्तमपि श्रुतिषु– **अर्धो ह वा एष आत्मनो यज्जाया तस्माद्यावज्जायां न विन्दते नैव तावत्प्रजायतेऽसर्वो हि तावद्भवत्यथ यदैव जायां विन्दतेऽथ प्रजायते, तर्हि हि सर्वो भवति सर्व एतां गतिं गच्छानीति तस्माज्जायामामन्त्रयते।**[२१] तथा च **अर्धात्मा वा एष यजमानस्य यत्पत्नी**[२२] इति। अर्थात्पत्नी यजमानस्यार्धात्मा भवति, तस्मादेव कारणाल्लोके पत्नी अर्धाङ्गिनीत्युच्यते। तदुक्तमप्यैतरेयेण– **पतिर्जायां प्रविशति गर्भो भूत्वा स मातरं तस्यां पुनर्भवो भूत्वा दशमे मासि जायते तज्जाया जाया भवति यदस्यां जायते पुनरिति।**[२३] अर्थादिदं सिद्धं यद्यजमानपुरुषः जायां लब्ध्वैव स्वात्मानं कृत्स्नतरं पूर्णं मन्यते। तां च जायां विवाहसंस्काद्वारैव लभ्यते। अत एव विवाहसंस्कारो सर्वसंस्कारेष्वपि महत्त्वपूर्णोऽस्ति। **पूर्णमदः पूर्णमिदम्** इत्यनेन सिद्धान्तेनेदं स्पष्टं भवति यद्यज्ञेन हि पूर्णप्राणः स आधिदैविकोऽभिसन्धीयते। स यदि यज्ञकर्तुराध्यात्मिकः प्राणोऽर्द्धखण्डः स्यात् तर्हि कृत्स्नस्याकृत्स्नेन योगोऽसमञ्जसः स्यात्। तस्मात् पत्न्या सहकृतः पतिर्यज्ञायाधिक्रियते। तैत्तिरीयब्राह्मणे तु पत्न्या विरहितो यजमान अयज्ञ एवोक्तः। यथा– **अयज्ञो वा एष योऽपत्नीकः। न प्रजाः प्रजायेरन्। अथो अर्द्धो वा एष आत्मनो यत्पत्नी।**[२४] अत एव च पत्नी शरीरार्द्धमुच्यते। तस्य चार्द्धशरीरस्य पूर्णता विवाहसंस्कारादेव जायते। तस्माद्विवाह–

संस्कारस्योपयोगिता स्वत एव सिद्ध्यति।

**विवाहभेदाः**

विवाहभेदप्रसङ्गे भगवता मनुना प्रोक्तम्-

**चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितम्।**
**अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत॥**[२५]

अर्थाद्ब्राह्मणादीनां चतुर्णामपि वर्णानामिहलोके परलोके च कांश्चिद्धितान् कांश्चिदहितांश्चाष्टविधस्त्रीविवाहानुच्यते। अत्र स्त्रीविवाहपदं विशेषेण ध्यातव्यमस्ति। यतस्तु पुरुषाणां कृते यज्ञोपवीतवेदाध्ययनाग्निहोत्रादयो वैदिकसंस्कारा उक्ताः, परं स्त्रीणां कृते ते संस्काराः न विहिताः। तस्येदं तात्पर्यं यत्स्त्रीणामपि जातकर्मादिक्रियाकलापास्तूक्तकालक्रमेण शरीरसंस्कारार्थममन्त्रक एव क्रियते। तदुक्तम्मनुना-

**अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः।**
**संस्कारार्थे शरीरस्य यथाकालं यथाक्रमम्॥**[२६]

तस्मादेतस्मात्कारणात् विवाहविधिरेव स्त्रीणां वैदिकः संस्कार उपनयनाख्य इति मन्वादिभिः निर्दिष्टः। यथा-

**वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।**
**पतिसेवा गुरौ वासो गृहार्थोऽग्नि परिक्रिया॥**[२७]
**अग्निहोत्रस्य शुश्रूषा सायमुद्वासमेव च।**
**कार्यं पत्या प्रतिदिनमिति कर्म च वैदिकम्॥**[२८]

अर्थाद्विवाहसंस्कार एव स्त्रीणाम्मुख्यो वैदिकसंस्कारः। पतिसेवैव गुरुकुले वासो वेदाध्ययनरूपः। गृहकृत्यमेव सायम्प्रातः समिद्धोम-रूपोऽग्निपरिचर्या। तस्माद्विवाहादेरुपनयनस्थाने विधानादुपनयनादेर्निवृत्तिरिति निर्दिष्टः। स्त्रीविवाहस्याष्टौ भेदाः मन्वादिभिः प्रोक्तास्ते यथा-

**ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः।**
**गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥**[२९]

एष्वष्टविधविवाहेष्वाद्याश्चत्वारो ब्राह्मदैवार्षप्राजापत्याश्च धर्म्याः सर्वैश्च स्तुत्याः प्रशस्ताश्चोक्तास्सन्ति। तेषु विवाहेषु ब्रह्मवर्चस्विनः शिष्टसम्मताश्च पुत्राः जायन्ते। इतरेष्वासुरगान्धर्वराक्षसपैशाचेषु च क्रूरकर्माणो मृषावादिनो वेदद्वेषिणो यागादिधर्मद्वेषिणश्च पुत्राः जायन्ते, तस्मादेते विवाहाः निन्द्या अप्रशस्ताश्चोक्ताः। अत एवोक्तम्मनुना-

**ब्राह्मणादिषु विवाहेषु चतुर्थेष्वनुपूर्वशः।**
**ब्रह्मवर्चस्विनः पुत्राः जायन्ते शिष्टसम्मताः॥**
**इतरेषु च शिष्टेषु नृशंसानृतवादिनः।**
**जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः॥**[30*]

वर्त्तमानकाले भारतीयसमाजेऽन्तर्जातिविवाहो बहुप्रचलितोऽस्ति। तादृशो विवाहो दुर्विवाहेष्वस्माकम्मृषिभिर्गणितः। एभिर्दुर्विवाहैर्वर्णसंकरपुत्राणा-मेवोत्पत्तिर्भवति। वर्णसंकरैश्च पुत्रैः कुलधर्माः विलोप्यन्ते, तैश्च दत्तैरुदकैः श्राद्धादिकृत्यैश्च पितरस्तृप्ता न भवन्ति। तदुक्तं गीतायामपि-

**संकरो नरकायैव कुलघ्नानां कुलस्य च।**
**पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः॥**
**दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः।**
**उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः॥**
**उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन।**
**नरकेऽनियतं वासो भवतीत्यनुशुश्रुम॥**[31]

अतो वर्त्तमानसन्दर्भे वैदिकविधिना सम्पन्नस्य विवाहसंस्कारस्यो-पयोगिता वर्तत एव। अभियान्त्रिकयुगेऽस्मिन् धर्मशास्त्रोक्तनियमेषु न कस्यचिदपि पूर्णविश्वासो वर्तते। अतस्ते धर्माश्रयं विहायाधर्मानुवर्तने प्रवृत्ता भवन्ति, तस्मादेव कारणादद्यत्वे वृद्धाः तिरस्क्रियन्ते स्वकीयैरेव सन्ततीभिः। यतस्तु तैराधुनिकविज्ञानवादिभिस्तैत्तिरीयोपनिषद्युक्ताः मानवकल्याणायोपयुक्ताः सदुपदेशाः **देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि।** [32] न पठिताः।

वर्त्तमाने समाजे गान्धर्वविवाहस्यापि प्रचलनं बहुप्रचलितं जातमस्ति। युवावर्गेषु केचन न्यायालये गत्वा (बवनतज उंततंहम) विवहन्ति, केचन परस्परालापैरुत्पन्नैः प्रेमपाशैर्निबद्धास्सन्तः देवालये, विद्यालये, कार्यालये, उद्याने यत्र क्वचिच्च गत्वा स्वमनस्तृष्ट्यर्थं कुल-धर्म-जाति-परम्पराभिः विरक्ताः सन्तः प्रेमविवाहं (सवअम उंततंहम) कुर्वन्ति। तत्र सगोत्रीयता, सवर्णता, शास्त्रीयता, सामाजिकता, समानता च न महत्त्वं भजते। केवलं कन्यावरयोः परस्परप्रेम्णा क्षणिकशारीरिकसुखमवाप्त्यै वेदं लोकञ्च परिहाप्यायं विवाहो भवति। सन्दर्भेऽस्मिन्मनुना प्रोक्तमपि-

**अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा।**
**निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान्विवर्जयेत॥**[33]

तात्पर्यमिदमस्ति यदेभिर्निन्दितविवाहैर्निन्द्या एव प्रजाः समुत्पद्यन्ते। तैश्च प्रजाभिः कुलधर्मपरम्पराणां रक्षणं स्वप्नेऽपि न सम्भवमस्ति। तस्मात्सर्वविधप्रयत्नेनोपर्युक्ताश्चत्वारोऽपि निन्द्याः विवाहाः वर्जनीया एव। येषु विवाहेषु स्ववेदशाखानुसारं वैदिकैर्मन्त्रैः स्वात्मकुलपरम्पराभिश्च विवाहविधि राचर्यते, त एव विवाहाः धर्म्या इत्युच्यन्ते। यत्र वैदिकलौकिकविधीनामभावो भवति तादृशास्त्वधर्म्या एव। प्रशस्तेषु चतुर्ष्वपि ब्राह्मदैवार्षप्राजापत्येषु वरकन्ययोर्निरीक्षणम्, मधुपर्कार्चनम्, गोदानम्, कन्यादानम्, होमाः, अश्मारोहणम्, सप्तपदी, हृदयालभनम्, सिन्दुरदानादिकञ्च विविधं कर्म भवति। तत्र विशेषेणेदमवधेयं यदश्मारोहणानन्तरं वधूमुदीचीं दक्षिणपादेन सप्तप्रक्रमान् वरः प्रक्रामयन्मन्त्रमिममुच्चारयति- **एकमिषे द्वे ऊर्जे त्रीणि रायस्पोषाय चत्वारि मायोभवाय पञ्चपशुभ्यः षड्ऋतुभ्यः सखे सप्तपदा भव सा मामनुव्रता भवेति।**[34] मन्त्रेऽस्मिन् वरः कन्यायाः सप्तभिः प्रक्रमैस्सप्तनिमित्तान् स्मरति। वरः कथयति यत् हे कन्ये तव प्रथमं पदं अन्ननिमित्तम्, द्वितीयं पदं शक्तिनिमित्तम्, तृतीयं धननिमित्तम्, चतुर्थं सुखनिमित्तम्, पञ्चमं पशुनिमित्तम्, षष्ठमार्तवभोगनिमित्तम्, सप्तमञ्च सौख्यसम्पादननिमित्तं भवतु। एवमुक्तप्रकारेण त्वं मम कर्त्तव्यपालने सहायिनी भव इति कांक्षति। तदनन्तरं वरो वध्वाः दक्षिणांसस्योपरि दक्षिणं हस्तं नीत्वा हृदयमालभन् मन्त्रमिमं पठति- **मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु। मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्।**[35] मन्त्रस्यास्य तात्पर्यमिदमस्ति यच्छास्त्रविहितनियमपालनायाहं तव हृदयं दधामि। तव चित्तवृत्तयो मम मनोनुकूलाः भवन्तु। त्वं चैकनिष्ठा भूत्वा मम वचनानि पालयतु। प्रजापतिस्त्वां मया सह योजयतु त्वञ्च प्रत्येकदृष्ट्या मम सहयोगिनी भवतु। एभिर्मन्त्रवाक्यैर्वरकन्ययोराधिदैविकाधिभौतिका-ध्यात्मिकतयैक्यं भवतीत्यवबुध्यते। द्वयोरप्यैक्यत्वसम्पादनेनैव पुरुषस्य पूर्णता भवतीति सिद्ध्यति। अत एवोक्तं- **संसारोऽपि सारः स्याद् दम्पत्योरेककण्ठयोः।**[36] मनुनाऽप्युद्घोषितं यत्- **सहोभौ चरतां धर्म**[37]मिति। अर्थात्पतिपत्न्यावुभौ मिलित्वैव समस्तसांसारिकधर्मस्यानुपालनं करोत्विति। तस्मादिदं वक्तुं शक्यते यद्विवाहसंस्कारो वैज्ञानिकदृष्ट्याऽपि

महत्त्वपूर्णोऽस्ति।

**विवाहसंस्कारस्य वैज्ञानिकता–**

वस्तुतो विज्ञानपदस्य अनेकविधा अर्थाः भवन्ति। तत्राधिदैविकाधि भौतिकाध्यात्मिकदृष्ट्या कस्यचिदपि तथ्यस्याऽऽलोडनमन्वेषणादिकञ्च विज्ञानपदस्यात्यन्तसन्निकर्षोऽर्थो भवतीति मन्ये। विषयेऽस्मिन् महामहोपाध्यायेन समीक्षाचक्रवर्तिना पण्डितमधुसूदनओझावर्येण स्वकीये महर्षिकुलवैभवमिति ग्रन्थे लिखितं यत्– **विभिन्नं वस्तुजातमक्षिलक्ष्यीकृत्य मूलान्वेषण–क्रमेणैकतत्त्वपर्यन्तं गतिर्ज्ञानम्। एकं तत्त्वं निरूढम्मत्वा क्रमेण तस्यानन्तरूपताप्रतिपत्तिर्विज्ञानम्। विशिष्यज्ञानं हि विज्ञानम्, विविधं ज्ञानं विज्ञानम्, विभेदेन ज्ञानं वा विज्ञानमिति।**[३८]

वेदेषु विज्ञानस्य समस्तामपि शैलीं प्राधान्येनोपलभामहे। एकस्मादेव मूलात् परस्परात्यन्त– विलक्षणपदार्थघटितस्य जगत उत्पत्तिर्वेदेषु बहुधा प्रपञ्चिता, तत्तद्वस्तु धर्मश्च करतलामलकवद् विस्पष्टं ग्राहिताः। किमन्यत् तत्र धर्मतत्त्वं मोक्षतत्त्वञ्च यत्प्राधान्येनोपदिष्टम्, तदपि वस्तुतत्त्वविवेचन–प्रधानामनुभवपर्यवसायिनीञ्च विज्ञानशैलीमेव समालम्ब्य समुपदिष्टम्, न तु परोक्षमिव केवलं श्रद्धानप्रधानां शैलीमभिलक्ष्येति विवेचनपरा विद्वांसः सम्यगवगच्छेयुः। तस्माद्वैदिकं सर्वमपि ज्ञानम्– आत्मविज्ञानम्, धर्मविज्ञानम्, ब्रह्मविज्ञानमिति सर्वं विज्ञानशब्देनैवोपदेष्टुमर्हम्। अत एव कर्मविधिपरेषु ब्राह्मणग्रन्थेषु कल्पशास्त्रेषु च प्रतिविधिर्विज्ञानानुसृतमिति। यथोक्तममरसिंहेन– **मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।**[३९] अत्र शिल्पशब्देन यज्ञीयकर्मकाण्डे प्रवृत्तानां ब्राह्मणग्रन्थानां कल्पशास्त्राणाञ्च बोधो जायते। शिल्पपदस्यार्थं गोपथब्राह्मणे– **आत्मसंस्कृतिर्वै शिल्पानि आत्मानमेवास्य तत्संस्कुर्वन्ती त्युक्तम्।**[४०]

उपनिषत्स्वात्मवाचकः पञ्चसु कोशेष्वन्यतमकोषवाचकश्च विज्ञानशब्दः सुप्रसिद्धः। तत्र विज्ञानं जीवः, प्राज्ञो वा परात्मेति श्रीशङ्करभगवत्पादानामभिप्रेतम्। तत्र विज्ञानरूपयोर्द्वयोर्जीवयोः परस्परमेकीकरणं यत्र भवति तत्कर्मविशेषो विवाहसंस्कार इत्युच्यते। अनेन विवाहसंस्कारेणा–ध्यात्मविज्ञानस्य साक्षात्सम्बन्धो दृश्यते। पृथग्वंशे उत्पन्नस्य वरस्य पृथग्वंशे उत्पन्नायाः कन्यायाश्च परस्परमाध्यात्मिकतया यम्मेलनं विवाहसंस्कारादेव जायते। एकस्य गोत्रप्रवरस्य चापरेण गोत्रप्रवरेण सहाधिदैविकाधिभौतिका–

ध्यात्मिकरूपेण सम्मेलनमेव विवाहसंस्कारस्य मूलमुद्देश्यम्। तेन विवाहसंस्कारेण विज्ञानस्य या त्रिवेणी प्रवाहिता भवति तयैवास्य संस्कारस्य सर्वविधवैज्ञानिकत्वमपि सम्यक्तया सुसिद्धं भवतीत्यत्र नास्ति कस्यचिल्लेशतोऽपि सन्देहस्यावसरः।

**जयतु संस्कृतम्। जयतु भारतम्। जयतु भारतीया परम्परा।**

पादटिप्पणी-

1. मुण्डकोपनिषदि-1/1/4-5
2. श.प.ब्रा.-5/7/1/5
3. श्रीमद्भगवद्गीतायाम्-3/4
4. श्रीमद्भगवद्गीतायाम्-4/17
5. सायणाचार्यकृत ऋग्भाष्यभूमिकायाम्।
6. ऋक्प्रातिशाख्य-वर्गद्वयवृत्तौ
7. मुद्राराक्षसे-2/10
8. भर्तृहरिशतकत्रय्याम्- 3/84
9. मनुस्मृतौ-2/66
10. बृहदारण्यकोपनिषदि- 4/1/2,3,4,5,6,7
11. मनुस्मृतौ- 6/87,89
12. मनुस्मृतौ- 3/78 श्लोकस्य व्याख्यायाम्।
13. मनुस्मृतौ- 6/90
14. का.श्रौ.सू. सरलावृत्तिभाष्ये भूमिकायाम्-32 तमे पृष्ठे।
15. पा.गृ.सू.-1/2/1
16. या.स्मृ.-1/97
17. का.श्रौ.सू.-1/1/20
18. श.प.ब्रा.-3/2/1/17
19. श.प.ब्रा.-1/4/1/24
20. श.प.ब्रा.-1/1/2/12
21. श.प.ब्रा.-5/2/1/10
22. तै.ब्रा.-3/3/3/5

23. ऐतरेयब्राह्मणे–7/13
24. तै.ब्रा.–3/3/3/5
25. मनुस्मृतौ–3/20
26. मनु–2/66
27. मनु– 2/67
28. मनु–2/7 (क्षेपकश्लोकः)
29. मनु–3/21
30. मनु–3/39, 41
31. श्रीमद्भगवद्गीतायाम्–1/42,43,44
32. तैत्तिरीयोपनिषदि–1/10/2
33. मनुस्मृतौ–3/42
34. पा.गृ.सू.–1/8/1
35. पा.गृ.सू.–1/8/8
36. वादीभसिंहसूरि, क्षत्रचूड़ामणौ– 9/35
37. मनु–3/30
38. महर्षिकुलवैभवम्– उपोद्घाते 3 तमे पृष्ठे।
39. अमरकोषे– धीवर्गे– 6 तमे श्लोके
40. गोपथब्राह्मणे–2/6/7

शोध-प्रकाशनविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016